लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी
L.B.S. National Academy of Administration
मसूरी
MUSSOORIE
पुस्तकालय
LIBRARY
—
अवाप्ति संख्या
*Accession No.* 14617 (11252)
वर्ग संख्या
*Class No.* 891.22
पुस्तक संख्या
*Book No.* Kal

KALIDASA'S

# MEGHA-DUTAM

## WITH THE COMMENTARY OF MALLINATH

EDITED BY

**Saradaranjan Ray, M.A. Vidyavinode,**

*Late Principal, Vidyasagar College.*

AND

**Kaviraj Kumudranjan Ray, M.A. Bhisagacharya.**

WITH

**Analysis, Translations, Anglo-Sanskrit Notes Etc.**

*To be had of—*

90/4A, HARRISON ROAD

**CALCUTTA**

**Price Rs. 2/-**

**Foreign—3s. 6d.**

**Dedicated to—**

The sweet sacred memory
of my Daughter—
Kanika.

# Preface.

In this edition of our Meghadutam, we have followed the plan of our Raghuvamsam and Kiratarjuniyam.

In editing the Sanjivani I have consulted the editions of Prof. B. Goswami of Prof. K. B. Pathak and the Nirnaya-Sagara Press edition. Unfortunately these are all corrupt. Thus in several places I have been left to my own resources and with a view to get a meaning out of my text I have hazarded guesses within brackets with a query attached thus (?).

Besides among numerous readings I have selected one which seemed most consistent to me. Now it is for my readers to judge how for I have succeeded in all these difficulties.

The author will be much obliged if any of his esteemed readers will kindly point out errors and defeciencies to him to be rectified in the next edition.

CALCUTTA.
*November, 1927.* } KUMUDRANJAN RAY.

# Meghadutam.

## 1. Introduction—The Age of Kalidasa.

The current theory is that Kalidasa lived in Vikramaditya's time, "who after defeating the Sakas or Scythians established the Samvat Era which begins fifty seven years before Christ".

On the strength of this theory some scholars place Kalidasa in the first century B. C. Others, however identifying Vikrama with Harsa bring the poet down to the middle of the sixth century A. D.

The latest theory is—Kalidasa flourished in the reign of King Chandra Gupta II in the fifth century A. D. There is no evidence to connect this prince with our poet except that Chandragupta II. was named Vikramaditya.

We however place the poet to the second century before Christ. Our arguments are fully discussed in our introduction to Sakuntalam. Below is given the points of our arguments in a few words :—

(1) The current theory which places Kalidasa in the 5th century A. D. is untenable, there being no reference to Gupta-kings in the works of the poet.

(2) The Bhita-medalion (where we see King Dushyanta and his charioteer being entreated by hermits not to kill the antelope) as belonging to the Sunga period places Kalidasa at a time before Christ.

(3) From the absence of artificiality in his style the

poet appears to be much older than Girnar and Nasik inscriptions of 2nd century A. D.

(4) From the history of certain words Sanskrit seems to have been the spoken language at the time of Kalidasa. From the free and copious use of Vedic forms in his writings the poet seems to be not at all influenced by Panini's grammar and to belong to the post-Paninian period of transi-transition from Vedic to Sanskrit literature which probably extended from 300 to 100 B. C.

(5) From allusions to Buddhism and its patronage by royalty in the Sakuntalam the poet seems to have flourished soon after Asoka. Kalidasa's style also places him before Aswagosha the Buddhist poet of the 1st century A. D.

(6) The भरतवाक्य of Malavikagnimitram (e g. "आशास्यमभ्यधिगमात् प्रभृति प्रजानां सम्पत्स्यते न खलु गोप्तरि नाग्निमित्रे" ) seems plainly to indicate that Kalidasa was a court-poet of Agnimitra in the 2nd century B. C.

(7) From the two slokas of Raghu VI. [ e. g.—(i) अथोरगाख्यस्य पुरस्य नाथम् &c. and (ii) पाण्ड्योऽयमंसार्पितलम्बहार &c. ] some critic remarks that in Kalidasa's days the capital of the Pandyas was a city called Uragapura. This Uragapura is Uraiyura in Prakrit which as history says is the most ancient capital of the Pandyas (colas). Cola, Pandya, Kerala &c. are south Indian tribes. Chronicle also repeats that the Pandyas were in supreme ascendancy up to 1st century A. D. till they were overthrown by Karikala. And there are also reasons to believe that Kalidasa in his description of the Pandyas as lords of the south with their capital at Uragapura must have referred to their prosperous reign during 1st century B. C. ; for our poet does not

mention Pallavas the supreme ruler of the south in the 5th century A. D. The following sloka of Raghu IV. ("दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि । तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥") also shows that the Pandyas alone were supreme rulers in Kalidasa's time. Again in the same canto of Raghu we learn that the King drove the Yavanas from Afganisthan. Now it is well-known that there were no Yavanas in the 4th or 5th centuries. It is only in the first century B. C that we have Yavana kingdom in the north west.

All these irresistably point to the conclusion that Kalidasa flourished at a time before the beginning of the christian era.

## II. Kalidasa—his position.

Kalidasa was the greatest poet of India after Vyasa and Valmiki. Even mere translations of his sweet works have extracted the greatest admiration from modern squeamish readers. Thus Alexander Hamboldt says—"Kalidasa the celebrated author of the Sakuntala is a masterly describer of the influence which nature exercises upon the minds of lovers. Tenderness in the expression of feeling and richness of creative fancy have assigned to him his lofty place among the poets of all nations". In fact a study of Kalidasa's works at once convinces the reader that the poet had an all-embracing knowledge of nature and of human unity, beasts and birds not even excluded.

कुरुष्व तावत् करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम् ।
एषा विदूरीभवतः समुद्रात् सकानना निष्पततीव भूमिः ॥

This sloka of Raghu at once evinces Kalidasa's knowledge of the dynamical theory of Relative motion. The poet also

shows accurate knowledge of physical sciences in the well-known verse—करेण वातायनलम्बितेन etc. of Raghu XIII, sl. 21, see also sloka 15 here and so on.

## III. Personal History.

Nothing of Kalidasa's personal history is known to us. But his works show that he lived at Ujjain for a long time and suffered from the pangs of poverty and neglect and travelled a good deal. Tradition says that once the poet came to his house long after dusk. His wife denied entrance, whereon the poet replied "अस्ति कश्चिद्वाग् विशेषः" and promised to write poems beginning with each of these words. Thus Kumara begins with अस्ति, Raghu with वाक् and our Meghadutam with कश्चित्। Beyond this we know nothing of the poet ; this is why Mallinatha who flourished about 1385 A. D. observes undeserving reticence as to the personal history of the poet.

## IV. Kalidasa's Creed.

It has been admitted by all critics that Kalidasa was a Saiva. Indeed his नान्दी in Vikramorvasi (*e.g.*, वेदान्तेषु यमाहुरेक-पुरुषम् etc.,) and भरतवाक्य in Sakuntala (*e g.*, ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः) point to this effect. Mrs. Manning with reference to Vikramorvasi writes—"The drama commences with what is called a Prelude. The manager enters and pronounces an address or benediction which like Kalidasa's other preludes indicates that the author belongs to that modification of the Hindu faith in which the abstract deism of the Vedanta is qualified by identifying the Supreme invisible and inappreciable Spirit with a delusive form

which was the person of Rudra or Siva". For a detailed discussion see our Sakuntalam.

## V. Sources and story of the poem.

Several commentators say that the hero of this poem a यक्ष had to do the duty of collecting fresh flowers for his master Kuvera to worship Lord Siva with. One day this यक्ष failed in his duty, owing to his attachment with his wife. This enraged the master and he sentenced him to one year's exile to the hills of Ramgiri in Central Province. This bereavement from his wife due to master's curse was unbearable to the Yaksha and he sent message to his wife through the cloud. Here opens Kalidasa's Meghadutam. From this simple story the poet wove out a masterpiece poem full of pathos, imagination and beautiful descriptions of sceneries.

Mallinatha holds that the poet had the germ of his Meghaduta in the Ramayana where Rama sent message to Sita through his devoted follower Hanuman.

Pandit Prannath Saraswati holds that Kalidasa's Meghaduta was most probably suggested by the Yamaka-Kavya of Ghatakarpara.

We have shown in our Introduction to Sakuntalam under the heading "A Chronological Survey of Kalidasa's Works" that the idea of Meghadutam possessed Kalidasa even while he was writing the Vikramorvasi (see under Sl. 3 also).

[*N. B.*—Sequence in Kalidasa's works may be traced with reference to the gradual evolution of his religious ideas—see our Intro. to Sak.]

Perhaps the fictitious residence of the Yaksha was somewhere in Himalaya towards the north east of Kashmir and

thus probably on the extreme west of Tibet. Hence the cloud messenger is requested to pass from Ramgiri in C. P. through Ujjain in a westerly oblique course and proceed to his abode in that direction to waft his sorrows to his regretted wife.

We here give a brief survey of the cloud's progress to Himalaya—the abode of Yaksha.

Sls. 1-15.—Yaksha at Ramgiri (in C. P.) entrusts the cloud with his message to be conveyed to his beloved wife.

Sl. 16.—Cloud is to go obliquely a little westwards after ascending *Mala* region (near Modern Ratanpur in C. P.)

Sls. 17-18.—Cloud's progress to Mt. Amrakuta in Central India on the eastern side of Vindhya [N. B.—From C. P. cloud goes on to C. I.]

Sls. 19-22.—Narmada at the foot of Vindhya will then be reached.

Sl. 23.—Approach to Dasarna country.

Sls. 24-27.—Vidisa, the capital of Malva is to be arrived at. There it was all-beauty.

Sls. 28-29,—Nirvindhya and Sindhu rivers are to be crossed in order.

Sls. 30-43.—Ujjain with river Sipra, is gradually reached in its north-westward journey.

Sls. 44 48.—The cloud will then have to meet Kartikeya's temple at Devagiri (to the south of Chambal in the centre of Malva).

[*N. B.*—All these places and rivers are in Malva which the cloud is to traverse from east to west, for it has to take a north-west ward course].

Sl. 49.—Town of Dasapur in Central India will then come in its way.

[*N. B.*—Henceforth the cloud will proceed northwards via Delhi].

Sls. 50-51.—Brahmavarta between the rivers Saraswati and Drisadvati in the North-east of Delhi is then reached.

Sls. 52-58.—Jahnavi (Ganges) will then fall on its track.

Sls. 59-82.—Then passing north-eastwards through the slopes of Himalaya, Mt. Krauncha is to come to view. Further on there in Manasa lake. There near the source of Ganges will be seen Alaka the abode of Yaksharaja, and there on the margin of a pleasure-hill the cloud is likely to see his beloved.

[*N. B.*—From Delhi the cloud first progresses northwards, then north-eastwards through the slopes of Himalaya till it reaches Alaka (in Tibet) ].

Sls. 83-103.—An imaginary description of the विरहिनी and the signs whereby to recognise her, are described

Sls. 104-118.—Messages to be delivered to her.

Sls. 119-120.—Cloud's favour to heed his messages is appealed fcr.

# सञ्जीवनीकृतो मङ्गलाचरणम् ।

मातापितृभ्यां जगतो नमो वामार्धजानये ।
सद्यो दक्षिणदृक्पातसङ्कुचद्वामदृष्टये ॥ १ ॥

Salutation to that Being known as the Father and the Mother of the universe, whose left half is the wife and at whose gracious look the sight of evil withers.

अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
तं नरं वपुषि कुञ्जरं मुखे मन्महे किमपि तुन्दिलं महः ॥२॥

For the dispersion of the gloom of obstacles, we invoke that mild mighty holy Light of inconceivable majesty which is a man in the body and elephant in the head.

शरणं करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरु मामम्ब कृतार्थसार्थवाहम् ॥३॥

O Vani, I betake myself to thy auspicious feet, the resort of all that is moveable and immoveable. Render me a successful guide, O mother, by casting glances that are gracious through kindness.

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किञ्चिन्नानपेक्षितमुच्यते ॥ ४ ॥

भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता ।
एषा सञ्जीवनीव्याख्या तामद्योज्जीवयिष्यति ॥ ५ ॥

Here everything is being explained by me by means of

the prose order. Nothing unauthorised is being written, no anything irrelavant is being said.

Kalidasa's muse lies in a swoon through the poison of bad interpretation. This commentary styled the "Sanjivani" will now revive her.

# मेघदूतम् ।

दु गतौ + त = दूत messenger. Here the vowel is lengthened by the उणादिसूत्र "दुतनिभ्यां दीर्घश्च" । दू उपतापे + क्त कर्त्तरि also gives दूत meaning 'oppressed'. But this sense does not suit here. दूत usually means सन्देशहर ( messenger ) cf "चारेचणः दूतमुखः पुरुषः कोऽपि पार्थिवः"—*Sisupalavadha.* मेघः दूतः यस्मिन्, बहु— । तत् । The word is neuter for it qualifies काव्यम् understood. Or—मेघश्चासौ दूतश्च, कर्मधा— । Then by transference of epithet ( उपचार ) it means the book ( poem ) describing the cloud-messenger.

*1. A yaksha through curse lived at Ramgiri.*

**कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः**
**शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।**
**यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु**
**स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥ १ ॥**

Prakasika—कश्चित् यक्षः रामगिर्य्याश्रमेषु वसतिं चक्रे [ A Yaksha resided in the regions of Ramgiri ] Was this place agreeable—जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु [ The place was pleasant

with cool and shady Nameru trees and its waters were rendered pure for Sita bathed there in days of yore ]. Then the yaksha was quite at home there ?—वर्षभोग्येण शापेन अस्तंगमितमहिमा [ No ; he was undergoing punishment by way of curse to stay there for a year. And this took away all his majesty and hence he was hapless there ]. Why could he not look like the time ?—कान्ताविरहगुरुणा शापेन [ The curse hang heavy on him ; for it separated him from his beloved wife residing at the Himalayan abode of his master Kuvera ]. What was the cause of the curse ?—स्वाधिकारात् प्रमत्तः ( अतः ) भर्तुः शापेन अस्तंगमितमहिमा [ He failed in his usual duties. Hence his master cursed him and deprived him of his privileges ].

Prose.—स्वाधिकारात् प्रमत्तः ( अतः ) कान्ताविरहगुरुणा वर्षभोग्येण भर्तुः शापेन अस्तंगमितमहिमा कश्चित् यक्षः जनकतनयास्नानपुण्योदकेषु स्निग्धच्छायातरुषु रामगिर्य्याश्रमेषु वसतिं चक्रे ।

Beng.—কোন এক যক্ষ নিজের কার্য্যে অসাবধান হওয়ায় নিজ প্রভু কুবেরের বর্ষভোগ্য সুতরাং স্ত্রীবিরহহেতু সুদীর্ঘ শাপে লুপ্তশক্তি হইয়া, স্নিগ্ধনমেরুবৃক্ষসঙ্কুল রামগিরির আশ্রমে বাস লইল। সেখানের জল সীতার স্নানে পবিত্র ছিল।

Eng.—Negligent of his duties, ( hence ) deprived of his glory by his master's curse that is to last for a year and was unbearable owing to separation from wife, a cartain yaksha took his abode in the regions of Ramgiri, cool through Nameru trees and having sanctified waters on account of the daughter of ( King ) Janaka.

Expl.—See Prak. above.

Sanjivani.—"आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इति शास्त्रात् काव्यादौ वस्तुनिर्देशात् कथां प्रस्तौति।—कश्चिदिति ॥ 'स्वाधिकारात्' स्वनियोगात्

'प्रमत्तः' अनवहितः [ ''प्रमादोऽनवधानता'' इत्यमरः। ''जुगुप्साविरामप्रमादार्थानामुप-
संख्यानम्'' इत्यपादानत्वम् ; तस्मात् पञ्चमी2 ] अतएव अपराधात् हेतोः—'कान्ता-
विरहेण गुरुणा' दुर्भरेण, दुस्तरेण इत्यर्थः [ ''गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे''
इति शब्दार्णवे (?वः)3 ] 'वर्षं' वत्सरं 'भोग्येन' [ ''कालाध्वनोरत्यन्तसंयोगे'' इति
द्वितीया। ''अत्यन्तसंयोगे च'' इति समासः। ''कुमति च'' इति णत्वम्4 ]
'भर्त्तुः' स्वामिनः 'शापेन अस्तंगमितो महिमा' सामर्थ्यं यस्य सः 'अस्तंगमितमहिमा'
[ अस्तम् इति मकारान्तमव्ययम्। तस्य ''द्वितीया'' इति योगविभागात् समासः ]
'कश्चित्' अनिर्दिष्टनामा 'यक्षो' देवयोनिविशेषः [ ''विद्याधराप्सरोयक्षरक्षोगन्धर्व-
किन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः'' इत्यमरः ] 'जनकतनयायाः'
सीतायाः 'स्नानैः' अवगाहनैः 'पुण्यानि' पवित्राणि 'उदकानि' येषु तेषु, पावनेषु इत्यर्थः।
छायाप्रधानाः तरवः 'छायातरवः' [ शाकपार्थिवादित्वात् समासः ] 'स्निग्धाः' सान्द्राः
'छायातरवः' नमेरुवृक्षा येषु तेषु, वसतियोग्येषु इत्यर्थः [ ''स्निग्धन्तु मसृणे सान्द्रे''
इति। ''छायावृक्षो नमेरुः स्यात्'' इति शब्दार्णवे ( ? वः ) ] 'रामगिरिः' चित्रकूटस्य
आश्रमेषु वसतिम् [ ''वहिवस्यतिभ्यश्चित्'' इत्यौणादिको अतिप्रत्ययः ] 'चक्रे' कृतवान्
[ अत्रकाव्ये नगनगरार्णवादिवर्णनासम्भवात् महाकाव्यत्वम्। रसो विप्रलम्भाख्य-
शृङ्गारः। तत्राप्युन्मादावस्था। अत एव एकत्रानवस्थानं सूचितम् 'आश्रमेषु' इति
बहुवचनेन। सीतां प्रति रामस्य हनूमत्सन्देशं मनसि निधाय मेघसन्देशं कविः
कृतवान् इत्याहुः। अत्र काव्ये सर्वत्र मन्दाक्रान्ता वृत्तम्। तदुक्तम्—''मन्दाक्रान्ता
जलधिषडगैर्म्भौ नतौ तात् गुरु चेत्'' इति5 ]।

## Notes on Malli.

1. In accordance with the injunction "its commencement is a benediction, a salutation or a statement of a subject",—narration of a fact being enjoined, he ( Kalidasa ) begins the story. 2. स्वाधिकारात् takes अपादाने ५मी by the varttika "जुगुप्साविरामप्रमादार्थानाम्" &c. 3. According to शब्दार्णव—गुरु means Brihaspati,

best, preceptor, father and unbearable. [ N. B.—Here the reading should be शब्दार्णवः and *not* शब्दार्णवे ; for whenever Malli quotes lexicon he ends with the nominative]. 4. द्वितीया in वर्षम् is enjoined by the rule "कालाध्वनोः—" and the समास is guided by the rule "अत्यन्त—" ( char ). षत्व in वर्षभोग्येण is according to the rule "कुमति च"। 5. In this poem there being descriptions of mountains, cities, ocean, it is a महाकाव्य। The sentiment here is love of the type of विप्रलम्भ ( i. e want of enjoyment through separation ). The condition is that of a mad man. By plural in आश्रमेषु is indicated non-fixity in one place. Some say that the poet wrote this cloud message having his mind bent on the fact of Rama's sending message to Sita through Hanumat. The metre is मन्दाक्रान्ता everywhere (see Notes on metre at the end ).

## Charcha.

1. कान्ता &c.—विरह separation. गुरु unbearable. कान्तया विरहः, सुप्सुपा—। तेन गुरुः, सुप् सुपा—Or तृतीया तत्—, for Tattwabodhini has "हेतुतृतीययापि समास इष्यते"। तेन। ·Qual. शापेन। During separation from the beloved everything becomes unbearable, cp "तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः। तदेकाकी सबन्धुः सन्निह न रहितो यदा"—*Kirat.*

2. स्वाधिकारात् &c.—अधिक्रियते अस्मिन् इति अधि + कृ + घञ् अधिकरणे =अधिकारः office, duty, स्वस्य or स्वः अधिकारः, ६तत्—or कर्मधा—। तस्मात्। अपादाने ५मी by the rule "जुगुप्सा—" ( see Malli ). प्र + मद + क्त कर्त्तरि = प्रमत्तः careless. Qual. यक्षः। The reading स्वाधिकारप्रमत्तः is also seen, but Malli's reading is स्वाधिकारात् प्रमत्तः, hence he says "तस्मात् पञ्चमी"। Negligence on the part of yaksha incurred his master's wrath.

3. शापेन—शप + घञ् भावे = शापः curse. Here the curse was the punishment to suffer separation for one year. तेन । इतौ ३या ।

4. अस्तम् &c.—गम + णिच् + क्त कर्मणि = गमित caused to go. अस्तम् is an अव्यय meaning 'end' (here). अस्तम् गमितः, सुप् सुपा । तादृशः महिमा ( majesty ) अस्य, बहु— । Qual. यक्षः । शाप was the cause of his disappearence of महिमा । In अस्तंगमित Malli says "द्वितीया-इति योगविभागात् समासः" । But योगविभाग of द्वितीया is unauthoritative ( i. e. not sanctioned by महाभाष्य ). See our Introduction to Bhatti. canto I. योगविभाग is resorted to only to defend the cases wished for—cp "योगविभागस्त्विष्टसिद्ध्यर्थ."—*Manorama.* Kaiyata also is against योगविभाग is his भाष्यप्रदीप । Thus while expounding the समास of ह्यः ( अव्यय having the sense of ७मी ) and गोदोह kaiyata has—"ह्यस् शब्दस्य गोदोहशब्देन सुप् सुपेति समासः" ।

5. चक्रे—कृ + लिट् ए । "स्वरितञितः कर्त्रभिप्राये क्रियाफले" इत्यात्मनेपदम्, । Nom. यक्षः ।

6. वर्ष &c.—वर्षं भोग्यः, २या तत् । तेन । Qual. शापेन । २या in वर्षम् is अत्यन्तसंयोगे by the rule "कालाध्वनोः"—(Malli), then २या तत् is by the rule "अत्यन्तसंयोगे" । णत्व in वर्षभोग्येण is according to the rule ,'कृमति च' ।

7. जनक &c.—जनकतनया is Sita. तस्याः स्नानम्, ६तत् । तेन पुण्यानि, सुप् सुपा or ३तत्— । तादृशानि उदकानि एषु बहु— । Qual. रामगिर्याश्रमेषु । Sita was holy by birth and sanctified all that came in touch with her. cp "उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः" &c.—*uttaracharita.* From the use of the word जनकतनया it is inferred that the poet was thinking of रामकथा ।

8. स्निग्ध &c.—छायातरु is Nameru tree. स्निग्ध is shady, cool. स्निग्धा छायातरवः येषु, बहु— । Malli takes छायातरु to mean नमेरु on the strength of "विश्रश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः"—*Raghu.* Pradipa of दक्षिणावर्त्तनाथ takes छायातरु as "छायाप्रचुरास्तरवः" ।

9. राम &c.—रामस्य गिरिः, ६तत्— । तस्य आश्रमाः (resorts), ६तत्—। तेषु । यक्ष lived in the various regions of Ramgîri, hence the plural. Malli takes Ramgiri to mean चित्रकूट for Rama once lived there. Wilson identifies it with Ramtek ( North of Nagpur ). But recent researches point to *Ramagarh* hill in C. P. as the place intended by the poet, for it is near Amra·kuta, the source of river Narmada. अधिकरणे ७मी ।

10. Remark.—This poem is a खण्डकाव्य for it does not satisfy all the conditions of a महाकाव्य [ cp "खण्डकाव्य' महाकाव्यस्यैक-देशानुसारि यत्" ]. Love sentiment of the विप्रलम्भ type is displayed here. This love sentiment is of two kinds—(i) सम्भोग (union) (ii) विप्रलम्भ (separation).

11. Voice—प्रमत्तेन···केनचित् यक्षेण...—महिम्ना...वसतिः चक्रे... ।

2. *The bereaved yaksha saw a cloud.*

**तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी**
**नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।**
**आषाढ़स्य प्रथमदिवसे मेघमाश्लिष्टसानुं**
**वप्रक्रीड़ापरिणतगजप्रेक्षणीयं ददर्श ॥ २ ॥**

Prak.—अबलाविप्रयुक्तः स कामी मेघं ददर्श [ That passionate yaksha separate from his beloved wife saw a cloud ] What kind of

cloud it was?—आश्लिष्टसानुं (तथा) वप्रक्रीड़ापरिणतगजप्रेक्षणीयं मेघं ददर्श [The cloud stuck to the peak of the mountain, and it also looked like an elephant dealing side blows against the mount tain in his playful butting. Thus the cloud attracted his sight]. When did he saw the cloud? तस्मिन् अद्रौ कतिचित् मासान् नीत्वा स आषाढ़स्य प्रथमदिवसे मेघं ददर्श [He passed a few month (i. e. eight months) in that hill and there on the 1st day of Asada saw a charming cloud]. Did not the period affect him?—कनकवलयभ्रंशरिक्तप्रकोष्ठः स कामी [Yes, in this period he was exeessively emaciated so much so that the gold bracelet in his *wrist slipped down towards the elbow*]. 2.

Prose.—अबलाविप्रयुक्तः कनकवलयभ्रंशरिक्तप्रकोष्ठः स कामी तस्मिन् अद्रौ कतिचित् मासान् नीत्वा आषाढ़स्य प्रथमदिवसे आश्लिष्टसानुं वप्रक्रीड़ापरिणतगजप्रेक्षणीयं मेघं ददर्श।

Beng.—স্ত্রীবিরহিত কামী সেই যক্ষ সেই পর্বতে কয়েক মাস যাপন করিলে পর (বিরহকৃশতাহেতু) তার মণিবন্ধ হইতে স্বর্ণবলয় পতিত হইয়াছিল। অনন্তর আষাঢ়ের প্রথমদিনে সে পর্বতাগ্রস্থ এবং বপ্রক্রীড়ায় দন্তপ্রহাররত গজের ন্যায় মনোহর একখণ্ড মেঘ দেখিল।

Eng.—That possionate one, bereft of his wife and baving his wrist deviod of the golden bracelet, passed some months in that mountain and on the first day of *Ashada* saw a cloud, stuck to the peak, and beautiful like an elephant giving side-blows with his tusks in his sportive butting. 2.

Expl.—See Prak aud Eng. above.

Sanj.—तस्मिन्निति॥ 'तस्मिन्' चित्रकूटाद्रौ 'अबलाविप्रयुक्तः' कान्ताविरही, 'कनकस्य वलयः' कटकम् ["कटकं वलयोऽस्त्रियाम्" इत्यमरः] तस्य 'भ्रंशेन' पातेन 'रिक्तः' शून्यः 'प्रकोष्ठः' कूर्परादधः प्रदेशो यस्य स तथोक्तः ["कच्चान्तरे प्रकोष्ठः स्यात् प्रकोष्ठः कूर्परादधः" इति शाश्वतः] विरहदुःखात्कृश इत्यर्थः। 'कामी'

कामुक: स यक्ष: 'कतिचित् मासान्' अष्टौ मासान् इत्यर्थ: [ "शेषान् मासान् गमय चतुर:" इति वक्ष्यमाणत्वात् ] 'नीत्वा' यापयित्वा 'आषाढ़नक्षत्रेण युक्ता पौर्णमासी आषाढ़ी [ "नक्षत्रेण युक्त: काल:" इत्यण्। "टिड्ढाणञ्—" इत्यादिना ङीप् ] सा आषाढ़ी पौर्णमासी अस्मिन् इति 'आषाढ़ो' मास: [ "साऽस्मिन् पौर्णमासी इति संज्ञायाम्" इत्यण् ] तस्य 'प्रथमदिवसे आश्लिष्टसानु" आक्रान्तकूटम्। 'वप्रक्रीड़ा' उत्खातकेलय: [ "उत्खातकेलिशृङ्गाद्यैर्वप्रक्रीड़ा निगद्यते" इति शब्दार्णव: ] तासु 'परिणत:' तिर्य्यग्दन्तप्रहार: [ "तिर्य्यग्दन्तप्रहारस्तु: गज: परिणतो मत:" इति हलायुध: ] स चासौ गजश्च स इव प्रेक्षणीय:' दर्शनीय: तं 'मेघं ददर्श' [ गजप्रेक्षणीयमित्यत्र इवलोपात् लुप्तोपमा। केचित् "आषाढ़स्य प्रथमदिवसे" इत्यत्र "प्रत्यासन्ने नभसि" इति वक्ष्यमाणनभोमास प्रत्यासत्त्यर्थं "प्रशमदिवसे" इति पाठं कल्पयन्ति, तदसङ्गतम्। प्रथमातिरेके कारणाभावात्। नभोमासस्य प्रत्यासत्त्यर्थमिति चेत् न, प्रत्यासत्तिमात्रस्य मासप्रत्यासत्त्यैव प्रथमदिवसस्याप्युपपत्ते: अत्यन्तप्रत्यासत्तेरुपयोगाभावेन अविवक्षितत्वात्। विवक्षितत्वे वा स्वपक्षेऽपि प्रशम-दिवसान्तिमक्षणे मेघदर्शनकल्पनायां प्रमाणाभावेन तदसम्भवात्। प्रत्युत अस्मत्पक्षे एव कुशलसन्देशस्य भाव्यनर्थप्रतीकारार्थस्य पुरत एव अनुमानमुक्तं भवति इत्युपयोगसिद्धि:। ननु उन्मत्तस्य नायं विवेक इति चेत्, न ; उन्मत्तस्य न अनर्थस्य प्रतीकारार्थं प्रवृत्तिरपि इति सन्देशो मा भूत्। तथा च काव्यारम्भ: एवासिद्ध: स्यात् इत्यहो मूलच्छेदी पाण्डित्यप्रकर्ष:। कथं तर्हि "शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ" इत्यादिना भगवत्प्रबोधावधिकस्य शापस्य मासचतुष्टयावशिष्टस्योक्ति:, दशदिवसाधिक्यात् इति चेत्, स्वपक्षेऽपि कथं मा, विंशतिदिवसै: न्यूनत्वात् इति सन्तोष्टव्यम्। तस्मात् ईषदशेषम्यमविवक्षितम् इति सुष्ठूक्तं "प्रथमदिवसे" इति। ] ॥ २ ॥

## Notes on Malli.

1. Here in गजप्रेक्षणीयम् the word इव being elided this is is a case of लुप्तोपमा। Owing to the sloka प्रत्यासन्ने नभसि &c, some commentators ( Vallaba &c ) prefer the reading प्रशमदिवसे

in place of प्रथमदिवसे here, the last day of आषाढ़ being very close to *Sravana.* But this is unsound. There being no cause to supercede the 1st day of आषाढ़। If it be to denote proximity to श्रावण, that also can't be held ; for the month of आषाढ़ being proximate to श्रावण, 1st day of आषाढ़ is also proximate to it. And very close proximity of श्रावण is not intended. Even granting that very close proximity is intended, it is required to suppose that a piece of cloud was seen at the last moment of the last day of आषाढ़, which is impossible. On the other hand our reading ( namely प्रथमदिवसे ) is established on the ground that the yaksha infers perils and takes caution before hand to avoid the impending peril by sending good message to his wife ; (the reading प्रशम दिवसे leaves no time for him to do so ). It also can't be argued that a mad one can have no such consideration ; for in that case the message through cloud becomes impossible, for a mad can have no desire to avoid peril (e. g. unbearableness of the month of श्रावण ). Then the commencement of the poem also becomes impossible. Hence away with such root-destroying flow of learntng. Even the contention that the sloka "शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ" the four month's period left of the curse would be increased by ten days if it be reckoned from the 1st day of आषाढ़, is futile ; for in your own reading the period would be lessened by 20 days. So be satisfied with my argument. Such minute difference is not intended , hence the reading is प्रथमदिवसे।
[ N. B.—Malli's view is—four months should not be taken literally but approximately ].

## Charcha.

1. कतिचित्—किम् + डति = कति few. The word is always plural.

Its विभक्ति of १मा and २या edides by the rule "षष्ठ्यो लुक्"। चित् adds indefiniteness to it. Adj. to मासान्। Mal.i says "कतिचित् मासान षष्टौ मासान्", for we have the sloka "मासानन्यान् गमय चतुरो लोचने मोलयित्वा"—Infra.

2. अवला &c.—वि + प्र + युज + क्त कर्त्तरि = विप्रयुक्त separated. वि is *intensive* here. अवलया विप्रयुक्तः, ३तत्—। Qual. सः। After saying कान्ताविरह गुरुणा, the poet again says अवलाविप्रयुक्त to expedite inference of emaciation and consequent fall of bracelets.

3. कामी—कामयते इति कम + णिनि कर्त्तरि साधुकारिणि = कामी desiring, passionate. Or कम + घञ् भावे = कामः। स अस्ति अस्य इति काम + इनि ( मत्वर्थे ) = कामी। Qual. सः।

4. कनक &c.—वलय bracelet. कनकस्य वलयः, ६तत्—। तस्य भ्रंशः, ६तत्—। तेन रिक्तः (devoid), ३तत्—। तादृशः प्रकोष्ठः (wrist) यस्य, बहु—। Qual. स.। For the meaning of प्रकोष्ठ see Malli also. The separation made the यक्ष extremely emaciated for he was कामी। owing to this emaciation his bracelet slipped downwards from his wrist, cp—"अनभिलुलितज्याघाताङ्कं मुहुर्मणिवन्धनात् कनकवलयं स्रस्तं स्रस्तं मया प्रतिसार्य्यते"—Sak. III. Act.

5. आषाढस्य—शेषे ६ष्ठी, related to प्रथमदिवसे। For deriv of आषाढ see Malli "आषाढनक्षत्रयुक्ता &c".

6. प्रथम &c.—प्रथमः दिवसः first day कर्मधा—। तस्मिन्। अधिं ७मी। Malli refutes the reading प्रशमदिवसे।

7. आश्लिष्टसानुम्—सानु is the summiut of a mountain. आ + श्लिष + क्त कर्मणि = आश्लिष्ट stuck. आश्लिष्टः सानुः येन, बहु—। तम्। Qual. मेघम्।

8. वप्रक्रीड़ा &c.—वप्र is rampart. वप्रे क्रीड़ा sport in rampart, सुप् सुपा—। वप्रक्रीड़ा means playing with a rampart with the tusk or horn. See also Malli "उत्खातकेलिः शृङ्गाद्यैः &c." Cp. "निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु"—Raghu IV. 'परिणत' is a technical term meaning 'an elephant dealing sideblows with his tusks' "तिर्य्यग्दन्तप्रहारस्तु गजः परिणतो मतः"—Malli. प्र + ईक्ष + अनीयर् = प्रेक्षणीय beautiful. परिणतः गजः, कर्मधा—। वप्रक्रीड़ासु परिणतगजः, सुप् सुपा—। स इव प्रेक्षणीयः, उपमान कर्मधा—by the rule "उपमानानि सामान्यवचनैः"—An उपमान is compounded with its सामान्यवाचक word. तम्। Qual मेघम्। Or—वप्रक्रीड़ासु परिणतः सुप् सुपा—। स चासौ गजश्च, कर्मधा Rest as above. The cloud was beantiful like an elephant engaged in his playful butting, hence attracted यक्ष's notice. The sign was also auspicions "मत्तगजदर्शनात् कार्य्यसिद्धिर्भवति इति सूचितम्"—Pradipa.

9. ददर्श—दृश + लिट् अ। Nom सः। पश्यति, अपश्यत्, द्रक्ष्यति।

10 Voice.— ...विप्रयुक्तेन तेन कामिना... —प्रकोष्ठेन... —सानुः... —प्रेक्षणीयः मेघः ददृशे...।

## 4. *The cloud made the yaksha thoughtful.*

तस्य स्थित्वा कथमपि पुरः कौतुकाधानहेतो-
रन्तर्वाष्पश्चिरमनुचरो राजराजस्य दध्यौ।
मेघालोके भवति सुखिनोऽप्यन्यथावृत्ति चेतः
कण्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे ॥ ७ ॥

Prak.—तस्यपुरः कथमपि स्थित्वा राजराजस्य अनुचरः चिरं दध्यौ [ The Yaksha stood before the cloud and remained thoughtful for

a long time ]. Why this thought came to his mind ?—कौतुकाधानहेतोः तस्य ( मेघस्य ) पुरः स्थित्वा [ The cloud was such as to produce desire in one's mind. Hence its sight made him think thus ]. A pleasant thought indeed ?—अन्तर्बाष्पः राजराजस्य अनुचरः दध्यौ [ No ; the thought was painful and there were signs of suppressed tears in that follower of Kuvera]. Why do you say so ! मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति [ Even a happy man becomes restless at the sight of clouds ]. Then surely he was not happy :—कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे किं पुनः [ His dear wife was far away indeed and was longing for an embrace. Thus in such circumstances he can not naturally be happy ]. 3.

Prose,—राजराजस्य ( कुबेरस्य ) अनुचरः अन्तर्बाष्पः ( सन् ) कौतुकाधानहेतोः तस्य ( मेघस्य ) पुरः कथमपि स्थित्वा चिरं दध्यौ। मेघालोके सुखिनः अपि चेतः अन्यथावृत्ति भवति, कण्ठाश्लेषप्रणयिनि जने दूरसंस्थे ( सति ) किं पुनः ( वक्तव्यमिति शेषः )।

Beng.—অভিলাষোৎপাদনকারী সেই মেঘের সম্মুখে কিছুকাল কোন রকমে থাকিয়া বাষ্প রোধ করিয়া কুবেরের অনুচর যক্ষ ভাবিল। "মেঘদর্শনে সুখী লোকেরও চিত্ত অস্থির হয়, আর কণ্ঠালিঙ্গনার্থী প্রিয়জন দূরে থাকিলে যে হইবে তাহা আর কি বলিতে হইবে ?"

Eng.—That follower of Kuvera, with tears suppressed, somehow stood before the cloud that produces secret disires and mused long. In the happy even the sight of clouds make the minds of a restless character, what to speak of him whose beloved, yearning after an embrace ( round the neck ) is stationed far indeed.

Expl.—See Prak above.

Sanj.—तस्येति। राजानो यक्षाः [ "राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः" इति विश्वः ] राज्ञां राजा 'राजराजः' कुबेरः [ "राजराजो धनाधिपः" इत्यमरः।

"राजाहःसखिभ्यष्टच्" इति टच् प्रत्ययः ] तस्य 'अनुचरः' यक्षः 'अन्तर्बाष्पो' धीरोदात्तत्वात् अन्तःस्तम्भिताश्रुः सन् । 'कौतुकाधानहेतोः अभिलाषोत्पादकारणस्य [ "कौतुकं चाभिलाषे स्यादुत्सवे नर्महर्षयोः" इति विश्वः ] 'तस्य' मेघस्य 'पुरः' अग्रे 'कथमपि' गरीयसा प्रयत्नेन इत्यर्थः [ "ज्ञानहेतुविवक्षायाम् अप्यादि कथमव्ययम् । कथमादि तथाप्यन्तं यत्नगौरवबाढयोः" इत्युज्ज्वलः ] 'स्थित्वा चिरं दध्यौ' चिन्तयामास [ 'ध्यै चिन्तायाम् इति धातोः लिट् ] मनोविकारोपशमनपर्यन्तम् इतिशेषः । विकारहेतुमाह—मेघालोक इति । 'मेघालोके' मेघदर्शने सति 'सुखिनः अपि 'प्रियादिजनसंगतस्यापि 'चेतः' चित्तम् अन्यथाभूता वृत्तिर्व्यापारः यस्य तत् 'अन्यथावृत्ति भवति' विकृतिमापद्यते इत्यर्थः । 'कण्ठाश्लेषप्रणयिनि' कण्ठालिङ्गनार्थिनि 'जने' दूरे संस्था स्थितिर्यस्य तस्मिन् 'दूरसंस्थे' सति 'किं पुनः' विरहिणः किमुत वक्तव्यमित्यर्थः । विरहिणां मेघसन्दर्शनमुद्दीपनं भवतीति भाव । [ अर्थान्तरन्यासोऽलंकारः । तदुक्तं दण्डिना—"ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन । तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः" इति 2 ] ॥

## Notes on Malli.

1. The sense is, of the bereaved the sight of clouds is an exciter. 2. The figure of speech here is अर्थान्तरन्यास—which Dandin defines thus—That is called an अर्थान्तरन्यास in which another statement is put forth suitable to establish the matter in hand ( i. e., already stated ).

## Charcha.

1. तस्य—Refers to मेघ । शेषे ६ष्ठी, related to पुरः ।

2. कथमपि—A compound अव्यय meaning 'somebow' Adv. Qual. स्थित्वा । Cp. "कथमपि क्लेशादपक्रामति" &c.—Raghu. Also see Malli "कथमपि गरीयसा प्रयत्नेन" &c.

3, पुरः—पूर्वस्याम् दिशि इति पूर्व + ङि (७मी) + असि ( स्वार्थे ) = पुरः in

front. अव्यय—अधि ७मी। Here पुर् is ordered in place of पूर्वं by the rule "पूर्वाधरावराणामसि पुर्—अध्—अवश्चैषाम्"—when असि follows.

4. कौतुक &c.—कौतुक is 'desire' ( here ). The word generally means 'curiosity.' आ + धा + ल्युट् भावे = आधान imparting, producing. हेतु is cause. कौतुकस्य आधानम्, ६तत्—। तस्य हेतुः—, ६तत्—। Qual. तस्य। Malli's synonym of the word is—अभिलाषोत्पादन-कारणस्य। The cloud was such as to produce inward longing. The word कौतुक here may mean कामविषयौत्सुक्य also.

5. अन्तर्वाष्पः—अन्तर्—an अव्यय meaning 'inward.' अन्तः (मध्ये) वाष्पः अस्य, बहु—। Pred to अनुचरः। He was a धीरोदात्त hero, hence had the power to check the flow of tears. See also Malli —धीरोदात्तत्वात् &c.

6. चिरम्—An अव्यय meaning 'long interval.' Adv. Qual दध्यौ। He thought till he again regained his mental equilibrium. "मनोविकारोपशमपर्य्यन्तम्"—*Malli*.

7. राजराजस्य—For deriv. and meaning, see Malli. Here समासान्त टच् (अ) comes by the rule "राजाहः सखिभ्यष्टच्"—राजन्, अहन् and सखि final in a तत्पुरुष takes the समासान्त—अ। शेषे ६ष्ठी।

8. दध्यौ—ध्यै + लिट् णल्। Nom. अनुचरः। ध्यायति, अध्यासीत् ध्यास्यति।

9. मेघालोके—आ + लोक + घञ् भावे = आलोक sight, मेघस्य आलोकः। ६तत्—। तस्मिन्। भावे ७मी by the rule "यस्य च भावेन भावलक्षणम्"।

10. भवति—भू + लट् ति। Nom. चेतः।

11. अन्यथावृत्ति—अन्यथा ( अन्यप्रकारा ) वृत्तिः अस्य, बहु—। Pred to चेतः।

12. कण्ठ &c.—आ + श्लिष (आलिङ्गने) + घञ् भावे = आश्लेष embrace. प्रणय: ( इच्छा ) अस्ति अस्य इति प्रणय + इनि मत्वर्थे = प्रणयी। कण्ठस्य आश्लेष:, इतत्—। तव प्रणयी, सुप् सुपा—। तस्मिन्। Qual. जने। जने has भावे ७मी। Or—कण्ठाश्लेषे प्रणय:, सुप् सुपा—। स अस्ति अस्य इति इनि:।

12. दूरसंस्थे—सम् + स्था + अङ् भावे संस्था station ( स्थिति )। दूरे संस्था ( स्थिति: ) अस्य, वहु—। तस्मिन्। Pred to जने। स्था here takes अङ् भावे owing to Panini's use of व्यवस्था in "—व्यवस्थायामसंज्ञायाम्"। For force of किं पुन: see Malli—विरहिण: किमुत &c.

13. Remark—Here the altenative reading is कैतकाधानहेतो: which only suggests the blooming of Ketaka flower which is indirectly unbearable to a विरही। But in our reading ( e. g. कौतुकाधानहेतो: ) the effect is directly produced. Secondly *Kataka* flowers do not blossom in the rainy seeson—आषाढ़।

14. Parallel—The last half of the verse has a parallel in Vikramorvarsi—"एतेन पुनर्निवृत्तानामपुनत्कण्ठाकारिणा मेघोदयेनाप्रतीकारो भविष्यति"—Act IV.

15. Voice.—...अन्तर्बाष्पेण अनुचरेण दध्ये।...चेतसा...—वृत्तिना भूयते...।

*4. To Send news, yaksha welcomed the cloud.*

प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम्।
स प्रत्यग्रै: कुटजकुसुमै: कल्पितार्घाय तस्मै
प्रीत: प्रीतिप्रमुखवचनं स्वागतं व्याजहार ॥ ४ ॥

Prak.—स प्रीत: ( सन् ) प्रीतिप्रमुखवचनं स्वागतं तस्मै व्याजहार [ He was glad and welcomed the cloud with sweet words ]. No other

signs of hospitality?—प्रत्ययैः कुटजकुसुमैः कल्पितार्घाय तस्मै स्वागतं व्याजहार [ Yaksha also offered him *Arghya* composed of fresh *Girimallika* flowers. Thus he entertained the cloud with all cordiality ] Why all these formalities?—जीमूतेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् [ He entertained the cloud for through him, he will send his own good news ] To whom will he send news and why?—प्रत्यासन्ने नभसि दयिताजीवितालम्बनार्थी [ The month of *Sravana* was near, and this month is very trying for a विरही, hence to enliven up his विरही wife, the Yaksha wished to send good news to her through this cloud ]. 4.

Prose.—नभसि प्रत्यासन्ने (सति) दयिताजीवितालम्बनार्थी जीमूतेन स्वकुशलमयीं प्रवृत्तिं हारयिष्यन् सः प्रत्ययैः कुटजकुसुमैः कल्पितार्घाय तस्मै प्रीतः (सन्) प्रीतिप्रमुख-वचनं स्वागतं व्याजहार।

Beng.—শ্রাবণ মাস নিকটস্থ হইলে, প্রিয়ার জীবন রক্ষার্থী যক্ষ মেঘদ্বারা নিজ-কুশলবার্ত্তা প্রেরণ করিতে ইচ্ছুক হইয়া নূতন কুটজপুষ্পদ্বারা অর্ঘরচনা করিয়া প্রীতি সহকারে প্রণয়বাক্যে মেঘের স্বাগত সম্ভাষণ করিল।

Eng.—*Sravana* having approached, he ( yaksa ) wishing to enliven the life of his wife and intent upon sending his good news through the cloud, offered him *Arghya* of fresh *Kutaja* flowers ; ( then ) glad at heart he uttered welcome to the cloud with joyful words.

Expl.—See Prak.

Sanj.—अथ समाहितान्तःकरणः सन् किं कृतवान्, इत्याह—प्रत्यासन्न इति। 'स यक्षः' यश्चिरं दध्यौ स इत्यर्थः, 'नभसि' श्रावणे [ "नभा श्रावणिकश्च सः" इत्यमरः ] 'प्रत्यासन्ने' आषाढस्यानन्तरं सन्निकृष्टे प्राप्ते सतीत्यर्थः। 'दयिताजीवितालम्बनार्थी' सन् वर्षाकालस्य विरहदुःखजनकत्वात्। "उत्पन्नानर्थप्रतीकारात् अनर्थोत्पत्तिप्रतिबन्ध

एव वरम्" इति न्यायेन प्रागेव प्रियाप्राणधारणोपायं चिकीर्षुरित्यर्थः2। 'जीवनस्य' उदकस्य 'मूतः' पटबन्धः वस्त्रबन्धो 'जीमूतः' [ पृषोदरादित्वात् साधुः। "मूतः स्यात् पटबन्धेऽपि" इति रुद्रः ] तेन 'जीमूतेन' जलधरेण प्रयोज्येन 'स्वकुशलमयीं' स्वक्षेमप्रधानां 'प्रवृत्तिं' वार्त्ताम् [ "वार्त्ता प्रवृत्तिः वृत्तान्तः" इत्यमरः ] 'हारयिष्यन्' ["लृट् शेषे च" इति चकारात् क्रियार्थक्रियोपपदात् लृटप्रत्ययः। जीवनार्थं कर्म जीवनप्रदेनैव कर्त्तव्यमिति भावः। "हृक्रोरन्यतरस्याम्" इति कर्मसंज्ञाया विकल्पात् पक्षे कर्त्तरि तृतीया 3 ] 'प्रत्यग्रैः' अभिनवैः 'कुटजकुसुमैः' गिरिमल्लिकाभिः [ "कुटजो गिरिमल्लिका" इति हलायुधः ] 'कल्पितार्घाय' कल्पितः अनुष्ठितः अर्घः पूजाविधिः यस्मै तस्मै [ "मूल्ये पूजाविधौ अर्घः" इत्यमरः ] तस्मै जीमूताय [ "क्रियाग्रहणमपि कर्त्तव्यम्" इति सम्प्रदानत्वात् चतुर्थी ] 'प्रीतिप्रमुखानि' प्रीतिपूर्वकाणि वचनानि यस्मिन् कर्मणि तत् 'प्रीतिप्रमुखवचनं' यथा तथा, शोभनमागतं' स्वागतवचनं 'प्रीतः' सन् 'व्याजहार' कुशलागमनं पप्रच्छ इत्यर्थः। [ नाथेन तु अत्र 'प्रत्यासन्ने मनसि' इति साधीयान् पाठः कल्पितः। 'प्रत्यासन्ने' प्रकृतिमापन्ने सति इत्यर्थः। यस्तु तेनैव पूर्वापरविरोधः प्रदर्शितः स अस्माभिः आषाढस्य प्रथमदिवसे इत्येतत् पाठविप्लवसमाधानेनैव परिहृतः 4 ] ॥ ४ ॥

## Notes on malli

1. Then what he did after pacification of his mind? 2. "It is better to obstruct happening of evil than remedying the evil already occured"—in accordance with this dictum he from before even wished to find means to sustain darling's life. 3. owing to the presenoe of 'च' in the rule "लृट्शेषे च"—लृट is used to denote futurity whether there is or is not a क्रियार्थक्रिया। Here the लृट् is used to denote—क्रियार्थ। The sense is, the deed for life should be done byone who can give life ( i. e., a cloud ), जीमूतेन has optional तृतीया by the rule "हृक्रोरन्यतरस्याम्"। 4. Here Natha thinks "प्रत्यासन्ने मनसि" to be the better reading. The meaning of प्रत्यासन्ने being—restored to nature (प्रकृतिमापन्ने )।

The incongruity which Nath has put forth in this connection is well refuted by us while establishing the reading आषाढ़स्य-प्रथमदिवसे ( st-2 ) [ See also notes on Malli thereon ].

## Charcha.

1. प्रत्यासन्ने—प्रति + आ + सद् + क्त कर्त्तरि = प्रत्यासन्न near. तस्मिन्। Pred to नभसि। नभस् means the month of श्रावण। तस्मिन्। भावे ७मी।

2. दयित &c.—दयिता is an excessively fond wife. आ + लम्ब ल्युट् भावे = आलम्बन support. दयितायाः जीवितम्, ६तत्—। तस्य आलम्बनम्, ६तत्—। दयिताजीवितालम्बनम् अर्थयते य सः इति दयिताजीवितालम्बन + अर्थ + णिनि कर्त्तरि साधुकारिणि = दयिताजीवितालम्बनार्थी—। Quat सः। The Yaksha was trying to make provisions to suntain his wife beforehand.

3. जीमूतेन—Deriv. ( See Malli—जीवनस्य &c. ). तेन। प्रयोज्ये कर्त्तरि तृतीया by "हृक्रोः—" (Malli). Here the rule enjoins optioual कर्मसंज्ञा, hence जीमूतम् is also correct.

4. स्व &c.—स्वस्य कुशलम् own weal, ६तत्—। तेन प्रकृतमिति स्वकुशल + मयट् (प्रकृतवचने) स्त्रियाम् = स्वकुशलमयी। ताम्। Qual. प्रवृत्तिम्।

5. हारयिष्यन्—हृ + णिच् + लृट्: स्थाने शतृ = हारयिष्यन् wishing to cause to send. Qual. सः। In the noncausal form the sentence was—जीमूतः प्रवृत्तिं हरिष्यति ; णिजन्तपक्षे—स जीमूतेन ( जीमूतं वा ) प्रवृत्तिं हारयिष्यति। Here this लृट् has the sense of तुमुन् ( क्रियार्थे )—See Notes on Malli.

6. प्रत्यग्रैः—अग्रं प्रतिगतः प्रत्यग्रः fresh, प्रादितत्—। तैः, Qual. कुटजकुसुमैः ( which has करणे ३या )।

7. कल्पित &c.—अर्घ offering for worship. क्लप + णिच् + क्त कर्मणि = कल्पित: rendered. कल्पित: अर्घ: अस्य, बहु— । Qual. तस्मै ।

8. तस्मै—सम्प्रदान of the क्रिया-व्याजहार । Malli quotes the varttika "क्रियाग्रहणमपि कर्त्तव्यम्" । Malli quotes this from the Vritti. Acc, to भाष्य however, all cases come under the rule "कर्मणा यमभिप्रैति स सम्प्रदानम्" ।

9. प्रीति &c.—प्रमुख fore-front. प्रीति: प्रमुखे एषाम्, बहु— । Here परनिपात of सप्तम्यन्त is to be supported by the varttika "गड्वादे: परा सप्तमी" । गड्वादि being आकृतिगण we include प्रमुख under it. प्रीतिप्रमुखानि वचनानि अस्मिन्, बहु— । Qual. स्वागतम् । Or—The word may be taken as an adverb ( see Malli ).

10. स्वागतम्—सु happy, अव्यय । आ + गम + क्त भावे = आगतम् । शोभनमागतं स्वागतम्, नित्यकर्मधा— । तत् । obj. of व्याजहार ।

11. व्याजहार—वि + आ + हृ + लिट् णल् ( अ ) । Nom. स: । हरति—ते, अहार्षीत्—अहृति, अहरत्—त ।

12. Voice.—...आलम्बनार्थिना...हारयिष्यता तेन प्रीतेन सता... व्याजह्रे... ।

## 5. *Message through a cloud—an incongruity.*

धूमज्योति:सलिलमरुतां संनिपात: क्व मेघ:
सन्देशार्था: क्व पटुकरणै: प्राणिभि: प्रापणीया: ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु ॥ ५ ॥

Prak.—easy.

Prose.—धूमज्योति:सलिलमरुतां सन्निपात: ( सङ्घात: ) मेघ: क्व, पटुकरणै:

प्राणिभिः प्रापणीयाः सन्देशार्थाः क्व। इति औत्सुक्यात् अपरिगणयन् गुह्यकः तं ययाचे। हि (यस्मात्) कामार्त्ताः चेतनाचेतनेषु प्रकृतिकृपणाः।

Beng.—ধূম, জ্যোতি জল ও বায়ুর সমবায়ে উৎপন্ন মেঘ কোথায়, আর তীক্ষেন্দ্রিয়-যুক্ত মনুষ্যকর্তৃক প্রাপণীয় বার্তাই বা কোথায়। ঔৎসুক্যবশতঃ ইহা না বিচার করিয়াই যক্ষ মেঘকে প্রার্থনা করিল। কারণ কামার্তগণ চেতন ও অচেতন বিষয়ে স্বভাববশতঃ মূঢ় হইয়া থাকে।

Eng.—Where is indeed the cloud—a combination of smoke, luminary, water and air, and wherein lies the words of message to be conveyed by men of strong senses. Without considering thus through eagerness the Yaksha requested the cloud. For the love-stricken are by nature, iguorant to distinguish between animate and inanimate beings.

Expl.—Request to an inanimate object is surely fruitless. Still the Yaksha made such a request owing to his ignorance of this fact, for he was mad with love.

Malli.—ननु चेतनसाध्यमर्थं कथमचेतनेन कारयितुं प्रवृत्त इत्यपेक्षायां कविः समाधत्ते धूमेति।—धूमश्च ज्योतिश्च सलिलञ्च मरुद्वायुश्च तेषां 'सन्निपातः' सङ्घातः 'मेघः क्व' अचेतनत्वात् सन्देशानर्ह इत्यर्थः। 'पटुकरणैः' समर्थेन्द्रियैः [ "करणं साधकतमं क्षेत्रगात्रेन्द्रियेष्वपि" इत्यमरः ] 'प्राणिभिः' चेतनैः [ "प्राणी तु चेतनो जन्मी" इत्यमरः ] 'प्रापणीयाः 'प्रापयितव्याः सन्दिश्यन्ते इति सन्देशाः, त एव 'अर्थाः' क्व। 'इति' एवम् 'औत्सुक्यात्' इष्टार्थोद्युक्तत्वात् [ "इष्टार्थोद्युक्तः उत्सुकः" इत्यमरः ] 'अपरिगणयन्' अविचारयन् 'गुह्यकः' यक्षः 'मेघं ययाचे' याचितवान् प्रार्थयामास। तथा हि 'कामार्त्ताः' मदनातुराः चेतनाश्च अचेतनाश्च तेषु विषये 'प्रकृतिकृपणाः' स्वभावदीनाः। कामान्धानां युक्तायुक्तविवेकशून्यत्वात् अचेतनयाञ्चा न विरुध्यते इत्यर्थः। [ अत्र मेघसन्देशयोः विरूपयोः घटनात् विषमालङ्कारः। तदुक्तम्—"विरुद्धकार्य्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्। विरूपघटना चासौ विषमालङ्कृतिस्त्रिधा"। सा च अर्थान्तरन्यासानुप्राणिता। तत्समर्थकत्वेन एव चतुर्थपादे तस्योपन्यासात्'। ] ॥ ५ ॥

3

## Notes on Malli.

1. Here the figure is विषम in as much as two incongruous things (e. g. cloud and message ) are brought together. Thus it is said "The figure is विषम (which is of 3 kinds) where incongrous happening or occurance of opposite objects take place." The विषमालङ्कार is here enlivened by अर्थान्तरन्यास for the statement is supported by a general maxim in the fourth line.

## Charcha.

1. धूम &c.—By ज्योतिस्,I take 'luminary', For clouds contain lightning ( ज्योतिस् ). The whole is a द्वन्द्व । See Malli. शेषे षष्ठी ।

2. सन्निपात:—सम् + नि + पत + घञ् भावे = सन्निपात: conglomeration. Qual. मेघ: (which is Nom. to भवति understood).

3. क्व क्व—These two words suggest utter inconsistency of the two statements. cp "क्व सूर्यप्रभवो वंश: क्व चाल्पविषया मति:"—Raghu, where Malli says "द्वौ क्वशब्दौ महदन्तरं सूचयत:" । Also see "क्व वत हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसारा शरास्ते"—Sak. Act I. Also see our notes on Kirat I. sl. 6.

3. सन्देशार्था:—सन्देश message. ते एव अर्था:, कर्मधा— । Nom. to भवन्ति understood.

4. पटुकरणै:—करण senses. पटु strong. पटूनि करणानि एषाम्, बहु— । तै: । Qual. प्राणिभि: ।

5. प्रापणीया:—प्र + आप + अनीयर् कर्मणि । Adj. to सन्देशार्था: ।

6. प्राणिभि:—अनुक्ते कर्त्तरि श्या । षष्ठी here is also correct by the rule "कृत्यानां कर्त्तरि वा" । अनीयर् here is a कृत्य affix.

7. औत्सुक्यात्—औत्सुक्य is eagerness, "इष्टार्थोद्युक्तत्वात्"—Malli. हेतौ पञ्चमी ।

8. अपरिगणयन्—परि + गण + णिच् + शतृ = परिगणयन् considering. न तथा। Qual. गुह्यकः।

9. ययाचे—याच + लिट ए। Nom. गुह्यकः। कर्त्रभिप्राये क्रियाफले आत्मनेपदम्। The action was to benefit the agent.

10. कामार्त्ताः—कामेन आर्त्ताः (पीड़िताः) ऋता वा, ३तत्—। Adj. used substantively. Nom. to भवन्ति।

11. प्रकृति &c.—प्रकृति nature. कृपण is here 'ignorant'. प्रकृत्या कृपणाः, ३तत्—। Pred. to कामार्त्ताः। The love-stricken are always out of wits. See Malli "कामान्धानां युक्तायुक्तविवेकशून्यत्वात्" &c.

12. चेतना &c.—For samasa see Malli. अधि ७मी।

13. Voice.—सन्निपातेन मेघेन...प्रापणीयैः सन्देशार्थैः भूयते...गणयता गुह्यकेन...कामार्त्तैः कृपणैः भूयते...।

*6. This cloud is however a fit messenger having high ancestry &c.*

जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः।
तेनार्थित्वं त्वयि विधिवशाद् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥ ६ ॥

Prak.—त्वां मघोनः कामरूपं प्रकृतिपुरुषं जानामि [ I know, O cloud, that you are a prominent hand of Indra and can assume any form you like ]. Is this all ? पुष्करावर्त्तकानां भुवनविदिते वंशे जातं त्वाम् जानामि [ I also know you to be born in the well-known race of clouds called *Puskaravartaka.* Hence I expect

service from you ]. What then ?—तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः [ It is for this reason that I am a suitor to you ; all the more so for my wife through Destiny's play is at a distance. And you will carry my welfare to her ]. If I fail to do this trust of yours ?—अधिगुणे याच्ञा मोघा ( अपि ) वरम्, अधमे लब्धकामा याच्ञा न वरम् [ No matter for this ; you are qualified and fruitlessness of my request with you is better than its fruition through a mean person ].

Prose.—त्वां भुवनविदिते पुष्करावर्त्तकानां वंशे जातं कामरूपं मघोनः प्रकृतिपुरुषं जानामि। तेन विधिवशात् दूरबन्धुः अहं त्वयि अर्थित्वं गतः। अधिगुणे याच्ञा मोघा ( अपि ) वरम्, अधमे लब्धकामा न वरम्।

Beng,—হে মেঘ, তুমি ভুবনবিদিত পুষ্করাবর্ত্তক মেঘের বংশে উৎপন্ন, তুমি কামরূপী এবং ইন্দ্রের রাষ্ট্রের প্রধানপুরুষ—ইহা জানি। এই হেতু, দৈবক্রমে ভার্য্যা দূরে থাকায় আমি তোমার নিকট যাচকরূপে সমুপস্থিত। গুণিব্যক্তির নিকট প্রার্থনা বিফল হইলেও ভাল, নির্গুণের নিকট সফল প্রার্থনা ও ভাল নয়।

Eng.—I know thee to be born in the world famous race of *Puskaravartakas* and to be the prime officer of India, assuming froms at will. Hence, my wife being afar through Detiny I am a suitor to thee. Prayer with a meritorious, even if unfulfilled is better than a successful request made with a mean.

Expl.—See Prak.

Sanj.—जातमिति। हे मेघ, त्वां 'भुवनेषु विदिते' ["निष्ठा" इति भुतार्थे क्तः। "मति ( ? मति ) बुद्धि—" इत्यादिना वर्त्तमानार्थत्वेऽपि ( ? हि ) "क्तस्य च वर्त्तमाने" इति भुवनशब्दस्य षष्ठ्यन्ततानियमात् समासो न स्यात्। "क्तेन च पूजायाम्" इति निषेधात्'। ] 'पुष्कराश्च आवर्त्तकाश्च' केचित् मेघानां श्रेष्ठा तेषां 'वंशे जातम् महाकुल-

प्रसृतमित्यर्थः। 'कामरूपम्' इच्छाधीनविग्रहम्, दुर्गादिसञ्चारक्षमम् इत्यर्थः। 'मघोनः' इन्द्रस्य 'प्रकृतिपुरुषं' प्रधानपुरुषं 'जानामि, तेन त्वत्प्रभुत्वाभिजात्यादिगुणयोगेन हेतुना 'विधिवशात्' दैवायत्तत्वात् [ "विधिर्विधाने दैवे च" इत्यमरः ] दूरे वन्धुर्यस्य स 'दूरवन्धुः' 'वियुक्तभार्य्योऽहं' त्वयि 'अर्थित्वं गतः'। ननुयाचकस्य याचञायां याच्यगुणोत्कर्षः कुत्रोपयुज्यते इत्याशङ्का दैवात् याच्ञाभङ्गेऽपि लाघवदोषाभाव एव उपयोग इत्याह 2—याच्ञेति। तथाहि 'अधिगुणे' अधिकगुणे पुंसि विषये 'याच्ञा मोघा' निष्फलापि वरम् ईषत्प्रियम्। दातुर्गुणाढ्यत्वात् प्रियत्वं याच्ञावैफल्यात् ईषत्प्रियत्वमिति भावः। 'अधमे' निर्गुणे 'याच्ञा लब्धकामापि' सफलापि 'न वरम्, ईषत् प्रियमपि न भवति [ "देवाद्वृतेवरः श्रेष्ठेत्रिषु क्लीवं मनाक्प्रिये" इत्यमरः ]। अर्थान्तरन्यासानुप्राणित प्रेयोऽलङ्कारः। तदुक्तं दण्डिणा—"प्रेयः प्रियतराख्यानम्" इति, एतदाद्ये पादत्रये चतुर्थपादस्थेन अर्थान्तरन्यासेन उपजीवितम् इति सुव्यक्तमेतत् 3 ॥

## Notes on malli.

1. In विदित we have भूतार्थे क्त by the rule "निष्ठा"। If we take वर्त्तमानक्त here by the rule "मतिबुद्धिपूजार्थेभ्यश्च", then the word भुवन will take the 6th case ending by the rule "क्तस्य च वर्त्तमाने" and further समास will be prohibited by the rule "क्तेन च पूजायाम्" [ N. B.—here in place of गतिबुद्धि read मतिबुद्धि and in place of वर्त्तमानार्थत्वेऽपि read वर्त्तमानार्थत्वे हि otherwise meaning is not clear. Malli's object is to show the impossiblity of taking विदित with वर्त्तमान क्त ] (see *char* ). 2. In matter of request by a suitor where is indeed the excellence of the person requested—apprehending this, he shows the excellence ( e. g. absence of lightness ) in case the request is unsuccessful. 3. The figure is प्रेय enlivened by अर्थान्तरन्यास। Thus Dandin says "प्रेय is enumeration of the more desired." This inthe first 3 lines is enlivened by अर्थान्तरन्यास of the fourth one.

## Charcha.

1. भुवनविदिते—विद्+क्त कर्मणि अतीते=विदित known. भुवन by उपचार ( transference ) means people of the world. भुवनेन विदितः, इतत्— । तस्मिम् । Qual, वंशे । Malli says भुवनेषु विदितः making it a सुप्सुपा compound. We prefer a श्यातत्—here । Malli takes विदित as अतीत क्त ; remember वर्तमान क्त in case of मत्यर्थ roots etc. does not bar अतीत क्त, cp. "न हि तक्तुक्तौ्विन्यन्यायेनक्तस्य वर्त्तमानकालो भूतकालतां बाधते"—*Manorama.* Witness the usage 'पूजितः यः सुवासरैः" also see our notes on "मखेष्वखिन्नोऽनुमतः पुरोधसा"—Kirat 1. Sl. 22. Hence the difficulty of compounding भुवनस्य विदितः ( with वर्त्तमान क्त ) does not arise. The समास in such case being barred by the rule "क्तेन च पूजायाम्" । Bhattoji however is of opinion that this prohibition applies to कर्त्तृषष्ठी only ( as got by the rule "क्तस्य च वर्त्तमाने" ) and *not* to कारकषष्ठी, cp." अन्ये तु कारकषष्ठ्या तु समास इत्याहुः । एतेन "कलहं स राममहितः कृतवान्' इति भट्टिप्रयोगो व्याख्यातः"—*Manorama.* Thus in his opinion we may compound भुवनस्य विदितः into भुवनविदितः as शेषषष्ठीतत्—, ( क्त here being वर्त्तमाने ) । But Nagesa says that the prohibition by "क्तेन च—" is of all kinds of षष्ठी, cp "कारकषष्ठीशेषषष्ठ्योः उभयोरप्ययं निषेधः"—*Sabdendusekhara.* Hence we prefer a इतत्—with अतीत —क्त in विदित । वंशे has अधि कर्मी ।

2. पुष्करावर्त्तकानाम्—Malli here and in Kumara under "पुष्करावर्त्तकादिषु" take the cnmpound as a द्वन्द्व thereby making पुष्कर and आवर्त्तक as two different varieties of clouds. But how can one and the same cloud be born in the वंश of two different

kinds of clouds ? The four well-known varieties of clouds are —आवर्त्त, संवर्त्त, पुष्कर and द्रोण। But here and in Kumara quoted above we have आवर्त्तक। Why is the कन् attached ? This leads me to think that पुष्करावर्त्तकाः refers to only one class of clouds. The वाचस्पत्य has a quotation from the विष्णुपुराण which seems to say that पुष्कर is for certain reasons called पुष्करावर्त्तक also—"पुष्करा नाम ते मेघा बृहन्तस्तोयमत्सराः। पुष्करावर्त्तकास्तेन कारणेनेह शब्दिताः" पुष्कर being जल, we may derive—आवर्त्तयन्ति इति आ+वृत+णिच्+ण्वुल् कर्त्तरि =आवर्त्तकाः। पुष्कराणाम् आवर्त्तकाः those that cause water, to turn back इतत्—। तेषाम्। शेषे षष्ठी।

3. जानामि—ज्ञा+लट् मिप्। Nom. अहम्।

4 प्रकृति &c.—प्रकृति is प्रधान। प्रकृतिश्चासौ पुरुषश्च, कर्मधा—। तम्। Pred. to त्वाम्।

5. काम &c.—काम here means 'कामानुसारि'। तादृशं रूपमस्य, बहु—। तम्। Pred. to त्वाम्। Hence he was capable of doing service and going to any place. See Malli "दुर्गादिसञ्चारक्षमम्"। cp "गत्वा सद्यः कलभतनुताम्" &c.—*Intra.*

6. मघोनः—The base is मघवन् meaning इन्द्र। तस्य। शेषे षष्ठी related to प्रकृतिपुरुषम्। The base is also declined as मघवत् by the rule "मघवा बहुलम्"।

7. तेन—हेतौ ३या। See Malli "तेन त्वत्प्रभुत्वाभिजात्यादिगुणयोगित्वेन" &c.

8. विधि &c.—विधि fate. वश is आयत्तता control. विधेः वशः, इतत्—। तस्मात्। हेतौ ५मी।

9. दूरबन्धुः—बध्नाति स्नेहेन हृदयमिति बन्ध+उ=बन्धु lit. friend, here

'wife'. दूर means दूरस्थ। तादृशः बन्धुः अस्य, बहु—। Qual. अहम्।
We avoid a व्यधिकरण बहु—as दूरे बन्धुरस्य, for the *Bhashya* says "व्यधिकरणानां मा भूत्"।

10. गतः—गम + क्त कर्त्तरि। Now, अहम्।

11. अधिगुणे—गुणमधिगतः अधिगुणः, प्रादि तत्—। तस्मिन्। अधि ७मी।

12. वरम्—The word means 'ईषत्प्रिय'। In this sense it is neuter. See Amara quoted in Malli. Also cp "समुन्नयन् भूतिमनार्यसङ्गमात् वरं विरोधोऽपि समं महात्मभिः"—Kirat I.

13 Voice.—त्वं जातः कामरूपः—पुरुषः ज्ञायसे दूरबन्धुना मया गतम्। याच्ञया मोघया भूयते...लब्धकामया न वरं भूयते...।

*7. Now he entrusts the cloud with his request to go to Alaka.*

**सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः**
**सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य।**
**गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां**
**बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या॥ ७॥**

Prak.—हे पयोद, त्वं हि सन्तप्तानाम् शरणम् [ O cloud, you are the resort of the afflicted ] Then what am I to do ?—तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर [ You carry my news to my darling, for I am separated from her through Kuvera's curse] Where shall I find your darling—यक्षेश्वराणां अलका नाम वसतिः ते गन्तव्या [ you will find her in Kuvera's abode entitled Alaka ]. Is there any distinguishing feature of Alaka ?—बाह्योद्यानस्थितहर-

शिरश्चन्द्रिकाधौतहर्म्या अलका [ You will notice there the mansions ever illuminated by moon-beams. This moonlight comes from the crest of Siva who is residing there in some outer garden. Hence you will have no difficulty to find out Alaka ].

Prose.—हे पयोद, त्वं हि सन्तप्तानां शरणमसि तत् धनपतिक्रोधविश्लेषितस्य मे सन्देशं प्रियायाः हर। बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या अलका नाम यक्षेश्वराणां वसतिः ते गन्तव्या।

Beng.—হে মেঘ, তুমি সন্তপ্তদিগের রক্ষিতা বটে, তাই তুমি কুবেরের শাপে বিযুক্ত আমার খবর প্রিয়াকে দাও। তুমি যক্ষরাজ কুবেরের বসতি অলকায় যাইবে। অলকার হর্ম্যসমূহ, বহ্যোপবনস্থ মহাদেবের মস্তকের চন্দ্রকিরণে সর্বদাই আলোকিত।

Eng.—O cloud, you are the saviour of the distressed, so convey to my darling news of me—separated by Kuvera's curse. You are to go to the Yaksha-king's abode entitled Alaka, where the mansions are washed by moon-beams emanating from the crest of Siva residing in an outer garden.

Expl.—Easy.

Sanj.—सन्तप्तानामिति। हे 'पयोद', 'त्वं सन्तप्तानाम् आतपेन वा प्रवासविरहेन संज्वरितानाम् [ "सन्तापः संज्वरः समौ" इत्यमरः ] 'शरणं' पयोदानेन आतपखिन्नानां प्रोषितानाञ्च स्वस्थानप्रेरणया च रक्षकोऽसि [ "शरणं गृहरक्षित्रोः इत्यमरः ] 'तत्' तस्मात् कारणात् 'धनपतेः' कुवेरस्य क्रोधेन 'विश्लेषितस्य' प्रियया वियोजितस्य 'मे' मम 'सन्देशं' वार्त्तां 'प्रियायाः हर' प्रियां प्रति नय इत्यर्थः [ सम्बन्ध सामान्ये षष्ठी ] सन्देशहरणेन आवयोः सन्तापं नुद इत्यर्थः। कुत्र स्थाने सा स्थिता तत्स्थानस्य वा किं व्यावर्त्तकं तत्राह—गन्तव्येति। वहिर्भवं बाह्यम् [ "वहिर्देवपञ्चजनेभ्यश्च" इति ष्यञ् ] 'बाह्ये उद्याने स्थितस्य हरस्य शिरसि' या चन्द्रिका' तया 'धौतानि' निर्मलानि 'हर्म्याणि' धनिकभवनानि यस्यां सा तथोक्ता ["हर्म्यादि धनिनां वासः" इत्यमरः] अनेन व्यावर्त्तकमुक्तम्। 'अलका नाम' अलका इति प्रसिद्धा यक्षेश्वराणां 'वसतिः' स्थानं ते तव गन्तव्या। त्वया गन्तव्या इत्यर्थः [ "कृत्यानां कर्त्तरि वा" इति षष्ठी ]॥

## Charcha.

1. सन्तप्तानाम्—सम्+तप+क्त कर्त्तरि=सन्तप्त distressed by heat and separation as well, तेषाम्। शेषे ६ष्ठी। The cloud solaces the heated by water and the separated by expediting their union. See Malli—पयोदानेन भातपखिन्नानाम् &c.

2. प्रियायाः—सम्बन्धसामान्ये षष्ठी। ४र्थी should have been better.

3. हर—हृ+लोट हि। Nom. त्वम्। Deriv, ante.

4. धनपति &c.—धनपति is Kuvera. क्रुध+घञ् भावे=क्रोध anger, hence curse. वि+श्लिष+णिच+क्त कर्मणि=विश्लेषित seperated. धनपतेः क्रोधः, ६तत्—। तेन विश्लेषितः, ३तत्—। तस्य। Qual. मे। मे has शेषे ६ष्ठी, related to सन्देशम्।

5. गन्तव्या—गम+तव्य कर्मणि स्त्रियाम्=गन्तव्या—Agrees with उक्तकर्म —वसतिः। Here कर्त्ता takes षष्ठी by the rule "कृत्यानां कर्त्तरि वा"।

6. नाम—प्राकाश्ये अव्यय। "नाम प्राकाश्य-सम्भाव्य क्रोधपगमकुत्सनेषु—च" इत्यमरः। अलका takes १मा in connection with 'इति' understood. Hence Malli says—"अलकानाम, अलकेति प्रसिद्धा"।

7. वाह्य &c.—वहिर्भवम् इति वहिस+ञ्य=वाह्यम् outer. See also Malli; the quotation in Malli "वहिर्देवे—&c is from Kasika. वाह्यमुद्यानम्, कर्मधा—। तत्र स्थितः, सुप्सुपा—। तादृशः हरः, कर्मधा—। तस्य शिरः, ६तत्—। तस्य or तस्मिन् चन्द्रिका, ६तत्—or सुप्सुपा—। तया धौतानि, ३तत्—। तादृशानि हर्म्याणि, वहु—। Qual. अलका। This epithet characterises अलका। See "अनेन व्यावर्त्तकमुक्तम्"—Malli। [ चन्द्रशब्दात् साम्रायां कन् ततः स्त्रियथंटाप् इति चन्द्रिका moon beams ].

8. Voice.—...श्रवणेन भूयते...सन्देशः क्रियताम्।...वसत्या गन्तव्यया भूयते...[ अलका has १मा with इति, which always declares the कर्म; cp. "क्वचिन्निपातेनाभिधानम्"—Bhattoji ].

*8. you undertaking my task will also encourage the separated.*

**त्वामरूढं पवनपदवीमुद्गृहीतालकान्ताः**
**प्रेक्षिष्यन्ते पथिकवनिताः प्रत्ययादाश्वसत्यः ।**
**कः सन्नद्धे विरहविधुरां त्वय्युपेक्षेत जायां**
**न स्यादन्योऽप्यहमिव जनो यः पराधीनवृत्तिः ॥ ८ ॥**

Prak.—पवनपदवीमारूढं त्वां पथिकवनिता प्रेक्षिष्यन्ते [ The wives of those travalling abroad will seeyou on your aerial track ]. How is this possible—उद्गृहीतालकान्ताः पथिकवनिताः [ They will lock up their hairs and watch up at you ]. Will this benefit them ? प्रत्ययात् आश्वसत्यः [ None lives separate from the beloved in the ratny season, and your advent will mark the rainy season hence these bereaved ladies will be charished with the hope of their beloved's return. Thus your sight will give them im mense benefit ] I can't follow you—कः त्वयि सन्नद्धे विरहविधुरां जायामुपेक्षेत [ when you are in the sky, who will neglect their wife pining through separation ]. If they can't avoid this ! —अहमिव यः जनः पराधीनवृत्तिः न स्यात् ( सः ) कः उपेक्षेत [ All are not dependent like me. Those who are thus independent will not brook separation at your advent. Hence your rising in the sky will benefit the bereaved travellers wife by hastening their husbands home.

Prose.—पथिकवनिताः प्रत्ययात् आश्वसत्यः उद्गृहीतालकान्ताः ( सत्यः ) पवनपदवीमारूढं त्वां प्रेक्षिष्यन्ते । त्वयि सन्नद्धे, अहमिव यः जनः पराधीनवृत्तिः न स्यात् ( सः ) कः अन्यः विरहविधुरां जायामुपेक्षेत ।

**Beng.**—তুমি আকাশমার্গে আরূঢ় হইলে পথিকবনিতাগণ, প্রিয়তম সত্বর আসিবেন এই বিশ্বাসে আশ্বস্ত হইয়া তাদের কেশরাজি উত্তোলন করিয়া তোমাকে

দেখিবে, আমার স্থায় যে পরাধীন নয়, সে তোমাকে আকাশে সমুদিত দেখিয়া বিরহ-কাতরা জায়াকে নিশ্চই উপেক্ষা করিবে না।

Eng.—The wives of travellers, will look up to your aeriel way, with their locks ofhairs raised up and being comforted with the thought ( of thesr husband's arrival ). You being on in the sky, who else that is not dependent on others like that of me, can neglect their wives pulled down through separation ?

Expl.—In the rainy season everyone if circrmstances permit hasten to their bereaved wives- And as your rise will indicate the rainy season, so you being on in the sky the treveller's wives will be comforted at the belief that their husbands will soon return.

Sanj.—मदर्थं प्रस्थितस्य ते पथिकाङ्गनाजनाश्वासनमानुषङ्गिकं फलम् इत्याह त्वामिति। 'पवनपदवीमारूढ़' त्वाम्', पन्थानं गच्छन्तिये पथिका: [ "पथष्कन्" इति ष्कन् प्रत्यय:] तेषां 'वनिता:' प्रोषितभर्तृका: 'प्रत्ययात्' प्रियागमनविश्वासात् ["प्रत्ययोऽधीनशपथज्ञानविश्वासहेतुषु" इत्यमर: ] 'अश्वसत्य:' विश्वसिता: [ श्वसिधातो: शस्त्रन्तात् "उगितश्च" इति ङीप् ] तथा 'उदगृहीतालकान्ता' दृष्टिप्रसारार्थमुन्नमस्य धृतालकान्ता: सत्य: प्रेक्षिष्यन्ते। भर्तुरुत्कण्ठतया द्रक्ष्यन्ति इत्यर्थ:। मदागमनेन पथिका: कथमागमिष्यन्तीत्यत्राह—'त्वयि सन्नद्धे' व्यापृते सति विरहेण विधुरांविवशां 'जायां क उपेक्षेत' न कोऽपि इत्यर्थ: मद्यतिरिक्तोऽपि 'योजन: पराधीनवृत्ति:' परायत्तजीवनको न स्यात्। स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भाव: [ अत्र अर्थान्तरन्यासोऽलङ्कार:। तदुक्तम्—"कार्य्यकारणसामान्यविशेषाणां परस्परम्। समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृत:" इति लक्षणात् ] ॥ ८ ॥

## Notes on Malli.

1, Here the figure is अर्थान्तरन्यास। Thus it is said, wben the effect or the cause is supported by either of this or when a

general or a particular statement is supported by either of them, then the figure is अर्थान्तरन्यास ।

## Charcha.

1. आरूढम्—आ + रुह + क्त कर्त्तरि = आरूढ risen. तम् । Qual. त्वाम् ।

2. पवन &c.—पदवी track. पवनस्य पदवी, ६तत्— । The track by which air flows i. e., sky . ताम् । Obj. of आरूढम् ।

3. उदगृहीत &c.—उद् + ग्रह + क्त कर्मणि = उदगृहीत raised up. अलक locks of hair. तेषां अन्ताः, tips of locks &c. ६तत्— । उदगृहीता अलकान्ता याभिः, बहु— । ताः । Pred. to वनिताः । The hair being tied up they will have a good look at the cloud.

4. प्रेक्षिष्यन्ते—प्र + ईक्ष + लृट् अन्ते । Nom. वनिताः । ईक्षते, ऐक्षिष्ट, ईक्षाचक्रे &c.

5. प्रत्ययात्—प्र + अति + इ + अच् भावे = प्रत्यय belief, confidence. तस्मात् । हेतौ ५मी । The belief was the hope of union with the husbands—"प्रत्ययात् प्रियागमनविश्वासात्"—Malli. For the reason as to how the belief arises—see Expl. above.

6. आश्वसत्यः—आ + श्वस ( अदादि ) + शतृ लटः स्थाने + ङीप् स्त्रियाम् = आश्वसती cheering. ताः । Qual. पथिकवनिताः । For अदादि use of श्वस, cp "समाश्वसिहि समाश्वसिहि"—*Sak.* and *uttar.* Some read आश्वसन्त्यः here, in that case the root is to be taken as भ्वादि and नुम् in शतृ coming by the rule "श्यप्श्यनोः नित्यम्" । For भ्वादि use of श्वस compare" "न विश्वसेदविश्वस्ते विश्वस्तेऽपि नातिविश्वसेत्"—*Mah*, "आश्वसेयुः निशाचराः"—*Bhatti.* The root however is really अदादि, hence we prefer Malli's reading. Bhattoji defends its भ्वादि use saying "तन्त्रादित्वादेव सिद्धे क्रम् यहणं गणकार्य्यस्यानित्यत्वे लिङ्गम् । तेन न

विश्वसेदित्यादि सिद्धम्"। Madhava says "श्वसेत्—अत्र गणकार्यस्यानित्यत्वज्ञापनात् श्नपो लुक् न भवति। अनित्यत्वं च अमूषो घटादिपाठात् "घटादयः षितः" इत्येव षित्वे सिद्धे पुनः षित्करणात् ज्ञायते"।

7. सन्नद्धे—सम्+नह (बन्धने)+क्त कर्त्तरि=सन्नद्ध arrayed. तस्मिन्। Pred. to त्वयि (which has भावे ७मी)। In this sense of संनद्ध—cp. "नवजलधरः सन्नद्धोऽयं न दृप्तनिशाचरः"—*Vikramorvasi.*

8. विरह &c.—विगता (or—विघटिता) धूरस्याः इति विधुरा, बहु—। It means दुःखिता। Here समासान्त comes by the rule "ऋक्पूरब्धूःपथामानक्षे"। विरहेण विधुरा, ३तत्—। ताम्। Qual. जायाम्।

9. उपेक्षेत—उप+ईक्ष+ईत (लिङ्)। Nom. कः। Here लिङ् is शक्ति। Thus उपेक्षेत—उपेक्षितुं शक्नुयात्।

10. पराधीनवृत्तिः—वृत+क्तिन् भावे=वृत्ति livelihood. परेषु अधि इति पराधीना, ७मी तत्—। अधुत्तर पदात् खः इति खप्रत्ययः। पराधीना वृत्तिरस्य, बहु—। He who is स्वतन्त्र and not dependent like me must not neglect their beloved—"स्वतन्त्रस्तु न कोऽपि उपेक्षेत इति भावः"—Malli.

11. Voice.—पथिकवनिताभिः आश्वसतीभिः—अलकान्ताभिः आरूढः त्वं प्रेक्षिष्यसे...मया इव येन जनेन—वृत्तिना न भूयेत...तेन केन अन्येन विधुरा जाया उपेक्ष्येत।

*9. You will find my wife counting days in expectation.*

तां चावश्यं दिवसगणनातत्परामेकपत्नी-
मव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम्।
आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां
सद्यःपाति प्रणयि हृदयं विप्रयोगे रुणद्धि॥ ९॥

[N. B.—Malli reads it as the 10th verse and the tenth one ( e. g. मन्दं मन्दं नुदति &c. ) as the 9th. But then the च of this sloka becomes superfluous. Further verses मन्दं मन्दं &c. and कर्त्तुंयच्च should be consecutive as indicating auspicious journey. Again as in this verse the principal object of the jouney is indicated so it should naturally come after the verse 8 ( e. g. त्वामारूढ़म् &c ). Hence we read it here. ].

Prak.—अविहतगतिस्त्वम् दिवसगणनातत्पराम् अव्यापन्नामेकपत्नीं तां भ्रातृजायाम् अवश्यं द्रक्ष्यसि च [ you will surely find my wife ( your sister-in-law ) counting days as to the end of my punishment. She is all right and observing the vow of a साध्वी ] Will not the separation hang heavy on him ?—आशाबन्धः अङ्गनानां प्रणयि कुसुमसदृशम् ( अतः ) विप्रयोगे सद्यःपाति हृदयं प्रायशः रुणद्धि [ It is sure that soft hearts of women almost give way in separation ; still the hope of union in a future time sustains their life. Similarly my wife is in anxious expectation of the day of union ].

Prose.—See Prak. above.

Beng.—এবং অবিঘ্নগতি তুমিও, শাপাবসানের দিন গণনায় ব্যস্ত ( অতএব ) অমৃত পতিব্রতা ভ্রাতৃজায়াকে নিশ্চয়ই দেখিবে। ( কারণ ) স্ত্রীলোকের প্রণয়ি, কুসুমসুকুমার এবং বিয়োগকালে নষ্টপ্রায় হৃদয়কে আশাতন্তুই সাধারণতঃ রক্ষা করিয়া থাকে।

Eng.—With course unhampared, you too will find your devoted sister-in-law engaged in counting the days ( of my punishment ) and dragging her existence ; generally the tie of hope sustains the loving hearts of women, soft like flowers and almost collapsing at separation.

Expl.—See *Prak.* and *Eng.*

Sanj.—न च तस्या नाशात् व्रतखलनाद्वा निरर्थकस्त्वत्प्रयास इत्याह—ताञ्चेति। हे मेघ 'दिवसानाम् अवशिष्ट दिनानां 'गणनायां' संख्याने तत्परामासक्ताम् [ "तत्परे प्रसितासक्तौ" इत्यमरः ] अतएव 'अव्यापन्नाम्' अमृताम्। शापावसाने मदागमन-

प्रत्याशया जीवन्तीमित्यर्थः। एक पतिर्यस्या 'एकपत्नी' ताम्, पतिव्रतामित्यर्थः [ "नित्य" सपत्न्यादिषु—" इति ङीप्, नकारश्च ] 'भ्रातुः' मे जायां 'भ्रातृजायाम्'। मातृवन्निशङ्कं दर्शनीयामित्याशयः। 'तां' मत्प्रियाम् अविहतगतिः अविच्छिन्नगतिः सन् अवश्यं द्रक्ष्यसि च' आलोकयिष्यसे एव। तथाहि—'आशा' अतितृष्णा [ "आशा दिगतितृष्णयोः" यादवः ] बध्यते अनेन इति बन्धः बन्धनम्, वृन्तमिति यावत्। आशा एव बन्ध 'आशाबन्धः' [ कर्त्ता ] 'प्रणयि' प्रेमयुक्तम् अतएव 'कुसुमसदृशं' सुकुमारम् इत्यर्थः। अतएव 'विप्रयोगे' विरहे 'सद्यःपाति' सद्योभंशनशीलम् 'अङ्गनानां हृदयं' जीवितम् [ "हृदयं जीविते चित्ते वक्षस्याकूतयोः," इति शब्दार्णवः ] 'प्रायशः' प्रायेण 'रुणद्धि' प्रतिबध्नाति [ अर्थान्तरन्यासः ] ॥ ९ ॥

## Notes on Malli.

1. By तात्र etc. he says, your attempt will not go amiss owing to her death or breaking of vow ( of a साध्वी )।

## Charcha.

1. च—Malli renders it as एव ( certainty ). But as this verse is placed by us as 9th, so we take 'च' meaning 'and' ( समुच्चये )।

2. दिवस &c.—गण + णिच् + युच् भावे = गणना counting. तदेव परं प्रधानमस्या इति तत्परा, बहु—। दिवसानां गणना, ६तत्—। तस्यां तत्परा, सुप् सुपा—। ताम्। Qual. भ्रातृजायाम्। She is surely counting the termination of my curse.

3. एकपत्नीम्—एकः पतिः अस्या इति एक + पति + ङीप् = एक् + पति + न् + ङीप् = एकपत्नी a devoted wife. ताम्। Qual. भ्रातृजायाम्। Here न and ङीप् in the feminine comes by the rule "नित्य सपत्न्यादिषु—"।

4. अव्यापन्नाम्—वि + आ + पद + क्त कर्त्तरि स्त्रियाम् = व्यापन्ना dead. न तथा, नञ्तत्—। ताम्। Qual भ्रातृजायाम्। See Malli. "शापावसाने ...जीवन्तीम्"।

5. अविहतगतिः—गम + क्तिन् भावे = गतिः course. वि + हन + क्त कर्त्तरि = विहत obstructed. न विहता, नञ्तत्। तादृशी गतिरस्य, बहु—। Qual. त्वम्।

6. द्रक्ष्यसि—दृश + लृट् स्यसि। Nom. त्वम्। पश्यति, अपश्यत्, अद्राक्षीत्।

7. भ्रातृजायाम्—भ्रातुः जाया, ६तत्—। ताम्। Obj of द्रक्ष्यसि। The यक्ष was now a brother unto the cloud, hence his wife was cloud's भ्रातृजाया। By this epithet यक्ष also commands motherly respect from him.

8. आशाबन्धः—See Malli. Or—आशायाः बन्धः tie of hope, ६तत्—। Nom. to रुणद्धि।

9. कुसुम &c.—कुसुमेन सदृशम्, ३तत्—। Qual. हृदयम्; female hearts are very soft indeed.

10. प्रायशः—प्रायेण इति प्राय + टा (३या) + शस् = प्रायशः generally. Qual. रुणद्धि। The word has the sense of तृतीया which is according to the varttika "प्रकृत्यादिभ्यश्चोपसंख्यानम्"। The rule for शस् is "बह्वल्पार्थात् शस्कारकादन्यतरस्याम्"।

11. सद्यःपाति—सद्यः—an अव्यय meaning 'immediately. सद्यः पतितुं शीलमस्य इति सद्यः + पत + णिनि कर्त्तरि ताच्छील्ये = सद्यःपाति breaking then and there. Qual. हृदयम्।

12. विप्रयोगे—वि + प्र + युज + घञ्भावे = विप्रयोग separation. तस्मिन्। अधि ७मी।

13. रुणद्धि—रुध+लट ति ; holds up, sustains. Nom. आशाबन्धः । अरुणत्—अरुन्ध, अरौत्सीत्—अरुधत्—अरुद्ध—ररोध ।

14. Voice.—...तत्परा अव्यापन्ना एकपत्नी सा भ्रातृजाया...—गतिना त्वया द्रक्ष्यते ( or दर्शिष्यते ) आशाबन्धेन...रुध्यते ।

15. Parallel :—

"आशातन्तुर्नच कथयतात्यन्तमुच्छेदनीयः । प्राणवान् कथमपि करोत्यायतात्याः स एकः ।"—*Malati Madhava. IX.*

"गुर्वपि विरहदुःखं आशाबन्धः साहयति"—*Sak.* Act IV.

"शक्यं खल्वाशाबन्धेनात्मानं धारयितुम्"—*Vikram. III.*

### 10. *Auspicious signs in breezes &c.*

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वां**
**वामश्चायं नदति मधुरं चातकस्ते सगन्धः ।**
**गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः**
**सेविष्यन्ते नयनसुभगं खे भवन्तं बलाकाः ॥ १० ॥**

Prak.—Easy.

Prose.—यथा ( यस्मात् ) अनुकूलः पवन त्वां मन्दं मन्दं नुदति, अयं सगन्धः वामः चातकश्च मधुरं नदति ; (तथा ) गर्भाधानक्षणपरिचयाम् खे आबद्धमालाः बलाकाः नयनसुभगं भवन्तं सेविष्यन्ते ।

Beng.—যেহেতু অনুকূল বায়ু তোমাকে ধীরে ধীরে প্রেরণ করিতেছে, এবং বামস্থ তোমার সম্বন্ধী এই চাতকপক্ষী ডাকিতেছে, সেই জন্য গর্ভাধানসুখের অভ্যাস হেতু আকাশমার্গে শ্রেণীবদ্ধ বলাকাগণও দৃষ্টিসুন্দর তোমার সেবা করিবে ।

Eng.—As favourable breeze gently urges thee on and as this proud ( related ) chataka bird on your left sweetly twitters, so also will the cranes formed into a line owing to

their familiarity with thee at the time of gestation, will serve thee of lovely sight.

Expl.—Easy.

Sanj.—निमित्तान्यपि ते शुभानि दृश्यन्ते इत्याह मन्दं मन्दमिति। 'अनुकूलः पवनः' वायुः त्वां 'मन्दंमन्दम्' अतिमन्दम् इत्यर्थः [ अत्र कथंचित् वीप्सायामेव द्विरुक्ति-निर्वाह्या। "प्रकारे गुणवचनस्य" इत्येतदाश्रयणे तु कर्मधारयवद्भावे सुब्लुकि मन्द-मन्दमिति स्यात्। तदेवाह वामनः—"मन्दंमन्दमित्यत्राप्रकारार्थे द्विर्भावः" इति'1 ] 'यथा' सादृश्यम्, भाविफलानुरूपमित्यर्थः [ "यथा सादृश्ययोग्यतावीप्सास्वर्थानतिक्रमे" इति यादवः ] 'नुदति' प्रेरयति। अयं 'सगन्धः' सगर्वः सम्बन्धीतिकेचित् [ "गन्धो गन्धके आमोदे लेशे सम्बन्धगर्वयोः" इति विश्वः ] ते तव 'वामो' वामभागस्थः [ "वामस्तु वक्रे रम्ये स्यात् सव्ये वामगतेऽपि च" शब्दार्णवः ] 'चातकः' पक्षिविशेषश्च 'मधुरं' श्राव्यं 'नदति' व्याहरति। इदं निमित्तद्वयं वर्त्तते। वर्त्तिष्यते चापरं निमित्तमित्याह—गर्भेति। गर्भः कुक्षिस्थो जन्तुः। [ "गर्भोऽपवरके स्यग्रौ सुतेपन-सकण्टके। कुक्षौ कुक्षिस्थजन्तौ च' इति यादवः ] तस्य 'आधानम्' उत्पादनम् तदेव 'क्षणः' उत्सवः सुखहेतुत्वादिति भावः [ "निर्व्यापारस्थितौ कालविशेषोत्सवयोः क्षणः" इत्यमरः ] तस्मिन् 'परिचयात्' अभ्यासात् हेतोः 'खे' व्योम्नि 'आबद्धमालाः' गर्भाधान-सुखार्थं त्वत्समीपे बद्धपङ्क्तय इत्यर्थः [ उक्तं च कर्णोदये "गर्भं बलाका दधतेऽभ्र-योगान्नाके निबद्धावलयः समन्तात्" इति ] 'बलाका' बलाकाङ्गना'नयनसुभगं' दृष्टिप्रियं 'भवन्तं नूनं' सत्यं सेविष्यन्ते [ अनुकूलमारुतचातकशब्दितबलाकादर्शनानां शुभसूचकत्वं शकुनशास्त्रे दृष्टः तद्विस्तरभयान्नलिखि2 ] ॥ १० ॥

## Notes on Malli.

1. Duplication in मन्दं मन्दं is somehow to be defended by वीप्सा ( pervasion ). If the द्विर्वचन be प्रकारे by the rule "प्रकारे गुण-वचनस्य" then the form will be मन्दमन्दम् with a कर्मधारय समास। Hence Vamana says—"In मन्दं मन्दम् there is द्वित्व in the sense of

अप्रकार [ N.B.—The reading in Malli should be अत्र अप्रकारार्थे द्विभाव:, otherwise no reasonable meaning can be got ]. 2. Auspiciousness of favourable wind, twittering of chataka and crane-sight is seen, but it is not written through fear of excessiveness.

## Charcha.

1. मन्दं मन्दम्—Malli defends this duplication by वीप्सा। But here the idea of वीप्सा does not appeal to us. प्रकारार्थ suits the context very well. Thus—मन्द is gentle, a गुणवचन word qualifying नुदति ; the sense being मन्दप्रकारं नुदति। Then the form however should be मन्दमन्दम्, the whole being treated like a कर्मधा compound by the rule "कर्मधारयवदुत्तरेषु—"। Such irregularity is sometimes common with poets, cp "किमपि किमपि मन्दं मन्दमासत्तियोगात्"—*uttaracharita.* Act I. sl. 27. But our poet is not always irregular cp "क्षामक्षामकपोलमाननम्" &c. Sak. I. "कथं मन्दमन्दातपं स्यात्"—sl. 112. *Infra.* A defence may however be attempted—मन्दं नुदति urges gentle, मन्द being क्रियाविशेषण। मन्दं यथा तथा मन्दं नुदति—slowly urges gently i. e , urges very gently.

2. नुदति—नुद ( प्रेरणे ) + लट ति। Nom. पवन:।

3. यथा—Malli renders it as सदृशम् meaning भाविफलानुरूपम्। Then he makes it an adv. qual. नुदति। Better take it as हेतौ थ्या ; thus यथा = येन हेतुना। यद् and तद् being correlative, तथा (i.e., तेन हेतुना ) in the second half is understood. See our Prose above.

4. वाम:—वाम means वामस्थ:। Adj. qual. चातक:। चातक on

the left is auspicious, cp "वह्निश्चातकाश्चाषा ये च पुंसंज्ञिताः खगाः। मृगा वा वामगा इष्टाः सैन्यसम्पत्बलप्रदाः॥—quoted by Wilson.

5. नदति—नद+लट ति। Nom. चातकः, ; chirping of birds at start are auspicious indeed—"तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः"—*Bhatti.*

6. सगन्धः—गन्ध is गर्व pride. तेन सह वर्त्तमानः सगन्धः, बहु—by the rule "तेन सहेति तुल्य योगे"। Or—गन्ध is relation सम्बन्ध। तेन सह वर्त्तमानः सगन्धः related. As *ckatakas* are seen during cloud so they are related to it. In this sense of गन्ध cp "सर्वः सगन्धेषु विश्वसिति"—Sak. V. Qual. चातकः।

7. गर्भाधान &c.—गर्भस्य आधानम् taking of conception, ६तत्—। तदेव क्षणम् ( उत्सवः ) festivity of taking &c., कर्मधा—। तस्मिन् परिचयः ( अभ्यासः ) familiar with the festivity of taking conception सुप्सुपा। तस्मात्। हेतौ ५मी। cranes take conception in rainy season, cp "गर्भं बलाका अभ्रयोगात्" &e.—Malli. As you will procceed you will find cranes delighted and flocking round you for enjoyment of taking conception.

8. आबद्धमालाः—माला row. आ+बन्ध+क्त=आबद्ध bound, formed. आबद्धा माला याभिः, बहु—। ते। Qual. बलाकाः। cranes fly in circles and rows, cp "मेघिबन्धाहितन्वङ्गिस्तम्भां तोरणस्रजम्" Raghu.

9. सेविष्यन्ते—सेव+लृट स्यन्ते। Nom. बलाकाः। They will greet your advent for festivety hence in a manner they will serve you, cp "प्रेङ्डीयेव बलाकया सरभसं सोत्कण्ठमालिङ्गितः"—*Mrichchakatika.*

10. नयन &c.—सुभग beautiful, नयनयोः सुभगः शेषषष्ठ्या समासः। तम्। Qual. भवन्तम्।

11. Voice.—अनुकूलेन पवनेन त्वं नुद्यसे...वामेन सगन्धेन अनेन चातकेन नद्यते...मालाभिः बलकाभिः—सुभगः भवान् सेविष्यते...

*11. And swans will join you on your way,*

कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्यां
तच्छ्रुत्वा ते श्रवणसुभगं गर्जितं मानसोत्काः ।
आ कैलासाद्बिसकिसलयच्छेदपाथेयवन्तः
संपत्स्यन्ते नभसि भवतो राजहंसाः सहायाः ॥ ११ ॥

[ N. B.—The 'च' in this sloka keeps up the समुच्चय with the previous sloka. Hence it is desirable that slokas मन्दं मन्दं &c. and कर्त्तुं यच्च should be consecutive ].

Prak.—राजहंसा नभसि भवतः सहायाः सम्पत्स्यन्ते [ The swans will be your companion in your sojourn to the abode of Kuvera at Alaka ]. Will they follow me all along ?—आ कैलासात् सहायाः [They will be your companions up to Kailasa mountain ]. But what will they eat during this long journey ?—बिसकिसलयच्छेदपाथेय-वन्तः राजहंसाः [ The swans know that it will take a time to cover this journey. Hence for this, they take with them lotus stalks as their provender ]. But how will they know you proceeding in the sky ?—ते तत् श्रवणसुभगं गर्जितं श्रुत्वा मानसोत्काः राजहंसाः [ In the rainy season swans proceed towards *manasasarovara.* And your procession in the sky will surely be accompanied by deep rumbles. This will remind the swans of the advent of rainy season. And up they will follow you in your aeriel way up to Kailasa ]. This is not all !—यत् गर्जितं महीम् उच्छिलीध्राम् अतः (अवन्ध्यां) कर्त्तुं प्रभवति तत् श्रुत्वा [ They will catch that peculiar rumble of yours which makes the earth full of mush rooms the precur-

sor of brumper crop. Hence this particular rumble cannot avoid the ears of the swans waiting to start for Kailasa ].

Page.—यत् गर्जितं महीम् उच्छिलीन्ध्राम् ( अत: ) अवन्ध्यां कर्तुं प्रभवति, ते तत् श्रवणसुभगं ( गर्जितं ) श्रुत्वा मानसोत्का: विसकिसलयच्छेदपाथेयवन्त: राजहंसा: नभसि भवत: आ कैलासात् सहाया: सम्पत्स्यन्ते ।

Beng.—যে মেঘগর্জন পৃথিবীকে কন্দলীপূর্ণ (অতএব) শস্যযুক্ত করে, তোমার তাদৃশ শ্রবণসুভগ গর্জন শুনিয়া মানসসরোবরে গমনে উৎসুক রাজহংসগণ, পথে যাইবার জন্য মৃণালখণ্ড লইয়া আকাশে কৈলাস পর্য্যন্ত তোমার সাথী হইবে।

Eng:—On hearing that ear-regaling rumble of thine, which makes the Earth full of mush rooms and hence fruitful as well, the swans eager to start for Manasa lake will be your aerial companion up to Kailasa ( mountain ), being provided with provender of pieces lotus-stalks.

Expl.—See Prak.

Sanj.—सम्प्रति सहायसम्पत्तिश्चास्तीत्याह कर्त्तुमिति—'यत्गर्जितं [ कर्तृ ] 'महीमुच्छिलीन्ध्राम्' उद्भूतकन्दलिकां [ "कन्दल्याञ्चशिलीन्ध्रा स्यात्" इति शब्दार्णव: ] अतएव 'अवन्ध्यां' सफलां 'कर्तुं प्रभवति' शक्नोति [ शिलीन्ध्राणां भाविशस्यसम्पत्तिसूचकत्वात् इति भाव: । तदुक्तं निमित्तनिदाने—"कालाभ्रयोगात् उदिता शिलीन्ध्रा: सपन्नशस्यां कथयति धात्रीमिति" I ] 'तत् श्रवणसुभगं' श्रोत्रसुखं, लोकस्य इति शेष: ; 'ते तव गर्जित श्रुत्वामानसोत्का:' मानसे सरसि उत्मनस: उत्सुका इति यावत् [ "उत्क उन्मना" इति निपातात्साधु ] कालान्तरे मानसस्य हिमदुष्टत्वात् हिमस्य च हंसानां रोगहेतुत्वात् अन्यत्र गता हंसा: पुनर्वर्षासु मानसमेव गच्छन्तीति प्रसिद्धि:2 । विसकिसलयानां मृणालपत्राणां 'छेदै:' शकलै: 'पाथेयवन्त:' । पथि साधु 'पाथेयं' पथि भोज्यम् [ "पथ्यतिथिवसतिस्वपतेर्ढञ्" ] भवन्त: मृणालकन्दशकलसम्बलवन्त इत्यर्थ: । 'राजहंसा' हंसविशेषा: [ "राजहंसास्तु ते चञ्चुचरणै लोहितै: सिता:" इत्यमर: ] 'नभसि' व्योम्नि 'भवत:' तव 'आ कैलासात्' कैलासपर्य्यन्तम् [ पदद्वयञ्चैतत् ] 'सहाया:' सयाता: [ "सहायस्तु सयाव: स्यात्" इति शब्दार्णव: ] 'सम्पत्स्यन्ते' भविष्यन्ति ॥११॥

## Notes on Malli.

1. The sense is, the mush-rooms being indicative of future good harvest. Thus Nimitta-nidana saya.—The nursh-rooms grown with the advent of black clouds speak of earth's fertility". 2. In other seasons the Manasa lake being covered with frost and frost being propagators of disease to swans, they go to other places at that time but in rainy season they again proceed to Manasa.

## Charcha.

1. च—Malli does not explain it in his Tika and omits its propriety for which see above.

2. प्रभवति—प्र+भू+लट ति। Nom. गर्जितम्।

3. उच्छिलीन्ध्राम्—शिलीन्ध्रा is कन्दली mush room. उद्गता शिलीन्ध्रा यस्याः, बहु—by the varttika "प्रादिभ्यो धातुजस्य बहुब्रीहिरुत्तरपदलोपश्च वक्तव्यः"। ताम्। Qual. महीम्। The growth of these in the rainy season forebode bumper hervest that year. Hence it is a reason why मही should be अवन्ध्या ( वन्ध+यत् कर्मणि स्त्रियाम् )। 'कवके छत्र-जातौ च शिलिन्ध्रं स्मर्य्यते बुधैः"।

4. श्रवण &c—श्रु+ल्युट करणे=श्रवण ears. तयोः सुभगम् शेषषष्ठी-समासः। Qual. गर्जितम्। The rumble of rain clouds are pleasing to men's ears, cp "बलाहका श्रोतमनोहरस्वनाः"—*Ritu-samhara.*

5. मानसोत्सुकाः—मानस is the laka ( manasa ). उद्+कन् स्वार्थे =उत्क anxious उत्कण्ठित। The rule for कन् is "उत्क उन्मना"; मानसे उत्काः, सुप्सुपा—। Qual. राजहंसाः। The swans go to manasa lake in the rainy season. Cp "यस्यास्तोये कृतवसतयो मानस-, संनिकृष्टम्" &c.—Sl. 81.—*Infra.*

6. कैलासात्—५मी in connection with, आङ् in the sense of of मर्य्यादा (exclusion) ; आङ् in this sense is a कर्मप्रवचनीय by the rule "आङ् मर्य्यादा वचने"। Then we get ५मी by the rule" पञ्चम्य-पाङ्परिभिः"। Kailasa is a famous mountain, the abode of Siva, cp verses 60-62 and notes there on.

7. बिस &c.—बिस is lotus-stalk. किसलय is tip ( अग्र )। छिद +घञ कर्मणि=छेदः piece. बिसस्य किसलयानि, ६तत्—। तेषां छेदाः, ६तत्—। पाथेय ( पथि+ढञ् ) is provender. तदस्ति एषामिति पाथेय+वतुप् ( मत्वर्थे )=पाथेयवन्तः। बिसकिसलयच्छेदैः पाथेयवन्तः, ३तत्—। Qual. राजहंसाः। Here the epithet बिसकिसलयच्छेदपाथेयाः with a बहुब्रीहि ( at the end ) would have served the purpose equally well. Hence मतुप् is superfluous. Cp—"न कर्मधारयात् मत्वर्थीयो बहुब्रीहिश्चेत् अर्थप्रतिपत्तिकरः"। Vikramorvasi has a similar sentiment in—"पश्चात्सरः प्रति गमिष्यसि मानसं त्वं पाथेयमुत्सृज बिसं ग्रहणाय भूयः"—Act IV.

8. सम्पत्स्यन्ते—सम्+पद+लृट् स्यन्ते। N. m. राजहंसाः। पद्यते, अपद्यत, पेदे।

9. नभसि—अधि ७मी। Q. In what other sense is नभस् used in your text ?—*Ans.* See Sl. 4.

10. Voice.—येन प्रभूयते...मानसोत्कैः...पाथेयवद्भिः राजहंसैः सहायैः सम्पत्स्यते...।

## 12. *Embrace this mountain Ramgiri.*

आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं
वन्द्यैः पुंसां रघुपतिपदैरङ्कितं मेखलासु।
काले काले भवति भवतो यस्य संयोगमेत्य
स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम् ॥ १२ ॥

Prak.—प्रियसखम् अमुं तुङ्गं शैलम् आलिङ्ग्य आपृच्छस्व [ Embrace this lofty mountain, your dear friend and honour him ]. Why this honour ?—पुंसां वन्द्यैः रघुपतिपदैः मेखलासु अङ्कितं शैलम् [ This mountain bears on it peaks marks of Rama's footprints. Hence it deserves honour ] But is this Ramgiri hill a friend of mine ?—काले काले भवतः संयोगमेत्य चिरविरहजं वाष्पं मुञ्चतः यस्य स्नेहव्यक्तिः भवति [ In every rainy season, clouds coming in contact with this hill, discharge waters. And this discharge of first rains is hot, for summer has already made the roots of the hill heated. The poet fancies this phenomenon as the shedding of tears at the union of friends after a long separation. Thus the mountain availing itself of your meeting cannot but shed hot tears out of joy for his friend and thereby show his flow of affection for you ]. 12.

Prose.—See *Prak*, and *Sanj.*

Beng.—লোকবন্দ্য রামচন্দ্রের পদচিহ্নে অঙ্কিত, তোমার প্রিয়বন্ধু ঐ উচ্চ রামগিরি পর্বতকে আলিঙ্গন করিয়া সম্ভাষণ কর। ঐ পর্ব্বত প্রতি বর্ষকালেই তোমার মিলন লাভ করিয়া, চিরবিরহজন্য উষ্ণ বাষ্প ত্যাগ করতঃ প্রেমের পরিচয় দিয়া থাকে।

Eng.—Embrace and honour this yonder lofty mountain ( Ramgiri ), your favourite friend, whose slopes are marked with the all-worshipped foot-prints of Rama. This mountain in every year getting your union sheds warm tears due to long separation and thus manifests flow of affection ( for you ).

Expl.—See Prak.

Sanj.—आपृच्छस्वेति—प्रियं सखायं 'प्रियसखं' [ "राजाहः सखिभ्यष्टच्"—इति टच्समासान्तः ] 'तुङ्गम्' उन्नतं॥'पुंसां वन्द्यैः' रामपादन्यासैः 'मेखलासु'

कटकेषु [ "अथ मेखला श्रोणिस्थानेऽद्रिकटके कटिवन्धेऽभवन्धने" इति यादवः ] 'अङ्कितं' चिह्नितम् ; इत्थं सखित्वात् महत्वात् पवित्रत्वाच्च सम्भावना 'इमम् शैलं' चित्रकूटाद्रिम् 'आलिङ्ग्य आपृच्छस्व'—साधो, यामि इत्यामन्त्रणेन सभाजय [ "आमन्त्रण-सभाजने आप्रच्छनम्" इत्यमरः "आङि नुप्रच्छ्योः" इत्यात्मनेपदम् ]। सखित्वं निर्वाहयति—'काले काले' प्रतिप्रावृटकालं, सुहृत्समागमनकालाश्च कालशब्देनोच्यते [ वीप्सायां द्विरुक्तिः ] भवतः संयोगं सम्पर्कमित्यचिरविरहजम् उष्णं वाष्पम् उष्माणं, नेत्रजलञ्च [ "वाष्पः नेत्रजलोष्मणोः" इति विश्वः ] 'मुञ्चतो यस्य' शैलस्य 'स्नेहव्यक्तिः' प्रेमाविर्भावो 'भवति'। स्निग्धानां हि चिरविरहसङ्गतानां वाष्पपातो भवति इति भावः ॥ १२ ॥

## Charcha.

1. आपृच्छस्व—आ + प्रच्छ + लोट स्व। Honour. Nom. त्वम् understood. The आत्मनेपद here comes by the rule "आङिनुप्रच्छ्योः" for here प्रच्छ is preceded by आङ्। The word means 'honour by addressing' "साधोयामि इति आमन्त्रणेन सभाजय"—Malli. पृच्छति, पप्रच्छ, अप्राक्षीत्।

2. प्रिय &c.—प्रियः सखा, कर्मधा—। Here the समासान्त ( अ ) is guided by the rule "राजाहःसखिभ्यः टच्"—in तत्पुरुष। तम् Qual. शैलम्।

3. आलिङ्ग्य—आ + लिङ्ग + ल्यप्। Having embraced.

4. रघु &c.—रघु means by transference "those born in the race of रघु"। रघूणां पतिः, lord of Raghus, ६तत्—। तस्य पदानि, ६तत्—। तैः। अनुक्ते कर्त्तरि ३या। The word रघुपति will be declined like मुनि and not like पति, for पति final in a समास is to be so declined by the rule "पतिः समासे एव"।

5. काले काले—वीप्सायां द्विरुक्तिः।

6. भवतः—शेषे ६ष्ठी, related to संयोगम्।

7. एत्य—आ + इ ( गतौ ) + ल्यप्। Having got.

8. स्नेह &c.—स्निह + घञ् भावे = स्नेहः affection. वि + अञ्ज + क्तिन् भावे = व्यक्ति manifestation. स्नेहस्य व्यक्तिः ६तत्—। Nom. to भवति।

9. चिर &c.—चिर is here चिरकाल। चिरं ( i. e., चिरकालं व्याप्य ) विरहः, चिरविरहः २तत्—by the rule "अत्यन्तसंयोगे च"—कालवाचक words may enter into a २या तत्—compound. चिरविरहात् जातः इति चिर-विरह + जन + ड कर्त्तरि भूते = चिरविरहज। तम्। Qual. वाष्पम्।

10. मुञ्चतः—मुच ( तुदादि ) + लटः स्थाने शतृ = मुञ्चत् shedding. तस्य। Qual. यस्य।

11. यस्य—Refers to शैल। Here यद् being in a subsequent clause, तच्छब्द is not necessary "उत्तरवाक्यगतत्वेनोपादानात् न तच्छब्दव्यपेक्षा।

12. Voice.—प्रियसखः असौ तुङ्गः शैलः मेखलासु अङ्कितः...त्वया आपृच्छ्यताम्...स्नेहव्यक्तया भूयते...।

*13. You are now to listen the route from me.*

**मार्गं तावच्छृणु कथयतस्त्वत्प्रयाणानुरूपं**
**सन्देशं मे तदनु जलद श्रोष्यसि श्रोत्रपेयम्।**
**खिन्नः खिन्नः शिखरिषु पदं न्यस्य गन्तासि यत्र**
**क्षीणः क्षीणः परिलघुपयः स्रोतसाञ्चोपयुज्य ॥ १३ ॥**

Prak.—Very easy.

Prose.—हे जलद, कथयतः मे त्वत्प्रयाणानुरूपं मार्गं तावत् शृणु ; तदनु श्रोत्रपेयं सन्देशं श्रोष्यसि। यत्र ( मार्गे ) खिन्नः खिन्नः शिखरिषु पदं न्यस्य, क्षीणः क्षीणः स्रोतसां परिलघुपयः उपयुज्य च गन्तासि ( गमिष्यसि )।

Beng.—হে মেঘ, আমি বলিতেছি—তোমা র প্রয়াণযোগ্য-পথ তবে শ্রবণ কর।

তারপর শ্রোত্রগ্রাহ্য বার্ত্তা শ্রবণ করিবে। পথে যখনই পরিশ্রান্ত হইবে তখনই পর্বতে পদন্যাস করিয়া এবং ক্ষীণ হইলেই নদীসমূহের স্বাস্থ্যকর জলপান করিয়া যাইতে থাকিবে।

Eng.—O cloud, do indeed listen as I say, to your befitting route; afterwards you will hear the message to be taken by the ear. On the way you will proceed resting thy foot on mountains wherever fatigued and drinking wholesome river-water whenever emaciated.

Expl.—Easy.

Sanj.—सम्प्रति तस्य मार्गं कथयति, मार्गमिति। हे 'जलद', 'तावत्' इदानीं 'कथयतः' मत्तः इति शेषः। 'त्वत्प्रयाणस्य अनुरूपम्' अनुकूलं मार्गमध्वानम् [ "मार्गो मृगपदेऽमासि सौम्यर्क्षे अन्वेषणेऽध्वनीति" यादवः ] 'शृणु! तदनु' मार्गश्रवणानन्तरं 'श्रोत्राभ्यां पेयं' पानार्हम् अतितृष्णया श्रोतव्यमित्यर्थः [ पेयग्रहणात् सन्देशस्य अमृतसाम्यं गम्यते1 ] 'मे सन्देशं' वाचिकम् [ "सन्देशवाक् वाचिकं स्यात्" इत्यमरः ] 'श्रोष्यसि'। 'यत्र' मार्गे, 'खिन्नः खिन्नः' अभीक्ष्णं क्षीणबलः सन् [ "नित्यवीप्सयो"रिति नित्यार्थे-द्विर्भावः ]। 'शिखरिषु' पर्वतेषु 'पदं न्यस्य' निक्षिप्य, पुनर्बललाभार्थं क्वचित् विश्रम्य इत्यर्थः। 'क्षीणः क्षीणः' अभीक्ष्णं कृशाङ्गः सन् [ अत्रापि कृदन्तत्वात् पूर्ववत् द्विरुक्तिः ] 'स्रोतसां परिलघु' गुरुत्वदोषरहितम्। उपलास्फालनखेदितत्वात् पथ्यमित्यर्थः [ तथा च वागभटः—"उपलास्फालनाक्षेपविच्छेदैः खेदितोदकाः। हिमवन्मलयोद्भूताः पथ्याः नद्यो भवन्त्यमूः" ( ? पथ्यास्ता एव च स्थिराः ) इति2 ] 'पयः' पानीयम् 'उपयुज्य शरीरपोषणार्थमभ्यवहृत्य च' गन्तासि' गमिष्यसि [ गमेर्लुट ] ॥ १३ ॥

## Notes on malli.

1. The word पेय in श्रोत्रपेय indicates that the news is as good as nectar. 2. Thus Vagbhata says—"Those rivers are salutary that arise from Himalaya or Malaya Hills and whose water strongly rushes against stones scattering, throwing end breaking them at the sametime" [ N. B.—The text of Malli

everywhere is आस्फालनक्षेप which should be आस्फालनाक्षेप and "पथ्या नश्रीभवन्त्यामू:" should be "पथ्यास्ता एव च स्थिरा:" for the extant editions of वाग्भट् read the last half thus.—We have corrected it accordingly ].

## Charcha.

1. तावत्—Malli's rendering is 'इदानीम्' ( now ). Or—take तावत् to denote emphasis. See *ante*.

2. शृणु—श्रु + लोट हि। Nom. त्वम्।

3. कथयतः—कथ + णिच् ( चुरादि ) + लटः स्थाने शतृ = कथयत् saying तस्मात्। ५मी by the rule "आख्याता उपयोगे"। This is Malli's view for he says—"कथयतः मत्तः इति शेषः"। Or—take it as an adj qual. मे।

4. त्वत् &c.—प्र + या + ल्युट भावे = प्रयाणम् march. रूपमनुगतः अनुरूपम् suitable, प्रादितत्—। तव प्रयाणम्, ६तत्—। तस्य अनुरूपः, ६तत्—। तम्। Qual. मार्गम्। I will tell you the right way you are to take.

5. तदनु—Two words तत् and अनु। अनु here is a कर्मप्रवचनीय by the rule "अनुर्लक्षणे"। Then तत् has द्वितीया in connection with —अनु, by the rule "कर्मप्रवचनीययुक्ते द्वितीया"।

6. श्रोष्यसि—श्रु + लृट स्यसि। Nom. त्वम्। शृणोति, अश्रौषात्, शुश्राव।

7. श्रोत्र &c.—श्रूयते अनेन इति श्रु + ष्ट्रन् = श्रोत्रम् ear. पा + यत् कर्मणि = पेय to be drunk, i. e., to be taken minutely. श्रोत्रेण पेयः, ३तत्—। तम्। Qual. सन्देशम्। The epithet shows the importance of the message. See also Malli. The reading श्रव्यबन्धम् is equally good. बन्ध composition. श्रव्यः बन्धः अस्य बहु—। etc.

8. खिन्नः &c.—खिद + क्त कर्त्तरि = खिन्नः tried. Qual त्वम् । नित्यार्थे ( to denote intensity ) द्विरुक्तिः । For the rule see Malli.

9. न्यस्य—नि + अस ( क्षेपे ) दिवादि + ल्यप् । Having placed.

10. गन्तासि—गम + लुट तासि । Nom. त्वम् । लुट् denotes futurity.

11. यत्र—यद् + ङि ( ७मी ) + त्रल् स्वार्थे = यत्र—refers to मार्ग । अधि ७मी ।

12. क्षीणः &c.—क्षि + क्त कर्त्तरि = क्षीण emaciated. Here also नित्यार्थे द्विरुक्तिः । Malli says नित्य means intensity ; and intensity refers to actions ( क्रिया ) only. Hence क्तान्त forms here ( e.g. खिन्न, क्षीण ) take duplication to denote नित्य । See Malli—अत्रापि क्रदन्तत्वात् &c. By the rule "निष्ठायामण्यदर्थे"—क्षि takes दीर्घ in other voices than भाव and कर्मवाच्य । Then निष्ठा 'त' is changed into न when क्षि is changed to क्षी by the rule "क्षियो दीर्घात्" । Hence we get क्षीण । Qual. त्वम् ।

13. परिलघु—लघु here means clear, lucid. See Malli—गुरुत्व-दोषरहितम् &c. परि implies intensity परि अतिशयेन लघु, प्रादितत्— । Qual. पयः । Such salutary water will at once refresh you.

14. उपयुज्य—उप + युज + ल्यप् । Having taken. Both उपयुज्य and उपभुज्य mean the same.

15. Voice.—...अनुरूपः मार्गः श्रूयताम् । श्रोत्रपेयः सन्देशः श्रोष्यते । क्षीणेन...खिन्नेन...त्वया गन्ता... ।

## *14. Journey northwards.*

**अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि-**
**र्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धाङ्गनाभिः ।**

स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान् ॥ १४ ॥

Prak.—हे जलद, अस्मात्स्थानात् उदङ्मुखः खम् उत्पत [ O cloud, go straight northwards ]. If I am obstructed in the way—पथि दिङ्नागानां स्थूलहस्तावलेपान् परिहरन् उत्पत [ Why, go carefully and avoid onsets by trunks of elephants of quarters. Thus you will be able to proceed unhampered ]. No other hindrances ?—मुग्धसिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः सन् खमुत्पत [ Not at all ; rather you will go with double vigour, for your procedure will be amazingly watched by the simple wives of *Siddhas* ]. Why will they be amazed ?—पवनः अद्रेः शृङ्गं हरति किं स्वित् इति उन्मुखीभिः [ They will amazingly look up to you apprehending that some peaks of mountains are thrown down by wind ].

Prose.—पवनः अद्रेः शृङ्गं हरति किं स्वित् इति उन्मुखीभिः मुग्धसिद्धाङ्गनाभिः चकितचकितं दृष्टोत्साहः ( सन् ) अस्मात् सरसनिचुलात् स्थानात् पथि दिङ्नागानां स्थूलहस्तावचलेपान् परिहरन् उदङ्मुखः खम् उत्पत ।

Beng.—বায়ু পর্ব্বতের শৃঙ্গ উৎক্ষেপ করিতেছে কি—এই ভাবিয়া উন্মুখী মূঢ়সিদ্ধ-নারী কর্ত্তৃক চকিত ভাবে তোমার গমনোৎসাহ দৃষ্ট হইবে। তুমি সুন্দর স্থলবেতসম্পূর্ণ এইস্থান হইতে উত্তরাভিমুখে আকাশে গমন কর এবং ( গমনকালে ) পথে দিগ্গজগণের স্থূলশুণ্ডের আক্রমণ পরিহার করিবে।

Eng.—From this place, full of fresh cane-plants (*Nichula*) proceed northwards in the sky, avoiding on the way the onsets by thick trunks of the elephant of the quarters. While going your effort will be amazingly seen by simple *Siddha-wives* turned up apprehending if the wind is throwing down mountain-peaks.

Expl.—See *Prak* & *Eng*.

Sanj.—अद्रेरिति। 'पवमो' वायुः 'अद्रेः' चित्रकूटस्य 'शृङ्गं हरति किं स्वित्' [ किं स्विच्छब्दो विकल्पवितर्कार्थादिषु पठितः ] 'इति' शङ्कया 'उन्मुखीभिः' उन्नतमुखीभिः [ "स्वाङ्गाच्चोपसर्जनात् असंयोगोपधात्" इति ङीष् ] 'मुग्धाभिः' मूढाभिः [ "मुग्धः सुन्दरमूढयोः" इत्यमरः ] 'सिद्धानां' देवयोनिविशेषाणाम् 'अङ्गनाभिः चकितचकितं' चकितप्रकारं यथा तथा [ "प्रकारे गुणवचनस्य "इति द्विर्भावः ] दृष्टोत्साहः दृष्टसमुत्साहः सन् 'सरसा' आर्द्रा 'निचुलाः' स्थलवेतसा यस्मिन् तस्मात् [ "वाणीरे करिभेदे स्यात् निचुलः स्थलवेतसे "इति शब्दार्णवः ] 'अस्मात् स्थानात्' आश्रमात् 'पथि' नभोमार्गे 'दिङ्नागानां' दिग्गजानां 'स्थूला ये हस्ताः' कराः तेषामवलेपान्' आक्षेपान् 'परिहरन्' [ "हस्तो नक्षत्रभेदे स्यात् करेभकरयोरपि" इति विश्वः ] 'उदङ्मुखः' सन् अलकाया उदीच्यत्वात् इत्याशयः। 'खम्' आकाशम् 'उत्पत' उद्गच्छ [ अत्र इदमप्यर्थान्तरं ध्वनयति—'रसिको निचुलो नाम महाकविः' कालिदासस्य सहाध्यायः परापादितानां कालिदासप्रबन्धदूषणानां परिहर्त्ता यस्मिन्स्थाने 'तस्मात् स्थानात् उदङ्मुखः' निर्दोषत्वात् उन्नतमुखः सन् 'पथि सारस्वतमार्गे दिङ्नागानां' ( "पूजायां बहुवचनम्" ) दिङ्नामाचार्य्यस्य कालिदासप्रतिपक्षस्य 'हस्तावलेपान् 'हस्तविन्यासपूर्वकाणि दूषणानि परिहरन् ( "अवलेपस्तु गर्वे स्यात् लेपने दूषणेऽपि च" इति विश्वः ) 'अद्रेः' अद्रिकल्पस्य दिङ्नागाचार्य्यस्य 'शृङ्ग' प्राधान्यम् ( शृङ्गं प्राधान्यसान्वोश्च—इत्यमरः ) 'हरतीति' हेतुना 'सिद्धैः' सारस्वतसिद्धैः महाकविभिः अङ्गनाभिश्च 'दृष्टोत्साहः' सन् 'खम् उत्पत' उच्चैर्भव इति स्वप्रबन्धम् आत्मानं वा प्रति कवेरुक्तिः इति'1 ]॥ "संसर्गतो दोषगुणा भवन्तीत्येतन्मृषा येन जलाशयेऽपि। स्थित्वानुकूलं निचुलश्चलन्तमात्मानमारक्षति सिन्धुवेगात्"—इत्येत श्लोकनिर्माणात् कवेर्निचुलसंज्ञा इत्याह 2 ॥

## Notes on Malli.

1. [ N. B.—In Malli's alternative explanation of the sloka, ( which is dubious indeed ) we may translate the sloka after Prof. Pathak thus——"From this place where stands thy champion *Nichula*, ascend O Muse, the heaven of invention,

holding up thy head, and avoiding in the course of thy effort the salient faults indicated by *Dingnaga* with his hands, while thy flight is admired by good poets and finer women filled with surprise and looking upwards as if the genius of the mighty *Dingnaga* were eclipsed by thee". ]

2. The poet attained the title Nichula for having composed the sloka "संसर्गतौ" &c.—[N. B.—Similarly भवभूति attained this name of his for having composed the sloka "—गिरिजायाः स्तनौ वन्दे भवभूतिसिताननौ" &c. ].

## Charcha.

1. हरति—हृ+लट् ति। Carries down, throws down. Nom. पवनः। अद्रि here refers to Ramgiri ( See sl. 1).

2. किं स्वित—A compound अव्यय indicating doubtful interrogation ( वितर्कप्रश्न )। Cp "आहो स्वित् प्रसवो ममापचरितैर्विष्टम्भितो वीरुधाम्"—Sak. V.

3. उन्मुखीभिः—उन्नतंमुखमासाम्, बहु—by the Varttika "प्रादिभ्यो-धातुजस्य"—( *ante* ); hence उन्नतमुखीभिः is also correct. Qual. अङ्गनाभिः। In the final बहुव्रीहि we get उन्मुखी ( for मुख has a संयुक्त penultimate ) in the feminine by the rule "स्वाङ्गात् चोपसर्ज-नात् असंयोगोपधात्"। मुख is स्वाङ्ग। Thus उन्मुखाभिः is also correct.

4. दृष्टोत् &c.—उद्+सह+घञ् भावे=उत्साह effort. दृष्टः उत्साहः अस्य' बहु—। Qual. त्वम् understood.

5. चकित &c,—चकित amazed. It is गुणवचन word, hence duplication to denote प्रकार—the rule being "प्रकारे गुणवचनस्य"। Then the whole is treated like a कर्मधारय by the rule "कर्मधारयवदुत्तरेषु"; Adv. Qual. the क्रिया दृष्ट in दृष्टोत्साह। See Malli also.

6. मुग्ध &c.—सिद्ध is a kind of demigod. सिद्धानाम् अङ्गनाः, ६तत्—। मुग्धाः ( मूढ़ाः ) सिद्धाङ्गनाः, कर्मधा—। ताभिः। अनुक्ते कर्त्तरि ३या—, the क्रिया is in दृष्ट of दृष्टोत्साह। मुग्ध may also mean सुन्दर। See Malli. दृष्ट is connected with अङ्गनाभिः, still it enters into compound with उत्साह by the force of the dictum "सापेक्षत्वेऽपि गमकत्वात् समासः"।

7. सरस &c—सरस fresh. निचुल cane. सरसाः निचुलाः अस्मिन्, बहु—। तस्मात्। Qual. स्थानात्। स्थानात् has अपादाने ५मी।

8. उत्पत—उद्+पत+लोट हि। Nom. त्वम्। पतति, पपात, पतिष्यति।

9. उदङ्मुखः—उदच् north, i e., northward. उदक् मुखमस्य, बहु—। Pred to त्वम्।

10. दिङ्नागानाम्—दिशां नागाः ( हस्तिनः ), ६तत्—। तेषाम्। शेषे ६ष्ठी related to हस्तावलेप। These are the eight elephants of the quarters, cp—"ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः"।

11. परिहरन्—परि+हृ+शतृ। Avoiding. Qual. त्वम्।

12. स्थूल &c.—अव+लिप+घञ् भावे=अवलेपः strike, onset. स्थूलानि हस्तानि, कर्मधा—। स्थूलहस्तानाम् अवलेपाः, ६तत्—। Or—स्थूलहस्तैः अवलेपाः, सुप्सुपा—। तान्। Obj of परिहरन्। पुष्टशुण्डादण्डस्पर्शान् इत्यर्थः। The दिग्गज strike all that come in their way, but you are to avoid it.

13. Voice.—पवनेन क्रियते......दृष्टोत्साहेन...त्वया उदङ्मुखेन परिहरता उत्पत्यताम्।

14. Remark —Mallinath here sees a pointed allusion by

Kalidasa to his hated rival Dingnaga. But this explanation extremely dubious. Thus Prof. MacDonell says—"This explanation is extremely dubious in itself. Then it is uncertain whether Mallinatha means the Buddhist teacher Dingnaga. Thirdly, little weight can be attached to the Buddhistic tradition that Dingnaga was a pupil of Vasubandhu, for this statement is not found till the sixteenth century. Fourthly the assertion that Vasubandhu belongs to the sixth century depends chiefly on the Vikramaditya theory and is opposed to Chinese evidence, which indicate that works of Vasubandhu were translated in A. D. 404".

Further it is also not certain whether Kalidasa himself meant such an explanation. We doubt if स्थूलहस्तावलेप can be legitimately compounded to mean "foolish vauntings as expressed by gesticulations". Even if this point is allowed, the plural in दिङ्नागानाम becomes indefensible. When the word दिङ्नाग is not intended for many individual, the plural will indicate respect ( गौरव ) for दिङ्नाग on the part of the poet. Would that be consistent in the case of a "hated rival" contempt for whom is already expressed by the ridicule in स्थूलहस्तावलेप ?

Again as Kalidasa flourished in B. C., this दिङ्नाग should be proved to be a poet of that age. Otherwise Malli's allusive explanation fails. Hence we do not accept Malli's view.

### 15. *Rainbow will colour thee.*

रत्नच्छायाव्यतिकर इव प्रेक्ष्यमेतत्पुरस्ता-
द्वल्मीकाग्रात् प्रभवति धनु:खण्डमाखण्डलस्य ।
येन श्यामं वपुरतितरां कान्तिमापत्स्यते ते
बर्हेणेव स्फुरितरुचिना गोपवेषस्य विष्णो: ॥ १५ ॥

Prak.—Easy.

Prose.—रत्नच्छायाव्यतिकरः इव (रत्नप्रभामिश्रणमिव) प्रेक्ष्यम् एतत् आखण्डलस्य (इन्द्रस्य) धनुःखण्डं पुरस्तात् वल्मीकाग्रात् प्रभवति ; येन ते श्यामं वपुः, स्फुरितरुचिना बर्हेण गोपवेषस्य विष्णोः ( श्यामं वपुः ) इव अतितरां कान्तिम् आपत्स्यते ।

Beng.—পদ্মরাগাদিমণিপ্রভা মিশ্রণের ন্যায় মনোরম এই ইন্দ্রধনু সম্মুখে বল্মীকস্তূপাগ্র হইতে উদিত হইতেছে। উহা দ্বারা তোমার শ্যামদেহ, দীপ্তকান্তি ময়ূরপুচ্ছ দ্বারা গোপবেশধারী বিষ্ণুর শ্যামদেহের ন্যায় অত্যন্ত শোভা পাইবে।

Eng.—There arises from the top of the yonder ant hill, a piece of Rainbow as beautiful as the admixture of the lustre of several gems ; by this your blue body will attain excellent splendour just as the blue body of Vishnu dressed as a cow-herd, does attain by peacock-plumes of glorious lustre.

Expl —The cloud is compared to the body of Vishnu incarnated as cow herd in the form of Sri-Krishna. Now the cloud marked with rainbow will shine like Vishnu attired in peacock-plumes of variegated colours.

Sanj —रत्नेति। 'रत्नच्छायानां' पद्मरागादिमणिप्रभानां 'व्यतिकरो' मिश्रणमिव 'प्रेक्ष्यं' दर्शनीयम् 'आखण्डलस्य' इन्द्रस्य धनुःखण्डमेतत् [ इति हस्तेन निर्देशः ] 'पुरस्तात्' अग्रे 'वल्मीकाग्रात्' वामलूरविवराग्रात् [ "वामलूरश्च नाकश्च वल्मीकं पुंनपुंसकम्" इत्यमरः ] 'प्रभवति' आविर्भवति। 'येन' धनुःखण्डेन (?) ते तव श्यामं वपुः 'स्फुरितरुचिना' उज्ज्वलकान्तिना 'बर्हेण' गोपालस्य कृष्णस्य श्यामं वपुः 'इव अतितरां कान्तिम्' शोभाम् 'आपत्स्यते' ॥ १५ ॥

## Charcha.

१. रत्न &c.—रत्न gem ( like emerald, ruby &c. ) ; छाया lustre. वि + अति + कृ + अप् भावे = व्यतिकर admixture. रत्नस्य छायाः, ६तत्—। तासां व्यतिकरः ६तत्—। उपमान of धनुःखण्डम्। The उपमा is defec-

tive for धनु:खण्डम् is neuter, whereas रत्नच्छायाव्यतिकर is masculine. The reading रत्नच्छाय is also seen. This may be optionally correct by the rule "विभाषा सेनासुराच्छायाशालानिशानाम्"—when छाया is final in a तत्पुरुष। Or—रत्नच्छाय got from रत्नानां छाया will be always neuter by the rule "छाया बाहुल्ये"। We however prefer Malli's reading as रत्नच्छाया ; for in the above rules, छाया is generally taken in the sense 'shade' and *not* in the sense of 'lustre' as we have here.

2. पुरस्तात्—पूर्वस्यां दिशि इति पूर्व + ङि ( ७मी ) + अस्ताति स्वार्थे = पुरस्तात् in front. अधि ७मी। पूर्व is changed into पुर् by the rule "अस्ताति च"।

3. वल्मीकाग्रात्—वल्मीक is ant-hill. तस्य अग्रम्, ६तत्—। तस्मात्। अपादाने ५मी by the rule "भुव: प्रभव:"। The rainbow is said to emanate from वल्मीकाग्र owing to the belief that it rises off the snake's hood that reside inside an ant hill. Thus वराहमिहिर on the origin of rainbow says—"...केचित् अनन्तकुलोरगनि:श्वासोद्भूतमाहुराचार्य्या:"।

3. धनु:खण्डम्—धनुष: खण्डम्, ६तत्—। तत्। Nom. to प्रभवति ( प्र + भू + लट ति )। The reading धनुष्खण्डम् is better, for षत्व of विसर्ग here is obligatory by Panini's rule "नित्यं समासे अनुत्तरपदस्थस्य"।

4. येन—करणे ३या। Refers to धनु:खण्ड।

5. अतितराम्—अति + तरप् = अतितर + आम् = अतितराम्। Adv. Qual. आपत्स्यते। Here तरप् is स्वार्थे and आम् comes after it by the rule "किमेत्तिङ् अव्ययघात् आमु अद्रव्यप्रकर्षे"।

6. आपत्स्यते—आ + पद + लृट स्यते। Nom. वपु:।

7. बर्हेण—बर्ह is peacock feather. तेन। करणे ३या।

8. स्फुरित &c.—स्फुर्+क्त कर्त्तरि=स्फुरित bright. रुचि lustre. स्फुरिता रुचिरस्य, बहु—। तेन। Qual. बर्हेण।

9. गोप &c.—गोप cowherd, तस्य वेषः, ६तत्—। गोपवेष इव वेषः यस्य, बहु—। तस्य। Qual. विष्णोः। The allusion is to the belief that Vishnu in the incarnation of कृष्ण was a गोप in his childhood. See भागवतपुराण। Here in the final बहुव्रीहि of गोपवेष and वेष, the first वेष disappears by the rule "सप्तम्युपमानपूर्वस्य उत्तरपदलोपश्च वक्तव्यः"। विष्णोः is related to वपुः ( see Prose ).

10. Voice.—...व्यतिकरेण इव प्रेक्षेण धनुष् खण्डेन प्रभूयते...श्यामेन वपुषा कान्तिः... आपद्यते।

11. Remark.—Kalidasa was aware of the scientific reason of the origin of the halo of rainbow ( cp "शीकरव्यतिकरं मरीचिभिर्दूरयत्यवनते विवस्वति। इन्द्रचापपरिवेशशून्यतां निर्भरास्तव पितुर्व्रजन्ति ते"—Kum VIII. Sl. 31 ) ; here however he is referring to the general belief.

## *16. Northward course again.*

**त्वय्यायत्तं कृषिफलमिति भ्रूविलासानभिज्ञैः**
**प्रीतिस्निग्धैर्जनपदवधूलोचनैः पीयमानः।**
**सद्यः सीरोत्कषणसुरभि क्षेत्रमारुह्य मालं**
**किञ्चित्पश्चाद् व्रज लघुगतिर्भूय एवोत्तरेण ॥ १६ ॥**

Prak.—Easy.

Prose.—कृषिफलं त्वयि आयत्तम् इति भ्रूविलासानभिज्ञैः प्रीतिस्निग्धैः जनपदवधूलोचनैः पीयमानः ( त्वम् ) मालं क्षेत्रं सद्यः सीरोत्कषणसुरभि ( यथा तथा ) आरुह्य किञ्चित् पश्चात् व्रज ; लघुगतिः सन् भूय उत्तरेण एव व्रज।

Beng.—কৃষিফল তোমার (বৃষ্টির) অধীন—এইহেতু গ্রামনারীগণ, ভ্রূভঙ্গিতে অনভিজ্ঞ প্রেমার্দ্র লোচনে তোমাকে দেখিবে। তুমি পর্বতবহুল উন্নত ভূমি, সদ্যঃ হল-কর্ষণ হেতু সুরভিত করিয়া আরোহণ করতঃ কিছু পশ্চিমে যাইবে এবং ক্ষিপ্রগমনে পুনরায় উত্তরদিকে গমন করিবে।

Eng.—Agriculture is dependent on you, so being drunk in (as it were) by the village women's eyes, ignorant of playful looks and mild through affection, you rise the high hilly grounds making it fragrant owing to its recent furrows; bending a little westward, you will again proceed in quick motion towards north.

Expl.—Easy.

Sanj.—त्वयीति। 'कृषेः' हलकर्मणः 'फलं' शस्यं त्वयि [ अधिकरणविवक्षायां सप्तमी ] 'आयत्तम्' अधीनम् [ "अधीने निघ्न आयत्तः" इत्यमरः ] 'इति' हेतोः 'प्रीत्या स्निग्धैः' अकृत्रिमप्रेमार्द्रैरित्यर्थः। 'भ्रुविकाराणां' भ्रुविलासानामनभिज्ञैः पामरत्वात् इति शेषः। 'जनपदवधूनां' पल्लीयोषितां 'लोचनैः पीयमानः' सादरं वीक्ष्यमाणः सन् 'मालं' मालाख्यं क्षेत्रं शैलप्रायमुन्नतस्थलं [ "मालमुन्नतभूतलम्" इत्युत्पलः ] 'सद्यः' तत्कालमेव 'सीरैः' हलैः 'उत्कषणेन' कर्षणेन 'सुरभि' घ्राणतर्पणं यथा तथा 'आरुह्य' तत्र अभिरुह्य इत्यर्थः [ "सुरभिर्घ्राणतर्पणः" इत्यमरः ] 'किञ्चित् पश्चाद् व्रज गच्छ। 'लघुगतिः' तत्र निर्वृष्टत्वात् क्षिप्रगमनः सन् [ "लघु क्षिप्रतरं द्रुतम्" इत्यमरः ] 'भूयः' पुनः अपि 'उत्तरेण' उत्तरमार्गेणैव व्रज [ तृतीयाविधाने "प्रकृत्यादिभ्य उपसंख्यानम्" इति तृतीया ] यथा कश्चिद्बहुवल्लभः पतिः कुत्रचित् क्षेत्रे गूढं विहृत्य [ "क्षेत्रं शरीरकेदारे सिद्धस्थानकलत्रयोः" इति विश्वः ] दाक्षिण्यभङ्गभयात् नीचमार्गेण निर्गत्य पुनः सर्वाध्यक्षं सञ्चरति तद्वदिति ध्वनिः। ॥ १६ ॥

## Notes on Malli.

1. The suggestion is—this is just like a husband having many wives, secretly gone to some one and through fear of

breach of magnanimity come out again by a low means and becoming lord of all.

## Charcha.

1. त्वयि—अधिकरणविवक्षया ७मी। See Malli.

2. कृषि &c—कृषेः फलम् result of husbandry, ६तत्—। तत् । Nom. to भवति understood.

3. इति—An अव्यय indicating हेतु ( cause ).

4. भ्रू &c.—वि+कृ+घञ् भावे=विकार distortion. न अभिज्ञानि, अनभिज्ञानि ignorant, नञ्तत्—। भ्रुवः विकाराः, ६तत्—। तेषु, तेषां वा अनभिज्ञानि सुप्सुपा Or, ६तत्—। तैः। Qual. लोचनैः। The simple village folks are usually unaccustomed to tricks of eyes that are seen with townsmen. Cp "स्त्रीभूषणं चेष्टितमप्रगल्भं चारूण्यवक्राण्यपि वीक्षितानि गोपाङ्गनानां मुमुदे विलोक्य"—*Bhatti*. Both the readings भ्रूविलास and भ्रूविकार are equally good.

5. प्रीतिस्निग्धैः:—For समास-See Malli. Qual. लोचनैः।

6. जनपद &c.—जनपद village. तस्य वध्वः, ६तत्—। तासां लोचनानि, ६तत्—। तैः। अनुक्ते कर्त्तरि ३या the verb being पीयमानः।

7. पीयमानः—पा+कर्मणि शानच्। Qual. त्वम्। It implies great avidity of females, cp "ता राघवं दृष्टिभिरापिबन्त्यः"।

8. सद्यः &c —सीर plough, उद्+कष लुट भावे=उत्कषण ploughing. सीरस्य उत्कषणम्, ६तत्—। सद्यः सीरोत्कषणम्, सुप्सुपा। तेन सुरभि, ३तत्—। तत् यथा तथा। Adv. Qual. आरुह्य। Malli's reading ( as above ) is better, for ploughed lands become सुरभि through वृष्टि। And this वृष्टि was when the cloud ascended the क्षेत्र। This meaning is clerly manifest by taking it as an adverb

as Malli does. उत्कषण only cannot impart सुरभित्व to चेत्र। Hence it is not advisable to take this epithat as a विशेषण of चेत्र। No better meaning can be got even if the whole ( सद्यः सीरोत्कषण-सुरभिचेत्रम् ) be taken as one word. In this last case take—मालम् meaning the country so named. By माल Malli however understands उन्नतमूतल। मालम्—obj of आरुह्य ( आ + रुह + ल्यप् )। If Mala means country, identify it with "Malda" a little north of Ratanpore.

9. व्रज—व्रज + लोट हि ; Nom. त्वम्। व्रजति, वव्राज, अव्राजीत्।

10, लघु &c—गम + क्तिन् भावे = गति pace. लघु quick. लघ्वी (लघुर्वा ) गतिरस्य, बहु—। The shower before on चेत्र has maae the cloud light, hence it was लघुगतिः। Pred to त्वम्। See also Malli.

11. उत्तरेण—उत्तर north. तेन। प्रकृत्यादित्वात् तृया।

12. भूयः—बहु + ईयसुन् also gives भूयः ; but this भूयस् is an अव्यय and is a different one. It means 'again'. Adv. Qual. व्रज।

13. Voice.—कृषिफलेन आयत्तेन भूयते...पीयमानेन त्वया लघुगतिना... व्रज्यताम्...।

*17. Next Amrakuta will be your resting resort.*

त्वामासारप्रशमितवनोपप्लवं साधुमूर्ध्ना
वक्ष्यत्यध्वश्रमपरिगतं सानुमानाम्रकूटः।
न क्षुद्रोऽपि प्रथमसुकृतापेक्षया संश्रयाय
प्राप्ते मित्रे भवति विमुखः किंपुनर्यस्तथोच्चैः॥ १७॥

Prak.—सानुमान् आम्रकूटः मूर्ध्ना श्रमपरिगतं त्वां साधु वक्ष्यति [ Amra-kuta hill will take you to its peak, fatigued as you are]. Will he

show me this favour ?—आसारप्रशमितवनोपप्लवम् त्वाम् [ Why not ; you have extingiushed the forest fire in Amrakuta. And out of gratitude he will give you shelter ]. Is it so ?—मित्रे प्राप्ते क्षुद्रः अपि प्रथमसुकृतापेक्षया संश्रयाय विमुखः न भवति, किं पुनः य तथा उच्चैः ( भवति ) [ You by extinguishing the fire has done good to the mountain and in return he will gladly protect you by all means. Even a mean one can not be अकृतज्ञ, what to speak of such a high personage as Mt. Amrakuta ].

Prose.—आम्रकूटः सानुमान् आसारप्रशमितवनोपप्लवम् अध्वश्रमपरिगतं त्वां मूर्ध्ना साधु वक्ष्यति । संश्रयाय मित्रे प्राप्ते सति प्रथमसुकृतापेक्षया क्षुद्रः अपि न विमुखः भवति, यः तथा उच्चैः स किं पुनः ।

Beng.—আম্রকূটপর্ব্বত পথশ্রান্ত তোমাকে তার শৃঙ্গে সম্যক্ ধারণ করিবে, কারণ তুমি বর্ষণদ্বারা তার দবাগ্নি প্রশমিত করিয়াছ। আশ্রয়ের জন্য মিত্র আসিলে ক্ষুদ্রব্যক্তিও প্রথম উপকার স্মরণ করিয়া বিমুখ হয় না। যেজন এতাদৃশ উন্নত তার ত কথাই নাই।

Eng.—The mountain Amrakuta will well bear you on its peak, fatigued of journey as you are, and because you have extinguished its fire by showers. Out of gratitude for good service, even a mean one is not averse to a friend come for shelter ; what to speak of one, so high ( like you ) ?

Expl.—See Prak.

Sanj.—त्वामिति । आम्राश्चूताः कूटेषु शिखरेषु यस्य स 'आम्रकूटः नाम 'सानुमान्' पर्वतः [ "आम्रश्चूतो रसालोऽसौ" इति, "कूटोऽस्त्री शिखरं शृङ्गम्" इति चामरः ] 'आसारो' धारावृष्टिः [ "धारासम्पातः आसारः" इत्यमरः ] तेन 'प्रशमितो वनोपप्लवः' दावाग्निः येन तं कृतोपकारमित्यर्थः, 'अध्वश्रमेण परिगतं' व्याप्तं त्वां 'साधु' सम्यक् 'मूर्ध्ना वक्ष्यति' वोढा [ वहेः लृट् ]। तथाहि 'क्षुद्रः' कृपणः 'अपि' [ "क्षुद्रो

दरिद्रे कृपणे नृशंसे,' इति यादवः ] 'संश्रयाय' संश्रयणाय 'मित्रे' सुहृदि 'प्राप्ते' आगते सति 'प्रथमसुकृतापेक्षया 'पूर्वोपकारपर्य्यालोचनया 'विमुखो न भवति' यथा तेन प्रकारेण 'उच्चैः' उन्नतः स आम्रकूटः 'किं पुनः' विमुखः न भवतीति किमु वक्तव्यमित्यर्थः। एतेन प्रथमावसरे सौख्यलाभात् ते कार्य्यसिद्धिरिति सूचितम [ तदुक्तं निमित्तनिदाने "प्रथमावसरे यस्य सौख्यं तस्याखिलेऽध्वनि। शिवं भवति यात्रायामन्यथात्वशुभं ध्रुवमिति" ] I ॥ १७ ॥

## Notes on malli.

I. By this is indicated success, for friendship is got in the first instance ; thus निमित्तनिदान says "In journey all along good is assured of one who attains frienship at the first instance, otherwise evil attends."

## Charcha.

I. आसार &c—आ + सृ + घञ् भावे = आसार downpour. प्र + शम + णिच् क्त कर्मणि = प्रशमित। प्रशान्त is also correct by the rule "वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः"। उप + प्लु + अप् भावे = उपप्लवः ( उत्पात ), cp, 'उपप्लवाय लोकानां धूमकेतु रिवोदितः"—Kumara. वनस्य उपप्लवः forest fire, ६तत्—। आसारेण प्रशमितः ३तत्—। तादृशः वनोपप्लवः अनेन, बहु—। तम्। Qual. त्वाम्। Or—प्रशमितः वनोपप्लवः अनेन बहु—। आसारेण प्रशमितवनोप्लवः, ३तत्—।

2, वक्ष्यति—वह + लृट् स्यति। Nom. सानुमान्। वहति—ते, उवाह, —ऊहे।

3. अध्व &c.—अध्वनः श्रमः ( श्रम् + घञ् ), ६तत्—। तेन परिगतः ( overpowered ), ३तत्—। तम्। Qual. त्वाम्।

4. सानुमान्—सानु slope. तानिसन्ति अस्य इति सानु + मतुप् = सानुमान् a hill.

5. आम्रकूटः—Qual. सानुमान्। Wilson identifies it with Amarakantaka. It is the source of नर्मदा and forms a range of विन्ध्यपर्वत। The mountain is so called for abundance of mango-tree there, see also next sloka.

6. प्रथम &c.—कृ+क्त नपुंसके भावे=कृतम् deed. सु शोभनं कृतम्, प्रादितत्—। अप+ईक्ष+अ भावे=अपेक्षा regard. प्रथमं सुकृतम्, कर्मधा—। तस्य अपेक्षा, ६तत्—। तया। हेतौ ३या। The first सुकृत was in the shape of दवाग्निप्रशमन as spoken above, by showers.

7. संश्रयाय—सम्+श्रि+अच् भावे=संश्रय resort. तस्मै। If the construction be संश्रयाय प्राप्ते then संश्रयाय has "तुमर्थाच्च भाववचनात्" इति ४र्थी। But if the construction be—संश्रयाय विमुखो न भवति, then we have तादर्थ्ये ४र्थी or कर्मणि ४र्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिनः"। Thus संश्रयाय=संश्रयं दातुम्।

8. मित्रे—भावे ७मी by "यस्य च भावेन भावलक्षणम्"।

9. उच्चैः—An अव्यय, having the force of adjective here. Qual. यः।

10. किं पुनः—For the force of these—see Malli "किं पुनः... इति किमु वक्तव्यमित्यर्थः।

11. Voice.—आम्रकूटेन सानुमता...—उपप्लवः······—परिगतः त्वं वक्ष्यसे... क्षुद्रेण विमुखेन न भूयते...येन...तेन...।

*18. Your contact with Amrakuta will*
*afford a worthy spectacle.*

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**
**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**

नूनं यास्यति अमरमिथुनप्रेक्षणीयामवस्थां
मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः ॥ १८ ॥

Prak.—अचलः भुवः स्तन इव अमरमिथुनप्रेक्षणीयाम् अवस्थां यास्यति [ Amrakuta will look like the breast of the Earth and will be watched by pairs of gods ] How is this possible ?—परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः अचलः [ The sides of this mount is covered by wild mango trees and will look pale white, for all the trees are covered with ripe (hence almost white) fruits ]. But tips of breasts are blue !—स्निग्धवेणीसवर्णे त्वयि शिखरम् आरूढे सति मध्ये श्यामः शेषविस्तारपाण्डुः स्तन इव अचलः [ The blue cloud will resort to its peak, hence the top looking blue will resemble the tip of breasts. Thus the mountain pale white everywhere (through ripe mango-fruits ) and blue in the top (through contact with the blue cloud ) will exactly resemble the breast of Matron Earth. The sight too will be worth-seeing ].

Prose.—परिणतफलद्योतिभिः काननाम्रैः छन्नोपान्तः अचलः स्निग्धवेणीसवर्णे त्वयि शिखरम् आरूढे (सति), शेषविस्तारपाण्डुः मध्ये श्यामः भुवः स्तन इव अमरमिथुनप्रेक्षणीयाम् अवस्थां यास्यति नूनम् ॥

Beng.—স্নিগ্ধ কেশপাশতুল্য কৃষ্ণবর্ণ তুমি শৃঙ্গে আরোহণ করিলে পর, ফলের পক্কতাহেতু পাণ্ডুবর্ণবিশিষ্ট বনচূত দ্বারা আবৃতপার্শ্ব ঐ আম্রকূট পর্বত, বিস্তৃত পার্শ্বভাগে পাণ্ডুবর্ণ এবং মধ্যে শ্যামবর্ণ পৃথিবীদেবীর স্তনের ন্যায় দেবযুগলের দর্শনযোগ্য হইবে সন্দেহ নাই।

Eng.—You of a dark colour like oily braid of hair having mounted its peak, the mountain (Amrakuta) with its sides covered by wild mango-trees shining with ripe fruits will cer-

tainly attain the state of being looked at by pairs of gods, for it (the mount) resembles the breast of Earth black in the centre and pale white in the surface.

Expl.—See Prak.

Sanj—छन्नेति ! हे मेघ, 'परिणतैः' परिपक्वैः फलैः द्योतन्ते इति तथोक्तैः [ आषाढ़े वनचूताः फलन्ति पच्यन्ते च मेघवातेन इत्याशयः ] 'काननाम्रैः' वनचूतैः छन्नोपान्तः' आवृतपार्श्वः 'अचलः' आम्रकूटाद्रिः 'स्निग्धवेणीसवर्णे' मसृण केशबन्धच्छाये, श्यामवर्णे इत्यर्थः [ "वेणी तु केशबन्धे जलस्रुतौ" इति यादवः ] 'त्वयि शिखरं' शृङ्गमारूढ़े सति [ "यस्य च भावेन भावलक्षणम्" इति सप्तमी ] 'मध्ये श्यामः शेषे' मध्यादन्यत्र 'विस्तारे' परितः 'पाण्डुः' हरिणः [ "हरिणः पाण्डुर पाण्डुः" इत्यमरः ] 'भुवः स्तन इव, अमरमिथुनानां' खेचराणामित्यर्थः। 'प्रेक्षणीयां' दर्शनीयां 'अवस्थां नूनं यास्यति'। मिथुनग्रहणं कामिनामिव स्तनत्वेनोत्प्रेक्षा सम्भवतीति कृतम्। [ यथा परिश्रान्तः कश्चित्कामी कामिनीनां कुचकलशे विश्रान्तः सन् स्वपिति तद्वत् भवानपि भुवो नायिकाया स्तने इति ध्वनिः ] ॥ १८ ॥

## Notes on Malli.

1. The implication is, as a passionate fatigued, lies and takes rest on the breast of a woman so you will rest on the breast of matron Earth.

## Charcha.

1. छन्नो &c.—अन्तमुपगतः उपान्तः sides, प्रादि तत्—। छद+क्त कर्मणि = छन्न covered. छन्नः उपान्तः अस्य, वहु—। Qual. अचलः।

2. परिणत &c.—परि+नम+क्त कर्त्तरि = परिणत ripe. परिणतानि फलानि, कर्मधा—। तैः द्योतन्ते इति परिणतफल+द्युत+णिनि कर्त्तरि साधुकारिणि = परिणतफलद्योतिनः। तैः। Qual. काननाम्रैः। Mangoes when ripe are of various colours—cp—"अनेकवर्णं पवनावधूतं भूमौ पतत्याम्रफलं विपक्वम्"।

Here the fruits presented a pale white colour ( पाण्डुवर्ण ) and thus resembled the surface of a female breast. Also com— "आताम्रहरितपाण्डुर"—Sak. IV.

3. काननाम्रैः—काननस्य or काननस्थाः आम्राः इतत्—or शाकपार्थिवादि कर्मधा—। तैः। अनुक्ते कर्त्तरि ३या ; the verb is कृन्न in छन्नोपान्तः।

4. स्निग्ध &c.—वेणी braid of hair. स्निह + क्त कर्त्तरि = स्निग्ध glossy. स्निग्धा वेणी, कर्मधा—। तेन सवर्णः, ३तत्—। तादृशः वर्णः अस्य, बहु—। तादृशे। Qual. त्वयि ( which has भावे ७मी—see Malli ). The black cloud on the top well resembled the black nipple of a female breast. Thus the mount white on all sides शेषविस्तारपाण्डुः and black on the top imitated a female breast.

5. नूनम्—An अव्यय meaning 'surely'. Adv. Qual. यास्यति।

6. यास्यति—या + ऌट् स्यति। Nom. अचलः। याति, ययौ, अयासीत्।

7. अमर &c.—मिथुन pair. अमराणां मिथुनम्, ६तत्—। प्र + ईक्ष + कर्मणि अनीयर = प्रेक्षणीया to be looked at. अमरमिथुनेन प्रेक्षणीया, ३तत्— by the rule "कर्त्तृकरणे कृता बहुलम्"। We avoid the समास as मिथुनस्य प्रेक्षणीया, for in that case समास will be barred by the varttika "प्रतिपदविधाना षष्ठी न समस्यते", मिथुनस्य having कर्त्तरि षष्ठी by "कृत्यानां कर्त्तरि वा"। Hence Malli's अमरमिथुनानां प्रेक्षणीया is questionable. The ६तत्—may however be allowed bere if the षष्ठी be taken as शेष, but that would be a far-fetched defence and hence to be avoided. Qual. अवस्थाम्।

8. शेष &c.—शिष + घञ भावे = शेष remainder. वि + स्तृ + घञ भावे = विस्तार expanse. शेषश्चासौ विस्तारश्च, कर्मधा—। तत्र पाण्डुः (pale white), सुपसुपा—। Qual. अचलः and स्तनः।

9, Voice—कर्म्मोपान्तेन अचलेन...—पाण्डुना श्यामेन स्तनेन...प्र अचलेन अवस्था यास्यते ।

### *19. Next you will meet Narmada.*

**तस्मिन् स्थित्वा वनचरवधूभुक्तकुञ्जे मुहूर्त्तं**
**तोयोत्सर्गद्रुततरगतिस्तत्परं वर्त्म तीर्णः ।**
**रेवां द्रक्ष्यस्युपलविषमां विन्ध्यपादे विशीर्णां**
**भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य ॥ १८ ॥**

Prak.—Easy.

Prose.—वनचरवधूभुक्तकुञ्जे तस्मिन् ( आम्रकूटे ) मुहूर्त्तं स्थित्वा तोयोत्सर्गद्रुततरगतिः त्वं तत्परं वर्त्म तीर्णः ( सन् ), गजस्य अङ्गे भक्तिच्छेदैः ( रचनाभङ्गिभिः ) विरचितां भूतिमिव उपलविषमे विन्ध्यपादे ( उन्नतानतभागे ) विशीर्णां रेवां द्रक्ष्यसि ।

Beng.—বনচরবধূকর্তৃক ভুক্তকুঞ্জ সেই আম্রকূট পর্বতে মুহূর্ত্তকাল থাকিয়া, জলবর্ষণহেতু ক্ষিপ্রগমনবিশিষ্ট তুমি পরবর্ত্তিপথ অতিক্রম করিয়া বিন্ধ্যপর্বতের উন্নতানতভাগে পতিত নর্ম্মদানদীকে হস্তির অঙ্গে রচনাভেদে বিন্যস্ত পত্রাবলির ন্যায় দেখিবে ।

Eng.—Having for a moment rested in that mount whose bowers are enjoyed by wives of foresters, you of a light motion through discharge of water shall override the next path and shall see river Narmada fallen into the uneven slopes of Vindhya like decorations made by painting-patches on an elephant body.

Expl.—The black elephant will resemble the slope of Vindhya and the variegated streams of Narmada there will match variegated painting works on elephant's body.

Sanj —स्थित्वेति । हे मेघ, वने चरन्तीति 'वनचराः' [ "तत्पुरुषे कृति बहुलम्" इति बहुलग्रहणात् अलुक् न भवति ] तेषां वधूभिः भुक्ताः 'कुञ्जाः' लतागृहाः

यत्र तस्मिन् ["निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे" इत्यमरः] तत्र ते नयनविनोदोऽस्तीत्यर्थः। तस्मिन् आम्रकूटे 'मुहूर्त्तम्' अल्पकालं न तु चिरं, स्वकार्य्यविरोधात् इति भावः ["मुहूर्त्तमल्पकाले स्यात् घटिकाद्वितयेऽपि च" इति शब्दार्णवः] 'स्थित्वा' विश्रम्य 'तोयोत्सर्गेण', "त्वामासार" इत्युक्तवर्षणेन "द्रुततरगतिः' लाघवात् हेतोरिति क्षिप्रगमनः सन्। 'तस्मात्' आम्रकूटात् परम्' अनन्तरं 'तत्परं वर्त्म' मार्गं 'तीर्णः' अतिक्रान्तः। 'उपलैः' पाषाणैः विषमे विन्ध्यस्याद्रेः 'पादे' प्रत्यन्तपर्वते ["पादाः प्रत्यन्तपर्वताः" इत्यमरः] 'विशीर्णां' समन्ततो विसृमराम् [एतेन कस्याश्चित् कामुक्याः प्रियतमचरणपातोऽपि ध्वन्यते] 'रेवां' नर्मदां ['रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका" इत्यमरः] 'गजस्याङ्गे' शरीरे 'भक्तयः' रचनाः, रेखा इति यावत् ["भक्तिः निषेवणे भागे रचनायाम् "इति शब्दार्णवः] तासां 'छेदैः भङ्गिभिः 'विरचितां भूतिं' शृङ्गारमिव भसितमिव वा ["भूतिर्मातङ्गशृङ्गारे जातौ भस्मनि सम्पदि" इति विश्वः] 'द्रक्ष्यसि'। अयमपि महांस्ते नयनकौतुकलाभः इति भावः॥

## Charcha.

1. तस्मिन्—Refers to आम्रकूट। अधि ७मी।

2. वनचर &c.—भुज + क्त कर्मणि = भुक्त enjoyed. वनेचरन्तीति वनचराः forester. वन + चर + ट कर्त्तरि—उपपदतत्—। चर takes ट in the कर्त्तृवाच्य by the rule "चरेष्टः"। By the rule "तत्पुरुषे कृति बहुलम्" the विभक्ति in a तत्पुरुष is optionally retained when कृदन्त word follows. Thus वनेचर might be allowed; cp. "युधिष्ठिरं द्वैतवने वनेचरः"—Kirat 1. वनचराणां वध्वः, ६तत्—। ताभिः भुक्ताः, ३तत्—। तादृशा कुञ्जा यत्र, बहु—। तस्मिन्। Qual. तस्मिन्। The epithet suggests existence of worthy solaces there.

3. मुहूर्त्तम्—अत्यन्तसंयोगे (or—व्याप्यार्थे) २या by the rule "कालाध्वनोरत्यन्तसंयोगे"।

4. तोयोत् &c.—उद् + सृज + घञ् भावे = उत्सर्ग downpour. गम् +

क्तिन् भावे = गति course. अतिशयेन द्रुता इति द्रुत + तरप् स्त्रियाम् = द्रुततरा। तोयानाम् उत्सर्गः, इतत्— । तेन द्रुततरा, इतत्— । तादृशी गतिरस्य, बहु— । The cloud is already light through discharge of water. See Sl. 17.

5. तत्परम्—पर next. तस्मात् परम् तत्परम् सुप्सुपा— । Qual. वर्त्म ।

6. तीर्णः—तॄ + क्त कर्त्तरि = तीर्णः crossed. Pred. to त्वम् understood.

7. रेवाम—Reva is the river Narmada that rises from Amrakuta. Obj of द्रक्ष्यसि ।

8. द्रक्ष्यसि—दृश + लृट् स्यसि । Nom. त्वम् ।

9. विन्ध्य &c.—पाद foot. विन्ध्यस्य पादः, इतत्— । तस्मिन् । अधिकर्मो । Vindhya was full of stones ( उपलविषम ). Hence नर्मदा fallen into it and divided in many ways gave one the impression of lines of decoration on a huge black elephant.

10. विशीर्णाम्—वि + शॄ + क्त कर्त्तरि स्त्रियाम् = विशीर्णा fallen and divided variously. सारोद्धारिणी says "शतशः स्फुटितप्रवाहाम्" । Qual. रेवाम् ।

11. भक्तिच्छेदैः—भक्ति is painting. छेद is patch. भक्तीनां छेदाः, इतत्— । तैः । करणे इया । cp "भक्तिभिर्बहुधाभिरर्पिता भूतिरिव मत्तदन्तिनः" —Kumara.

12. भूतिम्—भूति is decoration. ताम् । उपमान of रेवाम् । भूति is compared to रेवा ; lines of paints ( भक्तिच्छेद ) with lines of streams. See also note. 9.

13 Voice.—...—गतिना...तीर्णेन...त्वया...विरचिता भूतिः इव... विशीर्णा रेवा द्रक्ष्यते... ।

*20. Narmada's fragrant water will refresh you.*

**तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि-**
**र्जम्बूकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।**
**अन्तःसारं घन तुलयितुं नानिलः शक्ष्यति त्वां**
**रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ॥ २० ॥**

Prak.—Easy.

Prose.—वान्तवृष्टिः ( त्वं ) तिक्तैः ( सुरभिभिः ) वनगजमदैः वासितं जम्बूकुञ्ज-प्रतिहतरयं तस्याः तोयमादाय गच्छेः। हे घन, अन्तःसारं त्वाम् अनिलः तुलयितुं न शक्ष्यति। सर्वो हि रिक्तः लघुः भवति, पूर्णता गौरवाय ( भवति )।

Beng.—তুমি জল বর্ষণ করিয়াছ, সুতরাং বনগজের সুরভি মদে বাসিত এবং জম্বুকুঞ্জে নিরুদ্ধবেগ ( তাই নির্মল ) নর্মদার জল গ্রহণ করিয়া যাইবে। হে মেঘ, অন্তঃবলযুক্ত তোমাকে বায়ু ও আন্দোলিত করিতে পারিবে না। সারহীন সমস্তদ্রব্যই লঘু হয় এবং পূর্ণতা গৌরবের হেতু।

Eng.—With water poured down, you will proceed taking Narmada's water, scented by fragrant ichor of wild tuskers and having its force obstructed by Jambugroves. O cloud, wind will not be able to agitate you, full of substance as you are. All emptied things are light and fullness is conducive of weight.

Expl.—The cloud having thrown down its accumulated water will get purified. Then refreshed with Narmada's fragrant fresh water, it will gain in strength and stamina. And thus will proceed to its work defying all external attacks.

Sanj.—तस्या इति। हे मेघ, 'वान्तवृष्टिः' उद्गीर्णवर्षः सन्; कृतवमनस्य व्यज्यते। 'तिक्तैः' सुगन्धिभिः, तिक्तरसवद्भिश्च [ "तिक्तो रसे सुगन्धौ च" इति विश्वः ] 'वनगजमदैः वासितं' सुरभितं भावितं च [ "हिमवद्विन्ध्यमलया गजानां प्रभवाः"

इति विन्ध्यस्य गजप्रभवत्वात् इति भाव: ] 'जम्बुकुञ्जै: प्रतिहतरयं' प्रतिबद्धवेगम्। सुखपेयमित्यर्थ:। अनेन लघुत्वं कषायभावना च व्यज्यते। 'तस्या' रेवाया: 'तोयमादाय गच्छे:' व्रज। 'हे घन' मेघ, अन्त: सारो बलं यस्य तं 'त्वामनिल:' आकाशवायु:, शरीरस्थश्च गम्यते। 'तुलयितुं न शक्ष्यति न शक्तो भविष्यति। तथाहि 'रिक्त:' अन्त:सारशून्य: 'सर्वो हि लघुर्भवति' प्रकम्प्यो भवति इत्यर्थ:। 'पूर्णता' सारवत्ता 'गौरवाय' अप्रकम्प्यत्वाय भवति इत्यर्थ: [ अयमत्र ध्वनि:—आदौ वमनशोधितस्य पुंस: पश्चात् श्लेष्मशोषणाय लघुतिक्तकषायाम्बुपानात् लब्धबलस्य वातप्रकोपो न स्यात् इति। यथाह वाग्भट:—"कषायाश्च हिमास्तस्य विशुद्धौ श्लेष्मणो हिता:। किमु तिक्तकषाया वा ये निसर्गात् कफापहा:। कृतशुद्धे: क्रमात् पीतपेयादे: पथ्यभोजिन:। वातादिभिर्न बाधा स्यादिन्द्रियैरिव योगिन: ॥" इति ] ॥ २० ॥

## Notes on Malli.

1. The implication here is—of one who has first cleansed himself by vomitting and purging, light bitter astringent things are to destroy the phlegm that lurks in the system ; thus having strength regained his वायु ( nervous system ) is not agitated. [ Here the quotation from Bagbhata is very easy ].

N. B.—The cloud will first be ( वान्त ), then taking light astringent water will gain in strength and thus defy the onsets of wind.

## Charcha.

1. तिक्तै:—तिक्त is fragrant here. तै:। Qual. वनगजमदै:। वनगजानां मदा: ( ichor ), इतत्—। तै:। अनुक्ते कर्त्तरि ३या—the क्रिया is वासितम्।

2. वासितम्—वास ( चुरादि—अदन्त )+क्त कर्मणि = scented. तत् Qual. तोयम्।

3. वान्तवृष्टिः—वम + क्त कर्मणि स्त्रियाम् = वान्त poured. Here वान्त has a secondary sense ( गौणवृत्ति ) and is not faulty hence, cp. "निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते" Dandin. वान्ता वृष्टिः अनेन, बहु—। Qual त्वाम्। For the implication ( ध्वनि ) everywhere, see Malli and Notes thereon.

4. जम्बु &c.—प्रति + हन + क्त कर्त्तरि = प्रतिहत obstructed. जम्बूनां कुञ्जाः, ६तत्—। तेषु प्रतिहतः, सुप्सुपा। तादृशः रयः ( वेगः ) अस्य, बहु—। तत्। Qual. तोयम्। The water being obstructed will accumulate in large quantity and thus give facility for a good drink. Cp.—"सुखपेयमित्यर्थः"—Malli. The epithet also suggests that contact with जम्बुकुञ्ज will add to the lucidity and astringency of the water. Hence it will be refreshing too.

5. गच्छेः—गम् + लिङ् थास्। Nom. त्वम्।

6. अन्तःसारम्—सार is strength. अन्तः सारः अस्य, बहु—। तम्। Qual. त्वाम्। See also Malli.

7. तुलयितुम्—तुलां करोति इति तुला + णिच् + तुमुन् = तुलयितुम् lit. 'to measure', hence secondarily 'to overcome' 'to agitate. Cp.—"तुलयति, तुलना इत्यादौ तुलाशब्दात् णिच्"। "तत्करोति तदाचष्टे" इति णिच्। चुरादि तुल however will give तोलयितुम्। शक धातुयोगे तुमुन्।

8. शक्ष्यति—शक + लृट् स्यति। Nom. अनिलः।

9. गौरवाय—गुरोः भाव इति गुरु + अण् = गौरव weight. तस्मै। "क्लृपि सम्पद्यमाने च" इति ४र्थी। The cloud was first light through its downpour then by taking fresh water it will gain in wieght and strength.

10. Voice.—...वान्तवृष्टिना गम्येत...अनिलेन शक्ष्यते...रिक्तेन लघुना भूयते...पूर्णतया गौरवाय भूयते...

*21. Deers will follow your path.*

नीपं दृष्ट्वा हरितकपिशं केसरैरर्द्धरूढै-
राविर्भूत प्रथममुकुलाः कन्दलीश्चानुकच्छम् ।
जग्ध्वारण्येष्वधिकसुरभिं गन्धमाघ्राय चोर्व्याः
सारङ्गास्ते जललवमुचः सूचयिष्यन्ति मार्गम् ॥२१॥

Prak.—सारङ्गास्ते मार्गं सूचयिष्यन्ति [ Deers will mark and thus show your path] Clouds always go on the sky—जललवमुचः ते मार्गम् [ The cloud will shed waters as it will go and thus leave marks whereby its track will be traced ]. But waters dry up on grounds—अरण्येषु उर्व्याः अधिकसुरभिं गन्धं च आघ्राय [ The downpour imparts fragrance to earth. Thus the smell will help the deer in tracing the course clouds take ]. Is it the only guide to trace the track ?—अनुकच्छम् आविर्भूतप्रथममुकुलाः कन्दलीः जग्ध्वा च मार्गं सूचयिष्यन्ति [ Downpour helps abundant growth of plantain trees in marshy lands. And the deer will partake of those plantain trees as their favourite meal. Thus their ingress thither will indicate the course the clouds took ] Is this all to infer cloud's course ?—अर्द्धरूढैः केसरैः हरितकपिशं नीपं दृष्ट्वा मार्गं सूचयिष्यन्ति [ Further, rains put Kadambas to blossoms. And these are a lovely sight to deers. On the way they will surely stare at these flowers. Thus in this way, deers will go to those places only where clouds have imparted new growths ; hence in a way they will mark the track the cloud took ].

Prose.—सारङ्गाः अर्द्धरूढैः केसरैः हरितकपिशं नीपं दृष्ट्वा, अनुकच्छमाविर्भूत-

प्रथममुकुला: कन्दली: जग्ध्वा च, अरण्येषु उर्व्या: अधिकसुरभिं गन्धम् आघ्राय च, जललवमुच: ते मार्गं सूचयिष्यन्ति ।

Beng.—অর্দ্ধোদ্গত কেশরদ্বারা হরিৎ ও কপিশবর্ণ কদম্বপুষ্প দেখিয়া, জলপ্রায় স্থলে কদলীর প্রথমোৎপন্ন মুকুল খাইয়া এবং অরণ্যে ভূভাগের অধিক সুরভি গন্ধ আঘ্রাণ করিয়া হরিণগণ ( প্রকারান্তরে ) জলবর্ষণকারী তোমার মার্গ সূচিত করিয়া দিবে। [অর্থাৎ হরিণগণের কদম্বদর্শন, কদলী ভক্ষণাদি ক্রিয়ায় তোমার পথ অনুমিত হইবে ]।

Eng.—Looking up to Kadamba flowers, green and brown through half-grown filaments, eating near marshy lands plantain trees with first buds on and smelling highly fragrant scent of Earth the deer will indicate ( and thus show ) the path marked by the sprinkling drops of rain.

Expl.—See Prak.

Sanj.—नीपमिति । 'सारङ्गा' मतङ्गजा कुरङ्गा वा [ "सारङ्गश्चातके भृङ्गे कुरङ्गे च मतङ्गजे" इति विश्व: ] 'अर्द्धरूढ़ै:' एकदेशोद्गतै: 'केसरै:' किञ्जल्कै: 'हरितं' पालाशवर्णं 'कपिशं' श्यामवर्णं, श्यामारुणमितियावत् [ "पालाशो हरितो हरित्" इति "श्याम: स्यात् कपिशो धूम्रधूमलौ कृष्णलोहिते" इति चामर: ] 'हरितं' च तत् 'कपिशं' च [ "वर्णो वर्णेन" इति समास: ] 'नीपं' स्थलकदम्बकुसुमं [ "अथ स्थलकदम्बके नीप: स्यात् पुलके" इति शब्दार्णव: ] 'दृष्ट्वा' संप्रेक्ष्य विदित्वा इति यावत्, तथा कच्छेषु अनूपेषु 'अनुकच्छम्' [ "अव्ययं विभक्ति—" इत्यादिना विभक्त्यर्थेऽव्ययीभाव: । "जलप्रायमनूपं स्यात् पुंसि कच्छस्तथाविध:" इत्यमर: ] 'आविर्भूता: प्रथमा' प्रथमोत्पन्ना 'मुकुला' यासां ता 'कन्दली:' भूमिकदली: [ "द्रोणपर्णी स्निग्धकन्दा कन्दली भूकदल्यपि" इति शब्दार्णव: ] 'जग्ध्वा' भक्षयित्वा [ "अदो जग्धिर्—" इति जग्ध्यादेश: ] 'अरण्येषु अधिकसुरभिम्' अतिघ्राणतर्पणम् [ दग्धारण्येषु इति पाठे 'दग्धम्' इत्यधिकविशेषणम् । अर्थवशात् कदलीश्च दृष्ट्वेव इत्यन्वयो द्रष्टव्य: ] 'उर्व्या' भूमेर्गन्धमाघ्रायजललवमुच:' मेघस्य ते तव 'मार्गं सूचयिष्यन्ति' अनुमापयिष्यन्ति [ यत्र यत्र वृष्टिकार्यं नीपकुसुमादिकं दृश्यते तत्र तत्र त्वया वृष्टमिति अनुमीयते इति भाव: ] ॥ २१ ॥

## Notes on Malli.

1. Wherever are seen Kadamba flowers etc., the works of rain, there your downpour is inferred—this is the sense.

## Charcha.

1. दृष्ट्वा—दृश + क्त्वाच्। Sights of newly blossoming Kadambas are attractive indeed.

2. हरित &c.—हरित green, कपिश brown. हरितञ्च तत् कपिशं च कर्मधा—by the rule "वर्णो वर्णेन"। तत्। Qual. नीपम्।

3. अर्द्ध &c.—रुह + क्त कर्त्तरि = रूढ़ grown. अर्द्धं यथा तथा रूढ़ाः, सुप्-सुपा—। तैः। Qual. केशरैः। केशरैः has हेतौ तृतीया। Half-grown filaments presented different colours.

4. आविर्भूत &c.—आविस् is an अव्यय meaning प्रकाश (manifestation). "प्रकाशे प्रादुराविः स्यात्" इत्यमरः। आविस्+भू+क्त कर्त्तरि = आविर्भूत grown. प्रथम is first, hence 'new'. प्रथमे मुकुलाः, कर्मधा—। आविर्भूता प्रथममुकुलाः आसां बहु—। ताः। Qual. कदलीः।

5. अनुकच्छम्—अव्ययीभाव समासः। See Malli. Adv. Qual. आविर्भूत।

6. जग्ध्वा—अद + क्त्वाच्। Having eaten. जग्ध is ordered in place of अद by the rule "अदो जग्धिर्ल्यप्तिकिति"।

7. अधिक &c.—अधिकं यथा तथा सुरभि, सुप्सुपा—। तम्। Qual. गन्धम्।

8. Remark.—The reading दग्धारण्येषु is preferable, for that states the reason for अधिकसुरभित्व in उर्व्याँ। In this reading the construction will be नीपं दृष्ट्वा कदलीं च दृष्ट्वा।

9. सारङ्गाः—सारम् (सबलम्) अङ्गमस्य इति सारङ्गः deer. सार + अङ्ग

gives सारङ्ग meaning पशु वा पक्षिन् by the varttika "शकन्ध्वादिषु पररूपं वाच्यम्"। By सारङ्ग Malli means both 'deer' and elephant. Indeed कदली भक्षण is highly characteristic of elephants, and विन्ध्य is a hot bed of wild elephants ( see sl. 20 above ) ; further कदली भक्षण is not definitely known to be favourite with stags. So if the reading be जग्ध्वा then सारङ्ग should be taken to mean 'elephant'. But as दग्धारण्य &c. seems to be a better reading, so we take सारङ्ग to mean 'deer' only. Kalidasa by सारङ्ग elsewhere means 'stag' only, cp. "एष राजेव दुष्मन्तः सारङ्गेणातिरंहसा"—Sak. I. and "इमं तावत् प्रियाप्रवृत्तिनिमित्तं सारङ्गमासीनमभ्यर्थये"—Vik. IV. In rainy season stags come out and jump about through joy. Hence take सारङ्ग as 'deer'.

10. जल &c.—लव drop. जलस्य लवाः, ६ तत्—। तान् मुञ्चन्ति इति जललव + मुच + क्विप् कर्त्तरि = जललवमुक्, तस्य। Qual. ते।

11. सूचयिष्यन्ति—सूच + णिच् (चुरादि) + लृट् स्यन्ति। Nom. सारङ्गाः।

12.—Voice.—...सारङ्गैः मृगैः...सूचयिष्यते...।

*(21 A)* अम्भोबिन्दुग्रहणचतुरांश्चातकान् वीक्षमाणाः
श्रेणीभूताः परिगणनया निर्दिशन्तो बलाकाः।
त्वामासाद्य स्तनितसमये मानयिष्यन्ति सिद्धाः
सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि॥

N. B.—Prof. K. B Pathak has shown that poet Jinasena utilised the 120 verses of our Meghaduta in his work called पार्श्वाभ्युदय। The present verse is not seen in his work, hence it seems to be spurious. Malli. however gives its commentary

which is appended herewith. The verse is also somewhat indelicate, so we do not elaborately explain it.

Prose.—अम्भोविन्दुग्रहणचतुरान् चातकान् वीक्षमाणाः, श्रेणीभूताः बलाकाः परिगणनया निर्दिशन्तः सिद्धाः ( देवयोनिविशेषाः ) स्तनितसमये सोत्कम्पानि प्रियसहचरीसम्भ्रमालिङ्गितानि आसाद्य त्वां मानयिष्यन्ति ।

Sanj.—अम्भ इति । 'अम्भोविन्दूनां' वर्षोदविन्दूनां ग्रहणे [ सर्वं सद्यापतितमम्बु न चातकस्य हितम्—इति शास्त्रात् भूस्पृष्टोदकस्य तेषां रोगहेतुत्वादन्तराले एव स्वीकारे] चतुरान् चातकान् वीक्षमाणा' कौतुकात् पश्यन्तः, 'श्रेणीभूता' बद्धपङ्क्तीः [ अभूततद्भावे च्विः ] 'बलाका:' बकपङ्क्तीः 'परिगणनया' एका द्वे तिस्र इति संख्यानेन 'निर्दिशन्तो' हस्तेन दर्शयन्तः 'सिद्धाः स्तनितसमये' त्वत्गर्जितकाले 'सोत्कम्पानि' उत्कम्पपूर्वकाणि 'प्रियसहचरीणां सम्भ्रमेण आलिङ्गितानि आसाद्य' स्वयंग्रहणाश्लेषसुखमनुभूय इत्यर्थः । 'त्वां मानयिष्यन्ति' त्वन्निमित्तत्वात् सुखलाभस्य इति भावः ॥

## *22. I fear your delay.*

उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते ।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत् ॥ २२ ॥

Prak.—Easy.

Prose.—हे सखे, मत्प्रियार्थं द्रुतमपि यियासोः ( गन्तुमिच्छोः ) ते ककुभसुरभौ पर्वते पर्वते कालक्षेपम् उत्पश्यामि । केकाः स्वागतीकृत्य सजलनयनैः शुक्लापाङ्गैः ( मयूरैः ) प्रत्युद्यातः भवान् कथमपि आशु गन्तुं व्यवस्येत् ।

Beng.—হে বন্ধো, আমার প্রিয় অর্থের জন্য (অথবা আমার প্রিয়ার জন্য) দ্রুত যাইতে ইচ্ছা হইলেও কুটজপুষ্পের গন্ধে আমোদিত প্রতি পর্বতে তোমার বিলম্ব ঘটিবে —ইহা আমি অনুমান করি। কেকা দ্বারা অভ্যর্থনা করিয়া আনন্দে অশ্রুজলবর্ষী

ময়ূরগণ আকাশে তোমার প্রত্যুদ্গমন করিবে এবং তুমি কোন মতে শীঘ্র যাইতে চেষ্টা করিবে।

Eng.—O friend, wishing to go quick for my good news (*Or*—for my darling) I see your delay in every hill fragrant with *Kutaja* flowers. Having greeted with their cries, the peacocks shedding tears of joy (at the advent of rain) will follow you up (in the sky); then you too will strive to go fast.

Expl.—Easy.

Sanj.—उत्पश्यामीति। हे 'सखे' मेघ 'मत्प्रियार्थं' यथ तथा 'द्रुतं' क्षिप्रम्। ["लघु क्षिप्रमथ द्रुत"मित्यमरः] 'यियासोः' यातुमिच्छोः 'अपि' [ यातेः सन्नन्तात् उ-प्रत्ययः ] 'ते' तव 'ककुभैः' कुटजकुसुमैः 'सुरभौ' सुगन्धिनि ["ककुभः कुटजोऽर्जुनः" इति शब्दार्णवः] 'पर्वते पर्वते' प्रतिपर्वतम् [ वीप्सायां द्विरुक्तिः ] 'कालक्षेपं' काल-विलम्बम् [ "क्षेपो विलम्बे निन्दायाम्" इति विश्वः ] "उत्पश्यामि उत्प्रेक्षे। विलम्ब-हेतुं दर्शयन्नाशुगमनं प्रार्थयते शुक्लेति—'सजलानि' सानन्दबाष्पाणि 'नयनानि' येषां तैः 'शुक्लापाङ्गैः' मयूरैः [ "मयूरो बर्हिणो बर्ही शुक्लापाङ्गः शिखावलः" इति यादवः ] 'केकाः' स्ववाणीः [ "केका वाणी मयूरस्य" इति अमरः ] 'स्वागतीकृत्य' स्वागतवचनी-कृत्य 'प्रत्युद्यातः' प्रत्युद्गतः कृतातिथ्य इत्यर्थः। 'भवान् कथमपि' यथा कथञ्चित् 'आशु गन्तुं' व्यवस्येत् उद्युञ्जीत [ प्रार्थने लिङ्। "शेषे प्रथमः" इति प्रथमपुरुषः। शेषश्चायं भवच्छब्दो युष्मदस्मद्व्यतिरेकात् ]। स्वागतीकृत्य केका इत्यत्र केकासु आरोप्य-मानस्य स्वागतवचनस्य प्रकृतप्रत्युद्गमनोपयोगात् परिणामालङ्कारः। तदुक्तमलङ्कारसर्वस्वे—"आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः" इति ॥ २२ ॥

## Notes on malli.

1. In स्वागतीकृत्य केकाः &c.—the figure is परिणाम in as much as the स्वागतवचन which is attributed to केका helps the प्रत्युद्गमन; Thus the *Alamkarasarvaswa* says—the figure is *Parinama* when the thing attributed helps the matter on hand."

## Charcha.

1. उत्पश्यामि—उद् + दृश + लट् मि। Nom. अहम् understood. The word means 'infer'.

2. मत् &c.—प्रिय: अर्थ:, कर्मधा—। मम प्रियार्थ:, ६तत्—। तत् यथा तथा। for my good news.—Adv. Qual. यियासो:। or—प्रिया darling. मम प्रिया, ६तत्—। मत्प्रियायै इदम् &c., नित्यतत्—i. e., नित्य समास of the ४र्थीतत् class by the rule "अर्थेन नित्य समासो विशेष्य लिङ्गता च वक्तव्य"। Rest as abose. Both meanings suit the context.

3. यियासो:—यातुमिच्छुरिति या + सन् + उ = यियासु: wishing to go. तस्य। Qual. ते।

4. ककुभ &c.—सुरभि fragrant. ककुभ is Kutaja flowers. These flowers are fragrant and begin to blossom from spring to rainy season, ककुभै: सुरभि, ३तत्—। तस्मिन्। Qual. पर्वते (which has अधि ७मी)।

5. शुक्लापाङ्गै:—शुक्लापाङ्ग is peacock. see Malli. तै:। अनुक्ते कर्त्तरि ३या—the क्रिया is in प्रत्युद्यात:।

6. स्वागतीकृत्य—स्वागत welcome (*Deriv. ante*). अस्वागतं स्वागतं कृत्वा इति स्वागत + च्वि (अभूततद्भावे) + कृ + ल्यप्। *Having welcomed.* केका: स्वागतीकृत्य = केकारवेण शुभागमनम् आपृच्छ्य। The peacocks asked his welfare by केका shouts.

7. प्रत्युद्यात:—प्रति + उद् + या + क्त कर्मणि। Qual. भवान्। The word means "to follow by going up."

8. कथमपि—A compound अव्यय meaning 'somehow'. Cp. "क्रोशात् कथमप्यपक्रामति" &c.—*Raghu.*

9. व्यवस्येत्—वि + अव + सो + लिङ् यात्। Nom. भवान्। The लिङ् is प्रार्थनायाम् here. see Malli.

10. Voice.—मया कालक्षेपः......उद्दृश्यते......प्रत्युद्यातेन भवता... व्यवस्येत... ।

### 23. *Dasarna country favoured by you.*

पाण्डुच्छायोपवनवृतयः केतकैः सूचिभिन्नै-
र्नीडारम्भैर्गृहबलिभुजामाकुलग्रामचैत्याः ।
त्वय्यासन्ने परिणतफलश्यामजम्बूवनान्ताः
सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः ॥ २३ ॥

Prak.—त्वयि आसन्ने दशार्णाः कतिपयदिनस्थायिहंसाः सम्पत्स्यते [ In the rainy season swans go to *manasa* lake ; and on the way they tarry where rain heavily pours. Thus as the cloud will pass over Dasarna country, swans will stay there for a few days—the downpour being expected to be heavy there ; for the cloud is already पूर्ण । ] Will not Dasarna show any other sign ?—सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृतयः दशार्णाः [ The country has all around its garden-hedges. And these will be all white through the blossoming of Ketaka flowers in the rainy season ]. A beautiful sight indeed !—गृहबलिभुजां नीडारम्भैः आकुलग्रामचैत्याः दशार्णाः [ The sacred trees like Peepul etc. there, will be crowded with crows etc. eager to make nests for shelter against rains ] Is this all ?—परिणतफलश्यामजम्बूवनान्ताः दशार्णाः [ Another beauty there will be that all the Jambu forests there will wear an attractive black colour owing to maturity of black berries ; thus the country will be wealthy at the advent of clouds ].

Prose.—त्वयि आसन्ने दशार्णाः सूचिभिन्नैः केतकैः पाण्डुच्छायोपवनवृतयः,

गृहबलिभुजां नीडारम्भैः आकुलग्रामचैत्याः, परिणतफलश्यामजम्बूवनान्ताः कतिपयदिनस्थायिहंसा सम्पत्स्यन्ते।

Beng,—তোমার আগমনে দশার্ণদেশে উপবনের সীমাভূত মুকুলাকারে প্রস্ফুটিত কেতকীপুষ্পে পাণ্ডুবর্ণ হইবে, গ্রামবৃক্ষ গৃহবলিভক্ষণশীল কাকাদিপক্ষিগণের নীড়ারম্ভহেতু পরিপূর্ণ হইবে, বনান্ত পরিপক্কজম্বুফলে শ্যামবর্ণ হইবে, এবং সেখানে (মানসগমনোন্মুখ) হংসগণ কিছুকাল থাকিবে।

Eng.—At your approach, the Dasarna country will have its garden-hedges white through blossoming of *Ketaki* flowers —its sacred trees will be crowded with the nest-building of domestic birds—the outskirts of its Jambu forest will look black by ripe fruits—it will also have swans resting there for a few days.

Expl.—See Prak.

Sanj—पाण्डुरिति। हे मेघ, 'त्वयि आसन्ने' सन्निकृष्टे सति दशार्णा नाम जनपदाः 1 (? जनपदः) 'सूचिभिन्नैः' सूचिषु मुकुलेषु भिन्नैः विकसितैः ["केतकीमुकुलाग्रेषु सूचिः स्यात्" इति शब्दार्णवः] 'कैतकैः' केतकीकुसुमैः 'पाण्डुच्छाया' हरिद्वर्णा 'उपवनानां वृतयः' कण्टकशाखावरणा येषु ते तथोक्ताः ["प्राकारो वरणः सालः प्राचीरं प्रान्ततो वृतिः" इत्यमरः] तथा 'गृहबलिभुजां' काकादिग्रामपक्षिणां 'नीडारम्भैः' कुलायनिर्माणैः ["कुलायो नीडमस्त्रियाम्" इत्यमरः] चित्याया इमानि 'चैत्यानि' रथ्यावृक्षाः ["चैत्यमायतने बुद्धबिम्बे चोद्देशपादपे" इति विश्वः] 'आकुलानि सङ्कीर्णानि ग्रामेषु 'चैत्यानि' येषु ते तथोक्ताः। तथा 'परिणतैः' पक्वैः 'फलैः श्यामानि यानि 'जम्बूवनानि' तैः 'अन्ताः' रम्याः ["मृताववसिते रम्ये समाप्तौ अन्त इष्यते" इति शब्दार्णवः] तथा कतिपयेषु एवं दिनेषु स्थायिनो हंसा येषु ते तथोक्ता एवंविधाः 'सम्पत्स्यन्ते' भविष्यन्ति ["पोटायुवतिस्तोककतिपय—" इत्यादिना, कतिपयशब्दस्य उत्तरपदत्वेऽपि न तच्छब्दस्योत्तरत्वमस्ति, अस्य शास्त्रस्य प्रायिकत्वात्].

## Notes on Malli.

1. N. B.—Here the usual reading जनपदाः is faulty. The singular is expected, for only one जनपद is intended ; hence say

दशार्णा नाम जनपदः। 2. In कतिपयदिन, the word कतिपय should have been placed latter as उत्तरपद by the rule "पोटायुवतिस्तोक कतिपय गृष्टिधेनुवशावेहद्वष्कयणी प्रवक्तृश्रोत्रियाध्यापकधूर्त्तः जातिः"। But as this rule is not obligatory in all cases and being प्रायिक ( general ) the present instance does not come under its operation. Hence कतिपय is placed first in the compound.

## Charcha.

1. पाण्डु &c—वरण' वृतिः ( वृ + क्तिन् भावे ) hedge. उपवन garden. उपवनानां वृतिः garden-hedge, ६तत्—। पाण्डुःछाया ( lustre ) यस्याः सा, बहु—। पाण्डुच्छायाः उपवनवृतयः एषाम्, बहु—। Pred. to दशार्णाः।

2. कैतकैः—हेतौ ३या। Ketaka plants are thorny and serve the purpose of hedges round gardens. Now these Ketaka plants serving as garden-hedges were in blossoms. Hence the hedges looked white owing to their white buds.

3. सूचि &c.—भिद + क्त कर्त्तरि = भिन्न blossoming. सूचि bud. सूचिषु भिन्नाः, सुप्सुपा—। तैः। Qual. कैतकैः।

4. नीड़ा &c.—आ + रभ + घञ् भावे = आरम्भ beginning. नीड़ nest. नीडानाम् आरम्भः, ६तत्—। तैः। हेतौ ३या।

5. गृह &c.—वलि offering. गृहाणां वलयः, ६तत्—। तान् भुञ्जते इति गृहवलि + भुज + क्विप् कर्त्तरि = गृहवलिभुजः those that take offerings of householders i. e., birds like crow &c. तेषाम्। शेषे ६ष्ठी, related to नीड़ारम्भ।

6. आकुल &c.—चिता or चित्या is a funeral ground. तस्या इमानि इति चित्या + अण् = चैत्यानि sacred trees. The old Hindu practice was to bury a सन्न्यासिन् on a river-side and to plant a tree like वट on that grave. The foot of that tree was

cemented and was held in great esteem. Hence चैत्य came to mean a sacred tree. ग्रामस्य चैत्यानि, ६तत्—। आकुलानि ग्रामचैत्यानि एषाम् बहु—। Pred. to दशार्णाः। The domestic birds were busy in nest-building to protect themselves from coming rains.

7. आसन्ने—आ+सद्+क्त कर्त्तरि=आसन्न near. तस्मिन्। Pred. to त्वयि ( which has भावे ७मी )।

8. परिणत &c.—परि+णम+क्त कर्त्तरि=परिणत mature. जम्बूवनस्य अन्तः ( cutskirt ) जम्बूवनान्तः, ६तत्—। परिणतानि फलानि, कर्मधा—। परिणतफलैः श्यामाः, ३तत्—। तादृशाः जम्बूवनान्ताः एषाम्, बहु—। Qual. दशार्णाः। Here Malli ingeniously expounds as परिणतफलश्यामानि जम्बूवनानि, कर्मधा—। तैः अन्ता ( रम्याः ) ३तत्—। But we take अन्त ( in वनान्त ) as outskirts, for our poet uses वनान्त elsewhere in the sense of 'outskirt of a forest'. Cp. "तमावर्त्तमानं वनिता वनान्तात्" —and "वृत्तः स नौसङ्गतयोर्वनान्ते"—Raghu II ; also see "शुचिमाससाद स वनान्तभुवम्"—Kirat, and "यत्र रम्यो वनान्तः—Uttar. Such ingenious explanation of Malli is also seen under "विमलोपलमेखलान्ताः" —Sisu IV. Sl. 40. Pred, to दशार्णाः।

9. सम्पत्स्यन्ते—सम+पद+लृट् स्यन्ते। Nom. दशार्णाः। Cp. "सम्पत्स्यते वः कामोऽयम्"—Kumara.

10. कतिपय &c.—Some editors and indeed the वाचस्पत्य too derives कतिपय from कति with अयच् and the angment पुक्। But the rule "प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च" seems to be against this. There तय stands for अयच् i.e., अयच्प्रत्ययान्त words. So तय includes कतिपय if it is अयच्प्रत्ययान्त and then कतिपय needs no separate mention in the sutra. The separate mention of कतिपय shows

therefore that कतिपय is not अयच् प्रत्ययान्त at all. Besides there is no rule to attach अयच् to कति or to have युक् either. Hence we take it as a primitive word ( अव्युत्पन्नप्रातिपदिक )। कतिपयानि दिनानि, कतिपयदिनानि, कर्मधा—। We do not get दिनकतिपयानि by "पोटायुवति—" &c, for the rule is प्रायिक। See Malli & notes thereon. तानि ( व्याप्य ) स्थायिनः, २तत्—by "अत्यन्तसंयोग च"। कतिपयदिनस्थायिनः हंसाः एषु—, बहु—। Pred. to दशार्णाः। Swans will halt there to enjoy climatie beauty of rainy reason. Mallis—कतिपयेषुदिनेषु स्थायिनः हंसा येषु &c, are only elucidatory.

11. दशार्णाः—दशार्ण is the name of a क्षत्रियजाति। तेषां निवासो जनपदः इति दशार्ण+अण्=दशार्णाः the country Dasarna. The affix अण् which is to be attached here by "तस्य निवासः", disappears by the rule "जनपदेलुप्"। Again the word दशार्ण though meaning a single country is in the plural by the rule "लुपि युक्तवत् व्यक्तिवचने"—when disappearance of an affix is enjoined by the word लुप्, it is to be understood that the *gender* and *number* of the word derived are to be the same as those of the stem. Thus we get दशार्णाः जनपदः and not जनपदाः। Derive दशार्ण thus :—दश ऋणानि ( दुर्गाणि ) एषामिति दशार्णा क्षत्रिय विशेषाः। दश+ऋण gives दशार्ण with वृद्धि by the Varttika "प्रवत्सतरकम्बलवसनार्णदशानामृणे"। The derivation here as—दश ऋणानि येष ते दशार्णाः जनपदाः is wrong. Here as also in "सप्तव्याधा दशार्णषु" follow the derivation given by us. If we have only दशार्णो देशः or दशार्णानदी then दश ऋणानि अस्मिन् अस्याम् वा is all right. Prof. Wilson thinks that it may correspond with the modern District of छतीसगड़।

12. Voice.—दशार्णैः...—हतिभिः...—यामचे—त्वे...—जम्बूवनान्तैः... स्थायिहंसैः...सम्पत्स्यते।

## *24. Arrival at Vidisa and Vetravati.*

**तेषां दिक्षु प्रथितविदिशालक्षणां राजधानीं**
**गत्वा सद्यः फलमविकलं कामुकत्वस्य लब्धा।**
**तीरोपान्तस्तनितसुभगं पास्यसि स्वादु यस्मात्**
**सभ्रूभङ्गं मुखमिव पयो वेत्रवत्याश्चलोर्मि॥ २४॥**

Prak.—Easy,

Prose.—दिक्षु प्रथितविदिशालक्षणां तेषां राजधानीं गत्वा सद्यः कामुकत्वस्य फल लब्धा (प्राप्स्यते)। यस्मात् स्वादु चलोर्मि वेत्रवत्याः पयः, सभ्रूभङ्गं मुखमिव तीरोपान्तस्तनितसुभगं पास्यसि।

Beng.—চারিদিকে বিদিশা নামে খ্যাত দশার্ণজনপদের রাজধানীতে যাইয়া তুমি তখনই বিলাসিত্বের ফল লাভ করিবে; কারণ তুমি বেত্রবতীর স্বাদু তরঙ্গসমন্বিত জল ভ্রূভঙ্গযুক্ত মুখের (অধরের) ন্যায় তটপ্রান্তে গর্জন করিতে করিতে পান করিবে।

Eng.—Having gone to the capital of Dasarna, well,-Known all around by the name of Vîdisa, you will forthwith attain the full benefit of a lover, for you will drink the sweet rippling water of Vetravati like the frowning face (of a woman), making at the same time a sweet rumbling near the river-edge.

Expl.—Easy.

Sanj.—तेषामिति। 'दिक्षुप्रथितं' प्रसिद्धं 'विदिशेति लक्षणं' नामधेयं यस्यास्ताम् ["लक्षणं नाम्नि चिह्ने च" इति विश्वः] 'तेषां' दशार्णानाम्। धीयन्ते ऽस्यामिति धानी ["करणाधिकरणयोश्च" इति ल्युट्] राज्ञां धानी 'राजधानी' ["कृद्योगा षष्ठी समस्यते" इति वक्तव्यात् समासः] तां प्रधाननगरीम् ["प्रधाननगरी राज्ञां राजधानीति

कथ्यते" इति शब्दार्णवः ] 'गत्वा सद्यः कामुकत्वस्य विलासितायाः [ "विलासी कामुकः कामी स्त्रीपरो रतिलम्पटः।" इति शब्दार्णवः ] 'अविकलं' समग्रं 'फलं' प्रयोजनं 'लब्धा' लप्स्यते त्वया इति शेषः [ कर्मणि लुट् ]। कुतः—'यस्मात्' कारणात् 'स्वादु' मधुरं, चला ऊर्मयः यस्य तत् 'चलोर्मि' तरङ्गितं 'वेत्रवत्याः' नाम नद्याः 'पयः सभ्रूभङ्गं' भ्रुकुटियुक्तं, दशनपीड़या इति भावः 'मुखमिव' इत्यर्थः। 'तीरोपान्ते' तटप्रान्ते यत् 'स्तनितं' गर्जितं तेन सुभगं यथा तथा। [ स्तनितशब्देन मनितमपि व्यपदिश्यते। "ऊर्ध्वमुच्चलितकण्ठनादितं हुङ्कृतं स्तनितमल्पघोषवत्" इति लक्षणात् ] 'पास्यसि' [ पिवते लृट् ]। "कामिनामधरास्वादः सुरतादतिरिच्यते" इति भावः॥ २४॥

## Charcha.

1. तेषाम्—Refers to Dasarna country. शेषे ६ष्ठी, related to राजधानीम्।

2. प्रथित &c—प्रथ + क्त = प्रथित well known. विदिशा इति लक्षणम् इति विदिशालक्षणं, शाकपार्थिवादिवत् कर्मधा—। प्रथितं विदिशालक्षणम् अस्याः, बहु—। The capital was Known as Vidisa, the modern Bhilsa ( in Malava ). It is situated on river Vetravati. For deriv. of राजधानी see Malli.

3. लब्धा—लभ + लुट् ता कर्मणि। लुट् implies futurity. Nom is त्वया understood.

4. तीरो &c—अन्त end. अन्तमुपगतः उपान्तः, edge प्रादितत्—। तीरस्य उपान्तः, ६तत्—। तत्र स्तनितम् ( rumbling ), सुप्सुपा—। तेन सुभगम्, ३तत्—। तत् यथा तथा। Adv. Qual. पास्यसि। Lovers enjoy their beloved with a suppressed sound of joy. The cloud with also imitate a lcvcr and kiss the rippling waters ( i. e. lower lip ) of Vetravati ( the lady ).

5. पास्यसि—पा + लृट् स्यसि। Nom. त्वम्। पिबति, पपौ, अपिबत्।

6. यस्मात्—हेतौ ५मी।

7. सभ्रूभङ्गम्—भ्रूभङ्गः frowns, ६तत्—। तेन सह वर्त्तमानः, बहु—by the rule "तेन सहेति तुल्ययोगे"। तत्। Qual. मुखम्। The frowning face corresponded with rippling water. सहभ्रूभङ्गम् is also correct by "वोपसर्जनस्य"।

8. चलोर्मि—ऊर्मि ripple. चलतीति चलः (moving) पचाद्यच्। चला ऊर्मयः अस्य, बहु—। Qual. पयः। This reading is surely better, for it correspouds the epithet सभ्रूभङ्गम् and thus completes the simile. The reading चलोर्म्याः keeps up the alliteration on y, but does not commend itself.

9. Voice.—त्व'...फलं...लप्स्यसे...त्वया पास्यते (पायिष्यते वा)।

## *25. Take rest at mount Nichaih (near Bhilsa).*

नीचैराख्यं गिरिमधिवसेस्तत्र विश्रामहेतो-
स्त्वत्सम्पर्कात् पुलकितमिव प्रौढ़पुष्पैः कदम्बैः।
यः पण्यस्त्रीरतिपरिमलोद्गारिभिर्नागराणा-
मुद्दामानि प्रथयति शिलावेश्मभिर्यौवनानि ॥ २५ ॥

Prak.—Easy.

Prose.—तत्र विश्रामहेतोः नीचैराख्यं प्रौढ़पुष्पैः कदम्बैः त्वत्सम्पर्कात् पुलकितमिव गिरिम् त्वम् अधिवसेः। यः (गिरिः) पण्यस्त्रीरतिपरिमलोद्गारिभिः शिलावेश्मभिः नागराणां उद्दामानि यौवनानि प्रथयति।

Beng.—সেই বিদিশায় বিশ্রামের জন্য পূর্ণ বিকসিত কদম্বপুষ্পে যেন তোমার সমাগমেই পুলকিত নীচৈঃ নামে পর্বতে তুমি বাস করিবে। সেই গিরি পণ্য স্ত্রীগণের

রতিকালের সুরভিবিকীর্ণকারি শিলাগৃহ দ্বারা নগরের উচ্ছৃঙ্খল যুবকগণের যৌবনের পরিচয় দিতেছে।

Eng.—You will there ( near Vidisa ) stay for rest on the hill named *Nichaih* which is horripilated as it were by your touch owing to full-blown Kadamba flowers. That hill testifies to the dissipated youth of country folks by its rock-rooms emitting fragrance used by harlots during dalliance.

Expl.—Easy.

Sanj.—नीचैरिति। हे मेघ 'तत्र' विदिशासमीपे 'विश्रामः' खेदापनयः [ भावे घञ् प्रत्ययः] तस्य 'हेतोः' विश्रामार्थम् इत्यर्थः [''षष्ठी हेतुप्रयोगे'' इति षष्ठी (?)] 'प्रौढ़-पुष्पैः' प्रचुरकुसुमैः 'कदम्बैः' नीपवृक्षैः 'त्वत् सम्पर्कात्' तव सङ्गात् पुलका अस्य जाता 'पुलकितमिव' सञ्जातपुलकमिवस्थितम् [ तारकादित्वात् इतच् प्रत्ययः ] नीचैरित्याख्या यस्य तं 'नीचैराख्यं' गिरिमधिवसेः' गिरौ वस इत्यर्थः [ ''उपान्वध्याङ्वसः'' इति कर्मत्वम् ]। 'यो' नीचै गिरिः 'पण्याः' क्रेया 'स्त्रियः'—'पण्यस्त्रियो' वेश्याः [ ''वारस्त्री गणिका वेश्या पण्यस्त्री रूपजीविनी'' इति शब्दार्णवः ] तासां 'रतिषु' यः 'परिमलः' गन्धविशेषः [ ''विमर्दोत्थे परिमलो गन्धे जनमनोहरे'' इति अमरः ] 'तमुद्गिरन्ति' आविष्कुर्वन्तीति तथोक्तानि तैः 'शिलावेश्मभिः' कन्दरैः 'नागराणां' पौराणाम् 'उद्दामानि' उत्कटानि 'यौवनानि प्रथयति प्रकटयति। उत्कटयौवनाः क्वचिदनुरक्ता वाराङ्गना विस्रम्भविहारकाङ्क्षिण्यो मात्रादिभयात् निशीथसमये कञ्चन विविक्तं देशमाश्रित्य रमयन्ति इति प्रसिद्धिः [अत्र उद्गारशब्दः गौणार्थत्वात् न जुगुप्सावहः प्रत्युत काव्यस्य अतिशोभाकरः एव ; तदुक्तं दण्डिना—''निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अति सुन्दर-मन्यत्र ग्राम्यकक्षां विगाहते'' इति। ]॥ २५॥

## Notes on Malli.

1. Here tha word उद्गार being used in a secondary sense is not at all indelicate but rather ornates the poem. Thus Dandin says—"निष्ठ्यूतोद्—&c. (which see under वान्तवृष्टि *ante* ).

## Charcha.

1. नीचैराख्यम्—आख्यानमाख्या ( आ + ख्या + अङ् भावे ) name. नीचैः आख्या अस्य, named Nichaih, बहु—। तम्। Qual. गिरिम्। This is perhaps a hill near Bhilsa.

2. अधिवसेः—अधि + वस + लिङ् यास्। Nom. त्वम्। This root वस is सकर्मक here being preceded by अधि। Hence गिरिम् and *not* गिरौ। The rule is—"उपान्वध्याङ् वसः"।

3. तत्र—अधि ७मी। Refers to neighbourhood of Vidisa.

4. विश्रामहेतोः—वि + श्रम + णिच् + अच् भावे = विश्रामः rest. अच् coming in by the rule. "एरच्"। The usual derivation as—वि + श्रम + घञ् is against Panini ; the वृद्धि being barred by the rule "नोदात्तोपदेशस्य मान्तस्य अनाचमेः"—and श्रम is an उदात्तोपदेश root. This वृद्धिनिषेध however does not apply to णिजन्त श्रम for the sutra refers to कृत्s only ; cp "न च णिच्यपि वृद्धिनिषेधः शङ्काः। 'नोदात्त' इत्यत्र 'कृति' इत्यनुवृत्त्या णिचि निषेधाभावात्"—*Jnanendra Bhikshu.* In वि + श्रम + णिच्, the rule "मितां ह्रस्वः" also does not stand in the way. For in this rule वृत्तिकार brings in "वा" from the previous sutra "वा चित्तविरागे"। But this "वा" is restricted to certain cases ( व्यवस्थित विभाषा ) and thus establishes विश्रामयति &c. cp "केचिदत्र 'वा' इत्यनुवर्तयन्ति सा च व्यवस्थितविभाषा"—*Vritti.* Also see our notes on—स पर्य्यान् विश्रामयेति &c.—Raghu. I. विश्राम एव हेतुः, कर्मधा—। तस्य or तस्मात्। हेतौ ५मी or शेषे षष्ठी। ३या is also correct here. हेतौ ५मी is better here. Here the rule "षष्ठी हेतुप्रयोगे" does not at all apply. For this rule does not regulate the षष्ठी in हेतुशब्द but that in the word of which the हेतुत्व is implied ( द्योत्य )। Hence it may be

cited if विश्राम had appeared with the षष्ठी विभक्ति attached to it. Besides, the विभक्ति to explain here is that in the प्रातिपदिक विश्राम-हेतु। Again this *directly states* the हेतुत्व of विश्राम and does not leave it to be inferred. This is another reason why the rule does not apply here. cp. "हेतुशब्दप्रयोगे हेतौ द्योत्ये षष्ठी स्यात्"—*Bhattoji.* Also see—खिद्यसे लोकहेतोः—Sak. Act V. and "निवास-हेतोरुटजं वितेनुः"—Rag. XIV.

5. पुलकितम् इव—पुलकित (deriv. Malli). तम्। Qual. गिरिम्। इव implies उत्प्रेक्षा (surmise). This horripilation is supposed to be due to joy.

6. प्रौढ &c.—प्र + वह + क्त कर्त्तरि = प्रौढ well mature. तादृशानि पुष्पाणि येषां, बहु—। तैः। Qual. कदम्बैः। कदम्बैः has अनुक्ते कर्त्तरि ३या। Here प्र + ऊढ gives प्रौढ with वृद्धि by the varttika "प्रात् ऊहोढोढ्येषैष्येषु"।

7. पण्य &c.—पण्यस्त्री is a harlot. तासां रतयः (enjoyment), ६तत्—। तासु परिमलः (perfume) सुप्सुपा—। तमुद्गिरन्ति इति पण्यस्त्री-रतिपरिमल + उद् + गृ + णिनि कर्त्तरि साधुकारिणि = पण्यस्त्रीरतिपरिमलोद्गारीणि। तैः। Qual. वेश्मभिः। These harlots secretly came to rock caves and enjoyed their beloved at nights. Their fragrant toilets used during enjoyment made those caves fragrant. Thus from these perfumes youthful lincenses could be inferred, वेश्मभिः has करणे ३या।

8. नागराणाम्—नगरे भवा इति नगर + अण् = नागराः born in city. तेषाम्। शेषे ६ष्ठी।

9. उद्दामानि—दाम्नः शृङ्खलाया उद्गतानि इति उद्दामानि unrestrained प्रादितत्—। Qual. यौवनानि। उद्दाम as अकारान्त is also seen, cp. "उद्दामेन विरदपतिना" &c.—Uttaracharita.

10. प्रथयति—प्रथ+णिच् (चुरादि)+लट् ति। Discloses. Nom. यः।

11. यौवनानि—युवन् young one. तस्य भाव इति युवन्+अण्=यौवनम् youth. तानि। Obj. of प्रथयति। "हायनान्तयुवादिभ्योऽण्" इति अव भावे अण्।

12. त्वत् &c.—सम्+पृच+घञ् भावे=सम्पर्कः contact. तव सम्पर्कः, इतत्—। तस्मात्। इतौ ५मी।

13. Voice.—नीचैराख्यः गिरिः पुलकितः...अध्युष्यते...येन प्रथ्यन्ते...।

*26. Start after rest.*

विश्रान्तः सन् व्रज वननदीतीरजातानि सिञ्च-
न्नुद्यानानां नवजलकणैः यूथिकाजालकानि।
गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां
छायादानात् क्षणपरिचितः पुष्पलावीमुखानाम् ॥२६॥

Prak.—Easy.

Prose.—विश्रान्तः सन् वननदीतीरजातानि उद्यानानां यूथिकाजालकानि नवजलकणैः सिञ्चन्, गण्डस्वेदापनयनरुजाक्लान्तकर्णोत्पलानां पुष्पलावीमुखानां ( स्त्रीणाम् ) छायादानात् क्षणपरिचितः ( सन् ) व्रज।

Beng.—বিশ্রাম করিয়া আরামোদ্যানের, বনস্থ নদীতীরজাত যূথিকাকলিসমূহ নবজলকণা দ্বারা আর্দ্র করতঃ, পুষ্পগ্রহণ তৎপর স্ত্রীলোকের মুখোপরি ছায়া দান করিবে। আতপতাপহেতু কপোলের ঘর্ম মুছিতে মুছিতে তাদের কর্ণোৎপল ম্লান হইয়াছে। তখন ছায়াদানহেতু মুহূর্ত্তকাল তাদের সহিত পরিচিত হইয়া যথানির্দিষ্ট পথে যাইবে।

Eng.—Having rested, you proceed sprinkling with fresh water-drops the buds in the gardens, of Jasmine flowers grown on the banks of forest rivers, and also being known for a moment for offering shade to the faces of flower-gathering women—the ear-lotuses of whose faces have faded owing to onset due to removal of sweat on the cheeks.

Expl.—The cloud will pass over gardens full of Jasmine buds and during its passage there it will shade and thus do service to women gathering flowers there Sun-heat has already made them perspire and the constant rubbing on their faces to remove those sweats will cause their ear-lotuses to fade. Thus the shade at this juncture will be all the more hailed and the cloud will also be acquinted with those women. This will surely cheer up the cloud as well.

Sanj.—विश्रान्तेति। 'विश्रान्तः सन्' तत्र नीचैर्गिरौ विनीताध्वश्रमः सन् 'वने' अरण्ये या नद्यस्तासां तीरेषु 'जातानि' स्वयं रूढ़ानि अकृत्रिमाणीत्यर्थः [ नदनदीति पाठे "पुमान् स्त्रिया" इत्येकशेषः दुर्वारः ] 'उद्यानानाम्' आरामाणां' सम्बन्धीनि 'यूथिकाजालकानि' मागधीकुसुममुकुलानि [ "अथ मागधी गणिका यूथिका" इत्यमरः। "कोरकजालककलिकाकुड्मलमुकुलानि तुल्यानि" इति हलायुधः ] 'नवजलकणैः सिञ्चन्' आर्द्रीकुर्वन् [ अत्र सिञ्चते रार्द्रीकरणार्थत्वे द्रवद्रव्यस्य करणत्वम्, यत्र तु क्षरणमर्थः तत्र कर्मत्वम्—यथा 'रेतः सिक्त्वा कुमारीषु' 'सुखैर्निषिञ्चन्तमिवामृतं त्वचि' इत्येवमादि। एवं किरतीत्यादीनामपि—'रजः किरति मारुतः', 'अवाकिरन् वयोवृद्धास्तं लाजैः पौरयोषितः' इत्यादिषु अर्थभेदाश्रयणेन रजोलाजाना कर्मत्वकरणत्वे गमयितव्ये । ] तथा 'गण्डयोः' कपोलयोः 'स्वेदस्य अपनयनेन' प्रमार्जनेन या 'रुजा' पीड़ा [ भिदादित्वादङ् प्रत्ययः ] तया 'क्लान्तानि' म्लानानि 'कर्णोत्पलानि' येषां तेषां तथोक्तानाम्। पुष्पाणि लुनन्तीति 'पुष्पलाव्यः' पुष्पावचायिकाः स्त्रियः [ "कर्मण्यण्"। "टिड्ढाणञ्—"इत्यादिना ङीप् ] तासां 'मुखानि'। तेषां 'छायया' 'अनातपस्य 'दानात्' कान्तिदानञ्च ध्वन्यते [ "छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपे" इत्यमरः ] कामुकदर्शनात् कामिनीनां सुखविकाशो भवति इति भावः। 'क्षणपरिचितः' क्षणं संसृष्टः सन् न तु चिरं, 'व्रज गच्छ ॥ २६ ॥

## Notes on Malli.

1. Here in नवजलकणैः सिञ्चन्, the verb सिच् means to wet

hence the करणत्व of the liquid (जलकण); but where the meaning is sprinkling there the liquid takes कर्म cp. "रेत: सिक्त्वा—" &c, similar is the case with कृ etc. In 'रज: किरति मारुत:' and in अवाकिरन् लाजैः,—रजस् and लाज take कर्म and करण respectively for the meaning differs.

## Charcha.

1. विश्रान्त:—वि + श्रम + क्त कर्त्तरि। Pred. to त्वम् understood. सन् ( अस + शतृ ) is also pred. to त्वम्।

2. व्रज—व्रज + लोट् हि। Nom. त्वम्।

3. वननदी &c.—वनस्य or वनस्था. नद्य: इति ६तत्—or शाकपार्थिवादि। वननद्या: तीरम्, ६तत्—। तत्र जातानि इति सुप्सुपा—। Qual. यूथिका-जालकानि।

4. उद्यानानाम्—उद्यान garden. तेषाम्। शेषे ६ष्ठी, related to जालकानि। This sense is—jasmine buds were in the gardens on the bank of forest-river.

5. नवजलकणै:—करणे ३या। For particulars see Malli and notes thereon.

6. सिञ्चन्—सिच् + लट: स्थाने शतृ = सिञ्चन् wetting. स:। Qual. त्वम्। Here सिच means आर्द्रीकरण—see Mall.

7. यूथिका &c.—जालक bud. यूथिका jasmine यूथिकाया जालकानि। तानि। Obj. of सिञ्चन्।

8. गण्ड &c.—स्विद् + घञ् भावे = स्वेद perspiration. अप + नी + ल्युट् भाव = अपनयन removal. रुज + अङ् भावे (भिदादि) = रुजा trouble (पीड़ा)। क्लम + क्त कर्त्तरि = क्लान्त fade. गण्डयो: स्वेद:, ६तत्—। तस्य अपनयनम्, कर्म षष्ठ्या समास:। तेन रुजा, ३तत्—। कर्णयो: उत्पलानि, ६तत्—। The ear-lotuses were fashions for decoration of female faces. गण्ड-

खेदापनयनरुजया क्लान्तानि सुपसुपा—। तादृशानि कर्णोत्पलानि एषाम्, बहु—। तेषाम्। Qual. मुखानाम्।

9. छायादानात्—छायायाः (shade) दानम्, ६तत्—। तस्मात्। हेतौ ५मी।

10. क्षणपरिचितः—परि + चि + क्त कर्त्तरि = परिचित known. क्षणं (व्याप्य) परिचितः, (अत्यन्त संयोगे) २या तत्—। The temporary recognition will be beneficial for both the cloud and the women—the cloud being a lover. see Malli "कामुकदर्शनात्—भवति"। Qual. त्वम्।

11. पुष्प &c.—पुष्प + लू + अण् + ङीप् स्त्रियाम् = पुष्पलावी a female flower-gatherer. A variety of मालाकार perhaps. Indeed Prof. Wilson thinks that पुष्पलावी refers to a class of मालाकार। तासां मुखानि, ६तत्—। तेषाम्। शेषे षष्ठी related to छायादानात्।

12 Voice.—...विश्रान्तेन सता सिञ्चता...परिचितेन त्वया व्रज्यताम्...।

*27. Your circuitous way will be of benefit to you.*

**वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां**
**सौधोत्सङ्गप्रणयविमुखो माभूरुज्जयिन्याः।**
**विद्युद्दामस्फुरितचकितैस्तत्र पौराङ्गनानां**
**लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि॥ २७॥**

Prak.—Easy.

Prose.—उत्तराशां प्रस्थितस्य भवतः पन्था यदपि (यद्यपि इत्यर्थः) वक्रः (स्यात्); (तथापि) उज्जयिन्याः सौधोत्सङ्गप्रणयविमुखः मा स्म भूः। तत्र विद्युद्दामस्फुरितचकितैः लोलापाङ्गैः पौराङ्गनानां लोचनैः यदि न रमसे (तदा) वञ्चितः असि।

Beng.—উত্তরদিকে গমনোদ্যত তোমার পথ উজ্জয়িনী হইয়া গেলে যদিও বক্র হইবে তথাপি তুমি উজ্জয়িনীর হর্ম্ম্যের উপর আরোহণসুখে বিমুখ হইও না। সেখানকার পৌরনারীগণের বিদ্যুৎমালার আবির্ভাবহেতু সন্ত্রস্ত লোলাপাঙ্গ নয়নে যদি মনের আনন্দ না হয় তবে তুমি প্রতারিত হইবে ( সুখ হইতে বঞ্চিত হইবে )।

Eng.—Proceeding northwards your way will no doubt be circuitous ( if you go via Ujjaini ), but still don't be averse to the enjoyment of mounting the palace roofs there. If you do not delight in the lovely looks of city damsels there—looks, restless in the corners and agitated at the advent of streaks of lightning—then surely you are deceived ( of enjoying their charming sights ).

Expl.—Easy.

Sanj.—वक्र इति। 'उत्तराशाम्' उदीचीं दिशं प्रति 'प्रस्थितस्य भवतः पन्था उज्जयिनीमार्गः 'वक्रः यदपि' दूरः यद्यपि इत्यर्थः [ विन्ध्यात् उत्तरवाहिन्याः निर्विन्ध्यायाः प्राग्भागे कियति अपि दूरे स्थिता उज्जयिनी, उत्तरपथस्तु निर्विन्ध्यायाः पश्चिम इति वक्रत्वम् ] 'तथापि उज्जयिन्याः' विशालानगरस्य [ "विशालोज्जयिनी समा" इत्युत्पलः ] 'सौधानाम् उत्सङ्गेषु'—उपरिभागेषु 'प्रणयः' परिचयः [ "प्रणयः स्यात् परिचये याच्ञायां सौहृदेऽपि च" इति यादवः—] 'तस्य विमुखः' पराङ्मुखः 'मा स्म भूः' न भवेः इत्यर्थः [ "स्मोत्तरे लङ् च" इति चकारादाशीरर्थे (?) लुङ्। "न माङ् योगे" इत्यड़ागमप्रतिषेधः। ] 'तत्र' उज्जयिन्यां 'विद्युद्दाम्नां' विद्युल्लतानां 'स्फुरितैः' स्फुरणैः 'चकितैः' भीतैः 'लोलापाङ्गैः' चञ्चलकटाक्षैः 'पौराङ्गनानां लोचनैः न रमसे यदि' तर्हि 'त्वं वञ्चितः' प्रतारितः 'असि' जन्मवैफल्यं भवेत् इत्यर्थः ॥ २७ ॥

## Notes on malli.

1. In 'मा स्म भूः'—लुङ् is enjoined in the sense of आशिस् (benediction) by the rule "स्मोत्तरे लङ् च", लङ् being optional with स्म। Then अ of लुङ् is prohibited by the rule "न माङ् योगे"। [ N. B.—Here प्रार्थना suits better than आशिस्। He entreats

the cloud to go via Ujjaini to enjoy the enviable sight of damsels there ].

## Charcha.

1. वक्रः—Course via Ujjaini was surrely round about. See Malli—"विन्ध्यात्......इति वक्रत्वम्"। Qual. पन्थाः।

2. यदपि—A coumpound अव्यय meaning यद्यपि ( though ).

3. प्रस्थितस्य—प्र + स्था + क्त कर्त्तरि। Qual. भवतः।

4. उत्तराशाम्—आशा quarter. "दिशस्तु ककुभः काष्ठाः आशाश्च हरितश्चता" इत्यमरः। उत्तरा आशा, कर्मधा—। ताम्। Obj. of प्रस्थितस्य। प्र + स्था is अकर्मक, but उत्तराशा here becomes its कर्म but the maxim "देशकालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्"।

5. सौधोत् &c.—उद् + सञ्ज + घञ् अधिकरणे = उत्सङ्ग top ( here ). प्र + णी + अच् भावे = प्रणय love, pleasure hence 'pleasure of mounting.' सौध mansion. तेषाम् उत्सङ्गः mansion tops, ६तत्—। तेषु प्रणयः pleasure of mounting mansion tops, सुप्सुपा—। तत्र विमुखः, सुप्सुपा—। Pred. to, त्वम्। Palaces of Ujjain are worth seeing. Ujjain was perhaps one of Kalidasa's favourite place hence he particularly mentions it, and extols it. It is also named as विशाला, अवन्ती &c.

6. भूः—भू + लुङ स। Nom. त्वम्। Here अट् in लुङ् is prohibited by "न माङ्योगे"। भवः ( with लङ् ) is optinal here. See Malli and notes thereon. Here लुङ् is used in the sense of लोट् प्रार्थनायाम्। Between friends request sounds better.

7. उज्जयिन्याः—A famous city from the earliest times to the present day. तस्याः। शेषे ६ष्ठी, related to सौध in सौधोत्सङ्ग &c. "सापेक्षत्वेऽपि गमकत्वात् समासः", hence सौध is compounded.

8. विद्युद्दाम &c.—दाम is माला ( wreath ). वि+द्युत+क्विप् कर्त्तरि =विद्युत् lightning. स्फुर+क्त नपुंसके भावे=स्फुरित flash. चक्+क्त कर्त्तरि = चकित frightened. विद्युतां दाम, ६तत्—। तस्य स्फुरितानि ( विलासा: ) ६तत्—। विद्युद्दामस्फुरितेभ्य: चकितानि, ५तत्—। तै:। Qual. लोचनै:। लोचनै: has करणे ३या।

9 तत्र—तस्मिन् स्थाने इति तद्+ङि (७मी)+त्रल् स्वार्थे=तत्र। Refers to उज्जयिनी। अधि ७मी। Not only Ujjaini's palaces are enjoyable but also female looks there will inmensely delight you. Hence go via that city.

पौर &c.—पुरे भवा इति पुर+अण्=पौरा: living in city. पौरा: अङ्गना:। तासाम्। शेषे ६ष्ठी related to लोचनै:।

11 लोला &c.—लोल is restless. अपाङ्ग corners of eyes. लोल: अपाङ्ग: एषाम्। बहु—। तै:। Qual. लोचनै:। Quivering eyes of beautiful women are charming. And this charm you will get in Ujjaini. If you miss it, your life will be deprived of real enjoyment.

12. रमसे—रम+लटसे। Nom. त्वम्। अरंस्त, रंस्यते।

13. वञ्चित:—वञ्च+णिच् चुरादि+क्त कर्त्तरि। Pred. to त्वम्।

14. असि—अस्+लट सि। Nom. त्वम्।

15. Voice—यथा चक्षुषा भूयते...—विमुखेन मा भावि...रम्यते त्वया... वञ्चितेन भूयते...।

## *28. Contact with* निर्विन्ध्या *river.*

**वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणाया:**
**संसर्पन्त्या: स्खलितसुभगं दर्शितावर्त्तनाभे:।**
**निर्विन्ध्याया: पथि भव रसाभ्यन्तर: सन्निपत्य**
**स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु ॥ २८ ॥**

Prak.—पथि रसाभ्यन्तरः भव [ Be water-loaded full of love as well on the way ]. How will this water and love will come in me ?—निर्विन्ध्यायाः सन्निपत्य भव [ In contact with river निर्विन्ध्या you will get these ]. निर्विन्ध्या may supply me with water, but whence love will come to me ?—वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः निर्विन्ध्यायाः [ निर्विन्ध्या is not only a river, but she is a lady love to you. Rows of twittering birds there will be her waist chain. Thus she will give you the appearance of a lady and her sight will excite you ]. This is not all ?—स्खलितसुभगं संसर्पन्त्याः दर्शितावर्त्तनाभेः निर्विन्ध्यायाः [ The river moving beautifully and stumbling on rocks will attract you like the dalliances of a lover. Again the whirlpool there will exactly imitate deep navels of beautiful women. Thus she being a lady love to you cannot but excite you with the sentiment of love ]. She may not lean towards me—स्त्रीणां प्रियेषु विभ्रमः हि आद्यं प्रणयवचनम् [ The fact that she shows you the navel and moves dalliantly before you speak of her attraction towards you. In fact amorous gestures *with females speak of their internal love. Hence your approach will be welcomed by her. And thus you will enjoy love sentiment in contact with her* ].

Prose.—पथि वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः स्खलितसुभगं संसर्पन्त्याः दर्शितावर्त्तनाभेः निर्विन्ध्यायाः सन्निपत्य रसाभ्यन्तरः भव। स्त्रीणां प्रियेषु विभ्रमः हि आद्यं प्रणयवचनम्।

Beng.—তরঙ্গক্ষোভে মুখরিত বিহগকুল যাহার কাঞ্চীমালা এবং উপলে স্খলিত হইয়া যে সুন্দর প্রবহমান হইতেছে এবং যে আবর্তরূপ নাভি প্রদর্শন করিতেছে এরূপ নির্বিন্ধ্যা নদীর সহিত মিলিত হইয়া জলপূর্ণ এবং শৃঙ্গাররসযুক্ত হও। বিলাসজন্য হাব-ভাবই স্ত্রীলোকের প্রথম প্রণয় বাক্য।

Eng.—Being in contact on the way with the river Nirvindhya be full of water ( and love sentiment as well )—Nirvin-

dhya which has for her waist-chain rows of swans screaming owing to agitation by waves. Again she is flowing beautifully through stumbling on rocks and shows her navel-like whirlpools. Amorous gestures towards lovers are indeed women's first word of love.

Expl.—Here the river is compared to a lady-love. And she having shown this love by gestures the cloud in contact with her will enjoy love sentiment and will have water-supply as well. Also see Prak.

Sanj.—सम्प्रत्युज्जयिनीं गच्छतस्तस्य मध्येमार्गं निर्विन्ध्यासम्बन्धमाह—वीचीति। हे सखे 'पथि' उज्जयिनीपथे 'वीचिक्षोभेण' तरङ्गचलनेन 'स्तनितानां' मुखराणाम् [ कर्त्तरि क्तः ] 'विहगानां' हंसानां 'श्रेणिः' पङ्क्तिरेव 'काञ्चीगुणो' यस्याः तस्याः 'स्खलितेन' उपलस्खलनेन मदस्खलितेन च 'सुभगं' यथा तथा 'संसर्पन्त्याः' प्रवहन्त्याः गच्छन्त्याश्च तथा 'दर्शितः' प्रकटितः 'आवर्त्तः' अम्भसां भ्रम एव 'नाभिः' यया [ "स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः ] निष्क्रान्ता विन्ध्यात् 'निर्विन्ध्या' नाम नदी [ "निरादयः क्रान्ताद्यर्थे पञ्चम्या" इति समासः। "द्विगुप्राप्तापन्न—" इत्यादिना परवल्लिङ्गताप्रतिषेधः 1 ] 'तस्याः' नद्याः 'सन्निपत्य' सङ्गत्य 'रसो' जलमभ्यन्तरे यस्य सः अन्यत्र 'रसेन' शृङ्गारेण अभ्यन्तरः अन्तरङ्गः भव, सर्वथा तस्या रसमनुभव इत्यर्थः [ "शृङ्गारादौ जले वीर्ये सुवर्णे विषशुक्रयोः। आस्वादे च रसं प्राहुः" इति शब्दार्णवः]। ननु तत्प्रार्थनामन्तरेण कथं तदनुभवः युज्यते इत्यत आह2—स्त्रीणामिति। 'स्त्रीणां प्रियेषु विभ्रमः' विलासः एव 'आद्यं प्रणयवचनं' प्रार्थनावाक्यं हि। स्त्रीणामेष स्वभावः यद्विलासैः एव रागप्रकाशनं न तु कण्ठत इति भावः। विभ्रमश्चात्र नाभिदर्शनादिरूप एव 3॥ २८॥

## Notes on Malli.

1. The समास in निर्विन्ध्या is प्रादिवत्—by the Varttika, "निरादयः—" ( Malli ) ; again विन्ध्य the later word being पुंलिङ्ग the whole ought to be so by the rule "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" but the

Varttika "द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधः वाच्यः" prohibits this परवल्लिङ्गता in cases of प्रादितत्—etc. Hence we get निर्विन्ध्या in the feminine. 2. How enjoyment is possible without being courted by her—on this he says. 3. The sense is, women's nature is to manifest love by gestures and not by words. And gestures in the form of showing navel are said indeed.

## Charcha.

1. वीचि&c.—क्षुभ + घञ् भावे = क्षोभ agitation. स्तन + क्त कर्त्तरि = स्तनित screaming. काञ्चीगुण is waist chain. वीचीनां क्षोभः, ६तत्— । तेन स्तनिताः, ३तत्— । वीचिक्षोभस्तनिता विहगश्रेणयः, कर्मधा— । ता एव काञ्चीगुणः यस्याः, बहु— । तस्याः । Qual. निर्विन्ध्यायाः । Screaming rows of swans are compared to jingling waistchains of women.

2. संसर्पन्त्याः—सम् + सृप + लट् स्थाने शतृ + ङीप् स्त्रियाम् = संसर्पन्ती moving. तस्याः । Qual. निर्विन्ध्यायाः । सृप is भ्वादि, hence नुम् in the feminine by the rule "शप्श्यनोर्नित्यम्" ।

3. स्खलित &c.—स्खलित is 'stumbling on rocks.' तेन सुभगम्, ३तत्— । तत् यथा तथा । Adv. Qual. संसर्पन्त्याः ।

4. दर्शित &c.—दृश + णिच् + क्त कर्मणि = दर्शित shown. आवर्त्त is whirlpool. आवर्त्त एव नाभिः, कर्मधा— । दर्शिता आवर्त्तनाभिः यया, बहु— । तस्याः । Qual. निर्विन्ध्यायाः । These are said by way of amorous gestures.

5. निर्विन्ध्यायाः—Deriv. &c.—( see Malli + notes thereon. ). सम्बन्धविवक्षया षष्ठी । This is a river near Ujjaini and rises from Vindhya Hill.

6. भव—भू + लोट हि । Nom. त्वम् ।

7. रसाभ्यन्तरः—रस means both 'water' and love sentiment,

रस: अभ्यन्तरे यस्य। व्यधिकरण बहु—। Pred to त्वम्। व्यधिकरण बहु—is unavoidable in such cases, cp "नीवारा: शुकगर्भकोटर—" Sak. Act. I. "गड्वादिराकृतिगणत्वात् सप्तम्यन्तस्य अभ्यन्तरशब्दस्य परनिपात:"। Or—रसेन अभ्यन्तर: &c इतत्—( See Maili ).

7. सन्निपत्य—सम् + नि + पत + ल्यप्। Having come in contact.

8. प्रियेषु—विषये ७मी।

9. हि—"हि हेतौ अवधारणे"। Here the word implies अवधारण ( certainty ).

10. Voice—रसाभ्यन्तरेण भूयताम् त्वया। विभ्रमेण आद्येन...प्रणयवचनेन भूयते...।

11. Remark.—It is usual with poets to represent a river as a lady-love, the screaming swans being her jingling waist-chain, pair of Chakravakas being her breasts, whirls being her navels—cp, "आवर्त्तशोभा नतनाभिकान्तेर्भङ्गो भ्रुवां द्वन्द्वचरा: स्तनानाम्"—Raghu XVI.

*29. You are fortunate—She is devoted to you, so try to dispel her emaciation due to separation.*

**वेणीभूतप्रतनुसलिलासावतीतस्य सिन्धु:**
**पाण्डुच्छाया तटरुहतरुभ्रंशिभिर्जीर्णपर्णै:।**
**सौभाग्यं ते सुभग विरहावस्थया व्यञ्जयन्ती**
**कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्य:॥**

Prak.—हे सुभग, पाण्डुच्छाया असौ सिन्धु: अतीतस्य ते सौभाग्यं व्यञ्जयन्ती [ O Fortunate one, this river is devotedly attached to you.

You were abroad and so long following the vow of a पतिव्रता she is now pale indeed ]. How She is pale ?—तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया [ Dry leaves have fallen on the river from trees on the banks—this has rendered her waters pale. Methinks she is pale through separation from you ]. Any other sign of separation ?—वेणीभूतप्रतनुसलिला असौ सिन्धुः [ The river's water is thin now through last summer heat. Thus it is as if she has a thin braid of hair due to separation and consequent observance of the vow of a सती ]. I understand, but what can I do ?—येन विधिना सिन्धुः कार्श्यं त्यजति तथा त्वया उपपाद्यः [ Act and behave towards her in such a way as she might shake off emaciation and become of usual size through enjoyment of your company in the shape of rain and union. In fact enliven up this river निर्विन्ध्या, a ladylove to you. And you are fortunate to have such a devoted lady-love ]. 29.

Prose.—हे सुभग, वेणीभूतप्रतनुसलिला तटरुहतरुभ्रंशिभिः जीर्णपर्णैः पाण्डुच्छाया असौ सिन्धुः विरहावस्थया अतीतस्य ( प्रोषितस्य ) ते सौभाग्यं व्यञ्जयन्ती येन विधिना कार्श्यं त्यजति सः ( विधिः ) त्वया एव उपपाद्यः ।

Beng.—হে সুভগ, বেণীরূপ ক্ষীণজলধারিনী এবং তটজাত বৃক্ষ হইতে পতিত জীর্ণ পত্রে পাণ্ডুবর্ণা এই নদী বিরহাবস্থা দ্বারা প্রোষিত তোমার প্রতি অনুরাগহেতুক সৌভাগ্য প্রকাশ করিতেছে। যাহাতে এর কৃশতা দূর হয় তাহা তুমি করিবে।

Eng.—O Fortunate one, this river is manifesting your good fortune by her wretched state of separation from you who were abroad. She has her waters thin like a thin braid of hair and she is pale through dry leaves fallen from trees grown on river banks. So act in such a way whereby she may give up her thinness.

Expl.—See Prak. ( clouds in the rainy season come once a year. It was abroad so long and the lover river was consequently thin and slender ; so the cloud must again enliven the river by its shower and thus union as well ).

Sanj.—निर्विन्ध्यायाः विरहावस्थां वर्णयन् तन्निराकरणं प्रार्थयते वेणीति। असौ वेणी वेणीभूतं वेण्याकारं 'प्रतनु' स्तोकञ्च सलिलं यस्याः सा तथोक्ता, वेणीभूतकेशपाशा इति च ध्वन्यते। रोहन्तीति रुहाः [ इगुपधलक्षणः कः ] तटयो रुहा ये तरवः तेभ्यः भ्रश्यन्तीति तथोक्तैः 'जीर्णपर्णैः' शुष्कपत्रैः 'पाण्डुच्छाया' पाण्डुवर्णा असत्त्व 'हे सुभग', 'विरहावस्थया' पूर्व्वोक्तप्रकारया कारणेन 'अतीतस्य' एतावन्तं कालमतीत्यगतस्य प्रोषितस्य इत्यर्थः 'ते' तव 'सौभाग्य' सुभगत्वम् [ 'हृद्भग- सिन्ध्वन्ते पूर्वपदस्य च' इत्युभय-पदवृद्धिः ] 'व्यञ्जयन्ती' प्रकाशयन्ती। स खलु सुभगः यमङ्गनाः कामयन्ते इति भावः। 'असौ' पूर्वोक्ता 'सिन्धुः' नदी निर्विन्ध्या [ "स्त्री नद्यां ना नदे सिन्धुर्देशभेदे अम्बुधौ गजे" इति वैजयन्ती ] 'येन विधिना' व्यापारेण 'कार्श्यं' त्यजति सविधिः 'त्वया उपपाद्यः' कर्त्तव्यः इत्यर्थः। स च विधिर्वृकिर वृष्टिः, अन्यत्र सम्भोगः, तदभावनिबन्धनत्वात् कार्श्यस्य इति भावः। इयञ्च पञ्चमी मदनावस्था तदुक्तं रतिरहस्ये—"नयनप्रीतिः प्रथमं चित्तासङ्गस्ततोऽथ सङ्कल्पः। निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः। उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः' इति। [ 'तामतीतस्य' इति पाठमाश्रित्य सिन्धुर्नाम नद्यन्तरमिति व्याख्यातं ; किन्तु सिन्धुर्नाम कश्चित् नदः काश्मीरदेशे स्थितः, नदी तु कुत्रापि नास्तीति एतत् उपेक्ष्यम् इत्याचक्षते । ]।

## Notes on Malli.

1. Mallinatha says that some here read 'वेणीभूतप्रतनुसलिला तामतीतस्य सिन्धुः' and say that there is a river of this name ; but here there being no river of that designation though a river so named is found in Kashmir, this reading is neglected. [ N. B.—Modern researches have shown that there is a river *Kala-sindhu* in Malva. Perhaps this river is meant here. So

we prefer the reading तामतीतस्य सिन्धुः meaning—'ताम्' निर्विन्ध्याम् 'अतीतस्य' अतिक्रम्य गतस्य ते तव सौभाग्यं व्यञ्जयन्ती 'सिन्धुः' तदाख्यः नदी &c].

## Charcha.

1. वेणी &c.—अवेणी वेणीभूतम् इति वेणी+च्वि (अभूत-तद्भावे)+भू क्त कर्त्तरि=वेणीभूत turned to braid. वेणीभूतं प्रतनु सलिलमस्याः इति विपद बहु—। Qual. सिन्धुः। This water is compared to a braid of hair.

2. अतीतस्य—अति+इ+क्त कर्त्तरि=अतीत gone abroad. तस्य। Qual. ते।

3. पाण्डु &c.—पाण्डु pale. छाया lustre. पाण्डुः छाया (कान्तिः), अस्याः, बहु—। Separation made her so. Qual. सिन्धुः।

4. तट &c.—रुह+क कर्त्तरि=रुहाः grower. क here comes by the rule "इगुपधज्ञाप्रीकिरः कः"। See also Malli. तटयोः रुहाः, ६तत्—or, सुप्सुपा—। तटरुहा तरवः, कर्मधा—। तेभ्यः साधु भ्रश्यन्तीति तटरुहतरु+भ्रंश+णिनि कर्त्तरि साधुकारिणि=तटरुहतरुभ्रंशीनि। तैः। Qual. जीर्णपर्णैः। Or—तटे रुहन्ति इति तट+रुह+क कर्त्तरि=तटरुहाः, उपपद तत्—। Such उपपद तत्—are guided by the rule "इगुपधज्ञाप्रीकिरः कः", for there is no special rule like "कर्मण्यण्" to bar उपपदतत्—here. Witness अम्भोरुह &c. Rest as above.

5. जीर्णपर्णैः—इत्तौ ३या। Dry leaves discolour waters.

6. विरहावस्थया—विरहस्य अवस्था, ६तत्—। तया। करणे ३या। The river's attitude gave the appearance of a विरहिणी। By this your luck as to have such a विरहिणी is indicated. Cp—"स खलु सुभगः यमङ्गनाः कामयन्ते"—Malli.

7. व्यञ्जयन्ती—वि+अञ्ज+णिच् (स्वार्थे)+शतृ+ङीप् स्त्रियाम्=व्यञ्जयन्ती manifesting. Pred. to सिन्धुः।

8. कार्श्यम्—कृश + क्त कर्त्तरि = कृश thin ; this is irregularly formed by the rule "अनुपसर्गात् फुल्लक्षीवकृशोल्लाघाः"। कृशस्य भाव इति कृश + ष्यञ् = कार्श्यम् thinness. Obj. of व्यञ्जति।

9. विधिना—करणे ३या।

10. उपपाद्यः—उप + पद + णिच् + यत् कर्मणि = उपपाद्य to be done. Nom. त्वया। तव is also correct by the rule "कृत्यानां कर्त्तरि वा"।

11. Remark—Here the river being represented as a lover, the sloka admits of two meaning ( for which see Malli ). Her कृशता is the fifth मदनावस्था। For the ten मदनावस्था—see Malli.

12. Voice.—...सलिलया...छायया अमुया सिन्धा...व्यञ्जयन्त्या...व्यज्यते... त्वं उपपादयेः ( or—त्वया उपपाद्येन तेन भूयते... )।

*30. Go up to the city of Ujjain.*

**प्राप्यावन्तीनुदयनकथाकोविदग्रामवृद्धान्**
**पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम्।**
**स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां**
**शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ॥३०॥**

Prak.—Easy.

Prose.—उदयनकथाकोविदग्रामवृद्धान् अवन्तीन् प्राप्य पूर्वोद्दिष्टां श्रीविशालां ( सम्पत्तिमहतीं ) विशालां, सुचरितफले स्वल्पीभूते गां गतानां स्वर्गिणां शेषैः ( उपभुक्तशिष्टैः ) पुण्यैः हृतम् ( आनीतम् ) दिवः कान्तिमत् एकं खण्डमिव पुरीम् अनुसर।

Beng.—বৎসরাজ উদয়নের কথায় অভিজ্ঞ গ্রামবৃদ্ধযুক্ত অবন্তিদেশে যাইয়া পূর্ব্বকথিত শ্রীসম্পন্ন বিশালা ( অর্থাৎ—উজ্জয়িনী ) পুরীতে গমন করিবে। ঐ নগরী যেন স্বর্গের একটী কমনীয় অংশবিশেষ ; এবং সুকৃত ক্ষয় হওয়ায় পৃথিবীতে আগত স্বর্গবাসিগণের ভুক্তাবশিষ্ট পুণ্য দ্বারাই আনীত বটে।

Eng.—Going to the country of the Avantis having old-villagers conversant with the story of Udayana, you proceed to Ujjaini mentioned before, great in wealth and which is like a beautiful part of Heaven and brought down by virtue of the remaining merits of gods who have descended on earth when the results of their meritorious acts have run short.

Expl.—Easy.

Sanj.—प्राप्येति। विदन्तीति विदाः [इगुपधलक्षणः कः] 'ओकमो' वेदस्थानस्य 'विदाः'—'कोविदाः' [ओकारलुप्ते पृषोदरादित्वात् साधुः] 'उदयनस्य' वत्सराजस्य 'कथानां' वासवदत्ताहरणाद्युद्भूतोपाख्यानानां 'कोविदाः' तत्त्वज्ञाः 'ग्रामेषु' ये 'वृद्धाः' ते सन्ति येषु तान् 'अवन्तीन्' तन्नामजनपदान् (? पदम्) 'प्राप्य' तत्र 'पूर्वोद्दिष्टां' पूर्वोक्तां "सौधोत्सङ्गप्रणयविमुखो मा स्म भूरुज्जयिन्याः"—इत्युक्तां 'श्रीविशालां' सम्पत्तिमहतीं ["शोभासम्पत्तिपद्मासु लक्ष्मीः श्रीरिव दृश्यते" इति शाश्वतः] 'विशालां पुरीम्' उज्जयिनीम् 'अनुसर' व्रज। कथमिव स्थिताम्?—'सुचरितफले' पुण्यफले स्वर्गोपभोगलक्षणे 'स्वल्पीभूते' अत्यल्पावशिष्टे सति इत्यर्थः। 'गां' भूमिं 'गतानां, पुनरपि भूलोकमागतानामित्यर्थः, 'स्वर्गिणां' स्वर्गवतां जनानां 'शेषैः' भुक्तशिष्टैः 'पुण्यैः' सुकृतैः 'हृतम्' आनीतं कान्तिरस्यास्तीति 'कान्तिमत्' उज्ज्वलं सारभूतमित्यर्थः 'एकं, मुख्यात् अन्यत् ["एके मुख्यान्यकेवलाः" इत्यमरः] 'दिवः' स्वर्गस्य 'खण्डमिव' स्थितामित्युत्प्रेक्षा। एतेन अतिक्रान्तसकलभूलोकनगरसौभाग्यसारत्वम् उज्जयिन्याः व्यज्यते। ॥ ३० ॥

## Notes on Malli.

1. By this is implied Ujjaini's essence of wealth surpassing other mundane cities.

## Charcha.

1. प्राप्य—प्र + आप + ल्यप्। Having reached.

2. अवन्तीन्—अवन्ति is the name of a Kshattriya class. तेषां

निवासो जनपदः इति अवन्ति+अण् = अवन्तयः Avanti country ; अण् dis-appears by the rule "जनपदे लुप्" । Then we get बहुवचन by the rule "लुपि युक्तवत्—" ( see sl. 24 under दशार्णाः ) । तान् । Obj. of प्राप्य । अवन्ति is a part of Malava—its capital is Ujjain.

3. उदयनकथा &c.—For deriv of कोविद—see Malli. ग्रामेषु वृद्धाः, सुप् सुपा— । cp. "घोषवृद्धान् उपस्थितान्"—Raghu. I. The story of उदयन is this—"चण्डमहासेन was a king of उज्जयिनी । He had a daughter named वासवदत्ता । This princess saw king उदयन ( वत्सराज ) in a dream and fell in love with him. She then sent this news to उदयन through some contrivance. And उदयन managed to carry her off from her father's house." उदयनस्य कथा ( वासवदत्ताहरणरूपा कथा &c. ), ६तत्— । उदयनकथायाः कोविदाः, ६तत्— । उदयकथाकोविदाः ग्रामवृद्धाः एषु, बहु— । तान् । Qual. अवन्तीन् । The old villagers of अवन्ति country were awere of वत्सराज story.

4. पूर्वो &c.—पूर्वं ( यथा स्यात् तथा ) उद्दिष्टा इति पूर्वोद्दिष्टा (previously told ), सुप् सुपा— । ताम् । Qual. पुरीम् ।

5. अनुसर—अनु+सृ+लोट् हि । Nom. त्वम् । सरति, ससार, असार्षीत् ।

6. श्री &c.—श्री is wealth. विशाला is rich. श्रिया विशाला, ३तत्— । ताम् । Qual. पुरीम् । Ujjain was rich in varieties of wealth, (see below, sl. 31 &c).

7. विशालाम्—This is another name of उज्जयिनी— । Qual. पुरीम् । सारोद्धारिणी explains it as—'वि' विविधा 'शालाः' प्राकाराः यस्याम् ।

8. स्वल्पीभूते—सु अतिशयेन अल्पम् इति स्वल्पं प्रादिसत् । अस्वल्पं स्वल्पं सम्पद्यमानं भूतम् इति स्वल्प+च्वि ( अभूततद्भावे )+भू+क्त कर्त्तरि = स्वल्पीभूतम् waned तस्मिन् । Pred. to सुचरितफले ( which has भावे ७मी ) ।

9. गाम्—Here गो means पृथिवी ( earth ); ताम्। Obj. of गतानाम्। "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले लक्ष्य दृष्ट्यां स्त्रियां पुंसि गौः"।

10. स्वर्गिणाम्—स्वर्ग heaven. तदस्ति अस्य इति स्वर्ग + इनि मत्वर्थे = स्वर्गिणः gods. तेषाम्। शेषे इत्, related to पुण्यैः।

11. शेषैः—शिष्यते इति शिष + घञ् कर्मणि = शेषः that which is left, residue. तैः। Qual. पुण्यैः। Gods or god-like men come down on Earth from Heaven when their पुण्य wanes, cp. "क्षीणे पुण्ये मर्त्यलोकं विशन्ति"—Gita. Though on earth, they then enjoy celestial beauties on account of the little पुण्य that remain with them. Now the poet says that this Ujjain was brought through the remaining mertorious act ( शेषैः पुण्यैः ) of these god-like personages. पुण्यैः has करणे ३या।

12. हृतम्—हृ + क्त कर्मणि = हृत brought ( आनीत )। तत्। Qual. खण्डम्।

13. Voice.—पूर्वोद्दिष्टा श्रीविशाला विशाला पुरी अनुस्रियताम् त्वया…।

### 31. *Breeze pleasant at Ujjain.*

दीर्घीकुर्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूलः
शिप्रावातः प्रियतम इव प्रार्थनाचाटुकारः॥

[ N. B.—This sloka is rather indelicate, so the prose. Eng. and Malli only follow ].

Prose.—यत्र ( उज्जयिन्यां ) प्रत्यूषेषु सारसानां मदकलं पटु कूजितं दीर्घीकुर्वन् ( विस्तारयन् ) स्फुटितकमलामोदमैत्रीकषायः अङ्गानुकूलः शिप्रावातः, प्रार्थनाचाटुकारः प्रियतम इव स्त्रीणां सुरतग्लानिं हरति।

Eng —Where (in Ujjain ) at dawn the breeze of the river Sipra lengthening the clear sweet cackling of the cranes, fragrant through contact with the smell of blown lotuses and agreeable to the body,—removes like the dearest putting flatteries in requesting (for enjoyment), women's languour due to sexual enjoyment.

Sanj.—दीर्घीकुर्वन्निति । 'यत्र' विशालायां 'प्रत्यूषेषु' अहर्मुखेषु [ "प्रत्यूषोऽहर्मुखं कल्यम्" इत्यमरः ] 'पटु' प्रस्फुटं 'मदकलं' मदेन अव्यक्तमधुरं [ "ध्वनौ तु मधुरास्फुटे कलः" इति अमरः ] 'सारसानां' पक्षिविशेषाणाम् [ "सारसो मैथुनी कामी गोनर्दः पुष्कराह्वयः" इति यादवः ] यद्वा—'सारसानां' हंसानां [ "चक्राङ्गः सारसो हंसः" इति शब्दार्णवः ] 'कूजितं' रुतं 'दीर्घीकुर्वन्' विस्तारयन् इत्यर्थः । यावद्वातं शब्दानुवृत्तेः इति भावः । एतेन प्रियतमः स्वचाटुवाक्यानुसारि क्रीडाकूजितम् अविच्छिन्नीकुर्वन् इति गम्यते । 'स्फुटितानां' विकसितानां कमलानाम् आमोदेन' परिमलेन सह या 'मैत्री' संसर्गः तेन 'कषायः' सुरभिः [ "रागद्रव्ये कषायोऽस्त्री निर्य्यासे सौरभे रसे" इति यादवः ] अन्यत्र विमर्दगन्धीत्यर्थः [ "विमर्दोत्थे परिमलो गन्धे जनमनोहरे आमोदः सोऽतिनिर्हारी" इत्यमरः ] 'अङ्गानुकूलः' मान्द्यात् गात्रसुखस्पर्शः । अन्यत्र गाढालिङ्गनदत्तगात्रसंवाहन इत्यर्थः [ भवभूतिना चोक्तम्—"अशिथिलपरिरम्भैर्दत्तसंवाहनानि" । "संवाह्यते च सुरतश्रान्ता प्रियैर्युवतयः" । एतत् कविरेव वक्ष्यति "सम्भोगान्ते मम समुचितहस्तसंवाहनानाम्" इति ] शिप्रा नाम काचित् तत्रत्या नदी तस्या वातः 'शिप्रावातः' । शिप्राग्रहणं शैत्यद्योतनार्थम्' ; 'प्रार्थना' सुरतस्य याच्ञा तत्र 'चाटु करोतीति तथोक्तः' । पुनः सुरतार्थं प्रियवचनप्रयोक्ता इत्यर्थः [ कर्मण्यण् प्रत्ययः ] 'प्रियतम' वल्लभ 'इव स्त्रीणां सुरतग्लानिं' सम्भोगखेदं 'हरति' नुदति । चाटूक्तिभिः विघ्नितपूर्वरतिखेदाः स्त्रियः प्रियतमप्रार्थनां सफलयन्तीति भावः । [ 'प्रार्थनाचाटुकारः' इत्यत्र "खण्डितनायकानुनेता" इति व्याख्याने सुरतग्लानिहरणं न सम्भवति । तस्याः पूर्वं सुरताभावात् पश्चात्तनसुरतग्लानिहरणं तु नेदानीन्तनकोपप्रशमनार्थचाटुवचनसाध्यम् इत्युपेक्षैवोचिता विवेकिनाम् । "ज्ञाते अन्यासङ्गविकृते खण्डितेर्ष्याकषायिते" इति दशरूपके ( ? रूपकः ) ] ॥ ३१ ॥

## Charcha.

1. दीर्घीकुर्वन्—दीर्घ long. अदीर्घं दीर्घं कुर्वन् इति दीर्घ+च्वि+कृ+शतृ। Lengthening. That is, the sound goes as far as the winds—hence the lengthening. Qual. शिप्रावातः।

2. मदकलम्—मद infatuation. कल is अव्यक्तमधुर—see also Malli. मदेन कलम्, ३तत्—। Qual. कूजितम् ( कूज+क्त नपुंसके भावे )।

3. सारसानाम्—सरसि चरन्तीति सरस्+अण् सारसा cranes, also swans. See Malli. तेषाम्। शेषे षष्ठी।

4. स्फुटित &c—स्फुट+क्त कर्त्तरि=स्फुटित blown. कमल lotus. स्फुटितानि कमलानि, कर्मधा—। तेषाम् आमोदः (fragrance), ६तत्—। तेन मैत्री, सुप् सुपा—। मित्रस्य भाव इति मित्र+अण् स्त्रियाम्=मैत्री friendship ; hence here it means 'contact'. कषाय is सुरभि ( See Malli ). कमलामोदमैत्र्या कषायः। ३तत्—। Qual. शिप्रावातः। Thus the wind was favourable in all ways.

5. हरति—हृ+लटति। Nom. शिप्रावातः।

6. शिप्रावातः—वात wind. शिप्रा is the name of a famous river near Ujjaini. शिप्रायाः वातः ६तत्—।

7. प्रार्थनाचाटुकारः—प्र+अर्थ+युच् भावे=प्रार्थना request. i. e., request for enjoyment. चाटु करोति इति चाटु+कृ+अण् कर्त्तरि=चाटुकारः maker of flattery. प्रार्थनायां चाटुकारः, सुप् सुपा—: Qual. प्रियतमः (which is उपमान of शिप्रावातः )। For the double meaing of the epithets see Malli. Cp "अध्वनाम सलवङ्गकेशरचाटुकार इव दक्षिणानिलः"—
—Kumara. VIII.

8. Voice.—दीर्घीकुर्वता...—कषायेन...अङ्गानुकूलेन...वातेन...—चाटुकारिणा प्रियतमेन...ग्लानिः क्रियते...।

*32. Various narration of* वत्सराज *in Ujjain.*

प्रद्योतस्य प्रियदुहितरं वत्सराजोऽत्र जह्रे
हैमं तालद्रुमवनमभूदत्र तस्यैव राज्ञः ।
अत्रोद्भ्रान्तः किल नलगिरिः स्तम्भमुत्पाट्य दर्पा-
दित्यागन्तून् रमयति जनो यत्र बन्धूनभिज्ञः ॥ ३२ ॥

[ N. B.—Malli and दक्षिणावर्तनाथ also reject this and the next sloka as spurious. But as these two slokas are mentioned in the पार्श्वाभ्युदय ( which we have referred to before ) so we are inclied to take these as authoritative. Hence Prose, Eng and Tika only follow ].

Prose.—अत्र ( उज्जयिन्यां ) वत्सराजः प्रद्योतस्य प्रियदुहितरं जह्रे । अत्र तस्यैव राज्ञः ( प्रद्योतस्य ) हैमं तालद्रुमवनम् अभूत् । अत्र नलगिरिः दर्पात् उद्भ्रान्तः ( उत्पत्य गतः ) इति अभिज्ञः जनः अत्र आगन्तून् बन्धून् रमयति ।

Eng.—Here Vatsaraja stole the dear danghter of king Pradyota ; here indeed was the golden palm-tree forest of that king ( Pradyota ), here the elephant Nalagiri broke the tying-post through infatuation and roamed—whith these stories conversant persons regale their new-coming friends.

Tika.—'अत्र' प्रदेशे 'वत्सराजो' वत्सदेशीयाधीश्वरः उदयनः । 'प्रद्योतस्य' नाम उज्जयिनीनायकस्य 'राज्ञः प्रियदुहितरं' वासवदत्तां 'जह्रे' जहार । 'अत्र तस्यैव राज्ञः' प्रद्योतस्य 'हैमं' सौवर्णं 'तालद्रुमवनमभूत्' । 'अत्र नलगिरिः' नाम दन्तिदन्तः प्रद्योतस्य गजः 'दर्पात्' मदात् 'स्तम्भमुत्पाट्य उद्भ्रान्तः' उत्पत्य भ्रमणं कृतवान् । 'इति' एवम्भूताभिः कथाभिः हेतुभिः 'अभिज्ञः' पूर्वोक्तकथाभिज्ञः कोविदो 'जनः आगन्तून्' देशान्तरादागतान् [ औणादिकः तुन् प्रत्ययः ] 'बन्धून् यत्र' विशालायां 'रमयति' विनोदयति । अत्र भाविकालङ्कारः—तदुक्तम् "अतीतानागतं यत्र प्रत्यक्षत्वेन लक्ष्यते । अत्यद्भुतार्थकथनात् भाविकं तदुदाहृतम्" ॥ ३२ ॥

## Charcha.

1. प्रद्योतस्य—प्रद्योत was another name of king चण्डमहासेन।

2. जह्रे—हृ+लिट ए। Nom. वत्सराजः।

3. उद्भ्रान्तः—उद्+भ्रम+क्त कर्त्तरि। Nom. नलगिरिः। अकर्मकत्वात् कर्त्तरि क्तः। Naliglri was the name of प्रद्योत's elephant given unto him by Indra All this story is from the *Brihat Katha* of Gunadhya. For the story see Sl. 31.

4. रमयति—रम+णिच्+लट ति। Nom. जनः।

5. यत्र—यस्याम् पुर्य्याम् इति यद्+ङि (७मी)+त्रल् स्वार्थे। अधि ७मी। उत्तरवाक्यगतत्वेन उपादानात् तच्छब्दोपादानं नापेक्षते।

### 33. *Wealth at Ujjain.*

हारांस्तारांस्तरलगुटिकान् कोटिशः शङ्खशुक्तीः
शष्पश्यामान्मरकतमणीनुन्मयूखप्ररोहान्।
दृष्ट्वा यस्यां विपणिरचितान् विद्रुमाणाञ्च भङ्गा-
नसंलक्ष्यन्ते सलिलनिधयस्तोयमात्रावशेषाः॥ ३३॥

Prose—यस्याम् (उज्जयिन्यां) विपणिरचितान् तारान् (शुद्धान्) तरलगुटिकान् हारान्, कोटिशः शङ्खशुक्तीः, उन्मयूखप्ररोहान् (उद्गतरश्म्यङ्कुरान्) शष्पश्यामान् मरकतमणीन्, विद्रुमाणां भङ्गान् (खण्डान्) च दृष्ट्वा सलिलनिधयः तोयमात्रावशेषाः संलक्ष्यन्ते।

Eng.—Where seeing lustrous necklaces set with precious stones in the centre, innumerable pearls and oysters, grass-green emaralds emitting rays, and pieces of corals, exposed for sale in shops,—the occans are supposed to have only water left in them.

Tika.—हारानिति। 'यस्यां' विशालायां 'कोटिशः, विपणिषु' पण्यवीथिकासु [ "विपणिः पण्यवीथिका" इत्यमरः ] 'रचितान्' प्रसारितान् [ इदं विशेषणं यथालिङ्गं सर्वत्र सम्बध्यते ] 'तारान्' शुद्धान् [ "तारो मुक्तादिसंशुद्धौ तरणे शुद्धिमौक्तिके" इति विश्वः ] 'तरलगुटिकान्' मध्यमणीभूतमहारत्नान् ["तरलो हारमध्यः" इत्यमरः। "पिण्डे मणौ महारत्ने गुटिका इन्द्रपारदे" इति शब्दार्णवः ] 'हारान्' मुक्तावलीः, तथा 'कोटिशः शङ्खांश्च शुक्तीश्च' मुक्तास्फोटांश्च [ "मुक्तास्फोटः स्त्रियांशुक्तिः शङ्खः स्यात् कम्बुरस्त्रियौ" इत्यमरः ] 'शष्पं' बालतृणं तद्वत् 'श्यामान्' [ "शष्पं बालतृणं घासो यवसं तृणमर्जुनम्" इत्यमरः ] 'उन्मयूखप्ररोहान्' उद्गतरश्म्यङ्कुरान् 'मरकतमणीन्' गारुडरत्नानि, तथा 'विद्रुमाणां भङ्गान्' प्रवालखण्डान् च दृष्ट्वा सलिलनिधयः' समुद्राः 'तोयमात्रावशेषाः' येषां ते तादृशाः 'लक्ष्यन्ते' अनुमीयन्ते जनैः। रत्नाकरान् अपि अतिरिच्यते रत्नसम्पद्भिः इति भावः ॥ ३३ ॥

### 34. *Journey-fatigue removed on palaces there.*

जालोद्गीर्णैरुपचितवपुः केशसंस्कारधूपै-
र्बन्धुप्रीत्या भवनशिखिभिर्दत्तनृत्योपहारः।
हर्म्येष्वस्याः कुसुमसुरभिष्वध्वखेदं नयेथाः
लक्ष्मीं पश्यन् ललितवनितापादरागाङ्कितेषु ॥ ३४ ॥

Prak.—Easy.

Prose.—जालोद्गीर्णैः केशसंस्कारधूपैः उपचितवपुः, बन्धुप्रीत्या भवनशिखिभिः दत्तनृत्योपहारः, कुसुमसुरभिषु ललितवनितापादरागाङ्कितेषु हर्म्येषु अस्याः (उज्जयिन्याः) लक्ष्मीं पश्यन् अध्वखेदं नयेथाः।

Beng.—গবাক্ষ হইতে নির্গত রমণীগণের কেশসংস্কারার্থ দ্রব্যের ধূপ দ্বারা প্রবৃদ্ধ হইয়া, বন্ধুর প্রতি স্নেহহেতু গৃহময়ূর কর্তৃক নৃত্যরূপ উপহার পাইয়া এবং কুসুমসুরভি সুন্দরী স্ত্রীর পাদালক্তকে চিহ্নিত হর্ম্যে উজ্জয়িনীর সম্পৎ অবলোকন করিয়া তুমি পথগমন জনিত শ্রম দূর করিবে।

Eng.—With thy body fattened by the incense smoke of toilets issuing through the windows, being honoured with the present of dances by domestic peacocks owing to offection for thee a friend, and looking at Ujjain's wealth at the palaces, scented by flowers and dyed with feet-lac of beantiful women, you will allay the fatigue of your journey.

Expl.—Easy.

Sanj —जालोद्गीर्णैरिति । 'जालोद्गीर्णै:' गवाक्षमार्गनिर्गतै: [ "जालं गवाक्ष आनाये जालके कपटेऽपि च" इति यादव: ] 'केशसंस्कारधूपै:' वनिताकेशसंस्कारार्थैर्गन्धद्रव्यधूपैरित्यर्थ: [ अत्र संस्कारधूपयो: तादर्थ्येऽपि यूपदार्वादिवत् प्रकृतिविकारा-भावात् (? विकारभावाभावात् ) अश्वघासादिवत् षष्ठीसमासो, न चतुर्थी समास: १ ] 'उपचितवपु:' परिपुष्टशरीर: ; बन्धौ बन्धुरिति वा 'प्रीत्या भवनशिखिभि:' गृहमयूरै: 'दत्त: नृत्यमेव उपहार' उपायनं यस्मै स तथोक्त: [ "उपायनमुपग्राह्यमुपहारस्तथोपदा" इत्यमर: ] 'कुसुमै: सुरभिषु—' सुगन्धिषु 'ललितवनिता:' सुन्दरस्त्रिय: [ "ललितं त्रिषु सुन्दर" मिति शब्दार्णव: ] तासां 'पादरागैः' लाक्षारसैः 'अङ्कितेषु' चिह्नितेषु 'हर्म्येषु—' धनिकभवनेषु 'लक्ष्मी:' उज्जयिन्या: 'लक्ष्मीं पश्यन्, अध्वना' अध्वगमनेन 'खेद' क्लेशं 'नयेथा' अपनयस्व ॥ ३४ ॥

## Notes on malli.

1. In the compound संस्कारधूप we have षष्ठीतत्पुरुष समास and *not* चतुर्थीतत्—though तादर्थ्य is implied, for प्रकृतिविकृतिभाव here is not implied as in यूपदारु । ( दारु wood is the प्रकृति and it is made into यूप—sacrificial stakes, the विकृति । In our present instance however there being no प्रकृतिविकृतिभाव, चतुर्थीतत् cannot take place ). N. B.—Here the reading in Malli should be प्रकृतिविकारभावाभावात् and *not* प्रकृतिविकाराभावात् ।

## Chareha.

1. जालो &c—उद्+गॄ+क्त कर्त्तरि=उद्गीर्ण issued out. जाल

here means 'window'. जालेभ्यः उद्‌गीर्णाः, सुप् सुपा—। तैः। Qual. संस्कारधूपैः।

2. उपचितवपुः—उप + चि + क्त कर्त्तरि = उपचित swollen. तादृशं वपुः यस्य, बहु—। Qual त्वम्। Smoke being one of the constituents, will surely augment the cloud.

3. केश &c—सम् + कृ + घञ् करणे = संस्कार toilet i. e., things for perfuming hair. Here सुट् comes by the rule "संपरिभ्यां करोतौ भूषणे।" केशानां संस्कारः, ६तत्—। तस्य धूपाः। तैः। करणे ३या। Or—संस्कार may mean 'toiletting' ( with भावे घञ् ). In that case केशसंस्कारस्य धूपाः has अश्वघासादिवत् तादर्थ्ये ६ष्ठीतत्—। Witness धर्मपत्नी। The rule "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" direct ४र्थीतत् in प्रकृतिविकृतिभाव only ; but as here there is no such प्रकृतिविकृतिभाव, we have recourse to ६तत्—as in अश्वघास। cp. "अश्वघासादयस्तु षष्ठीसमासाः"—*Bhattoji.* See also Malli & notes thereon.

4. बन्धुप्रीत्या—बन्धौ प्रीतिः, सुप्सुपा। तया। हेतौ ३या। Friendship between clouds and peacocks are well-known. cp. "—नीलकण्ठः सुहृदः"—sl. 87. *Infra.*

5. भवनशिखिभिः—भवनस्य शिखिनः, ६तत्—। तैः। अनुक्ते कर्त्तरि ३या। The verb is दत्त in दत्तनृत्योपहारः।

6. दत्त &c.—उप + हृ + घञ् भावे = उपहार present. नृत्त animal-dance. नृत्तमेव उपहारः, कर्मधा—। दत्त नृत्तोपहारः यस्मै, बहु—। Qual. त्वम्। Peacocks dance at the sight of clouds. Here Malli reads नृत्य। But a distinction is made between नृत्य and नृत्त। The दशरूपक has "भवेद्भावाश्रयं नृत्तं नृत्यं ताललयाश्रयम"! We can have नृत्तम् only in case of lower animals. Thus the poet says in Raghu "नृत्तं मयूराः कुसुमानि वृक्षाः"। Bhatti also recognises this difference

"गोपाङ्गनानृत्यमनन्दयत्तम्"। Compare also—"देवकृच्या प्रतीतो यत्तालमानरसाश्रयः। सविलासाङ्गविक्षेपो नृत्यमित्युच्यते बुधैः"॥ We therefore prefer दाक्षिणात्यनाथ's reading as नृत्त।

7. हर्म्येषु—हर्म्य mansions। तेषु। अधि ७मी।

8. अध्वखेदम्—खिद+घञ् भावे=खेद fatigue. अध्वनः खेदः, ६तत्—। तम्। Obj. of नयेथाः।

9. नयेथाः—नी+लिङ् विधौ+थास्। Nom. त्वम् understood. कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

10. लक्ष्मीम्—लक्षयति नीतिमन्तं पुमांसमिति लक्ष+ई (औणादि)=लक्ष्मीः with मुट् added. Here the word means beauty, wealth. ताम्। Obj. of पश्यन्। The word is derived like नदी except in 1st sing where the form is लक्ष्मीः—with विसर्ग।

11. पश्यन्—दृश+लटः स्थाने शतृ=पश्यत् seeing. Qual. त्वम्।

12. ललित &c.—ललित beautiful. रज्यते अनेन इति रञ्ज+घञ्+करणे (or—भावे)=राग dye. "घञि च भावकरणयोः" इति रञ्जे नलोपः। But in अधिकरणवाच्य the न does not elide, witness रङ्ग। ललिता वनिताः, कर्मधा—। पादानां रागाः dyes on feet, ६तत्—। ललितवनितानां पादरागाः, ६तत्—। तैः अङ्कितानि, ३तत्—। तेषु। Qual. हर्म्येषु।

13. Voice.—...उपचितवपुषा...नृत्योपहारेण पश्यता त्वया...खेदः नीयेत...।

35. *Proceed to the abode of* चण्डीश्वर।

भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः
पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य।
धूतोद्यानं कुवलयरजोगन्धिभिर्गन्धवत्या-
स्तोयक्रीडानिरतयुवतिस्नानतिक्तैर्मरुद्भिः॥ ३५॥

Prak.—गणैः सादरं वीक्ष्यमाणः ( सन् ) त्वं चण्डीश्वरस्य पुण्यं धाम यायाः [ You will be looked at by the *ganas*, but all along proceed towards the holy abode of "Chandiswara" ]. Who is this चण्डीश्वर ?—त्रिभुवनगुरोः चण्डीश्वरस्य [ I mean Lord Siva, the all in all in the three worlds ]. Why the *ganas* will look up to me ?—भर्त्तुः कण्ठच्छविः इति गणैः वीक्ष्यमाणः [ You are of a dark colour. Siva's throat too is such. Hence your colour having resembled Siva's throat, the *ganas* will wonderfully look up to you ]. What I gain going there ?—कुवलयरजोगन्धिभिः तोयक्रीड़ानिरतयुवतिस्नानतिक्तैः गन्धवत्याः मरुद्भिः धूतोद्यानं धाम यायाः [ There the gardens are fanned by breeze coming from the river Gandhavati. Then again the breeze is fragrant being seented with pollens of blue lotuses and hence suitable to allay fatigue. Fragrance is always refreshing. The breeze will be doubly so being also perfumed with the toilets used by ladies bathing in the river. Hence you will be benefited by going there ].

Prose.—भर्त्तुः कण्ठच्छविः इति गणैः सादरं वीक्ष्यमाणः (सन्) कुवलयरजोगन्धिभिः तोयक्रीड़ानिरतयुवतिस्नानतिक्तैः गन्धवत्याः ( नद्याः ) मरुद्भिः धूतोद्यानं पुण्यं त्रिभुवनगुरोः चण्डीश्वरस्य धाम यायाः ।

Beng.—হে মেঘ, তুমি ত্রিভুবনগুরু চণ্ডীশ্বরের পবিত্র ধামে যাইবে। সেখানে উদ্যানগুলি, নীলপদ্মসংযোগ হেতু সুরভি এবং জলক্রীড়ারত যুবতিগণের স্নানীয়দ্রব্যে বাসিত গন্ধবতী নদীর বায়ুদ্বারা নিয়ত সঞ্চালিত হইয়া থাকে। যাইবার সময় শিবের অনুচরগণ, প্রভুর কণ্ঠের বর্ণের ন্যায় তোমার বর্ণ এই হেতু তোমাকে দেখিতে থাকিবে।

Eng.—Being looked at by the *ganas* for your colour resembles that of the throat of their lord ( Siva ), you go to the holy place of *Chandiswara*, the lord of the three worlds. In

that place the gardens are wafted by Gandhavati river's breezes, scented by the pollens of blue lotuses and perfumed as well by powders of young ladies engaged in waters ports.

Expl.—See Prak.

Sanj.—भर्त्तुरिति। 'भर्त्तुः' स्वामिनो नीलकण्ठस्य भगवतः कण्ठस्येव छविर्यस्याङ्गे 'कण्ठच्छविः इति' हेतोः 'गणैः' प्रमथैः [ "गणास्तु गणनायां स्यात् गणेशे प्रमथे चये" इति शब्दार्णवः ] 'सादरं' यथा तथा 'वीक्ष्यमाणः' सन्। प्रियवस्तुसादृश्यात् अतिप्रियं भवेत् इति भावः। त्रयाणां भुवनानां समाहारः 'त्रिभुवनं' [ "तद्धितार्थ—" त्यादिना समासः ] तस्य 'गुरोः चण्डीश्वरस्य' कात्यायनीवल्लभस्य 'पुण्यं' पावनं 'धाम' महाकालाख्यं स्थानं 'यायाः' गच्छ [विध्यर्थे लिङ्] श्रेयस्करत्वात् सर्वथा यातव्यमिति भावः। उक्तञ्च स्कान्दे —"आकाशे तारकं लिङ्गं पाताले हाटकेश्वरम्। मर्त्यलोके महाकालं दृष्ट्वा काममवाप्नुयात्॥" इति ]। न केवलं मुक्तिस्थानमिदं किन्तु विलासस्थानमपि इत्याह धूतेति—'कुवलयरजोगन्धिभिः' उत्पलपरागगन्धवद्भिः 'तोयक्रीडासु निरतानाम्' आसक्तानां 'युवतीनां स्नानं' स्नानीयं चन्दनादि [ करणे ल्युट्। "स्नानीयेऽभिषवे स्नानम्" इति यादवः ] तेन 'तिक्तैः' सुरभिभिः [ "कटुतिक्तकषायास्तु सौरभे च प्रकीर्त्तिता" इति हलायुधः ]। सौगन्ध्यातिशयार्थं विशेषणद्वयम्। 'गन्धवत्याः' नाम नद्याः तत्याया: 'मरुद्भिः धूतोद्यानं' कम्पितारामम् इति धाम्नो विशेषणम्॥ ३५॥

## Charcha.

1. कण्ठच्छविः—छवि is 'lustre', कण्ठस्य छविः, ६तत्—। कण्ठच्छविरिव छविः अस्य, बहु—by the varttika "सप्तम्युपमानपूर्वस्य उत्तरपदलोपश्च वक्तव्यः।" Thus in the final compound कण्ठच्छवि+छवि the first छवि elides. Qual. मेघः understood. भर्त्तुः is connected with कण्ठ of कण्ठच्छविः। "सापेक्षत्वेऽपि गमकत्वात् समासः"। The sentence भर्त्तुः कण्ठच्छविः इति is elliptical for "असौ मेघः भर्त्तुः कण्ठच्छविः इति" हेतोः &c. मेघः being nom, to भवति understood.

2. इति—An अव्यय implying 'हेतु' here. See Malli.

3. वीक्ष्यमाणः—वि + ईक्ष + शानच् कर्मणि। Being seen. Pred to त्वम् understood. अनुक्त कर्त्ता is गणैः। Siva was नीलकण्ठ by swallowing poison. The cloud too is blue. Hence the resemblance will attract *gana's* notice.

4. यायाः—या + लिङ् विधौ + यास्। Nom. त्वम्। See also Malli.

5. त्रिभुवन &c—त्रयाणां भुवनानां समाहारः इति त्रिभुवनम्, समाहारद्विगु by the rule "तद्धितार्थोत्तरपदसमाहारे च"। भुवनशब्दस्य पत्रादित्वात् नपुंसकैकत्वम्। त्रिभुवनस्य गुरुः, ६तत्—। तस्य। Qual. चण्डीश्वरस्य। Siva was our poet's favourite god, hence perhaps he is called त्रिभुवनगुरु। Also cp—"उज्जयिन्यां महाकालम् इति देवतायतनमस्ति। तत्र परमेश्वरः सदा संनिधत्ते, सर्वेभ्यो वरांश्च ददातीति प्रसिद्धम्। तस्मात् त्रिभुवनगुरोः इत्युक्तम्।"

6. चण्डीश्वरस्य—चण्डी is a name of *Durga*. तस्याः ईश्वरः, ६तत्—। तस्य। शेषे ६ष्ठी, related to धाम। The धाम being connected with चण्डीश्वर is holy, again it is a place to regale the sense as well. cp. "न केवलं मुक्तिस्थानं...किन्तु विलासस्थानमपि"—Malli.

7. धूतोद्यानम्—धू + क्त कर्मणि = धूत shaken. धूतम् उद्यानं यत्र, बहु—। तत्—। Qual. धाम।

8. कुवलय &c.—कुवलय is 'blue-lotus'. रजस् pollen. कुवलयस्य रजांसि, ६तत्—। तेषां गन्धः, ६तत्—। स अस्ति एषाम् इति कुवलयरजोगन्ध + इनि मत्वर्थे = कुवलयरजोगन्धिनः। तैः। Qual. मरुद्भिः। This epithet as well as the next indicates fragrance. The गन्ध here being आगन्तु, the समासान्त 'इ' cannot come by the rule "गन्धस्य इत् उत्पूतिसुसुरभिभ्यः"। This समासान्त comes where the गन्ध is नैसर्गिक and in-

separable—"गन्धस्येले तद्देकान्तग्रहणम्"। Thus we have recourse to इनि।

9. गन्धवत्या:—This is the name of a river in Malva.

10. तोय &c.—स्नाति अनेन इति स्ना + ल्युट् करणे = स्नान i. e., स्नानीय द्रव्य like sandal etc. see Malli. करणे ल्युट् comes by the rule "कृत्यल्युटो बहुलम्"—कृत्य and ल्युट् affixes are irregularly attached in other than भाव and कर्मवाच्य। तिक्त here means 'सुरभि', as कषाय in "स्फुटितकमलामोदमैत्रीकषाय:" means. तोयक्रीड़ासु निरता:, सुप् सुपा—। तादृशा युवतय:, कर्मधा—। तासां स्नानानि, ६तत्—। तेन तिक्ता:, हेतुतृतीया तत्—। तै:। Qual. मरुद्भि:।

11. मरुद्भि:—मरुत् here means 'wind'. "मरुतौ पवनामरौ"। तै:। अनुक्ते कर्त्तरि ३या। The verb is धूत in ३तीयान्तम्।

12. Voice.—...कण्ठच्छविना अनेन भूयते...वीत्यमानेन त्वया...यायेत...।

*36. The cloud serves the purpose of a* पटह *in Mahakala.*

**अप्यन्यस्मिन् जलधर महाकालमासाद्य का**
**स्थातव्यं ते नयनविषयं यावदत्येति भानु:।**
**कुर्वन् सन्ध्याबलिपटहतां शूलिन: श्लाघनीया-**
**मामन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ॥ ३६॥**

Prak.—Easy.

Prose.—हे जलधर, अन्यस्मिन् अपि काले महाकालमासाद्य भानु: यावत् नयनविषयम् अत्येति (तावत्) ते स्थातव्यम्। शूलिन: श्लाघनीयां सन्ध्याबलिपटहतां कुर्वन् आमन्द्राणां गर्जितानाम् अविकलं फलं लप्स्यसे।

Beng.—হে জলধর, (যাইতে যাইতে) অন্য সময় মহাকালমন্দিরে উপস্থিত হইয়া,

সূর্য্য যতক্ষণ নয়নের গোচরে থাকিবে ততক্ষণ তুমিও থাকিবে। তারপর শিবের সান্ধ্য পূজায় প্রশংসনীয় পটহের কার্য্য করিয়া ধীরগম্ভীর গর্জনের সম্পূর্ণ ফল লাভ কর।

Eng —O cloud, reaching Mahakala in another time, you should remain there till the sun crosses your range of sight. Then playing the laudable part of a drum at evening worship of Siva the bearer of trident, you will gain the full benefit of your deep rumbling.

Expl.—Easy.

Sanj.—अपीति। 'हे जलधर, महाकालं' नाम पूर्वोक्तं चण्डीश्वरस्थानम् 'अन्यस्मिन्' सन्ध्याव्यतिरिक्तेऽपि काले 'आसाद्य' प्राप्य 'ते' तव 'स्थातव्यं' त्वया स्थातव्यमित्यर्थः [ "कृत्यानां कर्तरि वा" इति षष्ठी ] 'यावत्' यावता कालेन 'भानुः' सूर्य्यः 'नयनविषय' दृष्टिपथ'मत्येति' अतिक्रामति, अस्तसमयकालपर्य्यन्तं त्वया स्थातव्यमित्यर्थः [ यावत् इति अवधारणार्थे। "यावत्तावच्च साकल्ये अवधौ मानेऽवधारणे" इत्यमरः ]। किमर्थमत आह कुर्वन्निति—'श्लाघनीयां' प्रशस्तां 'शूलिनः' शिवस्य 'सन्ध्याया बलिः' पूजा तत्र 'पटहतां' कुर्वन्' सम्पादयन् 'आमन्द्राणाम्' ईषद्गम्भीराणां 'गर्जितानामविकलम्' अखण्ड' 'फलं लप्स्यसे' प्राप्स्यसि [ लभेः कर्तरि लृट् ]। महाकालनाथबलिपटहत्वेन विनियोगात् ते गर्जितसाफल्यं स्यात् इति भावः। ॥ ३६ ॥

## Notes on Malli.

1. The sense is, being engaged as a drum in the worship of the lord at Mahakala, your rumbling will be significant.

## Charcha.

1. जलधर—धरतीति धरः (पचाद्यच्); जलानां धरः, कर्मषष्ठ्या समासः। जलधर is cloud. तत्सम्बुद्धौ। Here जलधर is significant, for loaded clouds deeply rumble. Note that जलं धरतीति would give जलधार with अण् by "कर्मण्यण्"।

2. महाकालम्—This is the name of a sacred place near Ujjain ; the image of Siva there also goes by this name. This image is one of the 12 *jyotirlingas*. Obj. of आसाद्य ।

3. आसाद्य—आ + सद् + णिच् + ल्यप्। Having reached.

4. स्थातव्यम्—स्था + तव्य भावे । Nom. is ते । The अनुक्तकर्त्ता takes षष्ठी here by "कृत्यानां कर्त्तरि वा" । त्वया is also correct. Such short forms of युष्मद् and अस्मद् as मे, ते &c. are not used at the beginning of a sentence, cp. "वाक्यादौ मा भूत् । त्वां पातु" &c —*Bhattoji.*

5. नयन &c.—नी + ल्युट् करणे = नयन eye. नयनस्य विषय: (गोचर:), range of sight ६तत्— । तम् । Obj. of अत्येति ।

6. यावत्—Adv. Qual. अत्येति । For its meaning, sea Malli.

7. अत्येति—अति + इ + लट्ति । Crosses. Nom. भानु: । The cloud is to remam till the sun crosses vision i. e., till it sets.

8. सन्ध्या &c—बलि worship, पटह drum. तस्य भाव इति पटह + तल् = पटहता । सम्यक् ध्यायन्त्यस्याम् इति सम् + ध्यै + अङ् अधिकरणे = सन्ध्या evening. सन्ध्याया: बलि:, ६तत्— । तस्य पटहता । ताम् । Obj. of कुर्वन् ( कृ + लट: स्थाने शतृ ) । The cloud acting as a drum in शिवपूजा with gain Siva's grace and will be successful in its mission. Thus यक्ष will also succeed in consequence.

9. श्लाघनीयाम्—श्लाघ + अनीयर् कर्मणि स्त्रियाम् = श्लाघनीया landable. ताम् । • Qual. पटहताम् ।

10. आमन्द्राणाम्—आमन्द्र is 'deep rumble' ( ईषद्गम्भीर ) ; तेषाम् । Qual. गर्जितानाम् । cp "आमन्द्रमन्यध्वनिदत्ततालम्"—Bhatti.

12. लप्स्यसे—लभ + लृट् स्यसे । Nom. त्वम् । लभते, लेभे, अलब्ध ।

13. Voice.—...भानुना नयनविषय: अतीयते...त्वं तिष्ठे:...त्वया कुर्वता... लप्स्यते... ।

*37. There you derive double benefit.*

**पादन्यासैः क्वणितरशनास्तत्र लीलावधूतैः**
**रत्नच्छायाखचितवलिभिश्चामरैः क्लान्तहस्ताः ।**
**वेश्यास्त्वत्तो नखपदसुखान् प्राप्य वर्षाग्रबिन्दू-**
**नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥३७॥**

Prak.—वेश्याः त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते [The harlots, come at Mahakala to worship Siva will cheer you up with their long side-glances. In fact their eyes are so many lotuses and the long-side glances with the black pupil at the corner of the eye will look like a long row of black bees. Thus this sight will delight the cloud]. They are engaged in worship, will they look up to me?—त्वत्तः नखपदसुखान् वर्षाग्रबिन्दून् प्राप्य आमोक्ष्यन्ते [Why not; your drops will fall on the nail-marks on their cheeks. And these being made by their lovers will at once remind them of this fact and out of excess of joy, the harlots will look up to you]. What are their engagements in the worship?—तत्र पादन्यासैः क्वणितरशनाः वेश्याः [These harlots will dance there and during dancing their waistchains will surely jingle]. Is this all?—लीलावधूतैः रत्नच्छायाखचितवलिभिः चामरैः क्लान्तहस्ताः वेश्याः [Again during worship they will take and sportingly fan *chowries* having handles set with gems, and thus performing the *Daisika* variety of dancing will get tired. But all the while this sight will please you; just as their long side-glances will delight thee. Hence you will gain double benefit of seeing dance and worship].

Prose.—तत्र ( सन्ध्याकाले ) पादन्यासैः क्वणितरशनाः, लीलावधूतैः रत्नच्छाया-खचितवलिभिः चामरैः क्लान्तहस्ताः वेश्याः त्वत्तः नखपदसुखान् वर्षाग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् आमोक्ष्यन्ते ।

Beng.—সেখানে সন্ধ্যাকালে, পাদক্ষেপ করায় যাহাদের কটীভূষণ শব্দ করিবে এবং বিলাসচালিত রত্নপ্রভামণ্ডিতদণ্ড চামর বহন করায় যাহাদের হস্ত অবশ হইবে সেই বেশ্যাগণ তোমার নিকট হইতে তাদের গণ্ডের নখক্ষতে সুখবিধায়ক বর্ষাজলবিন্দু প্রাপ্ত হইয়া ভ্রমরশ্রেণীর ন্যায় সুদীর্ঘ কটাক্ষ তোমার প্রতি নিক্ষেপ করিবে।

Eng.—There in the evening the harlots, whose waist-chain will jingle owing to their movement of feet and whose hands will tire out owing to fanning of chowries, the handles of which are tinged by lustres of gems and which are being sportively wafted, will on reciept of first drops of rain soothing to their nail marks, cast on you side-glances long like rows of bees.

Expl.—See Prak.

Sanj.—पादन्यासैरिति। 'तत्र' सन्ध्याकाले 'पादन्यासैः' चरणनिक्षेपैः 'क्वणिताः' शब्दायमाना 'रशना' यासां तथोक्ताः [ क्वणतेः अकर्मकत्वात् "गत्यर्थाकर्मक—" इत्यादिना कर्त्तरि क्तः ] 'लीलया' विलासेन 'अवधूतैः' कम्पितैः 'रत्नानां' कङ्कणमणीनां 'छायया' कान्त्या 'खचिता' रूषिता 'वलयः' चामरदण्डा येषां तैः [ "वलिश्चामरदण्डे च जराविश्लथचर्म्मणि" इति विश्वः ] 'चामरैः' वालव्यजनैः 'क्लान्तहस्ताः'। [ एतेन दैशिकं नृत्यं सूचितम्। तदुक्तं नृत्यसर्वस्वे—"खड्गकन्दुकवस्त्रादिदण्डिकाचामरस्रजः। वीणाञ्च धृत्वा यत्कुर्य्यान्नृत्यं तद्दैशिकं भवेत्॥" इति ] 'वेश्याः' महाकालनाथमुपेत्य नृत्यन्त्यः गणिका 'त्वत्तो नखपदेषु—' नखक्षतेषु 'सुखान्' सुखकरान् [ "सुखहेतौ सुखे सुखम्" इति शब्दार्णवः ] 'वर्षस्य अग्रबिन्दून् प्राप्य त्वयि मधुकरश्रेणिदीर्घान्' कटाक्षान् अपाङ्गान् 'आमोक्ष्यन्ते'। परैः उपकृताः सन्तः सद्यः प्रत्युपकुर्वन्ति इति भावः। कामिनीदर्शनीयत्वलक्षणं शिवोपासनाफलं सद्यो लप्स्यसे इति ध्वनिः॥

## Charcha.

1. पाद &c.—नि + अस ( क्षेपे दिवादि ) + घञ भावे = न्यास movement. पादस्य न्यासः, ६तत्—। तैः। करणे ३या। Here पादन्यास means न्यस्तपाद by the maxim "भावानयने द्रव्यानयनम्"।

2. क्वणित &c.—रशना is waist-chain. क्वण + क्त कर्त्तरि = क्वणित jingling ; क्वण being अकर्मक takes कर्त्तरि क्त by the rule "गत्यर्थाकर्मक-श्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च" । क्वणिता रशना: आसाम्, बहु— । Qual. वेश्या: ।

3. तत्र—The word refers to time. "तत्र सन्ध्याकाले"—Malli. Or—it may refer to the place महाकाल । But पूर्वपरामर्शित्वं of तद् being more easily accessible, reference to काल seems more reasonable. तद् + ङि ( ७मी ) + त्रल् स्वार्थे = तत्र ।

4. लीला &c.—अव + धूञ् ( कम्पने ) + क्त कर्मणि = अवधूत wafted. लीला is a peculiar movement. लीलया ( विलासेन ) अवधूतानि, ३तत्— । तै: । Qual. चामरै: । All these movements are peculiar to दैशिक variety of dancing (for which see Mallî).

5. रत्न &c,—छाया is lustre. खच + क्त कर्मणि = खचित tinged. वलि is here staff ( दण्ड ) of चामर । ( Note its different meaning ). रत्नानां छाया:, ६तत्— । ( see also रत्नच्छाया—sl. 15 ). ताभि: खचिता: ( रञ्जिता: ), ३तत्— । तादृशा वलय: एषाम्, बहु— । तै: । Qual. चामरै: ( this also takes करणे ३या ) being the instrument of क्लान्तता of हस्त ।

6. क्लान्त &c.—क्लान्ता: हस्ता: आसां बहु— । ता: । Qual. वेश्या: ।

7. त्वत्त:—त्वत् इति युष्मद् + ङसि ( ५मी ) + तस् स्वार्थे = त्वत्त: from you. अपादाने ५मी ।

8. वेश्या:—वेश dress. तस्मै हिता इति वेश + यत् = वेश्या: harlots. Nom. to आमोक्ष्यन्ते ।

9. नख &c.—पद is चिह्न । सुखयतीति सुखा: ( पचाद्यच् ) । For this sense of सुख, comp.—"सर्व्वर्त्तुसुखाम्"—Bhatti. नखानां पदानि, ६तत्— ।

नखपदेषु सुखाः (सुखकराः), सुप् सुपा—। तान्। Qual. वर्षाग्रविन्दून्। The rain-drops falling on these nail-marks made by their lovers will delight them by association of ideas. Or—नखपदस्य सुखम्, ६तत्—। नखपदसुखमिव सुखमेषाम् बहु—। See कण्ठच्छविः—*ante.* तान्। The piercing rain-drops will be as pleasurable as the pleasure of nail-marks. Both the meanings suit us.

10. वर्ष &c.—अग्राः (प्रथमा) विन्दवः, कर्मधा—। वर्षस्य अग्रविन्दवः, ६तत्—। तान्। Obj. of प्राप्य।

11. आमोक्ष्यन्ते—आ + मुच् + लृट् अन्ते। Nom. वेश्याः। मुञ्चति, अमुञ्चत्, मुमोच।

12. मधुकर &c.—मधु कुर्वन्ति इति मधु + कृ + ट ताच्छील्ये = मधुकर bee. Here ट comes by the rule "कृञो हेतुताच्छील्यानुलोम्येषु"। Here ताच्छील्य (habit) is implied, hence the rule applies. मधुकराणां श्रेणयः (rows of bees), ६तत्—। ता इव दीर्घाः, उपमानकर्मधा—। तान्। Qual. कटाक्षान्। By the epithet is implied—that their eyes were like lotuses and the black eye-corners are like bees hovering over lotuses. Thus such कटाक्ष will be welcome to the cloud.

13. कटाक्षान्—कटं गण्डं अक्षन्ति व्याप्नुवन्ति इति कटाक्षाः, उपपदतत्—। "कर्मण्यण्" इति अण्। Obj. of आमोक्ष्यन्ते। This means that they will return you service out of gratitude, cp. 'परैः उपकृताः सन्तः सद्यः प्रत्युपकुर्वन्ति"—Malli.

14. Voice—…क्वणितरशनाभिः…क्लान्तहस्ताभिः वेश्याभिः…दीर्घाः कटाक्षाः आमोक्ष्यन्ते…।

## *38. Cloud's service at Siva's furious dance after worship.*

**पश्चादुच्चैर्भुजतरुवनं मण्डलेनाभिलीनः**
**सान्ध्यं तेजः प्रतिनवजवापुष्परक्तं दधानः।**
**नृत्यारम्भे हर पशुपतेरार्द्रनागाजिनेच्छां**
**शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिर्भवान्या॥ ३८॥**

Prak.—पश्चात् पशुपतेः नृत्यारम्भे आर्द्रनागाजिनेच्छां हर [ There pleased by worship Siva will then out of joy begin his ताण्डवनृत्य। But in this dance of the Lord, the hide of गजासुर that was slain by him serves as his upper wrap. And Siva wants this to be wet in blood. Now at Mahakala this wrap of गजासुर's hide being wanting, you must supply his want. For you are a votary of Siva ]. How is this possible ?—प्रतिनवजवापुष्परक्तं सान्ध्यं तेजः दधानः [ Like गजासुर's skin wet in blood you will also look red like fresh Japa flower. For the evening crimson sun-rays ( though sun is set ) will be reflected on you ]. This is not complete resemblance—उच्चैर्भुजतरुवनं मण्डलेन अभिलीनः [ While dancing Siva's large hands will be thrown up. Just at that time you will encircle his hands. And thy touch will to him appear like the touch of गजासुर's skin which is उत्क्षिप्त during ताण्डवनृत्य। In this way you will serve his desire for गजासुर's skin ]. But who will appreciate my service ?—भवान्या शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिः ( सन् ) त्वं हर [ *Bhavani*, Siva's spouse will observe your devotion with winkless eyes ].

Prose.—पश्चात् पशुपतेः नृत्यारम्भे, प्रतिनवजवापुष्परक्तं सान्ध्यं तेजः दधानः उच्चैर्भुजतरुवनं मण्डलेन अभिलीनः भवान्या शान्तोद्वेगस्तिमितनयनं दृष्टभक्तिः (सन्) आर्द्रनागाजिनेच्छां हर।

Beng.—পরে শিবের তাণ্ডবনৃত্যের সময় তুমি, নবজবাপুষ্পের ন্যায় অরুণবর্ণ সান্ধ্য সূর্য্যকিরণ ধারণ করিয়া এবং তাঁর উচ্চতরুতুল্য ভুজ অভিব্যাপ্তকরতঃ, তাঁর আর্দ্র গজাসুরের চর্ম্মের ইচ্ছা পূরণ করিবে। এই সময় তোমার ভক্তি দেবী ভবানী শান্ত ও স্তিমিত নয়নে দেখিবেন।

Eng.—Afterwards, wearing the evening sun-rays red like fresh Japa flower, and encircling the tree-like large arms ( of Siva ), you remove his desire for the wet skin of Gajasura. Bhavani will all along look to your devotion with eyes, motionless and free from agitation.

Expl.—See Prak.

Sanj.—पश्चादिति। 'पश्चात्' सन्ध्यावल्यनन्तरं 'पशुपतेः' शिवस्य 'नृत्यारम्भे' ताण्डवप्रारम्भे 'प्रतिनवजवापुष्परक्त" प्रत्यग्रजवाकुसुमारुणं सन्ध्यायां भवं 'सान्ध्यं तेजः दधानः। उच्चैः' उन्नतं 'भुजा एव तरवः' तेषां 'वनं मण्डलेन' मण्डलाकारेण 'अभिलीनः' अभिव्याप्तः सन् [ कर्त्तरि क्तः ] 'भवान्या' भवपत्न्या [ "इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्" इति ङीष्। आनुगागमश्च ] 'शान्त उद्वेगः' गजाजिनदर्शनभयं ययोस्ते अतएव 'स्तिमिते नयने' यस्मिन् कर्म्मणि तत् तथोक्तम् [ "उद्वेगस्त्वरिते क्लेशे भये मन्थरगामिनि" इति शब्दार्णवः ] 'भक्तिः' पूज्येषु अनुरागः [ भावार्थे क्तिन् प्रत्ययः ] दृष्टं दृष्टा वा भक्तिर्यस्य स 'दृष्टभक्तिः' सन् 'पशुपतेः आर्द्र" शोणितार्द्रं यत् 'नागाजिनं' गजचर्म [ "अजिनं चर्म कृत्तिः स्त्री" इत्यमरः ] तत्रेच्छां 'हर' निवर्त्तय। त्वमेव तत्स्थाने भव इत्यर्थः। गजासुरमर्द्दनानन्तरं भगवान् महादेवः तदीयमार्द्राजिनं भुजमण्डलेन बिभ्रत् ताण्डवं चकार इति प्रसिद्धिः[1]। [ दृष्टभक्तिरिति कथं रूपसिद्धिः। दृष्टशब्दस्य "स्त्रियाः पुंवत्—" इत्यादिना पुंवद्भावस्य दुर्घटत्वात्, "अपूरणीप्रियादिषु" इति निषेधात्। भक्तिशब्दस्य च प्रियादिषु पाठात् इति॥ तदेतत् न उद्यम्। दृढभक्तिरिति शब्दमाश्रित्य प्रतिविहितं गणव्याख्याने—दृढं भक्तिर्यस्य इति नपुंसकं पूर्वपदम्। अदार्ढ्यनिवृत्तिपरत्वे दृढशब्दात् लिङ्गविशेषस्य अनुपकारित्वात् ( ? कारकत्वात् ) स्त्रीत्वमविवक्षितम्। भोजराजस्तु "भक्तौ च कर्मसाधनायाम्" इत्यनेन सूत्रेण भज्यते सेव्यते इति कर्मार्थत्वे भवानीभक्तिरित्यादि भवति। भावसाधनायां तु स्थिरभक्ति र्भवान्याम् इत्यादि भवति" इत्याह। तदेतत् सर्वं सम्यक् विवेचितं रघुवंशसञ्जीवन्यां "दृढभक्तिरिति ज्येष्ठे" इत्यत्र। तस्मात् दृढभक्तिरित्यत्रापि मतभेदेन पूर्वपदस्य स्त्रीत्वेन नपुंसकत्वेन च रूपसिद्धिरस्तीति स्थितम्[2] ]॥ ३८॥

## Notes on Malli.

1. It is well-known that Almighty Mahadeva killed the demon Gajasura and then taking its blood-wet skin on hand performed the ताण्डवनृत्य । 2. How do we get इष्टभक्ति ? For इष्ट cannot have पुंवद्भाव by "स्त्रियाः पुंवत्"—( *char* ), for भक्ति being of the प्रियादि class, the पुंवद्भाव is barred in connection with it by "अपूरणीप्रियादिषु" ( char ). This is to be said here.—Ganakara regarding the word दृढभक्ति says—"दृढं भक्तिरस्य, with दृढ in the neuter. Gender after the word दृढ being not at all emphasised—the word दृढ meaning only exclusion of what is not दृढ, the स्त्रीत्व of दृढ becomes अविवक्षित ।" Thus he establishes दृढभक्ति । Bhojaraja however says—"words like भवानीभक्ति are established with भक्ति derived as कर्मणि क्तिन् by the Ganasutra "भक्तौ च कर्मसाधनायाम्" ; but भक्ति derived as भावे क्तिन् will give पुंवद्भाव as in ईश्वरभक्ति" । All this has been said in Raghu XII. ( sl. 19 ) under 'दृढभक्तिः' । Thus either by स्त्रीत्व or by नपुंसकत्व of पूर्वपद ( as above ), the formation of दृढभक्ति &c. is concluded.

## Charcha.

1. पश्चात्—Refers to the 'period after evening worship.' See Malli.—सन्ध्यावल्यनन्तरम् । अपर + आति ( सप्तम्याम् ) = पश्चात्—an अव्यय । अपरशब्दस्य पश्चादेशः ।

2. उच्चैः—An अव्यय । अव्ययत्वात् विभक्तिलोपः । Qual. भुजतरुवनम् ।

3. भुज &c.—भुजा एव तरवः, कर्मधा— । तेषां वनम् । Obj. of अभिलीनः ।

4. मण्डलेन—मण्डल circle. तेन । प्रकृत्यादित्वात् ३या ।

5. अभिलीनः—अभि + ली + क्त कर्त्तरि = अभिलीन spread. Qual. त्वम् । The cloud circling the hands of Siva give him the impression of गजासुर's skin.

6. प्रति &c.—नवं प्रतिगत: प्रतिनव: fresh, प्रादितत्— । जवाया पुष्पम्, ६तत्— । प्रतिनवं जवापुष्पम्, कर्मधा— । तदिव रक्तम्—उपमानकर्मधा, by the rule "उपमानानि सामान्यवचनैः" । Qual. तेजः ।

7. दधानः—धा + शानच् कर्त्तरि । Qual. त्वम् । कर्तृभिप्राये क्रियाफले आत्मनेपदम् । The action will benefit the cloud. Siva loves the blood-wet elephant skin of Gajasura in his ताण्डवनृत्य । The allusicn is that Siva killed the गजासुर to save the gods and took his e'ephant skin and casting it over his shoulders performed the ताण्डवनृत्य ।

8. हर—हृ + लोट हि । Nom. त्वम् । The cloud is to serve the purpose of Siva's elephant skin. The cloud being red through falling sun rays will well resemble the blood-wet elephant skin.

9. पशुपतेः—पशूनां पतिः, ६तत्— । तस्य । शेषे ६ष्ठी, related to इच्छाम् । The base is declined like मुनि, the rule being "पतिः समास एव" ।

10. आर्द्र &c.—नाग is here 'elephant.' तस्य अजिनं ( चर्म ), ६तत्— । आर्द्र ( wet ) नागाजिनम्, कर्मधा— । तत तस्य वा इच्छा, सुप्सुपा, or—६तत्— । ताम् । Obj. of हर । See note. 7. above. This नागाजिन is worn by Siva as a wrap for the upper part of his body, cp—"त्वचं चर्णोत्क्षिप्त गजेन्द्रकृत्तिना...शम्भुना"—*Sisu.*

11. शान्त &c.—शम + क्त कर्त्तरि = शान्त abated. उद् + विज + घञ् भावे = उद्वेग fear i. e., fear of गजासुर's skin. शान्तः उद्वेगः ययोः ते, बहु— । शान्तोद्वेगे च स्तिमिते च नयने यस्मिन् बहु— । तत् यथा तथा । Adv. Qual. दृष्ट in दृष्टभक्तिः ।

12. दृष्टभक्तिः—भज + क्तिन् भावे = भक्ति devotion. दृष्टा भक्तिरस्य, बहु— । Or—दृष्टं भक्तिरस्य इति दृष्टभक्तिः । Pred. to त्वम् । Here in the

first explanation पुंवद्भाव may be questioned by the rule "स्त्रियाः पुंवत् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियाम् अपूरणीप्रियादिषु"—An attributive word in the feminine which applies equally to males and females ( भाषितपुंस्क ) will have the masculine form ( पुंवत् ), if leading in a compound in which the word it qualifies in the feminine ; but the masculine form is not allowed to ऊङन्त words nor when a पूरणप्रत्ययान्त word or a word of the प्रियादि class follows,—for भक्ति is of the प्रियादि class. Hence the पुंवद्भाव of इष्टा in इष्टभक्ति comes under the prohibition—"अपूरणीप्रियादिषु" । Bhoja however explains that भक्ति in the प्रियादि list is to be derived as क्तिन् कर्मणि meaning 'the object of worship', It thus bars पुंवद्भाव in compounding भवानी भक्तिरस्य which gives भवानीभक्तिः without पुंवद्भाव । But भक्ति in compounds like इष्टभक्ति, विदितभक्ति &c. is derived with भावे क्तिन् । Hence the prohibition does not apply and we have पुंवद्भाव getting इष्टभक्ति as here. Vamana and others however give a different explananation. They start with a सामान्यनिर्देश like इष्टमस्य अस्ति । The विशेष comes in afterwards thus—इष्टं किमस्ति ? *Ans.*—यत् इष्टमस्ति सा भक्तिः । Thus we have इष्टभक्ति with इष्ट in neuter सामान्ये । cp—'दृढभक्तिरित्येवमादिषु स्त्रीपूर्वपदस्य अविवक्षितत्वात् सिद्धम्"—*Vamana.* "सामान्ये नपुंसकम् ; दृढं भक्तिरस्य स दृढभक्तिः । स्त्रीत्वविवक्षायां तु दृढाभक्तिः"—*Bhattoji.* Also see Malli and notes thereon.

13. भवान्या—भवस्य जाया इति भव+आनुक्+ङीष=भवानी । See Malli. तया । अनुक्ते कर्त्तरि ३या । The क्रिया is इष्ट in इष्टभक्तिः । "सापेक्षत्वेऽपि गमकत्वात् समासः ।

14. Voice.—···दधानेन.. अभिलीनेन...दृष्टभक्तिना सता त्वया...—इच्छा क्रियताम्।

### 39. *Cloud is to help the ladies going to lover's places.*

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तं
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामन्या कनकनिकषस्निग्धया दर्शयोर्वीं
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः ॥३८॥

Prak — Easy.

Prose.—तत्र नक्तं रमणवसतिं गच्छन्तीनां योषितां, सूचिभेद्यैः तमोभिः रुद्धालोके नरपतिपथे कनकनिकषस्निग्धया सौदामन्या उर्वीं दर्शय। तोयोत्सर्गस्तनितमुखरः मा स्म भूः। ताः विक्लवाः।

Beng.—সেই স্থানে রাত্রে নিবিড় অন্ধকারে রুদ্ধালোক রাজপথে প্রিয়তমের আলয়ে গমনশীল রমণীগণকে, কষ্টিপাথরে স্বর্ণরেখার ন্যায় উজ্জ্বল বিদ্যুৎ দ্বারা পথ দেখাইও। বারিবর্ষণ ও গর্জনবাহুল্য করিও না। কারণ তারা ভয়শীল।

Eng.—There on the highways the sight being obstructed by impenetrable darkness, show, by lightning bright like a line of gold on a touch-stone, the path to women going to their lover's abodes at night; but be not noisy with roarings and rains; for they are frightful.

Expl.— Easy.

Sanj.—इत्थं महाकालनाथस्य सेवाप्रकारमभिधाय पुनरपि नगरसञ्चारप्रकारमाह, गच्छन्तीति।—'तत्र' उज्जयिन्यां 'नक्तं' रात्रौ 'रमणवसतिं' प्रियभवनं प्रति 'गच्छन्तीनां' योषिताम्' अभिसारिकाणाम् इत्यर्थः। 'सूचिभिः भेद्यैः' अतिसान्द्रैः इत्यर्थः, तमोभिः' रुद्धालोके' निरुद्धदृष्टिप्रसरे 'नरपतिपथे' राजमार्गे 'कनकस्य

निकषः', निकष्यते इति व्युत्पत्त्या निकषोपलरेखा 'तस्य इव स्निग्ध" तेजः यस्या तया [ "स्निग्धन्तु मसृणे सान्द्रे रम्ये क्लीवे च तेजसि" इति शब्दार्णवः ] सुदाम्ना अद्रिणा एकदिक् इति 'सौदामनी' विद्युत् [ "तेनैकदिक्" इत्यण् प्रत्ययः ] तया 'उर्वीं' मार्गं 'दर्शय'। किञ्च 'तोयोत्सर्गस्तनिताभ्यां" वृष्टिगर्जिताभ्यां 'मुखरः' शब्दायमानः 'मा स्म भूः'। कुतः—'ताः' योषितः 'विक्लवाः' भीरव ततो वृष्टिगर्जिते न कार्य्ये इत्यर्थः। [ अत्र तोयोत्सर्गसहितं स्तनितम् इति विग्रहः, विशिष्टस्य इव केवलस्तनितस्यापि अनिष्टत्वात्। न च द्वन्द्वपक्षे अल्पाच्तरपूर्वनिपातशास्त्रविरोधः, "लक्षणहेत्वोः क्रियायाः" इत्यत्र सूत्रे एव विपरीतनिर्देशेन पूर्वनिपातशास्त्रस्य अनित्यत्वज्ञापनात् इति2 ] ॥३९॥

## Notes on Malli.

1. Thus speaking of the worship of the lord of Mahakala the poet again by गच्छन्तीनाम् &c. speaks of its travel in cities. 2. In तोयोत्सर्गस्तनित, the विग्रह can not be तोयोत्सर्गसहितं स्तनितम्, for स्तनित alone like its qualified state is not desired. Again if we take it as a द्वन्द्व compound, then the vioiation of the rule "अल्पाच्तरम्" guiding the word with fewer vowels to lead in a द्वन्द्व compound, shall not stand in the way, for Panini himself writing "लक्षणहेत्वोः" and not हेतुलक्षणयोः in his rule "लक्षणहेत्वोः क्रियायाः" violates the rule and thus makes the rule "अल्पाच्तरम्" not at all obligatory.

## Charcha.

1. गच्छन्तीनाम्—गम + शतृ + ङीप = गच्छन्ती going. तासाम्। Qual. योषिताम्। नुम् in the feminine comes by the rule "शप्श्यनोर्नित्यम्"—गम being भ्वादि।

2. रमण &c.—रमयतीति रम + णिच् + ल्यु कर्त्तरि = रमण a lover. वस + अति ( औणादि ) = वसति abode. रमणानां वसतिः, ६तत्—। ताम्। Obj. of गच्छन्तीनाम्।

3. तत्र—Refers to उज्जयिनी।

4. नक्तम्—A मान्त अव्यय in the sense of सप्तमी। अधि ७मी here।

5. रुद्ध &c.—आ+लोक+घञ् करणे=आलोक eye. रुध+क्त कर्मणि=रुद्ध obstructed. रुद्धः आलोकः अस्मिन्, बहु—। तस्मिन्। Qual. नरपतिपथे।

6. नर &c.—नराणां पतिः, ६तत्—। नरपतेः पन्थाः, ६तत्—। तस्मिन्। अधि ७मी। Here समासान्त अ comes by the rule "ऋक्पूरब्धूः पथामानक्षे"।

7. सूचि &c.—भेत्तुं योग्यमिति भिद+यत् कर्मणि=भेद्य। सूचि needle. सूचिभिः भेद्यानि, ३तत्—। तैः। Qual. तमोभिः (which has अनुक्ते कर्त्तरि ३या—the क्रिया is रुद्ध in रुद्धालोके)। The darkness was so great that it can be pierced by needles. Thus सारोद्धारिणी says "अतिनिविड़त्वात् तमसां कविसमये सूचिभेद्यत्वमिष्यते। औपचारिकोऽयं धर्मः"।

8. सौदामन्या—सुदामन् is a mountain. सुदाम्ना पर्वतेन एकदिक् इति सुदामन्+अण+ङीप्=सौदामनी lightning. It is believed to be grown out of that mountain, hence so called. तया। करणे ३या।

9. कनक &c—निकष्यते इति नि+कष+अच् कर्मणि=निकष the line on the test stone. कनकस्य निकषः (निकषोपरि रेखा) ६तत्—। स इव स्निग्धा (उज्ज्वला) उपमानकर्मधा—। तया। Qual. सौदामन्या। निकष also means the test stone, cp "निकषे हेमरेखेव श्रोतासौदनपायिनी"—Raghu.

10. दर्शय—दृश+णिच्+लोट हि। Nom. त्वम्।

11. उर्वीम्—The earth is called उर्वी for she was once saved by the ऊरु of Kasyapa. It also means any 'piece of land'. ताम्—obj of दर्शय।

12. तोयोत् &c—स्तनित rumbling (*deriv ante*). उद्+सृज+

घञ् भावे=उत्सर्ग pouring. तोयानाम् उत्सर्गः, ६तत्—। तोयोत्सर्गश्च स्तनितञ्च, तोयोत्सर्गस्तनिते, द्वन्द्व—। ताभ्यां मुखरः, ३तत्—। Pred to त्वम्। Here the द्वन्द्व compound is an evident violation of the rule "अल्पाच्तरम्"; but as Panini himself violates this rule in "लक्षणहेतोः क्रियायाः" and in "समुद्राभ्राद्घः", so such occasional violations are tolerable. See also Malli and notes thereon. If the compound be otherwise analysed as—तोयोत्सर्गे स्तनितम्, सुप्सुपा—। तेन मुखरः &c—then this difficulty of grammar does not at all arise, but then तोयोत्सर्ग is not emphasised.

13. मा स्म भूः—For gram and deriv, see under "—विमुखो मा स्म भूरुज्जयिन्याः"—Sl. 27. The reading मा च भूः is better for च well connects the verbs दर्शय and भूः। cp "मा च भूरिति चकारो दर्शय इति क्रियया सेत्रासमुच्चयार्थः"—दक्षिणावर्त्तनाथः।

14. Voice—उर्वी दृश्यताम् त्वया...—मुखरेण या भावि...ताभिः विलवाभिः भूयते...।

### *40. Rest is assured to the cloud.*

तां कस्याञ्चिद्भवनवलभौ सुप्तपारावतायां
नीत्वा रात्रिं चिरविलसनात् खिन्नविद्युत्कलत्रः।
दृष्टे सूर्य्ये पुनरपि भवान् वाहयेदध्वशेषं
मन्दायन्ते न खलु सुहृदामभ्युपेतार्थकृत्याः ॥ ४० ॥

Prak.—Easy.

Prose.—चिरविलसनात् खिन्नविद्युत्कलत्रः भवान् सुप्तपारावतायां कस्याञ्चित् भवनवलभौ ( गृहाच्छादनोपरिभागे ) तां रात्रिं नीत्वा सूर्य्ये दृष्टे पुनरपि अध्वशेषं वाहयेत्। सुहृदाम् अभ्युपेतार्थकृत्याः न मन्दायन्ते खलु।

Beng.—চিরস্ফুরণ হেতু তোমার বিদ্যুৎপত্নী ক্লান্ত হইবে, স্বতরাং তুমি, গৃহাচ্ছাদনের উপরিভাগে যেখানে পারাবত নিদ্রা যাইতেছে তথায় সেই রাত্রি যাপন করিয়া পুনরায় সূর্য্য উঠিলে অবশিষ্ট পথ গমন করিবে। বন্ধুগণের কার্য্যকরণে প্রতিজ্ঞা করিয়া কেহ বিলম্ব করে না।

Eng.—Having passed that night on some house-roof where pigeons are asleep, along with your lightning-wife fatigned through constant shining, you, the sun having risen again, traverse the remaining path. Men having undertaken errands of friends do not indeed tarry.

Expl.—Easy.

Sanj.—तामिति। 'चिरं विलसनात्' स्फुरणात् 'खिन्नं विद्युदेव कलत्रं' यस्य स' भवान्, सुप्ताः पारावता' कलरवा यस्यां, विविक्तायामित्यर्थः [ "पारावतः कलरवः कपोतः" इत्यमरः ], जनसञ्चारः तत्रासम्भावित एव इतिभावः। 'कस्याश्चित् भवनवलभौ' गृहाच्छादनोपरिभागे इत्यर्थः [ "आच्छादनं स्याद्दलभी गृहाणाम्" इति हलायुधः ] 'तां रात्रिं' नीत्वा दृष्टे सूर्य्ये' सति दिने सति इत्यर्थः। 'पुनरपि अध्वशेषं वाहयेत्। तथाहि—'सुहृदां' मित्राणाम् 'अभ्युपेता' अङ्गीकृता 'अर्थस्य' प्रयोजनस्य 'कृत्या क्रिया यैः ते अभ्युपेतसुहृदर्थाः इत्यर्थः [ सापेक्षत्वेऽपि गमकत्वात् समासः। "कृत्या क्रिया-देवतयोः कार्य्ये स्त्री" इति यादवः ] "न मन्दायन्ते खलु' न मन्दा भवन्ति हि, न विलम्बन्ते इत्यर्थः [ "लोहितादि डाज्भ्यः क्यष्"। "वा क्यषः" इत्यात्मनेपदम्] ॥

## Charcha.

1. भवन &c—वलभि is top of house-roof. See Malli. भवनस्य वलभिः, ६तत्—। तस्याम्। अधि ७मी। In this sense of वलभि, cp, सौधान्यत्यर्थतापात् वलभिपरिचयद्वेषिपारावतानि"—*Malavikagni-mitram II.*

2. सुप्त &c.—पारे आपतति इति पारापतः or पारावतः (पचाद्यच्)। पृषोदरादित्वात् पस्य वः। स्वप+क्त कर्त्तरि=सुप्त sleeping. सुप्ताः पारावताः

यस्याम्, बहु—। तस्याम्। Qual. भवनवलभौ। The epithet suggests quietness of the place ; hence good sleep is assured there.

3. चिरविलसनात्—चिरं विलसनम्, २या तत्—by "अत्यन्तसंयोगे च"। तस्मात्। हेतौ ५मी।

4. खिन्न &c.—खिद्+क्त कर्त्तरि = खिन्न tired. वि विशेषेण द्योतते इति वि+द्युत्+क्विप् कर्त्तरि = विद्युत्। विद्युदेव कलत्रम्, कर्मधा। खिन्नं विद्युत्कलत्रमस्य, बहु—। Qual भवान्। For your wife's sake you must take rest.

5. सूर्य्ये—सरति इति सृ+क्यप् = सूर्य्यः Sun. निपातनात् साधुः। तस्मिन्। भावे ७मी।

6. पुनरपि—Malli connects it with वाहयेत्।

7. भवान्—भातीति भा+डवतु कर्त्तरि = भवत् you. सः। Nom. to वाहयेत्। Its fem is भवती। cp, "भवतीनां सूनृतया गिरा"—Sak. There is another भवत् ( भू+शतृ ), but the fem, of this is भवन्ती।

8. वाहयेत्—वह्+णिच्+लिङ् ( विधौ )+यात्। Nom. भवान्। वह्+णिच् means 'to pass', cp—"नरपतिरतिवाहयाम्बभूव वियामाम्"—Raghu.

9. मन्दायन्ते—मन्दा भवति इति मन्द+क्यष = मन्दाय ( नामधातु )+लट् अन्ते = मन्दायन्ते tarrying. Nom. जनाः understood. मन्द being included under लोहितादि class it takes क्यष ( च्व्यर्थे ) by the rule "लोहितादिडाच्भ्यः क्यष्"। Here मन्दायन्ति is also correct, for आत्मनेपद is optional by "वा क्यषः"।

10. खलु—The word here implies अवधारण ( certainty ), cp "प्रश्रितवाराः खलु मादृशां गिरः"—Kirat. I.

11. सुहृदाम्—सुशोभनं हृदयमेषाम् इति सुहृदः friends. तेषाम्। शेषे ६ष्ठी।

The word is connected with अर्थकृत्य, hence its separation from the compound is not justifiable. But the connection being obvious समास is allowed by—"सापेक्षत्वेऽपि गमकत्वात् समासः"। सुहृद् in the sense मित्र is irregularly formed by the rule "सुहृद्दुर्हृदौ मित्रामित्रयोः"।

12. अभ्युपेत &c.—अभि+उप+इ+क्त कर्मणि=अभ्युपेत accepted. अर्थस्य (प्रयोजनस्य) कृत्याः, ६तत्—। अभ्युपेताः अर्थकृत्याः यैः ते, बहु—। Adj. Qual. जनाः understood. Or—it may be taken as an adjective used substantively. cp "विशेषणमात्रप्रयोगो विशेष्योपपत्तौ"—*Vamana.* कृ+क्यप् भावे=कृत्य work.

13. Voice.—...विद्युत्कलत्रेण भवता अध्वशेषः वाह्यते। अभ्युपेतार्थकृत्यैः जनैः...न मन्दाय्यते...।

*41. The cloud is to avoid obstruction to lovers.*

तस्मिन्काले नयनसलिलं योषितां खण्डितानां
शान्तिं नेयं प्रणयिभिरतो वर्त्म भानोस्त्यजाशु।
प्रालेयास्रं कमलवदनात् सोऽपि हर्त्तुं नलिन्याः
प्रत्यावृत्तस्त्वयि कररुधि स्यादनल्पाभ्यसूयः॥ ४१॥

Prak.—Easy.

Prose.—तस्मिन् काले प्रणयिभिः खण्डितानां योषितां नयनसलिलं शान्तिं नेयम्, अतः आशु भानोः वर्त्म त्यज। सोऽपि (भानुरपि) नलिन्याः कमलवदनात् प्रालेयास्रं (हिमाश्रु) हर्त्तुं प्रत्यावृत्तः (प्रत्यागतः)। त्वयि कररुधि (सति) अनल्पाभ्यसूयः स्यात्।

Beng.—সেই প্রভাতসময়ে প্রণয়িগণ খণ্ডিত স্ত্রীগণের নয়ন জলের অবসান করিবেন, সুতরাং তুমি সত্বর সূর্য্যের পথ ত্যাগ করিবে। সূর্য্যও নলিনীর কমলরূপ বদন হইতে

হিমরূপ অশ্রু অপহরণ করিতে সমাগত। তুমি তাহার কররোধ করিলে তিনি নিতান্ত ক্রুদ্ধ হইবেন।

Eng.—At that morning hour the lovers are to put an end to tears of women ( angry through infidelity ) ; therefore quickly go away from the path of the sun. The sun too is come back to remove tears of frost from the lotus-face of Nalini ( the lotus-plant ). If you obstruct his rays ( hands ) he would be highly incensed.

Expl.—The cloud must not cover the sun in the morning ; for then morning not being known, the lovers will not try to pacify the नायिका, and thus their hours of quarrel will be prolonged. And the sun too in that case will be denied the privilege of pacifying his spouse the नलिनी।

Sanj.—तस्मिन्निति। 'तस्मिन्काले' पूर्वोक्ते सूर्योदयकाले 'प्रणयिभिः' प्रियतमैः 'खण्डितानां योषितां' नायिकाविशेषाणाम् [ "ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्याकषायिता" इति दशरूपकः ] 'नयन सलिलं शान्तिनेयं' नेतव्यम् [ नयतिर्द्विकर्मकः ] 'अतो' हेतोः 'भानोः वर्त्म त्यज' तस्यावरको मा भूरित्यर्थः। विपक्षे अनिष्टमाचष्टे—'सोऽपि' भानुः, नलिनानि अम्बुजानि यस्याः सन्तीति 'नलिनी' पद्मिनी तस्याः स्वकान्तायाः 'कमलं' स्वकुसुममेव 'वदनं' तस्मात् 'प्रालेयं' हिममेव 'अस्रु हर्त्तुं' शमयितुं 'प्रत्यावृत्तः' प्रत्यागतः [ नलिन्याश्च भर्त्तुः भानोर्देशान्तरगमनात् खण्डितात्वम् इत्याशयः।1 ] 'ततः त्वयि करान्' अंशून् रुणद्धीति कररुत् [ क्विप् ] तस्मिन् 'कररुधि' सति हस्तरोधिनि सति इति च गम्यते [ "वलिहस्तांशवः कराः" इत्यमरः ] 'अनल्पाभ्यसूयः' अधिकविद्वेषः स्यात्। प्रायेण इच्छाविशेषविघातात् रोषो द्वेषश्च कामिनां भवतीति भावः। किञ्च "ब्रह्माणं वार्कमीशानं विष्णुं वा द्वेष्टि यो जनः। श्रेयांसि तस्य नश्यन्ति रौरवं च भवेद्ध्रुवम्" इति निषेधात् कार्य्यहानिर्भविष्यति इति ध्वनिः2॥

## Notes on Malli.

1. The sense is, नलिनी will also become a खण्डिता नायिका for her husband भानु being abroad so long. 2. The sense is,

generally the lovers get angry through obstruction of their desires ; moreover, the implication is that ( in that case ) you will fail in your mission for there is the saying "one who enrages the Brahman, the sun, Siva or Vishnu, loses good, surely he attains the Hell, called रौरव" ।

## Charcha.

1. तस्मिन्काले—Refers to the morning following the night. अधि ७मी ।

2. खण्डितानाम्—खण्डिता योषित् is one who is angry on account of infidelity on the part of her lover. See दशरूपक quoted by Malli.

3. नेयम्—नी + यत् कर्मणि । अनुक्तकर्त्ता is प्रणायिभिः । The root नी is द्विकर्मक, the two कर्मs here being—(i) नयनसलिलम् ( direct ), and (ii) शान्तिम् ( indirect ) ; The dictum being "ण्यादेः प्रधाने" here the प्रधानकर्म—नयनसलिलम् becomes voiced in the कर्मवाच्य ।

4. त्यज—त्यज + लोट हि । Nom. त्वम् understood. तत्याज, अत्याक्षीत् ।

5. प्रालेयास्रम्—प्रालेय is frost. प्र + ली + अच् भावे = प्रलय destruction. प्रलये भवमिति प्रलय + अण् = प्रालेयम् frost. Here the form is प्रालेय and *not* प्रालय as was expected, the rule being "केकय मित्रयुप्रलयानां यादेरियः" । अस्र is tears. प्रालेयमेव अस्रम्, मयूरव्यंसकादि-कर्मधा— । तत् । Obj-of हर्त्तुम् ।

6. कमलवदनात्—For समास see Malli. अपादाने ५मी ।

7. नलिन्याः—नलिन is lotusflower. तानि सन्ति अस्याः इति नलिन + इनि मत्वर्थे + ङीप् = नलिनी the whole lotus-plant. तस्याः । शेषे ६ष्ठी,

related to कमलवदनात्। नलिनी is represented as sun's spouse. In this sense of नलिनी, cp "सुरगज इव बिभ्रत्पद्मिनीं दन्तलग्नाम्"—Kum. "नित्यपद्मा नलिन्यः" *ante*, "न पर्वताग्रे नलिनी प्ररोहति"—*Mrichchakatika.*

8. प्रत्यावृत्तः—प्रति+आ+वृत्+क्त कर्त्तरि। Nom. सः। गत्यर्थत्वात् कर्त्तरि क्तः।

9. कररुधि—कर rays. तान् रुणद्धीति कर+रुध+क्विप् कर्त्तरि= कररुध्। तस्मिन्। Pred, to त्वयि (which has भावे ७मी)। By कर there is also hint to 'हस्त'। See Malli.

10. अनल्प &c.—अभ्यसूया anger. अल्प little. न अल्पा अनल्पा, great नञ् तत्—। तादृशी अभ्यसूया अस्य, बहु—। Pred to सः।

11. स्यात्—अस+लिङ् (विधौ)+यात्। Nom. सः। अस्ति, आसीत् अभूत्।

12. Voice.—प्रणयिनः...नयेयुः—...त्यज्यताम् त्वया...तेन प्रत्यावृत्तम्... अनल्पाभ्यसूयेन भूयेत।

42. *The cloud is to please the river* गम्भीरा।

गम्भीरायाः पयसि सरितश्चेतसीव प्रसन्ने
छायात्मापि प्रकृतिसुभगो लप्स्यते ते प्रवेशम्।
तस्मादस्याः कुमुदविशदान्यर्हसि त्वं न धैर्या-
न्मोघीकर्त्तुं चटुलशफरोद्वर्त्तनप्रेक्षितानि ॥ ४२ ॥

Prak.—Easy.

Prose.—गम्भीरायाः सरितः प्रसन्ने चेतसि इव पयसि प्रकृतिसुभगः ते छायात्मा अपि प्रवेशं लप्स्यते। तस्मात् कुमुदविशदानि अस्याः चटुलशफरोद्वर्त्तनप्रेक्षितानि त्वं धैर्यात् मोघीकर्त्तुं न अर्हसि।

Beng.—গম্ভীরা নামক নদীর প্রসন্নচিত্তের ন্যায় নির্মল জলে তোমার স্বভাবসুন্দর

উজ্জ্বল আত্মা ও প্রবেশ লাভ করিবে। সুতরাং তুমি ধৈর্য্যঅবলম্বন করিয়া তার কুমুদের ন্যায় শুভ্র শফরীর উল্লম্ফনরূপপ্রেক্ষণ বিফল করিবে না।

Eng.—Even your lustrous self, beautiful by nature will find access into the clear water of the river *Gambhira* as unto a clear mind. Then through self-control it does not behove thee to render fruitless her lily-white looks in the shape of gambols of *Safari-fishes.*

Expl.—The *Gambhira* river as a নায়িকা will be captivated by you and she will then cast wistful eyes on you. At that time you must fulfil her wishes.

Sanj.—गम्भीराया इति। 'गम्भीरा नाम सरित्', उदारा नायिका च व्यज्यते। 'तस्याः' प्रसन्ने' अनुरक्तत्वात् दोषरहिते 'चेतसि' अतिनिर्मले' पयसि, प्रकृत्या स्वभावेन सुभगः सुन्दरः [ "सुन्दरे अधिकभाग्ये च दुर्दिनेतरवासरे तुरीयांशे श्रीमति च सुभगः" इति शब्दार्णवः ] 'ते' तव 'छाया आसौ आत्मा च' सोऽपि प्रतिबिम्बशरीरश्च 'प्रवेशं लप्स्यते'। साचात् प्रवेशमनिच्छोरपि इति भावः। तस्मात् छायाद्वारापि प्रवेशावश्य-म्भाविलात् अस्या गम्भीरायाः 'कुमुदवत् ( ? ) विशदानि' धवलानि 'चटुलानि' शीघ्राणि 'शफराणां' मीनानां 'उद्वर्तनानि' उल्लङ्घनान्येव 'प्रेक्षितानि' अवलोकनानि [ "त्रिषु स्यात् चटुलं शीघ्रम्" इति विश्वः ] एतावदेव गम्भीरायाः अनुरागलिङ्गम्। 'धैर्य्यात्' धाष्ट्यात् वैयात्यादिति यावत् 'मोघीकर्त्तुं' विफलीकर्त्तुं 'नार्हसि' नानुरक्ता विप्रलब्धव्या इत्यर्थः। [ पूर्वं लब्धवानु—क्लिश्नाति नित्यं दयितामङ्कस्थामतिसुन्दरः। अनुत्यरक्तां यत्नेन रक्तां धूर्त्तो विमुञ्चति—इति ] ॥ ४२ ॥

## Charcha.

1. गम्भीरायाः—गम्भीरा is the name of a river at Malwa. Qual. सरितः।

2. प्रसन्ने चेतसि—प्र+सद+क्त कर्त्तरि=प्रसन्न clear. तस्मिन्। Qual. both चेतसि and पयसि। It is natural with poets to compare the clear water with a clear mind, cp "सुप्रसन्न इव ह्रदः"—Raghu. I.

3. छायात्मा—छाया चासौ आत्मा च, कर्मधा—। The cloud is no better than an image, hence it is called छायात्मा। अपि implies गर्हा (disregard) here.—"गर्हासमुच्चयशङ्काप्रश्न सम्भावनास्वपि"। The sense is—though छायात्मा (disregarding this state) you will gain access into her (the river).

4. प्रकृति &c.—सुभग beautiful. प्र+कृ+क्तिन् भावे=प्रकृति nature. प्रकृत्या सुभगः, ३तत्—। प्रकृत्यादित्वात् तृतीया। Qual. छायात्मा।

5. लप्स्यते—लभ+लृट स्यते। Nom. छायात्मा।

6. कुमुद &c.—कुमुदानि इव विशदानि, "उपमानानि सामान्यवचनैः" इति समासः। Qual. प्रेक्षितानि। Malli's कुमुदवत् विशदानि is wrong, वति can not be got without a क्रिया, the rule being "तेन तुल्यं क्रिया चेद्वतिः"। The epithet suggests clear and sincere looks (of a lover).

7. धैर्यात्—Malli renders as—धाष्ट्र्यात्। This is not sound, for धैर्य is rarely used in this sense. Better take in its literal sense "through self-control." She is loving you, but don't control yourself from her. हेतौ ५मी।

8 मोघीकर्त्तुम्—मोघ fruitless. अमोघानि मोघानि कर्त्तुम् इति मोघ+च्वि (अभूततद्भाव)+कृ+तुमुन्।

9. चटुल &c.—शफर is a kind of small fish that jumps on the surface of waters. उद्+वृत+ल्युट भावे=उद्वर्त्तन gambol. शफराणाम् उद्वर्त्तनानि, ६तत्—। चटुलानि (शीघ्राणि) शफरोद्वर्त्तनानि, कर्मधा—। प्र+ईक्ष क्त नपुंसके भावे=प्रेक्षित seeing, look. चटुलशफरोद्वर्त्तनानि एव प्रेक्षितानि, मयूरव्यंसकादित्वात् कर्मधा—। तानि। Obj. of मोघीकर्त्तुम्।

10 Remark—It is as remarked before (see ante) natural

with poets to compare rivers to नायिकाs । Here rapidly darting fishes are the glances of the river. Thus female beauty is everywhere in sanskrit literature assigned to rivers, cp "स- ततार सैकतवतीरभितः शफरीपरिस्फुरितचारुदृशः। ललिताः सखीरिव बृहज्जघनाः सुरनिम्नगामुपयतीः सरितः॥"—Kirat.

*43. The cloud cant leave behind the river, the loving* **नायिका।**

**तस्याः किञ्चित्करधृतमिव प्राप्तवानीरशाखं**
**हृत्वा नीलं सलिलवसनं मुक्तरोधोनितम्बम्।**
**प्रस्थानं ते कथमपि सखे लम्बमानस्य भावि**
**ज्ञातास्वादो विवृतजघनां को विहातुं समर्थः॥ ४३॥**

N. B.—The sloka is indilicate, so we give Prose and Malli only.

Prose.—हे सखे प्राप्तवानीरशाखम् (अतएव) किञ्चित् करधृतमिव मुक्तरोधोनितम्बं नीलं तस्याः सलिलवसनं हृत्वा लम्बमानस्य ते प्रस्थानं कथमपि भावि। ज्ञातास्वादः कः विवृतजघनां विहातुं समर्थः।

Sanj.—तस्या इति। हे सखे, प्राप्ता वानीरशाखा' वेतसशाखा येन तत्तथोक्तम् अतएव 'किञ्चित्' ईषत् 'करधृतं' हस्तावलम्बितमिव स्थितं 'मुक्तः' त्यक्तः 'रोधः' तटमेव 'नितम्बः' कटकः येन तत्तथोक्तम् ["नितम्बः पश्चिमे श्रोणिभागेऽद्रिकटके कटौ" इति यादवः] 'नीलं' कृष्णवर्णं 'तस्या' गम्भीरायाः सलिलमेव वसनम्'। नीलाम्बरधारणं विरहतापनिवारणमिति प्रसिद्धम्। 'हृत्वा' अपनीय 'लम्बमानस्य' पीतसलिलभरात् लम्बमानस्य, अन्यत्र जघनारूढ़स्य 'ते' तव 'प्रस्थानं' प्रयाणं 'कथमपि' कृच्छ्रेण भावि। कृच्छ्रत्वे हेतुमाह—ज्ञातेति। 'ज्ञातास्वादः' अनुभूतरसः 'कः' पुमान् 'विवृतं' प्रकटीकृतं 'जघनं' कटिः तत्पूर्वभागो वा यस्याः ताम् ["जघनं स्यात् कटौ पूर्वश्रोणिभागापरांशयोः" इति यादवः] 'विहातुं' त्यक्तुं 'समर्थः' न कोऽपीत्यर्थः॥ ४३॥

## Charcha.

1. Remark—The cane-plants on the river-banks hanged on the water and almost touched them. Hence the cloth in the shape of water was as if touched by the hand of the cloud.

2. भावि—भविष्यति इति भू+णिनि कर्त्तरि भविष्यदर्थे क्लीवे-भावि shall be. Nom. प्रस्थानम्।

### *44. Favourable wind attends the cloud.*

त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः
स्रोतोरन्ध्रध्वनितसुभगं दन्तिभिः पीयमानः ।
नीचैर्वास्यत्युपजिगमिषोर्देवपूर्वं गिरिं ते
शीतो वायुः परिणमयिता काननोदुम्बराणाम् ॥ ४४ ॥

Prak.—Easy.

Prose—त्वन्निष्यन्दोच्छ्वसितवसुधागन्धसम्पर्करम्यः दन्तिभिः स्रोतोरन्ध्रध्वनितसुभगं पीयमानः काननोदुम्बराणां परिणमयिता शीतो वायुः देवपूर्वं गिरिम् उपजिगमिषोः ते (तव सम्बन्धे) नीचैः वास्यति (वीजयिष्यति)।

Beng.—তোমার ধারাপাতে উজ্জীবিত পৃথিবীর গন্ধেতে রমণীয়, হস্তিগণকর্ত্তৃক নাসারন্ধ্রের ধ্বনিসহকারে আঘ্রায়মাণ, বনডুমুরের পরিপক্কতারনিমিত্তভূত শীতল বায়ু, দেবগিরিতে গমনেচ্ছু তোমাকে মৃদুভাবে বীজিত করিবে।

Eng.—On you, wishing to proceed to Devagiri, the wind will blow slowly—the wind that is charming owing to contact with the smell of earth refreshed by showers, that is being pleasantly enjoyed by elephants with the sound of their nostrils and—that causes ripeness of wild figs.

Expl.—Easy.

Sanj.—त्वदिति। 'त्वन्निष्यन्देन' तव वृष्ट्या 'उच्छ्वसितायाः' उपबृंहितायाः 'वसुधायाः' भूमेः 'गन्धस्य' सम्पर्केण रम्यः'। सुरभिः इत्यर्थः। स्रोतःशब्देन इन्द्रियवाचिना तद्विशेषो घ्राणं लक्ष्यते [ "स्रोतोऽम्बुवेगेन्द्रिययोः' इति विश्वः ] 'स्रोतोरन्ध्रेषु—' नासायकुहरेषु यद् ध्वनितं' शब्दः तेन 'सुभगं' यथा तथा 'दन्तिभिः' गजैः 'पीयमानः' वसुधागन्धलोभात् आघ्रायमाण इत्यर्थः। अनेन मान्द्यमुच्यते। 'काननेषु' वनेषु 'उदुम्बराणां' जन्तुफलानाम् [ "उदुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः" इत्यमरः ] 'परिणमयिता' परिपाचयिता [ "मितां ह्रस्वः" इति ह्रस्वः ] 'शीतो वायुः देवपूर्वं' देवशब्दपूर्वं 'गिरिं' देवगिरिमित्यर्थः। 'उपजिगमिषोः' उपगन्तुमिच्छोः [ गमेः सन्नन्तात् उप्रत्ययः ] 'ते' तव 'नीचैः' शनैः 'वास्यति' त्वां वीजयिष्यति इत्यर्थः [ सम्बन्धमात्रविवक्षायां षष्ठी ]। [ देवपूर्वं गिरिमित्यत्र देवपूर्वत्वं गिरिशब्दस्य न तु संज्ञिनः तदर्थस्य। संज्ञायाः सञ्जित्वाभावात् अवाच्यवचनं दोषमाहुरालङ्कारिकाः। तदुक्तमेकावल्याम्—"यद वाच्यस्य वचनम् अवाच्यवचनं हि तत्" इति। समाधानं तु देवशब्दविशेषितेन गिरिशब्देन शब्दपरेण अर्थः मेघोपगमनयोग्यो देवगिरिः लक्ष्यते इति कथंचित् सम्पाद्यम्। ] ॥ ४४ ॥

## Notes on malli.

1. Here in देवपूर्वं गिरिम्, the word देव precedes गिरि and not the *object* of which it is the name ( संज्ञिन् ). Thus the word गिरि which stands for the *word* only, can not be used as designating the *objeit*. Yet .t is so used. Hence the rhetoricians say that here there is the defect of *thought* known as अवाच्य वचन। Thus the Ekavali says "the use of a word in a sense it cannot express is अवाच्यवचनं"। In such cases the possible solution should be that the word गिरि qualified by the word देव, points by लक्षणा in the matter of अर्थ applied to something restricted to शब्द only, to देवगिरि to be gone by the cloud.

## Charcha.

1. त्वन्निष्यन्द &c—नि + स्यन्द + घञ भावे = निष्यन्द rain. "अनुविपर्यभिनिभ्यः

-मन्द्रैरप्राणिषु—" इति पाणिकं चलम्। उद्+श्वस+क्त कर्मणि=उच्छ्वसित enlivened, swollen. तव निष्यन्दः, ६तत्—। तेन उच्छ्वसिता, ३तत्—। तादृशी वसुधा—कर्मधा। तस्याः गन्धः, ६तत्—। तस्य सम्पर्कः ( contact ), ६तत्—। तेन रम्यः, ३तत्—। Qual. वायुः। The epithet suggests सुरभित्व of वायु। Downpour scents the earth, cp "गन्धश्च धाराहत-पल्वलानाम् &c."—Raghu.

2. स्रोतो &c—By स्रोतम् here घ्राण ( nose ) is referred to. See Malli. स्रोतसः रन्ध्रम्, ६तत्—। तस्य ध्वनितम्, ६तत्—। तेन सुभगम्, ३तत्—। तत् यथा तथा। Adv. Qual. पीयमानः। Out of joy for the good smell of Earth the elephans made sounds with their nostrils.

3. पीयमानः—पा+शानच् कर्मणि। Qual वायुः। In making sounds the elephants drank in wind.

4. नीचैः—An अव्यय meaning 'lowly'. Adv. Qual. वास्यति। This suggests मान्द्य of the वायु, hence the wind was favourable to his journey.

5. वास्यति—वा+लृट् स्यति। Nom. वायुः।

6. उप &c.—उपगन्तुमिच्छोः इति उप+गम+सन्+उ=उपजिगमिषुः। Qual. ते। ते has सम्बन्धविवक्षया ६ष्ठी।

7 देवपूर्वम्—देवः पूर्वः यस्य, बहु—। तम्। Qual. गिरिम्। Here the discussion of Malli, seems to me to be uncalled for. It would have been relevant if the poet had said देवपूर्वः गिरिः पर्वतः, in that case पर्वतः—the thing mountain cannot be देवपूर्वः गिरिः। The mountain's very name is देवपूर्वः गिरिः। This is what the poet says here by—देवपूर्वं गिरिम् उपजिगमिषोः ( going to गिरि with देव pre-

ceding it ). Thus there is no absurdity in this. Malli perhaps recognised this for in Sisupala under—हिरण्यपूर्वं कशिपुं प्रचक्षते ( canto 1. Sl. 42 ) he says—"विशेषश्चात्र—यं दैत्यमुद्दिश्य 'हिरण्यपूर्वं कशिपुं प्रचक्षते' तन्नाम्नैव प्रयुज्यते। Also see 'धनुरूपपदमस्मै वेदमभ्यादिदेश—" Kirat.

8. परिणमयिता—परि + नम + णिच् + तृच्, कर्त्तरि = परिणमयिता ripener. Qual वायुः। "मितां ह्रस्वः" इति ह्रस्वः। Here the affix is तृच् and *not* तृन् hence "न लोकाव्यय निष्ठाखलर्थ तृनाम्" does not apply and we get कर्मणि षष्ठी in उदुम्बराणाम्।

9. Voice.—...—वन्येन...पीयमानेन...परिणमयित्रा शीतेन वायुना वास्यते...।

## *45. Propitiate Skanda at Devagiri.*

तत्र स्कन्दं नियतवसतिं पुष्पमेघीकृतात्मा
पुष्पासारैः स्नपयतु भवान् व्योमगङ्गाजलार्द्रैः।
रक्षाहेतोर्नवशशिभृता वासवीनां चमूना—
मत्यादित्यं हुतवहमुखे सम्भृतं तद्धि तेजः॥ ४५॥

Prak.—तत्र नियतवसतिं स्कन्दं भवान् स्नपयतु [ You will at Devagiri shower Skanda, a permanent settler there ]. Whereby shall I shower him ?—व्योमगङ्गाजलार्द्रैः पुष्पासारैः स्नपयतु [ why ; you bathe him with showers of flowers wet with water-particles of Divine river Mandakini ]. Is it possible with a cloud ?—पुष्पमेघीकृतात्मा भवान् [ You are कामरूप ; so you turn into such a cloud as will shower flowers only ]. But why this honour to Skanda ?—तत् नवशशिभृता हुतवहमुखे सम्भृतम् अत्यादित्यं तेजः हि

[ Skanda is but the powerful all-surpassing energy of Siva, the crescent moon-bearer. Siva cast his seed unto Fire. And from this seed sprung Skanda. Hence he deserves worship ]. Had Siva any misson in this ?—वासवीनां चमूनां रक्षाहेतोः सम्भृतम् [ Siva cast his seed in fire to produce Skanda only to save the army of Indra from the oppression of the Demon Tadaka. Hence Skanda is not an ordinary personage ].

Prose.—तत्र ( देवगिरौ ) पुष्पमेघीकृतात्मा भवान् नियतवसतिं स्कन्दं व्योमगङ्गाजलार्द्रैः पुष्पासारैः स्नपयतु। तत् ( स्कन्दः ) वासवीनां चमूनां रक्षाहेतोः नवशशिभृता हुतवहमुखे सम्भृतम् अत्यादित्यं तेजः हि।

Beng.—সেই দেবগিরিতে পুষ্পবর্ষণশীল মেঘের বিগ্রহ ধারণ করিয়া নিয়তবাসী ভগবান্ স্কন্দকে ( কার্ত্তিকেয়কে ) তুমি আকাশগঙ্গা মন্দাকিনীর জলসিক্ত পুষ্পধারায় স্নান করাইবে। সেই স্কন্দ, ইন্দ্রের সেনার রক্ষার জন্য শশিভূৎ শিবকর্ত্তৃক অগ্নিমুখে নিক্ষিপ্ত তেজবটে। এই তেজঃ, প্রভাবে আদিত্যকেও অতিক্রম করে।

Eng.—There at Devagiri you assuming the form of a flower-pouring cloud, bathe Skanda ( Kartikeya ) the permanent settler with showers of flowers wet with waters of heavenly Ganges ( Mandakini ). He is the sun-surpassing energy cast on the mouth of Fire god, by Siva the bearer of new lunar digit for the protection of India's army.

Expl —See *Prak. + Eng.*

Sanj.—तत्रेति। 'तत्र' देवगिरौ 'नियता वसतिर्यस्य तं' नित्यसन्निहितमित्यर्थः। पुरा किल तारकाख्यासुरविजयसन्तुष्टःसुरप्रार्थनावशात् भगवान् भवानीनन्दनः स्कन्दो 'नित्यमिह सह शिवाभ्यां वसामि' इति उक्त्वा तत्र वसतीति प्रसिद्धिः। 'स्कन्दं' कुमारं स्वामिनं पुष्पाणां मेघः पुष्पमेघः। 'पुष्पमेघीकृतात्मा' कामरूपत्वात् पुष्पवर्षकमेघीकृतविग्रहः सन् 'व्योमगङ्गाजलार्द्रैः' पुष्पासारैः पुष्पसम्पातैः [ "धारासम्पात आसारः" इत्यमरः ]

'भवान्' स्वयमेव "अर्चयतु, स्वयं पूजायाः उत्तमत्वात् इति भावः2 [ तथा च शम्भुरहस्ये —"स्वयं यजति चेद्देवमुत्तमा सोदरात्मजैः। मध्यमा याजयेत् भृत्यैरधमा याजनक्रिया" इति ]। स्कन्दस्य पूज्यत्वसमर्थनेन अर्थेन अर्थान्तरं न्यस्यति रक्षेति—'तत्' भगवान् स्कन्द इत्यर्थः [ विधेयप्राधान्यात् नपुंसकनिर्देशः ] वासवस्य इमा 'वासव्यः' [ "तस्येदम्" इत्यण्] तासां 'वासवीनाम्' ऐन्द्रीनां 'चमूनां' सेनानां 'रक्षाहेतोः' रक्षार्थं 'नवशशिभृता' भगवता चन्द्रशेखरेण। वहतीति वहः [ पचाद्यच् ] हुतस्य वहः 'हुतवहः' वह्निः तस्य 'मुखे सम्भृतं' सञ्चितम् आदित्यमतिक्रान्तम् 'अत्यादित्यम्' [ "अत्यादयः क्रान्ताद्यर्थे द्वितीयया "इति समासः ] 'तेजो हि', साक्षात् भगवतो हरस्यैव मूर्त्यन्तरम् इत्यर्थः। अतः पूज्यमिति भावः। मुखग्रहणन्तु शुद्धत्वसूचनार्थम् [ तदुक्तं शम्भुरहस्ये—"गवां पश्चात् द्विजस्याङ्घ्रि—र्योगिनां हृत् कवेर्वचः। परं शुचितमं विद्यात् मुखं स्त्रीवह्नि-वाजिनाम्"3 ॥ ४५ ॥

## Notes on Malli.

1. The tradition is that formerly being glad at his victory over the demon Tadaka and being requested by gods, Lord Skanda son of Bhavani promised to live there at Devagiri saying "I will always live here with Siva and Durga." 2. The sense is, worship by one's ownself is the best. 3. By मुख in हुतवहमुखे purity is indicated. Thus it is said in शम्भुरहस्य— 'The latter half of the cow, the feet of a Brahman, the mind of yogis, words of poets and mouths of females, horses and fire are very pure."

## Charcha.

1. तत्र—Refers to देवगिरि। अधि ७मी। Deriv. *ante.*

2. नियतवसतिम्—नि + यम + क्त कर्त्तरि = नियत fixed. नियता वसतिर्यस्य, बहु—। तम्। Qual. स्कन्दम्। स्कन्द is another name of कार्त्तिकेय।

He is also called शरजन्म ( see ante )। For the reason of his permanent residence at देवगिरि, see Malli. and notes thereon.

3. पुष्पमेघी &c.—पुष्पाणां मेघ:, ६तत्—। पुष्पमेघ will be a cloud showering flowers only. अपुष्पमेघ: पुष्पमेघ: क्रत: इति पुष्पमेघ + च्वि + क्ल + क्त कर्मणि = पुष्पमेघीक्रत। तादृश: आत्मा ( स्वरूप: ) अस्य, बहु—। Qual. भवान्।

4. पुष्पासारै:—पुष्पाणाम् आसार: ( धारापात: ) ६तत्—। तै:। करणे ३या।

5. स्नपयतु—स्ना + णिच् + लोट तु। Nom. भवान्। स्नापयतु is also correct, but when preceded by any उपसर्ग मित्व is compulsory; witness प्रस्नपयति। The गणसूत्र is "ग्लास्नावनुवमां च"।

6. व्योम &c.—व्योमगङ्गा is आकाशगङ्गा i. e., मन्दाकिनी। व्योमगङ्गा-जलैन आर्द्रै:, ३तत्—। तै:। Qual. पुष्पासारै:। Skanda deserved worship for he was as good as शिव। See Malli "साचात् भगवत:... पूज्यम्"।

7. रक्षाहेतो:—see विश्रामहेतो: ( sl. २५ ). हेतौ ५मी or शेषे ६ष्ठी।

8. अत्यादित्यम्—For समास see Malli. Qual. तेज:।

9. हुत &c.—Deriv. Malli. अधि ७मी। The allusion is—कार्त्तिकेय was born of the semen of Siva. The lord cast it on fire-god, but she too weak to bear it transferred it to Divine Ganges. Thence sprung कार्त्तिकेय। This seed of Siva is also said to be cast in a forest of *sara* grass. Thence it was swallowed by six क्रत्तिकाs and each gave birth to a male child. These six combined formed one having six heads and twelve hands. He as the commander of Indra's army defeated and killed Taraka. See also Malli's quotation from Ramayana under "सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम्"—Raghu II, sl. 75.

10. सम्भृतम्—सम+भृ+क्त कर्मणि। Nom. is नवशशिभृता। Qual. तेजः।

11. तत्—विधेयप्राधान्यात् क्लीवत्वम्। Refers to स्कन्द। cp "तथापि मायोऽयमवेदि यन्मया &c."—Kirat I. sl. 6.

12. हि—अवधारणे (certainty) अव्ययम्। "हि हेतावधारणे" इत्यमरः।

13. Voice.—...वसतिः स्कन्दः...कृतात्मना भवता आप्यताम्। तेन... सम्भृतेन अत्यादित्येन तेजसा भूयते...।

## 46. *Cloud's presence will delight Skanda's peacock there.*

ज्योतिर्लेखावलयि गलितं यस्य बर्हं भवानी
पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति।
धौतापाङ्गं हरशशिरुचा पावकेस्तं मयूरं
पश्चादद्रिग्रहणगुरुभिः गर्जितैर्नर्तयेथाः ॥ ४५ ॥

Prak.—Easy.

Prose.—ज्योतिर्लेखावलयि गलितं यस्य (मयूरस्य) बर्हं भवानी पुत्रप्रेम्णा कुवलय-दलप्रापि कर्णे करोति; हरशशिरुचा धौतापाङ्गं पावकेः (स्कन्दस्य) तं मयूरं पश्चात् अद्रिग्रहणगुरुभिः गर्जितैः नर्तयेथाः।

Beng.—যে ময়ূরের উজ্জ্বলরেখামণ্ডলযুক্ত এবং পতিত পালক (বর্হ) দেবী ভবানী অপত্যস্নেহবশতঃ নীলপদ্মশোভিত কর্ণে গ্রহণ করিয়া থাকেন, শিবের শিরশ্চন্দ্রকিরণে ধৌতাপাঙ্গ কার্ত্তিকেয়ের সেই ময়ূরকে তুমি গিরিগুহার প্রতিধ্বনিতে দীর্ঘ গর্জন দ্বারা নর্ত্তিত করিবে।

Eng.—Afterwards with rumblings prolonged through reverberation in mountains you will make Kartikeya's peacock dance—peacock whose outer eye-corners are illumined by the ray's of Siva's crescent moon and whose cast off plumes having circles of lustrous lines, Bhavani wears out of filial affection on her ears already decorated with petals of blue-lotuses.

Expl.—Easy.

Sanj.—ज्योतिरिति। 'ज्योतिषः' तेजसः 'लेखाः' राजयः तासां 'वलयं' मण्डलं यस्यास्तीति तथोक्तं 'गलितं' भ्रष्टं न तु लौल्यात् स्वयं छिन्नमितिभावः, यस्य मयूरस्य 'बर्हं' पिच्छम् [ "पिच्छबर्हे नपुंसके" इत्यमरः ] 'भवानी' गौरी 'पुत्रप्रेम्णा' पुत्रस्नेहेन, 'कुवलयस्य दलं' पत्रं तत्प्रापि तत्योगि यथा तथा 'कर्णे करोति' दलेन सह धारय,-तीत्यर्थः। यद्वा—कुवलयस्य 'दलप्रापि' दलभाजि दलार्हे कर्णे करोति [क्विबन्तात् सप्तमी] दलं परिहृत्य तत्स्थाने बर्हं धत्त इत्यर्थः। [ नाथस्तु 'कुवलयदलक्षेपि' इति पाठमाह। क्षेपो निन्दापसरणं वा ] 'हरशशिरुचा' हरशिरश्चन्द्रिकया 'धौतापाङ्गं' स्वतोऽपि शौक्ल्यात् अतिधवलितनेत्रान्तम् [ "अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः ] पावकस्य अग्नेः अपत्यं 'पावकिः' स्कन्दः [ "अत इञ्" इति इञ् ] तस्य 'तं पूर्वोक्तं मयूरं पश्चात्' पुष्पाभिषेचनानन्तरम् 'अद्रेः' देवगिरेः कर्तुः 'ग्रहणेन' गुहासंक्रमणेन 'गुरुभिः' प्रतिध्वानमहद्भिरित्यर्थः। 'गर्जितैर्नर्तयेथाः' नृत्यङ्कारय, मार्दङ्गिकभावेन भगवन्तं कुमारमुपास्स्व इति भावः। ['नर्तयेथा' इत्यत्र "अणौ अकर्मकात् चित्तवत्कर्तृकात्" इत्यात्मनेपदापवादः ; "निगरणचलनार्थेभ्यश्च" इति परस्मैपदं वा ( ? इति वा परस्मैपदं ) न भवति, तस्य ( ? तयोः ) "न पादमिपाङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः" इति प्रतिषेधात्। ] ४६ ॥

## Notes on malli.

1. In नर्तयेथाः, आत्मनेपद should be barred by the rule "अणौ अकर्मकात्—" ( roots which are अकर्मक and have a living being as कर्ता in the non-causal form, take परस्मैपद in the causal form ) ;

Or परस्मैपद should not take place by the rule "निगरणचलनार्थेभ्यश्च" ( roots having the sense of eating and moving, take परस्मैपद in the causal form ) for these rules are barred by the rule "नपा-दमि-आङ्यम-आङ्यस-परिमुह-रुचि-नृति-वद-वसः" which directs आत्मनेपद in all these cases. [ N. B.—Here Malli's reading is corrupt and seems to be an interpolation. The reading strictly should be —नर्त्तयेथा इत्यत्र "अणावकर्मकात्—" इत्यात्मनेपदापवादः परस्मैपदं न भवति तस्य "पादमि—" इति प्रतिषेधात् ] ( See char ).

## Charcha.

1. ज्योति &c.—ज्योतिस् is lustre, लेखा line, वलय circle. ज्योतिषः लेखाः, ६तत्—। तासां वलयम्, ६तत्—। तदस्ति अस्य इति ज्योतिर्लेखावलय + इनि मत्वर्थे = ज्योतिर्लेखावलयि। Qual. बर्हम्। This speaks of the beauty of plumes.

2. पुत्र &c.—पुत्रे प्रेम, सुप् सुपा—। तेन। हेतौ ३या।

3. कुव य &c.—कुवलय blue lotus. दल petal. कुवलयस्य दलानि, ६तत्—। तानि प्राप्नोति (धारयति) यस्मिन् कर्मणि तत् इति कुवलयदल + प्र + आप + णिनि = कुवलयदलप्रापि यथा तथा। Adv. Qual. करोति। In this case the epithet means—दलेन सह धारयति। Or—प्राप्नोति भजति इति प्राप् [कर्त्तरि क्विप्] दलस्य प्राप्-६तत्। तस्मिन्। Qual. कर्णे। In this case the meaning is—दलं परित्यज्य बर्हं धत्ते। See Malli, We prefer the former reading. For such क्विबन्त use of प्राप is rare. Or—take the whole as one word. But then कर्ण loses its force ; कुवलयदलक्षेपि is also the reading here—the epithet qualifying बर्हम्। But this reading does not commend itself. For बर्ह is worn out of पुत्रप्रेम and not for its कुवलयदल—surpassing beauty.

4. धौता &c.—धौत: अपाङ्ग: यस्य, बहु—। तम्। Qual. मयूरम्। हरशशिरुक् made the bright eye-corners all the more resplendant.

5. पावके:—पावकि ( deriv.—Malli ) is a name of स्कन्द, for he was in a manner son of *Agni*. See Allusion sl. 45. मयूर was कार्त्तिकेय's वाहन।

6. अद्रि° &c.—ग्रह + लुट् भावे = ग्रहण 'taking.' i. e., taking in the caves. अद्रे: ग्रहणम्, ६तत्—। तेन गुरु:, ३तत्—। तै:। Qual. गर्जितै: ( which has करणे ३या ). See also Malli.

7. नर्त्तयेथा:—नृत + णिच् + लिङ् ( विधौ ) + ईथाम्। Nom. त्वम्। Here Malli's quotation of both the rules "अणावकर्मकात्—" and "निगरण—" is uncalled for. The rule "निगरण—" ( See Malli + notes thereon ) is for सकर्मक roots and roots having no चित्तवत्कर्त्ता in the noncausal form. cp, "अयमपि योग: सकर्मकार्थ:। अचित्तवत्कर्तृकार्थश्च"—*Vritti*. Here नृत is चलनार्थ no doubt ( in as much as नर्त्तन implies motion ) but it being अकर्मक its कर्त्ता being चित्तवत् ( living ), the rule "निगरण—" does not apply, but the rule "अणौ—" operates here. Then the rule "न पादमि—" ( Malli ) comes and bars both these rules directing आत्मनेपद in the cases of these roots by the rule "णिचश्च"—when the action benefits the agent. Here नृत being under the rule "पा दमि—" takes आत्मनेपद by the rule "णिचश्च" for the action will benefit the cloud. cp, "...नृतिवदवसहरथेतेभ्य:प्राप्नोत्ये: परस्मैपदं न भवति। 'णिचश्च' इत्यात्मनेपदं भवति। तत्र पिबतिर्निगरणार्थ:। दमिप्रभृतयश्चित्तवत्कर्तृकार्था:। "—*Kasika*, under the rule" "न पादमि—"।

8. Voice.—भवान्मा...क्रियते...धौतापाङ्ग: स मयूर: नर्त्तित व्यवा।

47. *The cloud is to proceed to* चर्मण्वती *river*

आराध्यैनं शरवणभवं देवमुल्लङ्घिताध्वा
सिद्धद्वन्द्वैर्जलकणभयाद्वीणिभिर्मुक्तमार्गः ।
व्यालम्बेथाः सुरभितनयालम्भजां मानयिष्यन्
स्रोतोमूर्त्या भुवि परिणतां रन्तिदेवस्य कीर्त्तिम् ॥४७॥

Prak.—Easy.

Prose—शरवणभवम् एनं देवमाराध्य उल्लङ्घिताध्वा, जलकणभयात् वीणिभिः ( वीणायुक्तैः ) सिद्धद्वन्द्वैः मुक्तमार्गः, सुरभितनयालम्भजां ( गोवधजाताम् ) भुवि स्रोतोमूर्त्या परिणतां रन्तिदेवस्य कीर्त्तिं ( चर्मण्वतीं नदीं ) मानयिष्यन् त्वं व्यालम्बेथाः ।

Beng.—শরবণজাত এই দেব স্কন্দকে পূজা করিয়া পথ অতিক্রম করতঃ তুমি, জলকণার ভয়ে বীণাহস্ত সিদ্ধ মিথুনগণ কর্ত্তৃক দত্তমার্গ হইয়া, নদীরূপে পরিণতা রাজা রন্তিদেবের গোবধ জন্য কীর্ত্তি ( অর্থাৎ রন্তিদেবের কীর্ত্তির পরিচায়ক নদীকে ) সম্মানিত করিবার জন্য অবতরণ করিবে ।

Eng.—Having worshipped god Kartikeya, born of the *Sara forest* you will traverse road-way with thy path left free out of fear for water-drops by pairs of *siddhas* holding lutes. But then you will tarry to honour Rantideva's fame due to sacrifices of cows, but now transformed on earth into a streane ( i. e., river Charmanwati ).

Expl.—Easy.

Sanj.—आराध्येति । 'एनं' पूर्वोक्तं, 'शरा बाणतृणानि [ "शरो बाणे बाणतृणे" इति शब्दार्णवः ] तेषां वनं 'शरवणम्' [ "प्रनिरन्तः शर—" इत्यादिना णत्वम् ] तत्र भवः जन्म यस्य तं 'शरवणभवम्' [ "भवज्यों बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः" इति वामनः । भवज्यः भगतिकत्वात् आश्रयणीयः इत्यर्थः ] 'देवं' स्कन्दम् 'आराध्य' उपास्य 'वीणिभिः' वीणावद्भिः [ व्रीह्यादित्वात् इनिः ] 'सिद्धद्वन्द्वैः' सिद्धमिथुनैः,

भगवन्तं स्कन्दमुपवीणयितुमागतैः इत्यर्थः। 'जलकणभयात्' जलसेकस्य वीणाक्वणनप्रति-बन्धकत्वात् इतिभावः। 'मुक्तमार्गः' त्यक्तवर्त्मा सन् 'लङ्घिताध्वा' कियन्तमध्वानं गत इत्यर्थः। 'सुरभितनयानां' गवाम् 'आलम्भेन' संज्ञपनेन आयत इति तथोक्ताम् 'भुवि' लोके 'स्रोतोमूर्त्या' प्रवाहरूपेण 'परिणतां' रूपविशेषमापन्नां 'रन्तिदेवस्य' दशपुरपतेः महाराजस्य 'कीर्त्तिं' चर्मन्वत्याख्यां नदीमित्यर्थः, 'मानयिष्यन्' सत्करिष्यन् 'व्यालम्बेथाः' आलम्ब्य अवतरेः इत्यर्थः। [ पुरा किल राज्ञो रन्तिदेवस्य गवालम्भेषु एकत्र सम्भृतात् रक्तनिष्यन्दात् चर्मराशेः काचित् नदी सस्यन्दे। सा चर्मन्वती इति आख्यायते इति ] ॥ ४७ ॥

## Charcha.

1. एनम्—अन्वादेशे इदमशब्दस्थाने एनादेशः। This एन comes in द्वितीया, तृतीया sing, and षष्ठी सप्तमी dual; the rule is "द्वितीया टौस्स्वेनः"। This एन is ordered in place of एतद् as well. But we prefer इदम् here, for स्कन्द was rather at a distant from the speaker—cp, "इदमस्तु सन्निकृष्टं समीपतरवर्त्ति चैतदो रूपम्"। Qual. देवम् which is—Obj. of आराध्य ( आ + राध + णिच् चुरादि + ल्यप् )। In the sense of पूजा, राध is चुरादि generally, cp, "आराधय सपत्नीकः प्रीता कामदुघा हि सा" —Raghu.

2. शरवण &c.—भवनम् इति भू + अप् भावे = भव birth. शराणां वनम् ६तत्—। शरवणे भवः ( जन्म ) अस्य, बहु—। Qual, देवम्। The seed from which कार्त्तिकेय sprung was also cast in a *sara* forest; whence the कृत्तिकाs swallowed it. So he is शरवणभव। See Sl. 45. The rule for णत्व in शरवण is "प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिर-पीयूक्षाभ्योऽसंज्ञायामपि"। Malli says here the final बहु—is व्यधिकरण and it is unavoidable in such cases.

3. उल्लङ्घि &c—उद् + लङ्घ् + क्त कर्मणि = उल्लङ्घित traversed. उल्लङ्घितः अध्वा येन, बहु—। Qual. त्वम् understood.

4. जल &c.—जलानां कणाः, ६तत्—। तेभ्यः भयम् ५तत्—। तस्मात्—हेतौ ५मी। The Siddhas feared waterdrops, for these might damage their lutes. See "जलसेकस्य वीणाक्वणनप्रतिबन्धकत्वात्"—Malli.

5. वीणिभिः—वीणा lute. सा अस्ति एषामिति वीणा + इनि ( व्रीह्यादित्वात् ) = वीणिनः having lutes. तैः। Qual. सिद्धद्वन्द्वैः ( which is अनुक्ते कर्त्तरि ३या )।

6 मुक्तमार्गः—मुच + क्त कर्मणि = मुक्त left मुक्तः मार्गः अस्य, बहु—। Qual. त्वम्। मुक्तमार्ग sounds well than दत्तमार्गः।

7. व्यालम्बेथाः—वि + आ + लम्ब + लिङ् ( विधौ ) + ईथास्। Should tarry. Nom. त्वम्।

8. सुरभि &c.—सुरभि is the celestial cow. तस्याः तनयाः ६तत्—। आ + लभ + घञ् = आलम्भ sacrifice. सुरभितनयानाम् आलम्भः, कर्मषष्ठ्या समासः। तस्मात् जाता इति सुरभितनयालम्भ + जन + ड कर्त्तरि भूते = सुरभितनयालम्भजा issued from the slaughter of cows. ताम्। Qual. कीर्त्तिम्। The allusion is—Rantideva, king of Dasapura is said to have killed in sacrifices many cows and their bloody skins heaped in a place sent forth a stream of blood which in time turned into the river Charmanvati ( modern Chambal river ).

7. मानयिष्यन्— मान + णिच् + शतृ = मानयिष्यन् in order to honour. हेतौ शतृ by the rule "लक्षणहेत्वोः क्रियायाः"—this being the cause ( हेतु ) of व्यालम्बन। The cloud is to tarry over the river.

10. स्रोतो &c.—परि + णम + क्त कर्त्तरि स्त्रियाम् = परिणता। ताम्। Qual. कीर्त्तिम्। स्रोतः एव मूर्त्तिः, कर्मधा—। ३या। प्रकृत्यादित्वात् तृतीया। See Note 8. above.

11. रन्तिदेवस्य कीर्त्तिम्—Rantideva was king of दशपुर। He was Sankriti's son and sixth in descent from Bharata. He was famous for having done many sacrifices. The चर्म्मण्वती river being the result of his famous cow-sacrifice is called his कीर्त्ति transformed into river.

12. Voice.—...उल्लङ्घिताध्वना...मुक्तमार्गेण मानयिष्यता त्वया व्यालम्बेत...।

## 48. *The cloud will be a sapphire in the stream-necklace of the river.*

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥४८॥

Prak.=त्वयि जलमादातुम् अवनते सति, गगनगतयः दृष्टीः आवर्ज्य तस्याः सिन्धोः प्रवाहम् प्रेक्षिष्यन्ते [When you will stoop down on the river चर्म्मण्वती, the Siddhas &c. will lower their eyes and observe the current of this river] Is there anything worth-seeing ?—स्थूलमध्येन्द्रनीलं भुवः एकं मुक्तागुणमिव प्रवाहं प्रेक्षिष्यन्ते [Yes; the stream will look like a pearl necklace set with a blue sapphire in the middle, on the neck of Lady Earth]. But the stream is too wide to assume the appearance of a necklace—पृथुमपि दूरभावात् तनुं प्रवाहं मुक्तागुणमिव प्रेक्षिष्यन्ते [The Siddhas will look from a distance, hence the bulky current will but look like a slender necklace set with sapphire]. But where do you find sapphire here ?—शार्ङ्गिणः वर्णचौरे त्वयि अवनते सति [The cloud exactly resembles in colour a blue sapphire.

And as this blue cloud will hover over the white current of the river, the stream will appear from a distance as a white pearl necklace with a blue sapphire in the middle. Thus the resemblance is complete and present a good spectacle for the Siddhas &c., to look at ].

Prose.—शार्ङ्गिणः वर्णचौरे त्वयि जलमादातुम् अवनते ( सति ), गगनगतयः ( सिद्धादयः ) दृष्टीः आवर्ज्य पृथुमपि दूरभावात् तनुं तस्याः सिन्धोः प्रवाहं स्थूलमध्येन्द्रनीलं भुवः एकं मुक्तागुणमिव प्रेक्षिष्यन्ते नूनम्।

Beng.—শার্ঙ্গধর কৃষ্ণের তুল্য বর্ণবিশিষ্ট তুমি জল লইবার জন্য ( চর্ম্মণ্বতী নদীর উপর ) অবনত হইলে, গগনচারী সিদ্ধগণ নীচে দৃষ্টিক্ষেপ করিয়া, স্থূল হইলেও দূরত্বহেতু ক্ষীণবোধ হওয়ায় সেই নদীর স্রোতকে বৃহৎ ইন্দ্রনীলরূপ মধ্যমণিযুক্ত পৃথ্বীদেবীর মুক্তাহারের ন্যায় দেখিতে থাকিবে।

Eng.—When you, an imitator of Krishna's colour will stoop down to draw water ( from the river ), the sky-rangers, having bent down their eyes, will look upon the stream, though large still slender through distance, as a pearl necklace of lady Earth, set with a blue sapphire in the middle.

Expl.—See Prak.

Sanj.—त्वयीति। 'शार्ङ्गिणः' कृष्णस्य 'वर्णस्य' कान्तेः 'चौरे'—'वर्णचौरे' तत्तुल्यवर्णे इत्यर्थः; 'त्वयि जलमादातुमवनते' सति 'पृथुमपि दूरभावात्' 'दूरत्वात्' 'तनुं' सूक्ष्मतया प्रतीयमानं 'तस्याः सिन्धोः' चर्मण्वत्याख्यायाः 'प्रवाहं', गगने गतिर्येषां ते गगनगतयः' खेचराः सिद्धगन्धर्वादयः [ अयमपि बहुव्रीहिः पूर्ववत् जन्माद्युत्तरपदेषु द्रष्टव्यः ] 'नूनं' सत्यं 'दृष्टीरावर्ज्य' नियम्य 'एकम्' एकयष्टिकं 'स्थूलो' महान् 'मध्यो' मध्यमणीभूत 'इन्द्रनीलः' यस्य तं 'भुवः' भूमेः 'मुक्तागुणं' मुक्ताहारमिव प्रेक्षिष्यन्ते। [ अत्र अत्यन्तनीलमेघसङ्गतस्य प्रवाहस्य भूकण्ठमुक्तागुणत्वेन उत्प्रेक्षा एवायम्—इति इवशब्देन व्यज्यते। निरुक्तकारस्तु तत्र तत्रोपमा यत्र इव-शब्दस्य दर्शनम् इति इव-शब्ददर्शनात् अत्रापि उपमैव इति बभाम। ] ४८ ॥

## Notes on Malli.

1. Here the word इव indicates—that the stream united with the dark blue cloud is surmised as a pearl-necklace on the neck of Earth. The निरुक्तकार however in a mistake took it as उपमा from the presence of the word इव ; he says that wherever there is इव, there is उपमा।

## Charcha.

1. अवनते—अव + नम + क्त कर्त्तरि = अवनत to hang down. तस्मिन्। Pred to त्वयि ( which has भावे ७मी )।

2. वर्णचौरे—चोरयतीति चोर: = चुर + णिच् + अच् कर्त्तरि। चोर एव इति चौर:—प्रज्ञादित्वात् स्वार्थे अण्। वर्णस्य चौर:, ६तत्—। तस्मिन्। Qual. त्वयि। The dark cloud well resembles Krishna's colour, cp—"कान्तिमापत्स्यते गोपवेषस्य विष्णो:"—sl. 15. *ante.*

3 दूरभावात्—भू + घञ भावे = भाव: existence, state. दूरस्य भाव:, ६तत्—। तस्मात्। हेतौ ५मी। A large thing appears small from a distance.

4. प्रेक्षिष्यन्ते—प्र + ईक्ष + लृट् स्यन्ते। Nom. गगनगतय:। For गगनगतय:—see Malli.

5. आवर्ज्य—आ + वृज + णिच् ल्यप्। Having bent down.

6. मुक्ता &c.—गुण string i. e., necklace. मुक्ताया: गुणम्, ६तत्—। उपमान of प्रवाहम्। The current resembles a pearl-necklace, for both are clear and shining.

7. स्थूल &c —मध्य: इन्द्रनील:, कर्मधा—। स्थूल: मध्येन्द्रनील: यस्य, बहु—। तम्। Qual. मुक्तागुणम्। The dark cloud just above

the white stream was like a pearl-necklace set with blue sapphire in the centre.

8. Voice.—...गतिभिः पृथुः अपि तनुः प्रवाहः...—मध्येन्द्रनीलः...एकः मुक्तागुणः इव प्रेक्षिष्यते... ।

9. Remark.—Comparing river-streams with pearl-necklaces is favourite with our poet, cp—"एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी । मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥"—Raghu. XIII.

## 49. *The cloud will be a good spectacle all along.*

तामुत्तीर्य्य व्रज परिचितभ्रूलताविभ्रमाणां
पक्ष्मोत्क्षेपादुपरिविलसत्कृष्णसारप्रभाणाम् ।
कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्वन् दशपुरवधूनेत्रकौतूहलानाम् ॥ ४८ ॥

Prak.—Easy.

Prose.—तां (चर्मण्वतीम्) उत्तीर्य्य आत्मबिम्बं परिचितभ्रूलताविभ्रमाणां पक्ष्मोत्क्षेपात् उपरिविलसत्कृष्णसारप्रभाणां कुन्दक्षेपानुगमधुकरश्रीमुषां दशपुरवधूनेत्रकौतूहलानाम् पात्रीकुर्वन् व्रज ।

Beng.—চর্ম্মণ্বতী নদী পার হইয়া, ভ্রূলতার বিলাসে অভ্যস্ত, চক্ষুর পক্ষ্ম উৎক্ষিপ্ত হওয়াতে উপরিভাগে কৃষ্ণশুভ্রপ্রভাবিশিষ্ট (অতএব) ক্ষিপ্যমান শুভ্র কুন্দানুসারি কৃষ্ণমধুকরের শোভানুকারী, দশপুরনারীবর্গের সতৃষ্ণ নয়নের বিষয়ীভূত হইয়া তুমি গমন কর।

Eng.—Having crossed the river Charmanvati you go on making your own image the object of the eager eye-sight of Dasapura ladies—eyesight which is habituated to gestures of creeper-like eyebrows and which has a black and white lustre at the top owing to the uplifting of the eyelashes and which

( thus ) resembles the beauty of black-bees hovering over white Kunda-flowers.

Expl —Easy.

Sanj.—तामिति। 'तां' चर्मण्वतीमुत्तीर्य्य, भ्रुवौ लताइव 'भ्रूलता' [ उपमितसमासः ] तासां 'विभ्रमाः' विलासाः 'परिचिताः' कृता येषु तेषाम्। 'पक्ष्माणि' नेत्रलोमानि [ "पक्ष्म सूत्रे च सूक्ष्मांशे किञ्जल्के नेत्रलोमनि" इति शाश्वतः ] तेषामुत्क्षेपात्' उन्नमनात् हेतोः, कृष्णाश्च साराश्च कृष्णशाराः' नीलशाराः [ "वर्णो वर्णेन" इति समासः। "कृष्णरक्तसिता शारा: "इति यादवः। ततश्च शारशब्दादेव सिद्धे कार्य्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थम्। रक्तत्वतु न विवक्षितम् उपमानानुसारात्, तस्य (i. e रक्तत्वस्य) स्वाभाविकस्य स्त्रीनेत्रेषु सामुद्रिकविरोधात्, इतरस्य (i. e. सितत्वस्य) अप्रसङ्गात्। क्वचित् भावकथनन्तु उपपत्तिविषयम् ] उपरि विलसन्त्यः कृष्णशाराः प्रभाः येषां तेषाम्; 'कुन्दानि' माघ्यकुसुमानि तेषां 'क्षेपः' इतस्ततश्चालनं तस्य 'अनुगाः' अनुसारिणो ये 'मधुकराः' तेषां श्रियं मुष्णन्तीति तथोक्तानां, क्षिप्यमानकुन्दानुधाविमधुकरकल्पानाम् इत्यर्थः। 'दशपुरं' रन्तिदेवस्य नगरं, तस्य 'वध्वः' स्त्रियः [ "वधूर्जाया स्नुषा स्त्री च" इत्यमरः ] तासां 'नेत्रकौतूहलानां' नेत्राभिलाषाणां साभिलाषदृष्टीनाम् इत्यर्थः। 'आत्मबिम्बं' स्वमूर्त्तिं 'पात्रीकुर्वन्' विषयीकुर्वन् व्रज गच्छ ॥ ४९ ॥

## Charcha.

1. ताम्—Refers to river चर्मण्वती। Obj. of उत्तीर्य्य।

2. उत्तीर्य्य—उद् + तॄ + ल्यप्।

3. व्रज—व्रज + लोट हि। Nom. त्वम्। Conj. ante.

4. परिचित &c.—भ्रुवौ लता इव, उपमितकर्मधा—। विभ्रम is हाव gestures. भ्रूलतानां विभ्रमाः। ६तत्—। परिचिताः भ्रूलताविभ्रमाः येषु, बहु—। तेषाम्। Qual. नेत्रकौतूहलानाम्। The ladies' gestures will delight the cloud, hence it is to go enjoying there female-looks.

5. पक्ष्मोत् &c.—पक्ष्मन् eyelashes. उद्+क्षिप+घञ् भावे=उत्क्षेप up-lifting. पक्ष्मणाम् उत्क्षेपः, ६तत्—। तस्मात्। हेतौ ५मी।

6. उपरि &c.—प्र+भा+अङ् भावे=प्रभा lustre. कृष्णाश्च ता शाराश्च, कर्मधा—( See Malli ). उपरि विलसन्त्यः, सुपसुपा—। उपरिविलसन्त्यः कृष्णशाराः प्रभाः: येषु, विपद बहु—। तेषाम्। Qual. नेत्रकौतूहलानाम्। शार means here black. The eye-ball was white no doubt but eye-lashes and pupils were black. Hence abundance of black is indicated. Thus Malli says "शारशब्दादेव सिद्धे कार्ष्ण्ये पुनः कृष्णपदोपादानं कार्ष्ण्यप्राधान्यार्थम्"।

7. कुन्द &c.—क्षिप+घञ भावे=क्षेप tossing. कुन्द is a variety of white flower, cp, "कुन्दावदाताः कलहंसमालाः"—*Bhatti*. अनुगच्छन्तीति अनु+गम+ड कर्त्तरि=अनुगाः followers. कुन्दानां क्षेपाः, ६तत्—। Here it means क्षिप्यमानकुन्द by the maxim "भावानयने द्रव्यानयनम्"। कुन्दक्षेपानाम् अनुगाः, ६तत्—। तादृशाः मधुकराः, कर्मधा—। तेषां श्रीः, ६तत्—। तां मुष्णन्तीति कुन्दक्षेपानुगमधुकरश्री+मुष+क्विप् कर्त्तरि=कुन्दक्षेपानुगमधुकरश्रीमुषः। तेषाम्। Qual. नेत्रकौतूहलानाम्। White Kunda flowers with black bees hovering over these well compares to the dark iris and white ball of a fully black eye.

8. पात्रीकुर्वन्—अपात्रं पात्रं कुर्वन् इति पात्र+च्वि+कृ+शतृ। Qual. त्वम्।

9. दशपुर &c.—दश पुराणि यत्र तत् दशपुरम् name of a town बहु—। तस्य वध्वः, ६तत्—। तासां नेत्राणि। तेषां कौतूहलाः (साभिलाषदृष्टयः) ६तत्—। तेषाम्। सम्बन्धविवक्षया षष्ठी। Dasapura is modern Mandasor or Dasor. It is the chief fown of the weastern district of Malwa.

10. Voice.—...पात्रीकुर्वता त्वया भ्रम्यताम्...।

## *50. Cloud's access to Kurukhetra.*

**ब्रह्मावर्त्तं जनपदमथ च्छायया गाहमानः**
**क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः ।**
**राजन्यानां शितशरशतैर्यत्र गाण्डीवधन्वा**
**धारापातैस्त्वमिव कमलान्यभ्यवर्षन्मुखानि ॥ ५० ॥**

Prak.—Easy.

Prose.—अथ ब्रह्मावर्त्तं जनपदं छायया गाहमानः (सन्) क्षत्रप्रधनपिशुनं तत् कौरवं क्षेत्रं भजेथाः ; यत्र गाण्डीवधन्वा (अर्जुनः) शितशरशतैः, त्वं धारापातैः कमलानि इव राजन्यानां मुखानि अभ्यवर्षत् ।

Beng.—অনন্তর ছায়ারূপে ব্রহ্মাবর্ত্তদেশে প্রবিষ্ট হইয়া ক্ষত্রিয়দিগের যুদ্ধের চিহ্নযুক্ত কুরুক্ষেত্রে যাইবে । এইস্থানে গাণ্ডীবধারী অর্জ্জুন, তুমি যেমন ধারাপাত দ্বারা পদ্মসমূহকে অভিবৃষ্টকর, সেইরূপ শত শত তীক্ষ্ণশরদ্বারা রাজন্যবর্গের মুখ সমাচ্ছন্ন করিয়াছিল ।

Eng.—Then entering in the shape of a shadow, the Bhram**a**varta country, you will land that Kurukshetra having signs of Kshattriya's welfare. Here Arjuna the wielder of Gandiva, pervaded with hundreds of sharp arrowrs the faces of Kshatriya princes, like you covering lotuses with showers of rains.

Expl.—Easy.

Sanj.—ब्रह्मावर्त्तमिति । 'अथ, अनन्तरं 'ब्रह्मावर्त्तनाम जनपदं' देशम् [ अत्रमनु :—"सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते" इति ] 'छायया' अनातपमण्डलेन 'गाहमानः' प्रविशन्, न तु स्वरूपेण । पीठक्षेत्राश्रमादीनि परिहृत्य अन्यतोव्रजेदिति वचनात् । 'क्षत्रप्रधनपिशुनं' अद्यापि शिरःकपालादिमत्तया कुरुपाण्डवयुद्धसूचकं [ "युद्धमायोधनं जन्यं प्रधनं प्रविदारणम्" इत्यमरः ] 'तत्' प्रसिद्धं कुरुनामिदं कौरवं क्षेत्रं भजेथाः" कुरुक्षेत्रं व्रजेत्यर्थः । 'यत्र' कुरुक्षेत्रे, गाण्डो धनुरस्यास्तीति गाण्डीवं धनुर्विशेषः [ "गाण्ड्यजगात् संज्ञायाम्"

इति मत्वर्थीयो वप्रत्ययः। "कपिध्वजस्य गाण्डीवगाण्डिवौ पुंनपुंसकौ" इति अमरः ] तत् धनुर्यस्य स गाण्डीवधन्वा अर्जुनः [ "वा संज्ञायाम्" इत्यनङादेशः ] 'शितशरशतैः' निशितबाणसहस्रैः 'राजन्यानां' राज्ञां 'मुखानि, धारापातैः' उदकधाराणां पातैः कमलानि त्वम् इव अभ्यवर्षत्' अभिमुखं दृष्टवान् शरवर्षेण शिरांसि चिच्छेद इत्यर्थः ॥ ५० ॥

## Charcha.

1. ब्रह्मावर्त्तम्—This is the country (जनपद) between the rivers सरस्वती and दृषद्वती। See Manu quoted by Malli.

2. छायया—छाया shade. तया। प्रकृत्यादित्वात् तृतीया।

3. गाहमानः—गाह + शानच् कर्त्तरि। Qual. त्वम्।

4. क्षत्र &c.—प्रधन battle. पिशुन is lit. sign, thence it means 'indicator' (सूचक). क्षत्राणां प्रधनम् इतत्—। तस्य पिशुनम्, इतत्—। Qual. क्षेत्रम्। In Kurukshetra the well known battle of the Kurus & Pandavas took place and vestiges of it were still there, hence it is so called.

5. तत्—Here तद् is प्रसिद्धार्थक। Qual. क्षेत्रम्।

6. कौरवं क्षेत्रम्—This is कुरुक्षेत्र। Its modern name is Thaneswar. The Allusion is well known and needs no special mention.

7. भजेथाः—भज + लिङ् विधौ + ईथास्। Nom. त्वम्। कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

8. राजन्यानाम्—राजन्य is Kshatriya. तेषाम्। शेषे षष्ठी। The word राजन्य may be derived from राजन् + यत्, or it is a रूढ़िशब्द।

9. शित &c.—शो + क्त कर्त्तरि = शित sharp. शात is also correct here by the rule "शाच्छोरन्यतरस्याम्"। But in the sense of तनु the

form is थित only cp, "ध्यतेरित्वं व्रते नित्यम्"। शराणां शतानि। ६ तत्— । शितानि शरशतानि, कर्मधा— । तैः। करणे ३या।

10. गाण्डीव &c.—For deriv. of गाण्डीव—see Malli. गाण्डीवं धनुरस्य इति बहु— । Here समासान्त अनङ् optionally comes by "वा संज्ञायाम्" yielding गाण्डीवधन्वन्। गाण्डीवधनुः is also correct. This is a name of अर्जुन। See Malli. Nom. to अभ्यवर्षत्।

11. धारापातैः—करणे ३या।

12. अभ्यवर्षत्—अभि+वृष+लङ द। Nom. गाण्डीवधन्वा।

13. Voice.—...गाह्यमानेन त्वया...भज्यते...धन्वना...अभ्यवृष्यन्त...।

## 51. *Saraswati's water is purifying to all.*

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे।
कृत्वा तासामभिगममपां सौम्य सारस्वतीनां
अन्तःशुद्धस्त्वमसि भविता वर्णमात्रेण कृष्णः॥ ५१॥

Prak.—Easy

Prose.—बन्धुप्रीत्या समरविमुखः लाङ्गली (बलरामः) अभिमतरसां रेवतीलोचनाङ्कां हालां (सुरां) हित्वा याः (अपः) सिषेवे, तासां सारस्वतीनाम् अपाम् अभिगमं (सेवां) कृत्वा हे सौम्य, त्वम् अन्तःशुद्धः वर्णमात्रेण कृष्णः भविता असि।

Beng.—বন্ধুভূত কুরুপাণ্ডবদিগের প্রতি স্নেহবশতঃ সমরবিমুখ হইয়া হলধর বলরাম, সুস্বাদু ও রেবতীর পত্নী রেবতীর লোচনচিহ্নযুক্ত (অর্থাৎ লোচনপ্রতিবিম্বযুক্ত) মদ্যত্যাগ করিয়া যে পবিত্র জলপান করিয়াছিলেন, সরস্বতীনদীর সেই পবিত্র জল সেবন করিয়া, হে সাধো, তুমি বর্ণে কাল হইলেও অন্তরে শুদ্ধ হইবে।

Eng.—O Good, one, you though dark in colour will be internally purified by partaking of those waters of Saraswati,

which the plough-bearer Balarama averse to warfare owing to his affection for relatives ( Kurus and Pandavas ) took in place of well-flavoured wine having the reflection of Revati's ( his wife's ) eyes.

Expl.—Easy.

Sanj.—हित्वेति। 'बन्धुप्रीत्या 'कुरुपाण्डवस्नेहेन न तु भयेन 'समरविमुखो' युद्धनिस्पृहः, लाङ्गलमस्यास्तीति 'लाङ्गली' हलधरः 'अभिमतरसाम्' अभीष्टस्वादां, तथा 'रेवत्याः' स्वप्रियायाः लोचने एव अङ्कः प्रतिबिम्बत्वात् चिह्नं यस्याः तां 'हालां' सुरां [''सुरा हलिप्रिया हाला'' इत्यमरः। ''अभिप्रयुक्तं देशभाषापदम्'' इत्यत्र (? सूत्रे) 'हाला' इति देशभाषापदमपि अतीव कविप्रयोगात् साधु इत्युदाजहार वामनः ] 'हित्वा' त्यक्त्वा, दुस्त्यजामपि इति भावः। 'याः सारस्वतीरपः सिषेवे। हे सौम्य' सुभग 'त्वं' तासां सरस्वत्या नद्या इमाः 'सारस्वत्यः' 'तासामभिगमं' सेवां कृत्वा 'अन्तर्' अन्तरात्मनि 'शुद्धो' 'निर्मलः' निर्दोषो भविता [ ''ण्वुल् तृचौ'' इति तृच् ] 'असि' सद्य एव पूतो भविष्यसीत्यर्थः [ ''वर्त्तमानसामीप्ये वर्त्तमानवद्वा'' इति वर्त्तमानप्रत्ययः ] 'वर्णमात्रेण' वर्णेनैव 'कृष्णः' श्यामः, न तु पापेन इत्यर्थः। [ अन्तःशुद्धिरेव सम्पाद्या न बाह्या। बहिः-शुद्धोऽपि सूतवधप्रायश्चित्तार्थं सारस्वतसलिलसेवी तत्रभगवान् बलभद्र एव निदर्शनम्। अतो भवतापि सरस्वती सर्वथा सेवितव्या इति भावः। ] ॥ ५१ ॥

## Notes on Malli.

1. The sense is—Internal and *not* external purification is to be done. Almighty Balarama furnishes an example here, for he though externally pure, partook of Saraswati's water for nternal purification. So you should serve Saraswati by all means.

## Charcha.

1. हित्वा—हा + क्त्वा। Having given up.
2. हालाम्—'हाला'—a colloqual word meaning 'wine'. ताम् /

Obj. of हित्वा। Wine was Balaram's favourite ( cp—"मदिरास्वाद मदपाटलितद्युती"—Sisu ) so much so that its abandonment in favour of Saraswati's water, makes the latter unsurpassably pure.

3. रेवती &c.—रेवती was बलरामs dear wife. रेवत्याः लोचनम्, ६तत्— । लोचनमित्यत्र जातौ एकवचनम् । रेवतीलोचनम् अङ्कः ( चिह्न ) यस्याः, बहु— । ताम् । Qual. हालाम् । The epithet suggests that this wine drunk in company with Revati made it all the more attractable, still he had foregone it. As Revati's eyes were reflected in clear wine, so it was रेवतीलोचनाङ्का । cp "सहपानात् रेवतीलोचनप्रतिबिम्बसम्भवः" —*Saroddharini*.

4. बन्धु &c.—By बन्धु is taken कुरुs and पाण्डवs । बन्धौ प्रीतिः, सुप्सुपा— । तया । हेतौ ३या ।

5. समर &c.—समरे विमुखः, सुप्सुपा— । Qual. लाङ्गली ।

6. या—Refers to water of the river Saraswati.

7. सिषेवे—सेव + लिट ए । Nom. लाङ्गली । The allusion is—that once Balarama killed a charioteer through Krishna's instigation. At the next stage being penitent of his deed he traversed the several well-known holyplaces and at last was absolved of his sinful action by ablution in the River Sarawati. Thus it is indicated that Saraswati's waters are holy indeed.

8. अभिगमम्—अभि + गम + अप् भावे = अभिगम serving, i. e., drinking. तम् । obj of कृत्वा ।

9. अपाम्—अप् water. The base is always feminine plural. तासाम् । कृद्योगे कर्मणि षष्ठी—the कृत् is in अभिगम ।

10. सारस्वतीनाम्—सरस् is water. तानि सन्ति अस्या इति सरस्+मतुप् स्त्रियाम्=सरस्वती। It is a very holy river in India. It flows by the north-west of कुरुक्षेत्र। सरस्वत्या इमा इति सरस्वती+अण्+ङीप् =सारस्वती। तासाम्। Qual. अपाम्। Cp. the verse—"'गङ्गा कनखले पुण्या कुरुक्षेत्रे सरस्वती। ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा॥" —quoted by सारोद्धारिणी।

11. असि—अस्+लट् सि। Nom. त्वम्। Malli connects it with भविता, thereby getting a future sense. The वर्त्तमान in the sense of future is supported by the rule "वर्त्तमानसामीप्ये वर्त्तमानवद्वा"। Prof. Pathak says that असिभविता= भवितासि (भू+लुट् Second sing ). But it should be remembered that such separation of a verb from its affixes is unusual. Separation of आमप्रत्ययान्त from the root ( as "पातयां प्रथममास", "प्रभ्रंशयां यो न हुषं चकार"—Raghu &c. ) cannot be taken as similar instances. But if the reading be अपि in place of असि, then the last half gain in force. लाङ्गली शुद्धो बभूव त्वमपि अन्तःशुद्धो भविता sounds very-good the connection of the two halves being estalished. So we prefer अपि here

12. भविता—भविष्यति इति भू+तृच् कर्त्तरि=भविता। Pred to त्वम्

13. वर्णमात्रेण—वर्ण एव इति वर्णमात्रम्, मयूरव्यंसकादित्वात् समासः। "मात्रं कार्त्स्न्येऽवधारणे" इत्यमरः। तेन। प्रकृत्यादित्वात् तृतीया। For the force of the epithet see Malli—न तु पापेन &c.

14. Voice.—...विमुखेन लाङ्गलिना याः सिषेविरे त्वया...शुद्धेन कृष्णेन भविष्या भूयते...।

## 52. *Cloud's procedure to Kanakha.*

तस्माद्गच्छेरनुकनखलं शैलराजावतीर्णां
जह्नोः कन्यां सगरतनयस्वर्गसोपानपङ्क्तिम् ।
गौरीवक्त्रभ्रुकुटिरचनां या विहस्येव फेनैः
शम्भोः केशग्रहणमकरोदिन्दुलग्नोर्मिहस्ता ॥ ५२ ॥

Prak.—Easy.

Prose.—तस्मात् ( कुरुक्षेत्रात् ) अनुकनखलं शैलराजावतीर्णां सगरतनयस्वर्गसोपानपङ्क्तिं जह्नोः कन्यां ( गङ्गाम् इत्यर्थः ) गच्छेः । या फेनैः गौरीवक्त्रभ्रुकुटिरचनां विहस्य इव इन्दुलग्नोर्मिहस्ता ( सती ) शम्भोः केशग्रहणमकरोत् ।

Beng.—সেই কুরুক্ষেত্র হইতে, কনখলসমীপে শৈলরাজ হিমালয় হইতে পৃথিবীতে পতিত সগরতনয়গণের স্বর্গপ্রাপ্তির পঙ্‌ক্তিস্বরূপ জহ্নুকন্যা গঙ্গার সমীপে যাইবে। গঙ্গা ফেনদ্বারা গৌরীর ভ্রূভঙ্গি উপহাস করিয়াই যেন উর্মিরূপ হস্ত চন্দ্রে লগ্ন করিয়া শিবের কেশগ্রহণ করিয়াছিলেন।

Eng —Then from Kurukshetra go to the river Ganges, the step to heaven for the sons of Sagara and who descends on earth from the Himalayas near Kanakhal. She laughing the frowns in the face of Gauri by foams as it were, caught hold of the hairs of Siva with her hands of waves stuck to Lord's crescent-moon.

Expl.—See Notes below.

Sanj.—तस्मादिति । 'तस्मात्' कुरुक्षेत्रात् 'कनखलस्य' अद्रेः (?) समीपे 'अनुकनखलम्' ["अनु यत्समया" इत्यव्ययीभावः] 'शैलराजात्' हिमवतः (अद्रेः) अवतीर्णां सगरतनयानां स्वर्गसोपानपङ्क्तिं' स्वर्गप्राप्तिसाधनभूतामित्यर्थः जह्नोर्नाम राज्ञः (? मुनेः ) 'कन्यां, जाह्नवीं गच्छेः' गच्छ [ विध्यर्थे लिङ् ] या जाह्नवी 'गौर्या वक्त्रे या भ्रुकुटिरचना' सापत्नरोषात् भ्रूभङ्गकरणं तां 'फेनैः विहस्य' अवहस्य 'इव'; धावल्यात्

फेनानां हासलेनोत्प्रेचा । 'इन्दौ' शिरोमाणिक्यभूते लग्ना ऊर्मय एव हस्ता यस्याः सा 'इन्दुलग्नोर्मिहस्ता' सती 'शम्भोः केशग्रहणमकरोत्' । यथा काचित् प्रौढ़ा नायिका सपत्नीमसहमाना स्वभर्त्तारं सह शिरोरत्नेन केशेषु आकर्षति तद्वत् इति भावः । [ इदञ्च, पुरा किल भगीरथप्रार्थनया भगवतीं गगनपथात् पतन्तीं गङ्गां गङ्गाधरो जटाजूटेन जग्राह इति कथामुपजीव्य उक्तम् १ ] ॥ ५२ ॥

## Notes on Malli.

1. This is said with reference to the fact that at the request of Bhagiratha, Siva the holder of Ganga, held her by his matted locks as she fell on Earth from the heaven. [N. B.—Here Malli's reading is vicious. अद्रेः should be placed after हिमवतः । And राज्ञः should be मुनेः ] ।

## Charcha.

1. तस्मात्—Refers to कुरुक्षेत्र । अपादाने ५मी ।

2. गच्छेः—गम + लिङ् विधौ + यास् । Nom. त्वम् । जगाम, अगमत्, अगच्छत्, गमिष्यति ।

3. अनु &c.—Kanakhala is a place near Hardwar where the river Ganges descends into a low plain uphills. Hence at कनखल Ganges is शैलराजावतीर्णा ( i. e., शैलराजात् हिमालयात् अवतीर्णा भूम्यां पतिता ) । Prof. Wilson thus by a verse shows the meaning of कनखल—"खलः को नाव मुक्तिं वै भजते तत्र मज्जनात् । अतः कनखलं तीर्थं नाम्ना चक्रुर्मुनीश्वराः ॥" Again Ganga's purity is mostly seen at कनखल, hence the cloud is to go there ( see Note 10. sl. 51 ). कनखलस्य समीपे इति अनुकनखलम्, अव्ययी— । Adv. Qual. गच्छेः । The rule quoted by Malli "अनुर्यत् समया"—means that the अव्यय 'अनु'

is compounded with the thing taken as a mark near which something occurs.

4. जह्नोः कन्याम्—Obj. of गच्छेः। By जह्नुकन्या Ganga is meant. The allusion is to the fact that when the flow of Ganges current disturbed the sage Jahnu, he drank her up. But being requested by Bhagiratha the sage re-issued her from his knee. Hence she is जह्नोः कन्या। Thus गङ्गा is called जाह्नवी। Malli's जह्नोर्नाम राज्ञः कन्या should be जह्नोर्नाम मुनेः कन्या।

5. सगर &c.—सोपान step. पङ्क्ति row. सोपानानां पङ्क्तिः, ६तत्—। स्वर्गस्य सोपानपङ्क्तिः the rows of steps leading to Heaven. ६तत्—। सगरतनयानां स्वर्गसोपानपङ्क्तिः, ६तत्—। ताम्। Qual. कन्याम्। Bhagiratha great-grandson of Sagara, a king of the solar dynasty, brought down Ganga on Earth from Heaven to rescue his fore-fathers the sons of Sagara, who were reduced to ashes at Patala by the curse of sage Kapila. Thus Ganga purified them of their sins and caused their access to Heaven, hence she is so called.

6. गौरी &c.—भ्रुवो कुटिः इति भ्रुकुटि, ६तत्—। तस्य रचना, ६तत्—। गौरीवक्त्रे भ्रुकुटिरचना, सुप्सुपा—। ताम्। Obj. of विहस्य। भ्रूकुटि is also correct by the vattrika "अभ्रुकु'सादीनामिति वक्तव्यम्"—ह्रस्व being optional in those cases. According tc some again भ्रकुटि is also available, the varttika being explained as—भ्रुकु'सादीनाम् 'अ' भवति। Ganges first fell on Earth on the Siva's head, for earth was not sufficiently strong to bear her burden. This provoked गौरी's jealousy. The poet writes the last half of this verse with

an allusion to this fact. Thus he surmises that Ganga laughed away Parvati's jealous frowns by her laughs in the shape of foams ( फेनैः विहस्य ) and seized Siva's hair.

7. अकरोत्—कृ+लङ् द। Nom. या। करोति—कुरुते, चकार—चक्रे, करिष्यति—ते।

8. इन्दु &c.—ऊर्मयः हस्ताः इव इति ऊर्मिहस्ताः, उपमित कर्मधा—। इन्दौ लग्नाः, सुप्सुपा—। इन्दुलग्ना ऊर्मिहस्ता अस्याः, बहु—। Pred to या। Kalidasa elsewhere also compares waves with hands cp "मां तरङ्गहस्तैरुपगूहतीव"—*Raghu.*

9. Voice.—...शैलराजावतीर्णा...—पङ्क्तिः कन्या गम्येत...यया...हस्तया ...अक्रियत...।

## 53. *Cloud's union with crystal water of Ganges.*

तस्याः पातुं सुरगज इव व्योम्नि पश्चार्द्धलम्बी
त्वञ्चेदच्छस्फटिकविशदं तर्कयेस्तिर्य्यगम्भः।
संसर्पन्त्या सपदि भवतः स्रोतसि च्छाययासौ
स्यादस्थानोपगतयमुनासङ्गमेवाभिरामा ॥ ५३ ॥

Prak —Easy.

[ N. B.—The dark cloud in union with the crystal waters of Ganges will give one the impression of the confluence of Ganges and Jamuna there—Jamuna's water being dark ].

Prose.—सुरगज इव व्योम्नि पश्चार्द्धलम्बी ( सन् ) त्वम् अच्छस्फटिकविशदं तस्याः ( गङ्गायाः ) अम्भः तिर्य्यक् पातुं तर्कयेः चेत्, ( तदा ) सपदि स्रोतसि संसर्पन्त्या भवतः छायया असौ ( गङ्गा ) अस्थानोपगतयमुनासङ्गमा इव अभिरामा स्यात्।

Beng.—সুরগজের ন্যায় আকাশে পশ্চাদ্ভাগ দ্বারা লম্বমান হইয়া তুমি স্ফটিকের ন্যায়

গঙ্গার নির্মল জল যদি বক্রভাবে থাকিয়া পান কর, তবে তখনই গঙ্গাস্রোতে তোমার ছায়া প্রতিবিম্বিত হওয়ায় নদী অস্থানে যমুনাসঙ্গমপ্রাপ্ত হইয়া মনোহর হইবে বটে।

Eng.—If you in an oblique position think of drinking the crystal-clear waters of Ganges like a divine elephant resting in the sky with its hinder part only, then Ganges with your image entered into her, will be as beautiful as if it had conjoined with Jamuna not in its usual place ( at Allahabad ).

Expl.—Easy.

Sanj.—तस्या इति। 'सुरगज इव' कश्चित् दिग्गज इव व्योम्नि पश्चादर्द्धं पश्चार्द्धं [ पृषोदरादित्वात् साधुः' (?)1 ] तेन लम्बते इति 'पश्चार्द्धलम्बी' सन् पश्चात् भागेन व्योम्नि स्थित्वा पूर्वार्द्धेन जलोन्मुख इत्यर्थः। [ केचित् पूर्वार्द्धलम्बी इति पठन्ति ] 'अच्छस्फटिकविशदं' निर्मलस्फटिकावदातं 'तस्या' गङ्गाया अम्भः तिर्य्यक् तिरश्चीनं यथा तथा पातुं त्वं तर्कयेः' विचारयेः 'चेत्'। 'सपदि स्रोतसि' प्रवाहे 'संसर्पन्त्या 'भवतः छायया 'प्रतिबिम्बेन 'असौ' गङ्गा 'अस्थाने' प्रयागादन्यत्र उपगतः प्राप्तः यमुनासङ्गमः यया सा तथाभूता 'इव अभिरामा स्यात् ॥ ५३ ॥

## Notes on Malli.

1. In the formation of पश्चार्द्ध Malli resorts to पृषोदरादि, but this is a mistake ; the Varttika "अपरस्य अर्द्धे पश्चभावो वक्तव्यः "directs पश्च to be ordered in the place of अपर when अर्द्ध follows. ( See *char* ).

## Charcha.

1. पश्चार्द्धलम्बी—अपरम् अर्द्धम् अपरार्द्धम्, कर्मधा—। पश्च comes in place of अपर ( see Malli and notes thereon ). "अर्द्धं समेंऽशके अर्द्धं नपुंसकम्"। cp, "पश्चार्द्धेन प्रविष्टः"—Sak. 1. पश्चार्द्धेन लम्बते इति

पश्चार्ध + लम्ब + णिनि कर्त्तरि = पश्चाद्धलम्बी resting by hinder part. Pred. to त्वम्। Standing on the sky, the cloud is to stoop down by his fore part to drink water.

2. अच्छ &c—विशद white ( here ). अच्छ clear. अच्छ: स्फटिक:, कर्मधा—। स इव विशदम्, उपमान कर्मधा—by "उपमानानि सामान्यवचनै:"। Qual. अम्भ:।

3. तर्कये:—तर्क + णिच् ( चुरादि ) + लिङ् यास्। Nom. त्वम्।

4. तिर्यक्—तिर: वक्रमञ्चतीति तिरस् + अञ्च + क्विन् = तिर्यक्। तत् यथा तथा। Qual. पातुम्। He is to drink standing on the bank with his face directed towards the other bank. This is an oblique position.

5. संसर्पन्त्या—सम् + सृप + शतृ + ङीप् स्त्रियाम्—संसर्पन्ती reflecting तया। Qual. छायया which has करणे ३या।

6. सपदि—An अव्यय meaning 'immediataly' Adv. Qual. संसर्पन्त्या।

7. अस्थान &c—यमुनाया: सङ्गम:, ६तत्—। अस्थाने उपगत:, सुप् सुपा। अस्थानोपगत: यमुनासङ्गम: अस्या:, बहु—। Pred. to असौ। The simile is very apt see under Prak, above.

8. स्यात्—अस + लिङ् ( सम्भावनायाम् ) + यात्। Nom. असौ।

9. Voice.—गजेन...लम्बिना त्वया तर्क्येत...अमुया...—सङ्गमया...अभिरामया भूयेत...।

Remark.—Ganges water are white and Jamuna's waters are black. At the confluence their flows can be distinguished, cp, "क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य, पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गै:"—*Raghu.*

### 54. *Cloud's fatigue to be allayed on Himalaya.*

**आसीनानां सुरभितशिलं नाभिगन्धैर्मृगाणां**
**तस्या एव प्रभवमचलं प्राप्य गौरं तुषारैः ।**
**वक्ष्यस्यध्वश्रमविनयने तस्य शृङ्गे निषण्णः**
**शोभां शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयाम् ॥ ५४ ॥**

Prak.—Easy.

[ N. B.—The idea is that the dark cloud on the snow-clad white peak of Himalaya will look like black mud sticking on the horn of the white bull of Siva ].

Prose.—आसीनानां मृगाणां नाभिगन्धैः सुरभितशिलं, (तथा) तुषारैः गौरं तस्याः ( गङ्गायाः ) एव प्रभवं ( उत्पत्तिस्थानम् ) अचलं ( पर्वतं ) प्राप्य, अध्वश्रमविनयने तस्य शृङ्गे निषण्णः ( सन् ) त्वं शुभ्रत्रिनयनवृषोत्खातपङ्कोपमेयां शोभां वक्ष्यसि ( धारयिष्यसि )।

Beng.—উপবিষ্ট মৃগগণের কস্তুরীগন্ধে গন্ধিত প্রস্তর এবং তুষারহেতু গৌর গঙ্গার উৎপত্তিস্থান সেই পর্বত হিমালয়কে প্রাপ্ত হইয়া, তুমি পথশ্রমবিনোদের জন্য সেই পর্বতের শৃঙ্গে বসিয়া, শিবের শুভ্রবৃষের শৃঙ্গে লগ্ন কর্দমের ন্যায় শোভা ধারণ করিবে।

Eng.—Having reached that mountain ( Himalaya ) the source of Ganges, white with snow, and having its slabs of stones perfumed with the musks of seated deers, you will sit there to allay your fatigue ; you will also then attain the similarity of mud dug up by white bull of three-eyed Siva.

Expl.—Easy. Also See Prak, above.

Sanj.—आसीनानामिति । 'आसीनानाम्' उपविष्टानां 'मृगाणां' कस्तूरिकामृगाणाम्, अन्यथा नाभिगन्धानुपपत्तेः । 'नाभिगन्धैः' कस्तूरीगन्धैः तेषां तदुद्भवत्वात्, अतएव मृगनाभिसंज्ञा च [ "मृगनाभिः मृगमद कस्तूरी" इत्यमरः ] अथवा—'नाभयः

कस्तूर्य्यः [ "नाभिः प्रधाने कस्तूर्य्यां मदे च क्वचिदीरित" इति विश्वः ] तासां गन्धैः 'सुरभिता' सुरभीकृताः 'शिला' यस्य स 'तं' तस्या गङ्गाया एव, प्रभवत्यस्मादिति 'प्रभवः' कारणं तं 'तुषारैः गौरं' सितम् [ "अवदातः सितो गौरः" इत्यमरः ] 'अचलं प्राप्य विनीयते अनेन इति विनयनं [ करणे ल्युट् ] 'अध्वश्रमस्य' विनयने अपनोदके तस्य हिमाद्रेः शृङ्गे 'निषण्णः' सन् 'शुभ्रो यो 'विनयनस्य' त्र्यम्बकस्य 'वृषभः [ "सुकृते वृषभो वृषः" इत्यमरः ] तेन "उत्खातेन' विदारितेन 'पङ्केन सह 'उपमेयाम्' उपमातुमर्हां 'शोभां' वक्ष्यसि' वोढासि [ वहते ऌट । 'विनयन' इत्यत्र "पूर्वपदात् संज्ञायामगः" इति णत्वं न भवति । "क्षुभ्नादिषु च" इति निषेधात् ]। तस्या प्रभवमित्यादिना हिमाद्रौ मेघस्य वैवाहिको गृहविहारो ध्वन्यते ॥ ५४ ॥

## Charcha.

1. आसीनानाम्—आस + शानच् कर्त्तरि = आसीन seated, तेषाम् । Qual. मृगाणाम् । By मृग we are to understand those having 'musk' in theire navels. आसीन is formed with ई added by "ईदासः" ।

2. सुरभित &c.—सुरभिं करोति सुरभि + णिच् + लटति = सुरभयति । "तत् करोति तदाचष्टे" इति णिच् । सुरभिनाम धातु + क्त कर्मणि = सुरभित scented. तादृशा शिला अस्य, बहु— । तम् । Qual. अचलम् ।

3. नाभि &c.—नाभीनां गन्धाः, ६तत् । तैः । अनुक्ते कर्त्तरि ३या—the क्रिया being सुरभित in सुरभितशिलम् । For meanings of नाभि see Malli. कस्तूरिकामृगs abound in Himalayas plains rendering them fragrant, cp, "प्रस्थं हिमाद्रेर्मृगनाभिगन्धि"—Kum.

5. प्रभवम्—प्रभवत्यस्मात् ' इति प्र + भू + अप् अपादाने = प्रभव Source. तम् । Qual अचलम् । Ganges rises from Himalaya.

5. तुषारैः—तुषार snow. तैः । प्रकृत्यादित्वात् ३या ।

6. वत्स्यसि—वस + लृट् स्यसि। Nom. त्वम्। वसति—ते, उवास—ऊषे &c.

7. अध्व &c.—विनीयते अनेन इति वि + नी + ल्युट् करणे = विनयन the instrument by which is dispelled. ( Malli ). अध्वश्रमस्य विनयनम्, ६तत्—। तस्मिन्। Qual. शृङ्गे। Or—विनयतीति विनयनम् कर्तरि ल्युट by "कृत्यल्युटोबहुलम्"। Rest as above. Or—वि + नी + ल्युट् भावे = विनयनम् dispelling. अध्वश्रमस्य विनयनम्। ततः अर्श आद्यच्—तस्मिन्। Or—श्रमविनयने means श्रमविनयनविषये। विषयाधिकरणे ७मी। "विवक्षावशात् कारकाणि" इति विवक्षया ७मी।

8. निषण्णः—नि + सद + क्त कर्त्तरि = निषण्ण seated. Pred to त्वम्। "सदिरप्रतेः" इति षत्वम्। Then by the rule "रषाभ्यां नोणः समानपदे" इति प्रथमनस्य णत्वम्। ततः सन्धिना द्वितीयनस्यापि णत्वम्।

9. शुभ्र &c.—त्रिनयन is Siva. तस्य वृषः, ६तत्—। उत् + खन + क्त कर्मणि = उत्खात dug up in वप्रक्रीड़ा। शुभ्रः त्रिनयनवृषः, कर्मधा—। तेन उत्खातः, ३तत्—। तादृशः पङ्कः, कर्मधा—। तेन उपमेया, ३तत्—। ताम्। Qual. शोभाम्। The white bull is compared to snow-clad Himalaya. The mud dug up by the bull and stuck on its horns is compared to the dark cloud. Malli says—in त्रिनयन we do not get carebral though as a संज्ञा of Siva णत्व should have come by the rule "पूर्वपदात् संज्ञायामगः"—the cause for the change being in the पूर्वपद 'त्रि' here; for "त्रिनयन" is read under the क्षुभ्नादि class, क्षुभ्नादि is an open list ( आकृतिगण )। Thus *Kasika* says "अदृष्टितलक्षणो णत्वप्रतिषेधः क्षुभ्नादिषु द्रष्टव्यः"।

10. Voice.—...त्वया निषण्णेन...उपमेया शोभा नेष्यते...।

*55. Extinction of forest-fire there.*

तञ्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः ।
अर्हस्येनं शमयितुमलं वारिधारासहस्रै—
रापन्नार्त्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् ॥ ५५ ॥

Prak—Easy.

Prak.—वायौ सरति (सति) सरलस्कन्धसङ्घट्टजन्मा उल्काक्षपितचमरीबालभारः दवाग्निः तं (हिमाद्रिं) बाधेत चेत्, (तदा) वारिधारासहस्रैः एनम् अलं (सर्वप्रकारेण) शमयितुं अर्हसि । उत्तमानां सम्पदः आपन्नार्त्तिप्रशमनफला हि ।

Beng.—বায়ু বহিতে থাকিলে সরলবৃক্ষের প্রকাণ্ডের ঘর্ষণে উৎপন্ন বনাগ্নি অগ্নি-স্ফুলিঙ্গ দ্বারা চমরীমৃগের পুচ্ছলোমাদি দগ্ধ করিয়া যদি হিমাদ্রিকেও উৎপীড়ন করে, তবে তুমি অগ্নিকে সর্বপ্রকারে নির্বাপিত করিবে । আপন্নের ভয় দূর করাই উত্তমদিগের সম্পদের ফল বটে ।

Eng.—The wind having blowing if the forest fire grown by collision of trunks of Sarala trees, overpowers Himalaya even after burning by its sparks the hairs of Chamari deer, then it behoves thee to extinguish it by all means. Indeed the wealth of the good results in the destruction of the afflication of the distressed.

Sanj.—तमिति । 'वायौ' वनवाते सरति सति 'सरलानां' देवदारुद्रुमाणां (?) 'स्कन्धाः' प्रदेशविशेषाः [ "अस्त्री प्रकाण्डः स्कन्धः स्यात् मूलाच्छाखावधेः तरोः" इत्यमरः ] 'तेषां सङ्घट्टेन' सङ्घर्षेण जन्म यस्य स तथोक्तः [ जन्मोत्तरपदत्वात् व्यधिकरणोऽपि बहुव्रीहिः साधुरित्युक्तम् ] 'उल्काभिः' स्फुलिङ्गैः 'क्षपिताः' निर्दग्धाः 'चमरीणां बालभाराः' केशसमूहा येन, दव एव अग्निः 'दवाग्निः' वनवह्निः [ "वने च वनवह्नौ च दवो दाव इहेष्यते" इति यादवः ] 'तं' हिमाद्रिं 'बाधेत चेत्' पीडयेत् यदि

'एनं दवाग्नि' 'वारिधारासहस्रैः शमयितुमर्हसि'। युक्तञ्च एतत् इत्याह—'उत्तमानां' महतां 'सम्पदः' समृद्धयः 'आपन्नानां'मार्त्तानाम् 'आर्त्तिप्रशमनम्' आपन्निवारणमेव 'फलं' प्रयोजनं यासां तास्तथोक्ता हि। अतः हिमालयस्य दावानलस्त्वया शमयितव्य इति भावः ॥ ५५ ॥

## Charcha.

1. तम्—Refers to Himalaya. Obj of बाधेत।

2. सरति—सृ+लटः स्थाने शतृ=सरत् blowing तस्मिन्। Pred. to वायौ ( which has भावे ७मी )।

3. सरल &—सरल is a variety of देवदारु and not देवदारु proper. Malli's देवदारु for सरल is an oversight. Charaka's "शटीसरलदार्वेला-मञ्जिष्ठागुरुचन्दनैः" and "देवदारुवचाकुष्ठं सरलं शिग्रुसैन्धवम्", make देवदारु and सरल as different varieties of trees under the same species. स्कन्ध trunk. सङ्घट्ट friction, collision. This friction is due to blowing of winds. सरलानां स्कन्धाः, ६तत्—। तेषां सङ्घट्टनम्, ६तत्—। तस्मा त् ( तेन वा ) जन्म यस्य, बहु—। Qual. दवाग्निः। See also Malli.

3. बाधेत—बाध+लिङ् ( सम्भावनायाम् )+ईत। Nom. दवाग्निः।

4. उल्का &c.—उल्का spark. क्षप+णिच् ( चुरादि )+क्त कर्मणि=क्षपित burnt. चमरी is a kind of deer famous for their hairs (बाल)। बालानां भारः, bush of hairs, ६तत्—। चमरीणां बालभारः' ६तत्—। उल्काक्षपितः चमरीबालभारः यनेन, बहु—। Qual. दवाग्निः। The ravishes of दवाग्नि is well described in the Ritursamhara "ज्वलति पवनवृद्धः पर्वतानां दरीषु स्फुटति पटुनिनादः शुष्कवंशस्थलीषु—। प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन क्लपयति मृगवर्गं प्रान्तलग्नो दवाग्निः ॥"

5. अर्हसि—अर्ह+लट सि। Nom. त्वम्। आमर्ह, आर्हीत्।

6. अलम्—An अव्यय meaning here 'by all means' ( सर्वथा )। cp, "अलमतिशयेन"—शारीरकशारिवी। Adv. Qual. शमयितुम्।

7. वारिधारा &c—वारिधाराणां सहस्राणि, ६तत्— । तैः। करणे ३या।

8. आपन्न &c.—आ + पद + क्त कर्त्तरि = आपन्न distressed. आ + ऋच्छ + क्तिन् भावे = आर्त्ति affliction प्र + शम + ल्युट भावे = प्रशमन extinction. आपन्नानां आर्त्तिः, ६तत्— । तस्याः प्रशमनम्। ६तत्— । तदेव फलं यासाम्, बहु— । ताः। Pred to सम्पदः। The good always succour the distressed. cp, "आपन्नाभयसत्रेषु दीक्षिताः खलु पौरवाः"—Sak.

9. सम्पदः—सम्पद्यन्ते सत् + पद + क्विप् भावे = सम्पदः wealth. ताः। Nom to भवन्ति understood.

10. Voice—...—सङ्कुद्दजन्मना...—शालभारैव दवाग्निना न वाध्येत... त्वया धर्ष्यते...सम्पद्भिः...—फलाभिः भूयते... ।

### 56. **Sarava's** *futile attempt for the suppression of cloud.*

ये संरम्भोत्पतनरभसाः स्वाङ्गभङ्गाय तस्मिन्
मुक्ताध्वानं सपदि शरभा लङ्घयेयुर्भवन्तम्।
तान् कुर्वीथास्तुमुलकरकावृष्टिपातावकीर्णान्
के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः॥ ५६॥

**Prak.**—Easy.

**Prose.**—तस्मिन् ( हिमाद्रौ ) संरम्भोत्पतनरभसाः ये शरभाः स्वाङ्गभङ्गाय ( आत्मदेहभङ्गाय एव ) मुक्ताध्वानं भवन्तं लङ्घयेयुः; तान् सपदि ( त्वम्‌ः ) तुमुलकरकावृष्टिपातावकीर्णान् कुर्वीथाः। निष्फलारम्भयत्नाः के वा परिभवपदं न स्युः।

**Beng.**—সেই হিমাদ্রিতে, রাগের সহিত বেগে উৎপতিত যে সমস্ত শরভগণ, পথ

ছাড়িয়া দিলেও তোমাকে নিজ দেহের নাশের জন্যই আক্রমণ করিবে তাহাদিগকে তুমি শিলাবৃষ্টিদ্বারা বিক্ষিপ্ত করিবে। নিষ্ফল কার্য্যে যত্নবান্ হইলে কে বা পরিভূত না হয়।

Eng.—The Sarava deer that is eager to scamper up angrily and will in that Hima aya attack you for the breach of their own limbs only though you left their path, should be scattered by you with a heavy shower of hail-stones. Engaged in futile works who indeed does not becomes an object of defeat?

Expl.—The cloud is very powerful. Thus the Sarava deer that will assail it in Himalaya will in return be defeated by hail storms to be hurled by the cloud. Indeed quarrel with a powerful one ends in defeat only.

Sanj.—य इति। 'तस्मिन्' हिमाद्रौ 'संरम्भः' कोपः [ "संरम्भः सम्भ्रमे कोपे" इति शब्दार्णवः ] 'तेन उत्पतने उत्प्लवने 'रभसो' वेगः येषां ते तथोक्ताः [ "रभसो वेगहर्षयोः" इत्यमरः ] 'ये शरभाः' अष्टापदमृगविशेषाः [ "शरभः शलभे चाष्टापदे प्रोक्तो मृगान्तरे" इति विश्वः ] 'मुक्ताऽध्वा' शरभोत्प्लवनमार्गः येन तं 'भवन्तं सपदि स्वाङ्गभङ्गाय लङ्घयेयुः [ सम्भावनायां लिङ् ] भवतोऽतिदूरत्वात् स्वाङ्गभङ्गातिरिक्तं फलं नास्तिलङ्घनस्य इत्यर्थः। 'तान्' शरभान् 'तुमुलाः' सङ्कुलाः 'करकाः' वर्षोपलाः [ "वर्षोपलस्तु करका" इत्यमरः ] 'तासां वृष्टिः' तस्याः पातेन अवकीर्णान् विक्षिप्तान् 'कुर्वीथाः' कुरुष्व [ विध्यर्थे लिङ् ] क्षुद्रोऽपि अधिक्षिपन् प्रतिपक्षं सद्यः प्रतिक्षिप्तव्य इति भावः। तथा हि आरभ्यन्ते इति 'आरम्भाः' कर्माणि तेषु यत्नः उद्योगः स निष्फलो येषां ते तथोक्ताः, निष्फलकर्मोपक्रमा इत्यर्थः। अतः केवा 'परिभवपदं' तिरस्कारपदं 'न स्युः' न भवन्ति, सर्वं एव भवन्तीत्यर्थः। [ यदव "घनोपलस्तु करकः" इति यादववचनात् करकशब्दस्य नियतपुंलिङ्गताभिप्रायेण 'करकाणां वृष्टिः' इति केषाञ्चित् व्याख्यानं तदन्ये नानुमन्यन्ते; "वर्षोपलस्तु करका" इत्यमरवचनव्याख्याने क्षीरस्वामिना "कमण्डलौ च करकः सुगते च विनायके इति नानार्थे पुंस्यपि वक्ष्यति" इति वदता उभयलिङ्गताप्रकाशनात्। यादवस्य तु पुंलिङ्गताविधाने तात्पर्यं, न तु

स्त्रीलिङ्गतानिषेधे इति न तद्विरोधोऽपि। "करकस्तु करङ्के स्यात् दाडिमे च कमण्डलौ पक्षिभेदे करे चापि करका च घनोपलः" इति विश्वप्रकाशवचने तु उभयलिङ्गता व्यक्तैव इति न कुत्रापि विरोधवार्त्ता। अतएव रुद्रः "वर्षोपलस्तु करका करकोऽपि च दृश्यते" इति। ] ॥ ५६ ॥

## Notes on malli.

1. Some on the strength of Yadava's "घनोपलस्तु" &c. stated fixed maculinity of the word करक and explained as करकाणां वृष्टिः, but others do not approve it ; Kshiraswamin while explaining Amara's "वर्षोपलस्तु करका" says "कमण्डलौ &c" whereby उभयलिङ्गता ( masc. and fem ) of the word is shown. Yadava's motive is to establish its masculine gender and not to disapprove of its feminine use. Thus there is no contradiction. In the saying of विश्वप्रकाश ( e. g. "करकस्तु" &c ) he openly avows उभयलिङ्गता of the word करक। Thus Rudra has "वर्षोपलस्तु करका करकोऽपि"। Hence no contradiction anywhere.

## Charcha.

1. संरम्भ &c.—सम्+रभ+घञ् भावे=संरम्भ anger. उद्+पत+ल्युट् भावे=उत्पतन jumping. रभस force, संरम्भं च उत्पतनम्, द्वन्द्व—। संरम्भोत्पतने रभसः वेगः एषाम्, बहु—। Or—रभस is furious. संरम्भोत्पतने रभसाः, सुप्सुपा—। Thus expounding we avoid व्यधिकरण बहु—, as Malli has it.

2. स्वाङ्ग &c.—स्वाङ्गानां भङ्गः (breach)' ६तत्—। तस्मै। तादर्थ्ये ४र्थी। Their forceful rush will only lead to their own destruction.

3. मुक्त &c.—अध्वन् way. मुक्तः अध्वा यनेन, बहु—। तम्। The

cloud is afar on the sky, hence it was out of the range of शरभ deer.

4. लङ्घयेयुः—लङ्घ + णिच् + लिङ् (सम्भावनायाम्) + झस् । Nom. शरभाः । शरभs are a kind of eight-footed deer.

5. कुर्वीथाः—कृ + लिङ् (विधौ) + ईथाम् । Nom. त्वम् । कर्त्रभिप्राये क्रियाफले आत्मनेपदम् ।

6. तुमुल &c.—करका hail-stone. करकाणां वृष्टिः, ६तत्— । तुमुला करकावृष्टिः, कर्मधा— । तस्याः पातः, ६तत्— । तेन अवकीर्णाः (विक्षिप्ताः), ६तत्— । तान् । Qual. तान् । The hail-storm is sure to scatter away the *Saravas*. The poet aptly states this fact. For in the cold regions of Himalaya the cloud's water—particles will condense into hail-stones.

7. परिभव &c.—परि + भू + अप् भावे = परिभव defeat. पद is object. परिभवस्य पदम्, ६तत्— । विधेयविशेषण of के । विधेयप्राधान्यात् नपुंसकलिङ्गता । Also cp. "विधेयोद्देश्ययोः लिङ्गवचनेषु न तन्त्रता" ।

8. निष्फल &c.—आरभ्यन्ते इति आ + रभ + घञ् कर्मणि = आरम्भाः works. निर्गतं फलमेषाम् इति निष्फलाः । निष्फलाः आरम्भाः यस्य बहु— । तादृशः यत्नः एषाम्, बहु— । Qual. के । Fight on an unassailable one is unsuccessful.

9. स्युः—अस + लिङ् (विधौ) + युस् । Nom. के ।

10. Voice.—...रभसैः ये शरभैः मुक्ताध्वा भवान् लङ्घ्यत वै ...—अवकीर्णाः क्रियेरन् त्वया...—यत्नैः कैः...—पदेन...भूयेत... ।

### 57. *Cloud will then find* श्रीचरणन्यास *at Himalaya,*

तत्र व्यक्तं दृषदि चरणन्यासमर्धेन्दुमौलेः

शश्वत्सिद्धैरुपचितबलिं भक्तिनम्रः परीयाः ।

यस्मिन् दृष्टे करणविगमादूर्द्ध्वमुद्धूतपापाः
सङ्कल्पन्ते स्थिरगणपदप्राप्तये श्रद्दधानाः ॥ ५६ ॥

Prak.—Easy.

Prose.—तत्र ( हिमाद्रौ ) दृषदि व्यक्तं सिद्धैः शश्वत् उपचितबलिं अर्द्धेन्दुमौलेः ( शिवस्य ) चरणन्यासं भक्तिनम्रः ( सन् ) परीयाः ( प्रदक्षिणं कुरु ) ; यस्मिन् दृष्टे उद्धूतपापाः ( अतः ) श्रद्दधानाः करणविगमात् ( देहत्यागात् ) ऊर्द्ध्वं स्थिरगणपदप्राप्तये सङ्कल्पन्ते ।

Beng.—সেই হিমালয়ে কোন শিলায় শিবের পাদন্যাস স্পষ্ট দেখিতে পাইবে তাহা নিরন্তর সিদ্ধ ও যোগিগণকর্ত্তৃক পূজিত হয় ; এবং তাহার দর্শনে পাপমুক্ত অতএব শ্রদ্ধাবান্ লোক শরীরনাশের পর প্রমথগণের শাশ্বত পদ প্রাপ্ত হয় । সুতরাং তুমি ভক্তি-নম্র হইয়া সেই চরণাঙ্ক প্রদক্ষিণ করিও ।

Eng.—Bowing with devotion you circumambulate the foot-mark to be seen on a rock there, of Siva who has lunar digit on his forehead. This footprint is ever and anon worshipped by the *siddhas* and yogis and at its sight sinless and so devoted persons become fit for attainment of the permanant position of the Ganas.

Expl.—Easy.

Sanj.—तत्रेति । 'तत्र' हिमाद्रौ 'दृषदि' कस्याञ्चित् शिलायां 'व्यक्तं' प्रकटं 'शश्वत्' सदा 'सिद्धैः' योगिभिः [ "सिद्धिः निष्पत्तियोगयोः" इति विश्वः ] 'उपचितबलिं' रचितपूजाविधिम् [ "बलिः पूजोपहारयोः" इति यादवः ] अर्द्धं यासौ इन्दुश्च 'अर्द्धेन्दुः' [ "अर्द्धः खण्डे समेंऽशके" इति विश्वः ] स 'मौलौ' यस्य तस्य ईश्वरस्य 'चरणन्यासं' पाद-विन्यासं, 'भक्तिः' पूज्येष्वनुरागः तया 'नम्रः' सन् 'परीयाः' प्रदक्षिणं कुरु [ परिपूर्वात् इणो लिङ् ] 'यस्मिन्' पादन्यासे 'दृष्टे' सति 'उद्धूतपापाः' निरस्तकल्मषाः सन्तः 'श्रद्दधानाः' विश्वसन्तः पुरुषाः [श्रद्धा विश्वासः आस्तिक्यबुद्धिरिति यावत् । 'श्रदन्तरोरुपसर्गवत् वृत्तिर्वक्तव्या' इति धाञ्पूर्वात् दधातेः शानच् ] 'करणस्य' देहस्य विगमात् ऊर्द्ध्वं

देहत्यागानन्तरं [ "करणं साधकतमं क्षेत्रगात्रेन्द्रियेषु च" इत्यमरः ] 'स्थिरं' शाश्वतं 'गणानां' प्रमथानां 'पदं' स्थानं [ "गणाः प्रमथसंख्यौघाः" इति वैजयन्ती ] तस्य 'प्राप्तये कल्पन्ते' समर्था भवन्ति [ क्लृपेः पर्याप्तिवचनस्य अलमर्थत्वात् तद्योगे "नमः स्वस्ति—" इत्यादिना चतुर्थी । अलमिति पर्याप्त्यर्थग्रहणम्—इति भाष्यकारः 1 ] । "व्यक्तं व्यञ्जयामास शिवः श्रीचरणद्वयम् । हिमाद्रौ शाश्वतादीनां सिद्धये सर्वकर्मणाम् । दृष्ट्वा श्रीचरणन्यासं साधकः स्थिरयेत् तनुम् । इच्छाधीनशरीरो हि विचरेच्च जगत्त्रयम् ॥" —इति ग्रन्थरहस्ये (? रहस्यम् ) ॥2

## Notes on Malli.

1. As here in कल्पन्ते, the root क्लृप means समर्थ so in connection with it प्राप्तये takes 4र्थी by the rule "नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च"—समर्थ being अलमर्थ । And Bhashyakara says that अलं in the sutra stands for words having the sense of 'proficiency' ( पर्याप्तिवचन ) । 2. [ N. B.—As remarked before Malli always ends with प्रथमा whenever he quotes something. So we prefer ग्रन्थरहस्यम् here and not ग्रन्थरहस्ये ] ।

## Charcha.

1. तत्र—Refers to Himalaya.

2. व्यक्तम्—वि + अञ्ज् + क्त कर्त्तरि = व्यक्त manifest तम् । Qual. चरणन्यासम् । It is व्यक्त, hence you are sure to see it.

3. चरण &c.—नि + अस् ( क्षेपे-दिवादि ) + घञ् भावे = न्यास placing. चरणयोः न्यासः, तत्—। तम् । Obj. of परीयाः । The reference is to the spot श्रीचरणन्यास as said in ग्रन्थरहस्य । Wilson says that it has some connection with 'Haraka-pairi' a hill near Hardwar.

4. चर्द्धेन्दु &c—For चर्द्धेन्दु see Malli. अ मौली यस्य सः बहु—। जस्य। The word refers to Siva. "गड्वादिभ्यः सप्तमी परा वाच्या" इति सत्यादिः आकृतिगणत्वात् सप्तम्यन्तस्य मौलिशब्दस्य परनिपातः।

5. शश्वत्—An अव्यय meaning 'always', cp—"शश्वत् परिचित-विविक्तेन मनसा"—Sak V.

6. सिद्धैः—अनुक्ते कर्त्तरि तृया। By सिद्ध', we may refer to सिद्धs ( demi-gods ) or to yogis.

7. उपचित &c—बलि worship. उप + चि + क्त कर्मणि = उपचित gathered, perrformed. उपचिताः बलयः अस्य, बहु—। तम्। Qual. चरणन्यासम्।

8. परीयाः—परि + इ ( गतौ ) + लिङ् यास्। Should go round. Nom. त्वम्। एति, ऐत्, इयाय, अगात्।

9. यस्मिन्—भावे सप्तमी by the rule "यस्य च भावेन भावलक्षणम्"।

10. करण &c—क्रियते अनेन इति कृ + ल्युट् करणे = करण body वि + गम + अप् भावे = विगम destruction, cp "ईतिविगमप्रभृति प्रजानाम्" &c—*Malavikagnimitram*. करणस्य विगमः ६तत्—। तस्मात् ऊर्ध्वं इति दिक्शब्दयोगे ५मी। The rule is "अन्यारादितरर्त्ते दिक्शब्दाञ्चूत्तरपदा-जाहियुक्ते"। Here दिक्शब्द is explained as "दिशिदृष्टः शब्दो दिक्शब्दः" *Bhattoji.*

11. उद्धूत &c—उद् + धूञ् + क्त कर्मणि = उद्धूत forsook. उद्धूतानि पापानि एषाम्। बहु—। The root धूञ् is almost in all the गणs, cp—"धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनोति धवति स्फुटितातिमुक्तम्। वायुर्विधूनयति चम्पकपुष्परेणून् यत् कानने धवति चन्दनमञ्जरीश्च॥" Qual. जनाः understood.

12. सङ्कल्पन्ते—सम् + क्लृप + लट अन्ते। Nom. जनाः। Become able. "समर्थाः भवन्ति"—Malli. cp. "कल्पसे रक्षणाय"—Sak.

13. स्थिर &c—नखानां पदम्। ६तत्—। स्थिरं नखपदम् कर्मधा—। तस्य प्राप्तिः, ६तत्—। तस्यै। चलमर्थक (i. e., समर्थार्थक) 'सम+क्लृप' धातुयोगे ४र्थी—। See Malli and notes thereon. Here is no scope for the varttaka "क्लृपि सम्पद्यमाने च", for in the sentence—जनाः पदप्राप्तये सङ्कल्पन्ते, उत्पत्ति is not implied.

14 श्रद्दधानाः—श्रत्+धा+शानच् कर्त्तरि। Qual. जनाः। कर्त्तभिप्राये क्रियाफले आत्मनेपदम्। As they were उङ्कपापाः so they were श्रद्धावान्। Also see Malli.

15. Voice.—व्यक्तः...उपचितवलिः...श्वासः नसे च परीयेत (त्वया)... उद्धूतपापैः श्रद्दधानैः सङ्कल्प्यते।

*58. Nature supplies pipes &c. for* शिवपूजा।

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्य्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः।
निर्ह्रादस्ते मुरज इव चेत् कन्दरेषु ध्वनिः स्यात्
सङ्गीतार्थो ननु पशुपतेस्तत्र भावी समग्रः॥ ५८॥

Prak.—Very easy.

Prose. अनिलैः पूर्य्यमाणाः कीचकाः मधुरं शब्दायन्ते। संसक्ताभिः (वंशादिवादने अनुषक्ताभिः) किन्नरीभिः त्रिपुरविजयः गीयते। कन्दरेषु ते निर्ह्रादः मुरजे इव ध्वनिः चेत् (यदि) स्यात्, (तदा) तत्र पशुपतेः सङ्गीतार्थः समग्रः भावी (भविष्यति)।

Beng.—বায়ুতে পূর্ণ হইয়া সেখানে কীচকবংশসমূহ মধুর শব্দ করিতেছে। বংশাদিবাদনে অনুরক্ত কিন্নরীগণ সেখানে ত্রিপুর বিজয়ের গান করিতেছে। আর সেখানে যদি তোমার ধ্বনি গুহাতে প্রতিধ্বনিত হইয়া মুরজের শব্দ উৎপাদন করে, তবে শিবপূজার সঙ্গীত কাজ সম্পূর্ণ হইবে সন্দেহ নাই।

Eng.—The bamboos filled by wind sweetly sound there; the Kinnara women are singing of Siva's victory over *Tripura* in consonance with the instruments; and if thy rumbling resounding in the caves sounds like a drum, then indeed Siva's musical apparatus will be complete there.

Expl.—Easy.

Sanj.—शब्दायन्त इति। हे मेघ 'अनिलैः पूर्यमाणाः कीचकाः' वेणुविशेषाः [ "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः ] 'मधुरं' अतिमधुरं यथा तथा 'शब्दायन्ते' शब्दं कुर्वन्ति स्वनन्तीत्यर्थः [ "शब्दवैर—" इत्यादिना क्यङ् ] अनेन वंशवाद्यसम्पत्तिरुक्ता। 'संसक्ताभिः' सुयुक्ताभिः, वंशवाद्यानुषक्ताभिर्वा। [ 'संरक्ताभिः'—इति पाठे संरक्तकण्ठीभिः इत्यर्थः ]। 'किन्नरीभिः' किन्नरस्त्रीभिः। त्रयाणां पुराणां समाहारः 'त्रिपुरम्' ["तद्धितार्थोत्तरपद—" इति समासः। पात्रादित्वात् नपुंसकत्वम् ] तस्य 'विजयः गीयते'। 'कन्दरेषु' दरीषु [ "दरीस्तु कन्दरो वा स्त्री" इत्यमरः ] ते तव 'निर्ह्रादः' 'मुरजे' वाद्यभेदे 'ध्वनिरिव' मुरजध्वनिरिव इत्यर्थः। 'स्यात् चेत्' तर्हि 'तत्र' चरणसमीपे 'पशुपतेः' नित्यसन्निहितस्य शिवस्य 'सङ्गीतं' सम्यक् गीतं तदेवार्थः 'सङ्गीतार्थः' सङ्गीतवस्तु [ "अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु" इत्यमरः ] 'समग्रः' सम्पूर्णो 'भावी ननु' भविष्यति खलु [ "भविष्यति गम्यादयः" इति भविष्यदर्थे णिनिः ] ॥ ५८ ॥

## Charcha.

1. शब्दायन्ते—शब्द sound. शब्दं कुर्वन्ति इति शब्द + क्यङ् = शब्दाय ( नाम धातु ) + लट अन्त = शब्दायन्ते। Nom. कीचकाः। कीचक a kind of rattling bamboo sounding when its holes are filled by wind, cp. "स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम्"—*Raghu*, also—"यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन"—*Kum*. Nature supplied with pipes in Siva's worship. See also Malli.

2. पूर्यमाणा: – पूर + णिच् ( चुरादि ) + शानच् कर्मणि = पूर्यमाण being filled. ते । Qual. कीचका: ।

3. संसक्ताभि:—सम् + सञ्ज + क्त कर्त्तरि स्त्रियाम् = संसक्ता meaning "in consort to pipes" ताभि: । Qual. किन्नरीभि: । The reading संरक्ताभि: here seems better, for the word then indicates all the more devotion on the part of the किन्नरी । Then the गान is expected to be more natural as well.

4. त्रिपुर &c—त्रयाणां पुराणां समाहार: त्रिपुरम् a collection of three cities, समाहार द्विगु: । See Malli. पात्रादित्वात् नपुंसकम् as in त्रिभुवनम् ( ante ). तस्य विजय:, इतत् । Siva conquered this त्रिपुर by killing the powerful demon that resided there. उक्ते कर्मणि १मा ।

5. गीयते—गै धातु + लट् ते कर्मणि । Nom. किन्नरीभि: ।

5 A. निर्ह्राद: मुरजे—निर्ह्राद is sound Nom. to स्यात् । मुरजे—has चणि ७मी ।

6. सङ्गीतार्थ:—For समास see Malli. Nom. to भावी । The cloud's rumbling echoed in the caves will resemble the drum.

7. भावी—भविष्यतीति भू + णिनि भविष्यदर्थे = भावी shall be. See also Malli.

8. Voice.—पूर्यमाणै: कीचकै: शब्द्यायते...संसक्ता: किन्नर्य:...त्रिपुरविजयो गायन्ति...निर्ह्रादेन ध्वनिना...भूयेत...सङ्गीतार्थेन समग्रेण भाविना ( भूयेत ) ।

9. Remark—The Yaksha wants that the cloud should help nature in supplying with all the various instruments favourite to Siva.

*59. Clouds passage to Krauncha hill.*

प्रालेयाद्रेरुपतटमतिक्रम्य तांस्तान् विशेषान्
हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् ।
तेनोदीचीं दिशमनुसरेस्तिर्य्यगायामशोभी
श्यामः पादो बलिनियमनाभ्युद्यतस्येव विष्णोः ॥५९॥

Prak.—Easy.

Prose.—प्रालेयाद्रेः (हिमाचलस्य) उपतटं तान् तान् विशेषान् (द्रष्टव्य-वस्तूनि) अतिक्रम्य, हंसद्वारं भृगुपतियशोवर्त्म यत् क्रौञ्चरन्ध्रम् (क्रौञ्चाद्रेः बिलं अस्ति) तेन, बलिनियमनाभ्युद्यतस्य विष्णोः श्यामः पाद इव तिर्य्यगायामशोभी (सन्) त्वं उदीचीं दिशम् अनुसरेः ।

Beng.—হিমালয়ের তট-সমীপে সেই সমস্ত (কনখলের নিকট গঙ্গাদি) দ্রষ্টব্য বস্তু অতিক্রম করিয়া, মানস-সরোবরে যাইবার দ্বার স্বরূপ এবং পরশুরামের যশের হেতু ক্রৌঞ্চ পর্বতের যে সুরঙ্গ আছে, তাহা দ্বারা তুমি বক্রভাবে দীর্ঘ হইয়া বলিদমনে সমুদ্যত বিষ্ণুর শ্যামবর্ণ পাদের ন্যায় শোভিত হইয়া উত্তর দিকে যাইও ।

Eng.—Having crossed those worth-seeing objects (e. g. Ganges near Kanakhala &c ), you in an obliquely long posture and thus appearing like the blue feet of Vishnu about to control Vali, shall proceed northwards by the fissure of *Krauncha* hill, which caused Parasurama's fame to spread and which is used by swans as doors (for their way to and back from Manasa lake).

Expl.—Easy. Also see Allusion below.

Sanj.—प्रालेयेति । 'प्रालेयाद्रेः' हिमाद्रेः 'उपतटं' तटसमीपे ["अव्ययं विभक्ति—" इत्यादिना समीपार्थे अव्ययीभावः] तान् तान् [वीप्सार्थे द्विरुक्तिः] 'विशेषान्' द्रष्टव्यार्थान् ["विशेषोऽवयवे द्रव्ये द्रष्टव्योत्तमवस्तुनि" इति शब्दार्णवः ].

अतिक्रम्य अनुसरेः" इत्यनागतेन सम्बन्धः। 'हंसानां द्वारं'; मानसप्रस्थायिनो हंसाः क्रौञ्चरन्ध्रेण सञ्चरन्ते इत्यागमः। 'भृगुपतेः' जामदग्न्यस्य 'यशोवर्त्म' यशः प्रवृत्तिकारणमित्यर्थः। यत् क्रौञ्चाद्रेः रन्ध्रम् अस्ति 'तेन' क्रौञ्चबिलेन 'बलेः' दैत्यस्य 'नियमने' बन्धने 'अभ्युद्यतस्य' प्रवृत्तस्य 'विष्णोः' व्यापकस्य त्रिविक्रमस्य 'श्यामः' कृष्णवर्णः 'पाद इव', तिर्यगायामेन' छिद्रप्रवेशनार्थं तिरश्चीनदैर्घ्येण शोभते इति तथाविधः सन् 'उदीचीमुत्तरां 'दिशम्' अनुसरेरनुगच्छ। [ पुरा किल भगवतो देवात् धूर्जटेः धनुरुपनिषदमधीयानेन भृगुनन्दनेन स्कन्दस्य स्पर्द्धया क्रौञ्चशिखरिणम् अभिनिशितविशिखमुखेन हेलया मृत्पिण्डभेदं भित्वा तत एव क्रौञ्चक्रोडादिव सद्यः समुज्जृम्भिते कस्मिन्नपि यशः क्षीरनिधौ जगज्जालमाप्लावितम् इति कथा श्रूयते। ] ॥ ५९ ॥

## Notes on malli.

1. The tradition is—that in ancient times son of Vrigu who received instructions on धनुर्वेद from the Almighty Siva easily pricked the mountain Krauncha being challenged by Skanda, like a clump of clay by a very sharp arrow ; and the whole world was washed by the sea of fame issued as if from the very lap of that hill.

## Charcha.

1. प्रालेयाद्रेः—प्रालेयस्य ( हिमस्य ) अद्रिः, ६तत्— । तस्य । शेषे, षष्ठी related to विशेषान् । For deriv. of प्रालेय see *ante*. ( प्रलयशब्दात् अण् ; आदेः तस्य इयादेशश्च ) ।

2 उपतटम्—तटस्य समीपे उपतटम्, अव्ययी । See Malli. अधि-७मी । उपतटे is also correct here by the rule "तृतीया सप्तम्योर्बहुलम्" ।

3. तान् तान् विशेषान्—वीप्सायां द्विर्वचनम् । By विशेष are meant the Ganges near Kankhala, शरभवधाद etc. as seen in the foregoing verses. Obj. of अतिक्रम्य ।

4. हंस &c.—हंसानां द्वारम्, ६तत्— । Qual. क्रौञ्चरन्ध्रम् । see next.

5. भृगु &c.—भृगुपति ( the lord of the भृगुवंश ) is परशुराम । तस्य यशः, ६तत्— । तस्य वर्त्म (पन्थाः) ६तत्— । Qual. क्रौञ्चरन्ध्रम् । अश्नोति व्याप्नोति इति अश + सुन् = यशस् fame. The Allusion is to the fact that once Parasurama, a favourite disciple of Siva was envied by Kartikeya. Now to settle the precedence among them a stake was laid before the Krauncha Hill. Parasurama however outran Karttikeya in the dual and blew off the stake by even splitting the mount *Krauncha.* Hence this क्रौञ्चबिल was the cause ( वर्त्म ) of his fame. And this fissure in the said Hill is used by their way to मानस lake and back from it, so it was हंसद्वार । Bhavabhuti also alludes to this fact in his Viracharita ( e. g. "वीरः क्रौञ्चस्य भेदात्कृतधरणितलापूर्वहंसावतारः ) where वीरराघव remarks "पूर्वं हि हंसा मानससरस्येव स्थिता भूमौ नावरोहन्ति स्म । तदनन्तरं भगवता परशुरामेण क्रौञ्चपर्वते सरन्ध्रीकृते सति तेभ्यो रन्ध्रेभ्यो हंसा मानससरसो भूतलमवतरन्तीति पौराणिकी प्रसिद्धिः" ।

6. तेन—Refers to क्रौञ्चरन्ध्र । करणे ३या ।

7. उदीचीम्—उद् + अञ्च + क्विन् = उदक् north. ततः स्त्रियाम् ङीप् इति उदीची । "उदईत्" इति ईत्वम् । ताम् । Qual. दिशम् ।

8. अनुसरेः—अनु + सृ + विधि विधौ + यासु । Nom. त्वम् । Here the reading अनुपतेः is also seen. But अनुसरेः is better, for the cloud was proceeding uphills ; whereas अनुपतन suggests descent.

9. तिर्यग् &c—आ + यम + घञ् भावे = आयाम length. For तिर्यक् See *ante.* तिर्यक् आयामः कर्मधा— । तेन शोभते यः सः इति तिर्यगायाम + शुभ + णिनि कर्तरि ताच्छील्ये = तिर्यगायामशोभी । Qual. त्वम् ।

10. बलि &c—नि + यम + अप् भावे = नियम subduing. नियाम is also correct by the rule "यमः समुपनिविषु"। अभि + उद् + यम + क्त कर्त्तरि = अभ्युद्यत। बलेः नियमनम्, कर्मषष्ठ्या समासः। तत्र अभ्युद्यतः, सुप्सुपा—। तस्य। Qual. विष्णोः (वेवेष्टि इति विष + नु). Here dark feet of Vishnu is compared to the dark cloud. The allusion is to the fact that विष्णु as वामनावतार deprived Bali of his heavenly kingdom by placing a footstep on his head. Bali was thus again thrust back to his Patala kingdom.

11. Voice.—...हंसद्वारेण...वर्त्मना...क्रौञ्चरन्ध्रेण (भूयते)...श्यामेन पादेन...—शोभिना त्वया उदीची दिक् अनुसियेत—...।

## 60. *Cloud, the guest of Kailasa Mount.*

गत्वा चोर्द्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः।
शृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः॥ ६०॥

Prak.—Easy.

Prose—ऊर्ध्वं गत्वा च (त्वं) दशमुखभुजोच्छ्वासितप्रस्थसन्धेः त्रिदशवनितादर्पणस्य कैलासस्य अतिथिः स्याः। कुमुदविशदैः शृङ्गोच्छ्रायैः खं वितत्य यः कैलासः प्रतिदिनं राशीभूतः त्र्यम्बकस्य (शिवस्य) अट्टहास इव स्थितः।

Beng.—ঊর্দ্ধদিকে গমন করিয়া, রাবণহস্তোত্তলিত হওয়ায় বিশ্লেষিত প্রস্থ এবং সুরনিতাগণের আদর্শস্বরূপ কৈলাস পর্ব্বতের অতিথি হইও। সেই কৈলাস কুমুদশুভ্র উন্নতশৃঙ্গ দ্বারা আকাশ ব্যাপিয়া যেন রাশীভূত শিবের অট্টহাসের ন্যায় দণ্ডায়মান আছে।

Eng.—Going upwards, you become a guest unto mount Kailasa, the very mirror of divine damsels and whose slopes

were slackened by the arms of Ravana, the ten-necked. The mount with its high lily-white peaks pervades the sky and stands as if like the condensed loud laugh of three-eyed Siva.

Expl.—The snow-white mount Kailasa is so very white that it is compared to a miror for the divine damsels, and also to the collected and embodied laughter of Siva.

Sanj.—गत्वेति। क्रौञ्चबिलनिर्गमनानन्तरं 'ऊर्ध्वं च गत्वा, दशमुखस्य' रावणस्य 'भुजैः' बाहुभिः 'उच्छ्वासिताः' विश्लेषिताः 'प्रस्थानां' सानूनां 'सन्धयः' यस्य स तस्य। त्रिदश परिमाणमेषामस्तीति [ "संख्ययाव्यय—" इत्यादिना बहुव्रीहिः। "बहुव्रीहौ संख्येये—" इत्यादिना समासान्तो डजिति क्षीरस्वामी ] 'त्रिदशानां' देवानां वनिताः तासां दर्पणस्य'। कैलासस्य स्फटिकत्वात् रजतत्वात् वा बिम्बग्राहित्वेन इदमुक्तम्। 'कैलसस्यातिथिः स्याः'। 'यः' कैलासः 'कुमुदविशदैः' निर्मलैः 'शृङ्गाणामुच्छ्रायैः' औन्नत्यैः 'खम्' आकाशं 'वितत्य' व्याप्य 'प्रतिदिनं' दिने दिने 'राशीभूतः त्र्यम्बकस्य' त्रिलोचनस्य 'अट्टहासः' अतिहास 'इव स्थितः' [ "अट्टावतिशयितचौमौ" इति यादवः ] धावल्यात् हासत्वेनोत्प्रेक्षा। हासादीनां धावल्यं कविसमयसिद्धम् ॥ ६० ॥

## Charcha.

१. दशमुख etc.—दश मुखानि यस्य सः दशमुखः name of Ravana, बहु—। तस्य भुजाः, ६तत्—। उद्+श्वस+णिच्+क्त कर्मणि=उच्छ्वासित slackened. दशमुखभुजैः उच्छ्वासिताः, ३तत्—। तादृशाः प्रस्थसन्धिः यस्य, बहु—। तस्य। Qual. कैलासस्य। Ravana once tried to uproot Kailasa, cp, "पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम्"—Raghu. The Allusion is to the fact that while warring on Kuvera Ravana had occasion to pass by the mount Kaïlasa where Lord Siva resided at the time with his spouse parvati. He picked up a quarrel with Siva's followers and in a pique tugged at the mount to uproot

it. The hill shook to its foundation but the Lord steadied it with the pressure of his toe which pressed Rakshasa's arms so hard that he shrieked with pain and thenceforth received the name Ravana. Magha alludes to this in Sisupalavadham—cp "समुत्क्षिपन् यः पृथिवीभृतां वरं वरप्रदानस्य चकार शूलिनः"—&c.

2. त्रिदश &c.—तिस्रः दशा बालकौमारयौवनानि एषाम् इति त्रिदशाः gods, बहु—। Or—त्रिः (त्रिरावृत्तं) दश परिमाणमेषाम्, इति बहु—See Malli. Malli's त्रिदश &c. makes them 30 years of age. The rule for this is "संख्यया अव्ययासन्नदूराधिकसंख्याः संख्येये"—अव्यय &c. are compounded in a बहुव्रीहि with a संख्या when the compound refers to what is counted, Next we have डच् added by "बहुव्रीहौ संख्येये डजबहुगणात्"। Thus त्रिदशन्+डच्=त्रिदश। Bhanuji however thinks that gods do not go through बाल्य and कौमार, but are always in the enjoyment of यौवन and appear like one on his 25th year. 'स्थिरं विन्दति सौमित्रे पञ्चविंशतिवर्षवत्"—*Ramayana.* Hence he expounds—तृतीया दशा एषाम् त्रिदशाः, बहु—। Here and in like cases (e. g. त्रिदिव, त्रिभाग &c) त्रि means तृतीय, cp—"वृत्ति-विषये संख्याशब्दस्य पूरणार्थत्वम्"। त्रिदशानां वनिताः ६तत्—। तासां दर्पणः—तस्य। Qual कैलासस्य। Kailasa is so called owing to its whiteness and abundance of crystals &c.

3. स्थाः—अस्+लिङ्+यासु। Nom. त्वम्। विध्यर्थे लिङ्।

4. शृङ्गो &c—श्रि+घञ्=श्रायः loftiness उत्कृष्टः श्रायः इति उच्छ्रयः प्रादितत्—। शृङ्गाणाम् उच्छ्रयः, ६तत्—। तैः। करणे ३या। Here avoid उच्छ्राय as उद्+श्रि+घञ्, for then श्रि will not take घञ् the rule being "श्रिणीभुवोऽनुपसर्गे"। Here the abstract शृङ्गोच्छ्राय stands as

a concrete object उच्छ्रितशृङ्ग, by the maxim "कृदभिहितो भावो द्रव्यवत् प्रकाशते"।

5. वितत्य—वि + तन + ल्यप्। Having pervaded.

6. राशीभूतः—राशि heap. अराशिः राशिः सम्पद्यमानः भूतः इति राशि + च्वि + भू + क्त = राशीभूत heaped. Qual. अट्टहासः।

7. इव—An अव्यय implying उत्प्रेक्षा here. The mount was as if the embodied laugh heaped together by and by.

8. त्र्यम्बकस्य—त्रीणि अम्बकानि ( नयनानि ) यस्य, इति त्र्यम्बकः ( शिवः ), बहु। तस्य। शेषे षष्ठी।

9. Remark—Poets often compare laugh, fame etc, with something white cp. "या विहस्येव फेनैः"—*ante*. "सिता सकलाः खलु कीर्त्तिमौक्तिकाः"—*Naishadha*. See also Malli "हासादीनां धावल्यं कविसमयसिद्धम्"।

10. Voice—अतिथिना भूयेत त्वया...येन राशीभूतेन अट्टहासेन...स्थितम्।

## *61. Black cloud on white mount resemble dark cloth on Balarama.*

**उत्पश्यामि त्वयि तटगते स्निग्धभिन्नाञ्जनाभे**
**सद्यः कृत्तद्विरददशनच्छेदगौरस्य तस्य ।**
**शोभामद्रेः स्तिमितनयनप्रेक्षणीयां भवित्री—**
**मंसन्यस्ते सति हलभृतो मेचके वाससीव ॥ ६१ ॥**

Prak—Easy,

Prose—स्निग्धभिन्नाञ्जनाभे त्वयि तटगते ( सति ) सद्यःकृत्तद्विरददशनच्छेदगौरस्य तस्य अद्रेः, मेचके वाससि अंसन्यस्ते सति हलभृतः इव स्तिमित-[नयनप्रेक्षणीयां] शोभां भवित्रीं उत्पश्यामि।

Beng.—মসৃণ ও মর্দিত অঞ্জনের আভাযুক্ত তুমি কৈলাস-পর্বতের তটদেশে উপস্থিত হইলে সদ্যঃকর্তিত হস্তিদন্তের ন্যায় শুভ্র সেই অদ্রির শোভা, স্কন্ধগত শ্যামবস্ত্র-ধারী হলভৃৎ বলরামের শোভার ন্যায় স্থিরনয়নদ্বারা দর্শনযোগ্য হইবে মনে হয়।

Eng.—You of a colour like the glossy and powdered collyrium having reached the slope of that mount (Kailasa) which is white like a piece of ivory just cut, it will, I think, imitate the beauty, to be seen with motionless eyes, of Balarama, the plough-bearer with a blue cloth thrown over his shoulder.

Expl.—Easy.

Sanj.—उत्पश्यामीति। 'स्निग्ध'' मसृणं "भिन्न" मर्दितञ्च 'अञ्जनं' कज्जलं तस्य 'आभा इव आभा' यस्य तस्मिन् "त्वयि तटगते' सानुं गते सति, 'सद्यः कृत्तस्य' छिन्नस्य 'द्विरददशनस्य' गजदन्तस्य तद्वत् 'गौरस्य' धवलस्य तस्य 'अद्रेः' कैलासस्य, 'मेचके' श्यामले [ "कालश्यामलमेचकाः" इत्यमरः ] 'वाससि' वस्त्रे 'अंसन्यस्ते सति हलभृतो' बलभद्रस्य 'इव', स्तिमिताभ्यां नयनाभ्यां 'प्रेक्षणीयां शोभां भविर्त्री' भाविनी'मुत्पश्यामि' शोभामविष्यति इति तर्कयामि इत्यर्थः। श्रौती पूर्णोपमालङ्कारः॥ ६१॥

## Charcha.

1. उत्पश्यामि—उद्+दृश+लट मिप्। Nom. अहम्। Here दृश is ज्ञानार्थक (अनुमानार्थक)। ददर्श, द्रक्ष्यति, अपश्यत्, अद्राक्षीत्।

2. तटगते—तट is प्रस्थ। तं गतः, २तत्। तस्मिन्। Pred to त्वयि ( which has भावे ७मी )।

3 स्निग्ध etc.—स्निह+क्त कर्तरि=स्निग्ध glossy. भिद+क्त कर्मणि=भिन्न powdered. स्निग्धञ्च तत् भिन्नञ्च, स्निग्धभिन्नम्, कर्मधा। तादृशम् अञ्जनम्, कर्मधा। तस्य आभा, ६तत्। स्निग्धभिन्नाञ्जनाभा इव आभा यस्य,

बहु—by the Varttika "सप्तम्युपमानपूर्वस्य बहुव्रीहिरुत्तरपदलोपश्च वक्तव्यः" (*ante*). तस्मिन्। Qual, त्वयि। Such dark cloud will well compare with the मेचकवस्त्र of बलराम।

4. सद्यः &c—कृत्+क्त कर्मणि=कृत्त cut. छिद्+घञ् कर्मणि=छेद piece. रदन teeth. द्वौ रदौ यस्य इति द्विरदः elephant, बहु—। द्विरदस्य दशनम्, ६तत्। सद्यःकृत्तं द्विरददशनम्, कर्मधा। तस्य छेदः, ६तत्। स इव गौरः इति उपमानकर्मधा—by the rule "उपमानानि सामान्यवचनैः"। तस्य। Qual. अद्रेः। The ivory-white mount will resemble the proverbially white body of Balarama. The reading द्विरद—रदन is preferable, for it keeps up the alliteration.

5. स्तिमित &c—स्तिमित motionless. स्तिमिते नयने, कर्मधा। ताभ्याम् प्रेक्षणीया, ३तत्। ताम्। Qual. शोभाम्। The sight will be attractive indeed.

6. भवित्रीम्—भविष्यति इति भू+तृच् (भविष्यदर्थे)+ङीप् स्त्रियाम्= भवित्री। ताम्। Pred to शोभाम्। Also compare—भविता—*Ante*.

7. अंसन्यस्ते—नि+अस (क्षेपे दिवादि)+क्त कर्मणि न्यस्त placed. अंस shoulder. अंसे न्यस्तम् सुप्सुपा—। तस्मिन्। Pred to वाससि (which has भावे ७मी)।

8. Voice—...प्रेक्षणीया शोभा भवित्री उद्दृश्यते मया......।

## 62. *Cloud's probable service to Gauri there.*

हित्वा तस्मिन् भुजगवलयं शम्भुना दत्तहस्ता
क्रीडाशैले यदि च विचरेत् पादचारेण गौरी।
भङ्गीभक्त्या विरचितवपुः स्तम्भितान्तर्जलौघः
सोपानत्वं कुरु मणितटारोहणायाग्रयायी॥ ६२॥

Prak.—Easy.

Prose.—शम्भुना दत्तहस्ता सती गौरी भुजगवलयं ( हस्तं ) हित्वा यदि तस्मिन् क्रीड़ाशैले पादचारेण विचरेत्, ( तदा ) अग्रयायी स्तम्भितान्तर्जलौघः त्वं भङ्गीभक्त्या ( पर्वरचनया ) विरचितवपुः ( सन् ) मणितटारोहणाय सोपानत्वं कुरु।

Beng.—শিব হাত বাড়াইয়া দিলেও গৌরী (সর্পভয়ে) সর্পবলয়যুক্ত শিবের হস্ত ত্যাগ করিয়া যদি ঐ ক্রীড়াশৈলে পাদচারে বিচরণ করিতে থাকেন, তব অগ্রযায়ী তুমি তোমার জলরাশি স্তম্ভিত করিয়া নিজদেহ পর্বক্রমে বিরচিত করিয়া কৈলাসের মণিতটে আরোহণের জন্য গৌরীর সোপানের কাজ করিবে।

Eng.—If on that pleasure-hill (Kailasa) Parvati setting aside the hand of Siva, having serpent-bracelets on—though Siva may stretch his helping hand—walks on foot, then going in front of her and having condensed the internal water, you arrange yourself in the form of steps for Gauri's ascent to the jewelled slopes of that mount.

Expl.—Gauri is ever eager to get on the jewelled slopes of Kailasa. But when Siva will go forward to help her in this, then surely through fear of serpents she will not hold his arms. Then you form yourself into a line of steps and thus help and serve the goddess.

Sanj.—हित्वेति। 'तस्मिन् क्रीड़ाशैले' कैलासे [ "कैलासः कनकाद्रिश्च मन्दरो गन्धमादनः। क्रीड़ार्थं निर्मिता शम्भोर्देवैः क्रीड़ाद्रयोऽभवन्" इति शम्भुरहस्यम् ] 'शम्भुना' शिवेन भुजगमेव वलयं' कङ्कनं 'हित्वा' गौर्य्या भीरुत्वात् त्यक्त्वा 'दत्तहस्ता' सती गौरी पादचारेण विचरेत् यदि' तर्हि 'अग्रयायी' पुरोगतः तथा 'स्तम्भितः' घनीभावं प्रापितः 'अन्तर्जलौघः' प्रवाहौघेन स तथाभूतः 'भङ्गीनां' पर्वणां 'भक्त्या' रचनया 'विरचितवपुः' कल्पितशरीरः सन् मणीनां तटं 'मणितटं' तस्य 'आरोहणाय' सोपानत्वं कुरु'।

## Charcha.

1. भुजगवलयं हित्वा दत्तहस्ता &c.—Malli. construes here as शम्भुना

भुजगवलयं हित्वा दत्तहस्ता सती गौरी &c. (see sanj) ; but this is faulty—(i) no wife can set aside her lover's hand if there be no fearful cause ; here Siva forsook his भुजगवलय ; why then गौरी should not hold it ? (ii) secondly in the construction शम्भुना हित्वा गौरी विचरेत् the rule "समानकर्तृकयोः पूर्वकाले"—which requires that the same nominative should govern both the finite and the infinite verb—stands in the way. शम्भुना is the nom, of हित्वा, but of विचरेत्, गौरी is the nom.—thus there is no समानकर्तृकता here. We thus reject Malli's contruction and render as—शम्भुना दत्तहस्ता गौरी भुजगवलयं हस्तं हित्वा विचरेत् (See prose above). In this समानकर्तृकता of हित्वा and विचरेत् is well kept up. Again when Siva will stretch his helping hand Gauri will forsake it only through fear of serpent bracelet there. Thus she will be compelled to walk on foot. In our rendering भुजगवलयम् should be expounded as—भुजगः वलयः यस्य, बहु— । Qual. हस्तम् understood. It is curious enough that all the editions follow Malli's rendering though faulty.

2. क्रीडाशैले—अधि ७मी । The क्रीडाशैल is कैलास here. See Malli.

3. विचरेत्—वि + चर + लिङ् ( सम्भावनायाम् ) + यात् । Nom. गौरी ।

4. पाद &c.—पादाभ्यां चारः ( विचरणं ) इति पादचारः, इतत्— । तेन । कारणे ३या । Or—प्रकृत्यादित्वात् ३या ।

5. भङ्गीभक्त्या—भङ्गि is step. भङ्गी is also correct. भक्ति is रचना, cp "भक्तिच्छेदैरिव विरचितां भूतिमङ्गे गजस्य—" sl, 19 *ante*. भङ्गीनां भक्तिः, ६तत्— । तया । कारणे ३या

6. विरचित &c—वि + रच + क्त कर्मणि = विरचित made. तादृशं वपुः यस्य बहु—। Qual. त्वम्। The cloud is to form into steps and help Gauri thereby in her walks to the slopes of कैलास।

7. स्तम्भित &c—जलानाम् ओघ: (समूह:), ६तत्—। अन्त:स्थित: जलौघ: शाकपार्थिवादिवत् कर्मधा—। स्तम्भित: अन्तर्जलौघ: येन, बहु—। Qual. त्वम्। The cloud must not shower on Gauri.

8. कुरु—कृ + लोट हि। Nom त्वम्।

9. मणि &c—मणीनां तट: (प्रस्थ:), ६तत्—। तस्य आरोहणम्, कर्मषष्ठ्या समास:। तस्मै। तादर्थ्ये ४र्थी।

10. अग्रयायी—अग्रे यातुं शीलमस्य इति अग्र + या + णिनि कर्तरि ताच्छील्ये = अग्रयायी going in front. Qual. त्वम्। The cloud is to form into steps beforehand.

11. Voice.—...दत्तहस्तया...गौर्या...विचर्यते...अग्रयायिना...स्तम्भितजलौघेन...विरचितवपुषा त्वया क्रियताम्...।

## 63. *Still more services by the cloud.*

तत्रावश्यं वलयकुलिशोद्घट्टनोद्गीर्णतोयं
नेष्यन्ति त्वां सुरयुवतयो यन्त्रधारागृहत्वम्।
ताभ्यो मोक्षस्तव यदि सखे घर्मलब्धस्य न स्यात्
क्रीडालोला: श्रवणपरुषैर्गर्जितैर्भाययेस्ता: ॥ ६३ ॥

Prak.—Easy.

Prose.—तत्र (कैलासे) सुरयुवतय: वलयकुलिशोद्घट्टनोद्गीर्णतोयं त्वाम् अवश्यं यन्त्रधारागृहत्वं नेष्यन्ति (प्रापयिष्यन्ति)। हे सखे, यदि घर्मलब्धस्य (निदाघे प्राप्तस्य अत: सुखाकरस्य) तव ताभ्यो (सुरस्त्रीभ्यो) मोक्ष: न स्यात्, तदा क्रीडालोला ता: श्रवणपरुषै: गर्जितै: भाययेः (विभापयेः)।

Beng.—সেই কৈলাসপর্বতে সুরাঙ্গনাগণ বলয়াগ্রভাগের আঘাতে তোমার বারিধারা উদ্গীর্ণ করাইয়া তোমাকে দিয়া যন্ত্রধারাগৃহের কাজ করাইয়া লইবে। হে সখে, তোমাকে গ্রীষ্মকালে পাইয়া তাহারা যদি তোমাকে ছাড়িতে না চায় তবে তুমি ভীষণ গর্জনে ক্রীড়ালোল সেই যুবতিদিগকে ভয় দেখাইও।

Eng.—In that mount surely the divine damsels will make you attain the state of a shower bath by having brought out rain from you by the strike of their points of bracelets. If, O friend your release from them be not possible—you being got at summer, then you must frighten those sportive girls by your rumblings jarring to ear.

Expl.—The cloud being got by divine damsels at summer, they will not easily allow it to go. Then its work will be delayed, So to get red of those girls the cloud must scare them away by terrifying roars.

Sanj.—तत्रेति। 'तत्र' कैलासे 'अवश्यं' सर्वथा 'सुरयुवतयः', वलयकुलिशानि' कङ्कणकोटयः [ शतकोटिवाचिना कुलिशशब्देन कोटिमात्रं लक्ष्यते[1] ] तैः 'उद्घट्टनानि' प्रहाराः तैः 'उद्गीर्णम्' उत्सृष्टं तोयं येन तं 'त्वां' यन्त्रेषु धाराः 'यन्त्रधाराः' तासां 'गृहत्वं' कृत्रिमधारागृहत्वं 'नेष्यन्ति' प्रापयिष्यन्ति। 'हे सखे' मित्र 'घर्मे' निदाघे 'लब्धस्य' [ घर्मलब्धत्वञ्च अस्य देवभूमिषु सर्वदा सर्वर्तुसमाहारात्, प्राथमिकमेघत्वात् वा,—यथोक्तमाषाढस्य प्रथमेति[2] ] तव 'ताभ्यः' युवतिभ्यः 'मोक्षो न स्यात् यदि' तदा 'क्रीडालोलाः' क्रीडासक्ताः ताः प्रमत्ता इत्यर्थः 'ताः' सुरयुवतीः 'श्रवणपरुषैः' कर्णकटुभिः 'गर्जितैः' करणैः 'भाययेः' त्रासयेः [ अत्र हेतुभयाभावात् आत्मनेपदं षुगागमश्च न ] ॥ ६३ ॥

## Notes on Malli.

1. The word कुलिश which means the thunder having hundred points here points to 'कोटि' only. 2. The fact that the cloud is got in summer is from the presence of all the

seasons in divine lands ; or it being the first shower of rainy season ; thus it is said before "आषाढस्य प्रथमदिवसे &c.

## Charcha.

1. वलय &c.—कुलिश in कोटि ( point ). See Malli. उद्+घट्ट+ल्युट्भावे=उद्घट्टन striking. उद्+गॄ+क्त कर्मणि=उद्गीर्ण let out. वलयानां कुलिशानि, ६तत् । तैः उद्घट्टनम्, ३तत् । तेन उद्गीर्णं तोयमस्य बहु । तम् । Qual त्वाम् ।

2. नेष्यन्ति—नी+लट् स्यन्ति । Nom. युवयुवतयः । नयति—नै, निनाय—निन्ये, अन्वैषीत्—अनेष्ट ।

3. यन्त्र &c—यन्त्रे धाराः, सुप्सुपा । तासां गृहः । तस्य भावः इति त्वप्रत्ययः । Obj. of नेष्यन्ति । नी is द्विकर्मक—(i) त्वाम् ( प्रधान ) (ii) यन्त्रधारागृहत्वम् ( अप्रधान ) । यन्त्रधारागृह is an official room where arrangements are made for constant showers. cp "एकान्तस्थाने ग्रीष्मातपनिवारणाय......जलनिर्झरणं...स्थानं सुखिनां गृहे यन्त्रधारागृहं कथ्यते" ।

4. ताभ्यः—Refers to युवतयः । अपादाने ५मी by the rule "ध्रुवमपायेऽपादानम्" ।

5. घर्म &c—घर्मे ( ग्रीष्मे ) लब्धः, सुप्सुपा । तस्य । The cloud arriving there just at the end of summer and the beinning of rain is well said as ग्रीष्मलब्ध । Thus it will be hailed by the damsels, and they will not easily part with it. See also Malli. Qual तव ।

6. भायये:—भी+णिच्+लिङ् ( विधौ )+यास् । Nom. त्वम् । Here the cloud frightens by an instrument ( गर्जित ) and *not* directly. so the rule, "भीस्म्योर्हेतुभये "—भी & स्मि take आत्मनेपद when the emotion is caused by an agent—does not apply here.

And thus बुक् which is usual with भी in आत्मनेपद cannot come here. Thus we get the usual form भाययेः here. भीषयेः here is thus faulty.

7. Voice—...युवतिभिः···उद्गीर्णतोयः त्वं नेष्यसि [ Here त्वं the प्रधान कर्म becomes उक्त by "ण्यादेः प्रधाने" ]। मोचेष न भूयेत...त्वया माप्स्यते...... ।

## 64. *Cloud's Various sports in Kailasa.*

हेमाम्भोजप्रसवि सलिलं मानसस्याददानः
कुर्वन् कामं क्षणमुखपटप्रीतिमैरावतस्य ।
धुन्वन् कल्पद्रुमकिसलयान्यंशुकानीव वातै—
र्नानाचेष्टैर्जलदललितैर्निर्विशेस्तं नगेन्द्रम् ॥६४॥

Prak.—Easy.

Prose.—मानसस्य हेमाम्भोजप्रसवि सलिलम् आददानः, ऐरावतस्य क्षणमुखपटप्रीतिं कामं ( नूनं ) कुर्वन्, अंशुकानीव कल्पद्रुमकिसलयानि वातैः धुन्वन्, हे जलद, ( त्वं ) नानाचेष्टैः ललितैः ( क्रीड़ितैः ) तं नगेन्द्रं ( कैलासं ) निर्विशेः ( उपभुङ्क्ष्व )।

Beng,—মানস-সরোবরের স্বর্ণঘটিত পদ্মফুলযুক্ত জল গ্রহণ করিয়া ঐরাবতের মুখে ক্ষণকালের জন্য বস্ত্রপ্রীতি নিশ্চয়ই সমুৎপন্ন করিয়া, আর বস্ত্রের ন্যায় কল্পদ্রুমের নব পল্লবগুলি কম্পিত করিয়া, হে মেঘ, তুমি নানাবিধ ক্রীড়াদ্বারা সেই কৈলাস-পর্বত উপভোগ কর ( অর্থাৎ সেখানে বিহার কর )।

Eng.—Taking up waters of Manasa lake, having golden lotuses, surely doing the satisfaction of a moment's veil to Airavata and agitating by breezes the fine cloth-like twigs of Kalpa tree, O cloud, yon enjoy that mount Kailasa by sports of various kinds.

Expl.—Easy.

Sanj.—हेमेति। हे 'जलद', 'हेमाम्भोजानां प्रसवि' जनकं 'मानसस्य' सरसः 'सलिलमाददानः' पिबन् इत्यर्थः। तथा 'ऐरावतस्य, इन्द्रगजस्य, कामचारित्वात् त्रिदशसेवार्थं इन्द्रागमनाद्वा समागतस्य इति भावः। 'क्षणं' जलदानकाले 'मुखपटेन' या 'प्रीतिः' तां 'कुर्वन्'। तथा 'कल्पद्रुमाणां किसलयानि' पल्लवभूतानि 'अंशुकानि' सूक्ष्मवस्त्राणि 'इव' [ "अंशुकं वस्त्रमात्रे स्यात् परिधानोत्तरीययोः। सूक्ष्मवस्त्रे नातिदीर्घे" इति शब्दार्णवः ] 'वातैः' मेघवातैः धुन्वन्। 'नाना' बहुविधाः 'चेष्टाः' तोयपानादयः येषु तैः 'ललितैः' क्रीड़ितैः [ "ना भावमेटे स्त्रीनृत्ये ललितं विषु सुन्दरे। अस्त्रियां प्रमदागारे क्रीड़िते जातपल्लवे" इति शब्दार्णवः ] 'तं नगेन्द्रं' कैलासं 'कामं' यथेष्टं 'निर्विशेः' समुपभुङ्क्ष्व ["निर्वेशो भृतिभोगयोः" इत्यमरः] यथेच्छविहारो मित्रगृहेषु मैत्र्याः फलम्। सहजमित्रञ्च ते कैलासः। मेघपर्वतयोः अब्जसूर्ययोः अब्धिचन्द्रयोः शिखिजीमूतयोः समीराग्न्योः मित्रता स्वयम् इति भावः। ॥६४॥

## Notes on Malli.

1. The sense is, wilful enjoyment in a friend's house is the result of friendship. And Kailasa is your natural friend. Thus natural friendslip exists between cloud and hill, lotus and sun, sea and mocn, peacock and cloud, wind and fire.

## Charcha.

1. हेम &c.—अम्भसि जातानि इति अम्भस् + जन + ड कर्त्तरि भूते = अम्भोजानि lotuses. हेमनिर्मितानि अम्भोजानि, कर्मधा—। प्रसूते इति प्रसवि (with इनिः)। हेमाम्भोजानां प्रसवि, ६तत्—। Qual. सलिलम्। Or—प्रसव is flower. हेमाम्भोजानां प्रसवाः, ६तत्—। तानि सन्ति अस्य इति मत्वर्थीयः इनिः। It is said that मानससरोवर abounds in golden lotuses.

2. आददानः—आ + दा + शानच् कर्त्तरि। Qual. त्वम्। "आङो दो अनास्यविहरणे" इत्यात्मनेपदम्।

3. कामम्—An अव्यय meaning 'surely' 'नूनम्'। cp "महाभागः कामं नरपतिरभिन्नस्थितिरसौ"—Sak. Adv. Qual. कुर्वन्। Malli. connects it with निर्विशेः but we do not prefer this दूरान्वय।

4. क्षण &c.—मुखस्य पटः (वस्त्रं), ६तत्—। क्षणं मुखपटः, २तत्—by the rule "अत्यन्तसंयोगे च"। क्षणमुखपटस्य प्रीतिः, ६तत्—। ताम्। Obj. of कुर्वन्। Malli takes क्षण in the sense of सप्तमी explaining 'क्षणे जलदानकाले'। But we prefer २या in क्षण, cp—"अस्याक्रमणः प्रलयप्रवृद्धं मुहूर्त्तवक्त्रावरणं बभूव"—*Raghu.* ऐरावत is the name of Indra's elephant.

5. धुन्वन्—धु + शतृ। Agitating. Here धु is स्वादिगणीय। For its several conjugations see *ante.* Qual. त्वम्।

6. कल्प &c.—कल्पद्रुमाणां किसलयानि, ६तत्—। तानि। Obj. of धुन्वन्। We prefer किसलय with a dental, cp "किसलयैः सलज्जैरिव पाणिभिः"—Raghu.

7. वातैः—करणे ३या। The reading स्ववातैः is also seen, but वात itself gives the sense of स्ववात, hence we prefer Malli's reading.

8. जलद—जलं ददातीति जल—दा + क कर्त्तरि = जलदः cloud, तत् सम्बुद्धौ। "आतोऽनुपसर्गेकः" इति कर्मोपपदे कः।

9. ललितैः—ललित is sport. तैः। करणे ३या।

10. निर्विशेः—निर् + विश + लिङ् (विधौ) + याम्। Nom. त्वम्। निर् + विश here means enjoyment, cp "क्रीड़ारसं निर्विशतीव बाल्ये"—*Kumara.*

11. नगेन्द्रम्—न गच्छतीति नञ् + गम + ड कर्त्तरि = नगः mountain, उपपद तत्—। When referring to inanimate objects अग is also correct, the rule is "नगोऽप्राणिषु अन्यतरस्याम्"। इन्द्र by लक्षणा means

'best'. नगः इन्द्र इव, उपमित कर्मधा—by the rule "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"। Or—नगेषु इन्द्रः, सुपसुपा—। or नगानामिन्द्रः, शेषषष्ठी समासः। No विग्रह here. Obj. of निर्विशेः। Being Siva's abode, कैलास is called नगेन्द्र।

12. Voice.—...आददानेन...कुर्वता...धन्वता त्वया स नगेन्द्रः...निर्विश्यतां।

*65. Alaka on the lap of Kailasa,*

**तस्योत्सङ्गे प्रणयिन इव स्रस्तगङ्गादुकूलां**
**न त्वं दृष्ट्वा न पुनरलकां ज्ञास्यसे कामचारिन्।**
**या वः काले वहति सलिलोद्गारमुच्चैर्विमाना**
**मुक्ताजालग्रथितमलकं कामिनीवाभ्रवृन्दम्॥ ६५॥**

Prak.—तस्य उत्सङ्गे त्वं अलकां दृष्ट्वा न ज्ञास्यसे इति न [ On the top of Mount Kailasa you will see Alaka and recognise it ]. What is its recognition ?—स्रस्तगङ्गादुकूलाम् अलकाम् [ The Alaka has Ganges as its cloth. In other words, Ganges surrounds the city like a cloth round the waist of a lady ]. Then Alaka is a lady !—प्रणयिन उत्सङ्गे इव अलकाम् [ Alaka is on Kailasa, just as a darling sits on the lap of her lover ]. The comparison is not complete—उच्चैर्विमाना या, कामिनी मुक्ताजालग्रथितं अलकमिव, सलिलोद्गारं अभ्रवृन्दं वहति [ Alaka has high seven—storyed buildings and clouds coming in contact with these drop down waters ; thus she is like a woman having hair-braids with pendant pearl necklaces hanging on. Thus lady Alaka will attract you ].

Prose.—प्रणयिनः इव तस्य ( कैलासस्य ) उत्सङ्गे स्रस्तगङ्गादुकूलाम् अलकां दृष्ट्वा, हे कामचारिन्, त्वं पुनर्न ज्ञास्यसे इति न। उच्चैर्विमाना या ( अलका ) कामिनी मुक्ताजालग्रथितम् अलकमिव, सलिलोद्गारम् अभ्रवृन्दं वः काले (मेघकाले) वहति।

Eng.—O wanderer at will, seeing Alaka on the lap of that mountain ( Kailasa ) as though on the lap of a lover, with its cloth-like Ganges slipping down, will surely be recognised by you. She with high seven-storeyed white buildings will, in your season ( i. e., in rainy season ) bear water-dropping clouds like a woman bearing braids of hair set with pearl strings.

Expl.—Alaka in Kailasa appears like a woman on the lap of her lover. The Ganges encircling Alaka is her cloth. The black clouds on the top of Alaka's high mansions are like locks of hairs on the white head of a lady. Again waters dripping from clouds will well compare with hanging pearl-strings on hair-braids.

Sanj.—तस्येति। 'प्रणयिनः' प्रियतमस्य इव 'तस्य' कैलासस्य 'उत्सङ्गे' ऊर्ध्व-भागे, ऊरौ च [ "उत्सङ्गो मुक्तसंयोगे सक्थनि ऊर्ध्वतलेऽपि च" इति मालती मालायाम् ( ? मालतीमाला ) ] 'गङ्गा दुकूलं' शुभ्रवस्त्रं वा, इत्युपमितसमासः [ "दुकूलं सूक्ष्मवस्त्रे स्यात् उत्तरीये सितांशुके" इति शब्दार्णवः ] अन्यत्र तु गङ्गेव दुकूलम्। तत् स्रस्तं यस्याः तां तथोक्तलक्षणां 'अलकां' कुबेरनगरीं दृष्ट्वा कामिनीमिव इति शेषः। 'हे कामचारिन्, त्वं पुनः त्वं तु न ज्ञास्यसे इति न' किन्तु ज्ञास्यसे एव इत्यर्थः। कामचारि-णस्ते पूर्वमपि बहुशः दर्शनसम्भवात् अविज्ञानमसम्भावितमेव इति निश्चयार्थं नञ्द्वय-प्रयोगः [ तदुक्तं—"स्मृतिनिश्चयसिद्धार्थेषु नञ्द्वयप्रयोगः" इति ] 'उच्चैः' उन्नतानि 'विमानानि' सप्तभूमिकभवनानि यस्यां सा [ "विमानोऽस्त्री देवयाने सप्तभूमौ च सद्मनि" इति यादवः ] मेघसंवाहनस्थानसूचनार्थमिदं विशेषणम्। अन्यत्र, विमाना निष्कोपा। 'या अलका वः काले' मेघकाले इत्यर्थः 'अभ्रवृन्दं' मेघकदम्बकं, 'कामिनी' स्त्री 'मुक्ता-जालैः' मौक्तिकसरैः 'ग्रथितं' प्रत्युप्तमिव [ "पुंस्यल्यां मौक्तिके मुक्ता" इति यादवः ] 'अलकमिव' चूर्णकुन्तलानिव [ आकारेण वचनम्। "अलकाश्चूर्णकुन्तलाः" इत्यमरः ] 'वहति' बिभर्ति। अत्र कैलासस्य अनुकूलनायकत्वम्, अलकायाश्च स्वाधीनपतिका-

स्वाधीनायिकात्वं ध्वन्यते। "एकायत्तोऽनुकूलः स्यात्" इति "प्रियोपलालिता नित्यं स्वाधीनपतिका मता" इति च लक्षयन्ति। उदाहरन्ति च "लालयन् अलकप्रान्तान् रचयन् पत्रमञ्जरीम्। एकां विनोदयन् कान्तां छायावदनुवर्त्तते" ॥—इति ॥ ६५ ॥

## Charcha.

1. तस्य—Refers to कैलास। षष्ठे ६ष्ठी, related to उत्सङ्गे।

2. उत्सङ्गे—उद्+सञ्ज+घञ् भावे=उत्सङ्ग top, lap. तस्मिन्। अधि ७मी।

3. स्रस्त &c—गङ्गा एव दुकूला, मयूरव्यंसकादिवत् तत्पुरुषः। स्रस्ता गङ्गादुकूला यस्याः, बहु—। ताम्। Qual. अलकाम्। Ganges is well compared with the white cloth of a lady. And अलका is represented as a lady. See also Malli.

4. न, न—Two negatives imply a strong affirmative, cp—"कामचारिणः...इति निश्चयार्थं नञ्द्वयप्रयोगः"—Malli.

5. ज्ञास्यसे—ज्ञा+लृट् स्यसे। Nom. त्वम्। "अनुपसर्गाज्ज्ञः" इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

6. कामचारिन्—कामेन चरतीति कामचारी (with णिनि कर्त्तरि)। तत् सम्बुद्धौ। For the force of the epithet see Malli—कामचारिणः &c.

7. उच्चैर्विमाना—विमान is seven-storeyed buildings. उच्चैः विमानानि यस्याः, बहु—। The white mansion is the white face of lady Alaka. See also Malli.

8. मुक्ता &c—मुक्तानां जालानि, ६तत्—। तैः ग्रथितः (set), ३तत्—। तम्। Qual. अलकम्। Black clouds on white buildings will look like black hair on white faces. The water drops of clouds will be like pearl strings on hairs.

9. अभ्रवृन्दम्—अभ्राणां वृन्दम् ६तत्—। तत्। Obj. of वहति।

10. Voice.—त्वया ज्ञास्यते...विमानया यया कामिन्या...—ग्रथितः अलकः ...उह्यते।

# उत्तरमेघः।

## 66. *Description of Alaka ; cloud-like palaces there.*

**विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः**
**सङ्गीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।**
**अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः**
**प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ॥ ६६ ॥**

Prak—यत्र अभ्रंलिहाग्राः प्रासादाः तुङ्गं त्वां तुलयितुमलम् ( स्युः ) [ In Alaka cloud-reaching palaces well resemble high-soaring clouds ]. Is the comparison complete ?—ललितवनिताः सचित्राः सङ्गीताय प्रहतमुरजाः मणिमयभुवः प्रासादाः, विद्युत्वन्तं सेन्द्रचापं स्निग्धगम्भीरघोषम् अन्तस्तोयं त्वाम् [ The parallel is complete—the palace teems with beautiful female and the cloud has white lightning within similarly palaces are decorated with coloured picturs and the cloud with coloured rainbow, the drums in one resemble the cloud rumble in the other, the clear gem-surfaces in the one are compared to clear white watery clouds. ].

Prose.—यत्र ललितवनिताः सचित्राः सङ्गीताय प्रहतमुरजाः मणिमयभुवः अभ्रंलिहाग्राः प्रासादाः तैः तैः विशेषैः सेन्द्रचापं विद्युत्वन्तं स्निग्धगम्भीरघोषम् अन्तस्तोयं तुङ्गं त्वां तुलयितुम् अलं ( स्युः ) ।

Beng.—যে অলকায় সুন্দরী স্ত্রীসমন্বিত চিত্রচিত্রিত, বাদ্যের জন্য মুরজধ্বনিযুক্ত মণিময়স্থানশোভিত মেঘস্পর্শী প্রাসাদ সমূহ সেই সেই গুণদ্বারা বিদ্যুৎশোভিত ইন্দ্রধনুঃযুক্ত স্নিগ্ধগর্জনমুখরিত ও নির্মলজল বিশিষ্ট উন্নত মেঘের সহিত তুলনা করিতে সমর্থ হয়।

Eng.—Where the cloud-licking palaces with bright damsels and coloured pictures, and having drums struck for music and with gem-surfaces, well compare by those virtues the high clouds having lightning and rain-bow, and possessing deep rumble and also having clear waters within.

Expl.—See Prak.

Sanj.—विद्युत्वन्तमिति। यत्रालकायां 'ललिता' रम्याः 'वनिताः' स्त्रियो येषु ते, सह चित्रं वर्त्तन्ते इति 'सचित्राः' [ "आलेख्याश्चर्ययोः चित्रम्" इत्यमरः। "तेन सहेति तुल्ययोगे" इति बहुव्रीहिः। "वोपसर्जनस्य" इति सहशब्दस्य सभावः] 'सङ्गीताय' तौर्य्यत्रिकाय 'प्रहतमुरजाः' ताड़ितमृदङ्गाः [ "मुरजा तु मृदङ्गे स्यात् ढक्कामुरजयोरपि" इति शब्दार्णवे ( ? शब्दार्णवः ) ] 'मणिमय्यः' मणिविकाराः 'भुवो' येषु, अभ्रं लिहन्तीति 'अभ्रंलिहानि' अभ्रङ्कषाणि [ "वहाभ्रेलिहः" इति खश्प्रत्ययः। "अरुर्द्विषत्—" इत्यादिना मुमागमः] 'अग्राणि' शिखराणि येषां ते तथोक्ताः अतितुङ्गाः इत्यर्थः 'प्रासादाः' देवगृहाणि [ "प्रासादो देवभूभुजाम्" इत्यमरः ] विद्युतोऽस्य सन्तीति 'विद्युत्वन्तं सेन्द्रचापम्' इन्द्र चापयुक्तं, 'स्निग्धः' सान्द्रः 'गम्भीरो घोषो' गर्जितं यस्य तम्, 'अन्तः' अन्तर्गतं 'तोयं' यस्य तं 'तुङ्गम्' उन्नतं 'त्वां, तैः तैः विशेषैः' ललितवनितत्वादि धर्मैः 'तुलयितुं' समीकर्त्तुम् 'अलम्'पर्य्याप्ताः [ "अलं भूषणपर्य्याप्तिशक्ति वारण वाचकम्" इत्यमरः ]। अत्र उपमानोपमेयभूतमेघप्रासादधर्माणां विद्युद्वनितादीनां यथासंख्यम् अन्योन्यसादृश्यात् मेघप्रासादयोः साम्यसिद्धिरिति बिम्बप्रतिबिम्बभावेन इयं पूर्णोपमा। वस्तुतो भिन्नयोः परस्परसादृश्यात् अभिन्नयोः उपमानोपमेयधर्मयोः पृथगुपादानात् बिम्बप्रतिबिम्बभावः। ॥ ६६ ॥

## Notes on Malli.

1. Here similarity is established of the उपमान cloud and

the उपमेय palace owing to their qualifications विद्युत्वान् and ललितवनिता &c, respectively implying resemblance with each other. This is an instence of पूर्णोपमा through बिम्बप्रतिबिम्बभाव। In fact, when the virtues of उपमान and उपमेय though really different does not appear as such through similarity and are stated separately then we have बिम्बप्रतिबिम्बभाव:।

## Charcha.

1. विद्युत्वन्तम्—वि विशेषेण द्योतते इति वि + द्युत + क्विप् कर्त्तरि = विद्युत् lighting. तत् अस्ति अस्य इति विद्युत् + मतुप = विद्युत्वान् having lightning. तम्। Qual. त्वाम्। Here we get विद्युत्वान् and not विद्युद्वान् by the rule "तसौ मत्वर्थे"। विद्युत् ends in त्। Cp—"मरुत्वत:"—Sak.

2. ललितवनिता:—For समास see sanj. Qual. प्रासादा:। This epithet keeps up comparison with विद्युत्वत् as applicable to cloud. Hence the comparison of प्रासाद and मेघ is established—similarity of females with lightning is very appealing, cp, "धाता द्विव: स्थास्नुरिवाचिरप्रभा"—Bhatti.

3. सेन्द्रचापम्—चाप bow. इन्द्रस्य चाप:, ६तत्—। तेन सह वर्त्तमान: इति सेन्द्रचाप:। "तेन सहेति तुल्ययोगे" इति समास:। Qual. त्वाम्। This epithet is a parallel of सचित्रा:। Rainbow in cloud is compared to coloured painting in the palace. For सचित्रा:—See Malli.

4. सङ्गीताय—सम् + गै + क्त भावे = सङ्गीत song. तस्मै। तादर्थ्ये ४र्थी, or—कर्मणि ४र्थी by the rule "क्रियार्थोपपदस्य च कर्मणि स्थानिन:"। Thus सङ्गीताय = सङ्गीतं कर्त्तुम्।

5. प्रहतमुरजाः—प्र + हन + क्त कर्मणि = प्रहत struck. प्रहता मुरजा येषु—, यदु—। Qual. प्रासादाः। This epithet well compares with स्निग्धगम्भीरघोषम् as applied to cloud ( त्वाम् )। Both were sounding. For समास see sanj. The reading स्निग्धपर्जन्यघोषम् is also seen. But we prefer Malli's reading as here, for स्निग्ध as applicable to पर्जन्य is queer and also because the poet has "स्निग्ध-गम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ"—Raghu.

6. अन्तस्तोयम् &c—For समास see Malli. The clouds are sometimes white with clear water ( अन्तस्तोय ) just as palaces are with clear floors of gems ( मणिमयभुवः) ।

7. अभ्रंलिहाग्राः—For deriv. and समास see Sanj. Qual. प्रासादाः ।

8. त्वाम्—Refers to cloud. Obj of तुलयितुम् ।

9. तुलयितुम्—तुल + णिच् + तुमुन् । To rival. Here we have तुमुन् in connection with अस्त्यर्थ root understood.

10. अलम्—An अव्यय having the sense of पर्याप्ति (sufficiency ), See also Malli. It qualifies प्रासादाः ।

11. तैः तैः—वीप्सायां द्विरुक्तिः ।

12. विशेषैः—The विशेष are special characteristics of the palaces. करणे ३या । "विशेषैः ललितवनितत्वादिधर्मैः"—Malli.

13. Voice.—सविशेषैः &c....प्रासादैः...अलं भूयते ।

14. Remark.—(a) This description of अलका may be compared with the description of ओषधिप्रस्थ in Kumar VI. cp, "शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम् । अनुगर्जितसन्दिग्धाः करणैर्मुरजस्वनाः ॥

( b ) In this description of अलका the verses in the Parsabhyudaya of Jinasena as noticed by prof, Pathak (to whom I

am indebted for some suggestions ) are differently arranged. There—यत्रस्त्रीणां &c. comes next. But this is rather abrupt. First palaces and their surroundings etc, should be described then the sports carried therein. Hence Malli's arrangement as adopted by us is more natural.

( c ) Prof. Goswami rightly remarks—"This verse is an example of what in English would be called a complete antithesis. The parallelism is here complete."

### *67. Seasonal charms there.*

हस्ते लीलाकमलमलके बालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषं
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम् ॥ ६७ ॥

Prak.—Easy.

Prose —यत्र ( अलकायां ) वधूनां हस्ते लीलाकमलम्, अलके बालकुन्दानुविद्धम् (बालकुन्दानुवेधः), आनने श्रीः लोध्रप्रसवरजसा पाण्डुतां नीता ; चूडापाशे नवकुरवकं, कर्णे चारु शिरीषं, सीमन्ते च त्वदुपगमजं नीपं ( भवन्ति ) ।

Beng.—সেখানে বধূদিগের হাতে ক্রীড়ার জন্য কমল রহিয়াছে, কেশে নবকুন্দপুষ্প আছে ; মুখশ্রী লোধফুলের পরাগদ্বারা পাণ্ডু হইয়াছে ; কেশবন্ধেতে নূতন কুরবক, কর্ণে মনোরম শিরীষপুষ্প এবং সীমন্তে ( সীতিতে ) বর্ষাজাত কদমফুল আছে ।

Eng.—There the ladies have lotus to play with in their hands, bud of kunda flower are on their hair, their facial glow is rendered pale by pollens of *lodhra* flower, newly-blown *kuravakas* are on their fillet of hair, charming Sirisha flower on their

ears and on their braided lines of hairs are seen kadamba that blossom at thy advent ( i. e., in rainy season ).

Expl.—Easy.

Sanj.—सम्प्रति सर्वदा सर्वर्तुसम्पत्तिमाह—हस्त इति । 'यत्र' अलकायां 'वधूनां स्त्रीणां हस्ते लीलार्थं कमलं 'लीलाकमलं' शरल्लिङ्गमेतत् [ तदुक्तम्—"शरत् पङ्कजलक्षणा—" इति ] 'अलके' कुन्तले [ जातावेकवचनम् ] अलकेषु इत्यर्थः । 'बालकुन्दैः' प्रत्यग्रमाघ्यकुसुमैः 'अनुविद्धम्' 'अनुषिक्तग्रन्थनम् [ नपुंसके भावे क्तः ] । यद्यपि कुन्दानां शैशिरत्वमस्ति माघ्यं कुन्दमित्यभिधानात्, तथापि हैमन्ते प्रादुर्भावः शिशिरे प्रौढत्वमिति व्यवस्थाभेदेन हैमन्तकार्य्यत्वमित्याशयेन बालेतिविशेषणम् । [अलकम्—इति प्रथमान्तपाठे सप्तमीप्रक्रमभङ्गः स्यात् ॥ नाथस्तु नियतपुंलिङ्गताहानिश्चेति दोषान्तरमाह ; तदसत् —"स्वभाववक्राण्यलकानि तासाम्"—, "निधूतनान्यलकानि पीड़ितमुरः क्षतसीधरः खण्डितः" इत्यादिषु प्रयोगेषु नपुंसकलिङ्गतादर्शनात् ] 'आनने' मुखे 'लोध्रप्रसवानां' लोध्रपुष्पाणां शैशिराणां 'रजसा' परागेण [ "प्रसवस्तु फले पुष्पे वृक्षाणां गर्भमोचने" इति विश्वः] 'पाण्डुतां नीता श्रीः' शोभा । 'चूड़ापाशे' केशपाशे 'नवकुरुवकं' (?कुरवकं) वासन्तः पुष्पविशेषः । 'कर्णेचारु' पेशलं 'शिरीषं ग्रैष्मः पुष्पविशेषः । सीमन्ते' मस्तककेशवीथ्याम् [ 'सीमन्तमस्त्रियां मस्तककेशवीथ्यामुदाहृतमिति शब्दार्णवः ] 'तवोपगमः' मेघागम इत्यर्थः तत्रजातं 'त्वदुपगमजं' वार्षिकमित्यर्थः 'नीपं' कदम्बकुसुमम् [ सर्वत्र 'अस्ति' इति शेषः । "अस्ति भवति ( ? न्ती ) परः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति" इति न्यायात् ॥ इत्थं कमलकुन्दादि तत्तत्कार्य्यसमाहाराभिधानात् अर्थात् सर्वर्त्तुसमाहारसिद्धिः । कारणं विना कार्य्यस्य असिद्धेरिति भावः। ] ६७ ॥

## Notes on Malli.

1. The maxim is "अस्ति as indicative of first person present tense, is understood though not mentioned". Hence everywhere we have 'अस्ति' । The sense is.—Thus from the statement

of the collection of the effects e. g कमल, कुन्द etc, the presence of all the seasons is established, for there is no effect without cause. [ N. B.—भवतिपर: in Malli should be भवन्तीपर:, for भवन्ती is a designation of लट् of the old Professors. Malli himself in Kirat says "भवन्तीति लट: पूर्वाचार्याणां संज्ञा"। I think the quotation is from महाभाष्य ]।

## Charcha.

1. Remark—Here the verse suggests simultaneous presence of all the seasons. See also Malli.

2. हस्ते &c.—अधि' ७मी।

3. लीला &c.—लीला is sport. लीलार्थं कमलम्, शाकपार्थिवादि तत्—। Nom. to अस्ति। This epithet suggests presence of autumn, for in this season lotuses blossom abundantly. See also Malli.

4 बाल &c.—अनु + विध + क्त नपु'सके भावे = अनुविद्धम् sticking, contact ( संसर्ग: )। Here the word is a noun. बाल: कुन्द:, कर्मधा—। तस्य अनुविद्धम्, ६तत्—। Nom. to अस्ति। This indicates हेमन्त। Though Kundas fully blossom in winter, still owing to the epithet बाल here, its early budding is referred to, hence हेमन्त is to be taken here. See Malli—"यद्यपि...बालेति विशेषणम्"।

5. लोध्र &c.—प्रसव is flower. लोध्रस्य प्रसव:, ६तत्—। तस्य रज: ( dust ) ६तत्—। तेन। करणे ३या। or—अनुक्ते कर्त्तरि ३या। It suggests winter. Cp—"अभिविषिणयिषु भुवनानि य: सुरभिवास्यन लोध्ररजश्चय:"—Sisu. VI.

6. नीता—नी + क्त कर्मणि स्त्रियाम्। Agrees with उक्त कर्म—श्री:। Here the प्रधानकर्म is voiced by "ण्यादे: प्रधाने"।

7. नवकुरवकम्—Both कुरवक and कुरुवक are seen. But we prefer कुरवक, witness—"कुरवकी रवकारणतां ययौ"—Rag. Nom. to चस्ति। It indicates spring time.

8. सीमन्ते—सीमाया: सीम: वा अन्त:, इतत्—। शकन्ध्वादित्वात् पररूपं वाच्यम्। अधि ७मी। पररूप is ordered in the sense of केशवीथि only.

9. त्वदुप &c.—उप+गम+अप् भावे=उपगम. approach. तव उपगम:, इतत्—। तस्मात् जातम् इति त्वदुपगम+जन+ड कर्त्तरि भूते। Qual. नीपम्। नीप suggests वर्षा। See also Malli.

10. Voice.—Easy.

## *68. Effects of seasons there.*

यत्रोन्मत्तभ्रमरमुखरा: पादपा नित्यपुष्पा
हंसश्रेणीरचितरशना नित्यपद्मा नलिन्य:।
केकोत्कण्ठा भवनशिखिनो नित्यभास्वत्कलापा
नित्यज्योत्स्ना: प्रतिहततमोवृत्तिरम्या: प्रदोषा:॥ ६८॥

Prak.—Easy.

Prose.—यत्र नित्यपुष्पा: पादपा उन्मत्तभ्रमरमुखरा: (भवन्ति), नित्यपद्मा नलिन्य: हंसश्रेणीरचितरशना: (भवन्ति), नित्यभास्वत्कलापा: भवनशिखिन: केकोत्कण्ठा: (भवन्ति), नित्यज्योत्स्ना: प्रदोषा: प्रतिहततमोवृत्तिरम्या: (भवन्ति)।

Beng.—যেখানে নিত্য ফলবান্ বৃক্ষসমূহ মদমত্ত ভ্রমরে মুখরিত, নিত্যপদ্মপুষ্পযুক্ত পদ্মিনীতে নিনাদীহংসগণ রশনাকারে রহিয়াছে, ময়ূরগণ সদা উজ্জ্বল বর্হ ধারণ করিয়া রবে উৎকণ্ঠা দেখাইতেছে এবং সন্ধ্যাকাল নিয়তজ্যোৎস্নাযুক্ত এবং অন্ধকার নিবৃত্তিহেতু রম্য হইয়াছে।

Eng.—There trees with ever-growing flowers are noisy with maddening bees, the lotus-stalks with lotuses blossoming

always have rows of swans ( hovering about them ) as girdle, the domestic peacocks with ever-shining plumes are ready to set up cries, and night-falls with constant moonshines are charming owing to dispersion of the progress of darkness.

Expl.—Easy.

Sanj.—यत्रेति । 'यत्र' अलकायां 'पादपाः' वृक्षा 'नित्यानि पुष्पाणि येषां ते', न तु ऋतुनियमात् इति भावः ; अतएव उन्मत्तैः भ्रमरैः 'मुखराः' शब्दायमानाः । 'नलिन्यः' पद्मिन्यः नित्यानि पद्मानि यासां ताः तथा, न तु हेमन्तवर्जितम् इत्यर्थः, अतएव 'हंसश्रेणीभी रचितरशना', नित्यं हंसपङ्क्तिवेष्टिता इत्यर्थः । 'भवनशिखिनः' क्रीड़ामयूराः (?) 'नित्यं भास्वन्तः कलापा' वर्हाणि येषां ते तथोक्ताः न तु वर्षास्विव, अतएव 'केकाभिरुत्कण्ठा' उद्ग्रीवाः, 'प्रदोषाः' रात्रयः 'नित्या ज्योत्स्नाः' यासां ताः, न तु शुक्लपक्ष एव । अतएव 'प्रतिहता तमसां वृत्तिः' व्याप्तिः येषां, ते च ते 'रम्याश्च' इति तथोक्ताः ॥ ६८ ॥

## Charcha.

1. उन्मत्त &c.—उन्मत्ताः भ्रमराः, कर्मधा— । तैः मुखराः, ३तत्— । Qual. पादपाः । The trees there were always flowering ( नित्य पुष्पाः ), hence they attracted bees. As said before Alaka was favoured with the simultaneous presence of all the seasons, so it is no wonder that trees etc. should be नित्यपुष्प &c.

2. हंस &c.—Both श्रेणि and श्रेणी are correct. रशना girdle. हंसानां श्रेण्यः ६तत्— । तैः रचितः, ३तत्— । तादृश्याः रशनाः आसाम्, बहु— । Pred. to नलिन्यः । The ever flowering ( नित्यपद्माः ) lotus-plants attracted swans, they hover round them with sweet cackles and thus their circling line formed girdles to Lady नलिनी ।

Mark here the distinction between नलिन (lotus stalk) and नलिनी (plant having lotus stalk). See also note. 1.

3. भवनशिखिन:—Nom. to भवन्ति understood. Malli renders it as क्रीडामयूरा:। But everywhere we have description of real facts, hence here also we are to take peacocks as real and not those used for toys. Malli makes a similar mistake in Raghu XVI. Thus in place of Malli's क्रीड़ामयूरा: say गृहमयूरा:।

4. केकोत्कण्ठा:—उद्गत: कण्ठमेषामिति उत्कण्ठा:, बहु—by the varttika "प्रादिभ्यो धातुजस्य—"(ante). केका is peacock's cry. केकासु उत्कण्ठा:, सुप्सुपा—। Pred. to शिखिन:। Malli's केकाभि: उत्कण्ठा: means 'they are with uplifted necks through cries'.

5. नित्य &c.—Pred. to शिखिन:। भासते इति भास + क्विप = भास् lustre. भा: अस्ति अस्य इति भास् + वतुप् = भास्वत् shining. नित्यं भास्वन्त: सुप्सुपा—। नित्यभास्वन्त: कलापा: एषाम्, बहु—।

6. नित्य &c.—ज्योतिरस्य अस्ति इति ज्योतिस् + न मत्वर्थे निपातनात् ज्योत्स्ना moonshine. For समास see Malli Qual. प्रदोषा:।

7. प्रतिहत &c.—प्रति + हन + क्त कर्मणि = प्रतिहत dispelled. वृत + क्तिन् भावे = वृत्ति: progress (प्रसर). तमसो वृत्ति:। ६तत्—। प्रतिहता तमोवृत्तिरस्य, बहु—। प्रतिहततमोवृत्तयश्च ते रम्याश्च, कर्मधा—। Pred to प्रदोषा:। Constant moonshine dispelled darkness there.

8. Voice —Easy.

*69. Happiness suppremely reigns there.*

**आनन्दोत्थं नयनसलिलं यत्र नान्यैर्निमित्तै-**
**र्नान्यस्ताप: कुसुमशरजादिष्टसंयोगसाध्यात् ॥**

नाप्यन्यस्मात् प्रणयकलहाद्विप्रयोगोपपत्ति-
र्वित्तेशानां न च खलु वयो यौवनादन्यदस्ति ॥ ६८ ॥

Prak.—Easy.

Prose.—यत्र वित्तेशानाम् ( यक्षाणां ) नयनसलिलम् आनन्दोत्थं ( भवति ), अन्यैः निमित्तैः न ( भवति ) ; इष्टसंयोगसाध्यात् कुसुमशरजात् अन्यः तापः न ( भवति ) ; प्रणयकलहात् अन्यस्मात् विप्रयोगोपपत्तिः न ( भवति ) ; यौवनात् अन्यत् वयो न ( भवति ) ।

Beng.—সেখানে যক্ষগণের নয়নবারি আনন্দেতেই বাহির হয়, অন্য কারণে হয় না ; ইষ্টসমাগমেনিবর্ত্তনীয় কামজ ভিন্ন অন্য তাপ দৃষ্ট হয় না, প্রণয়কলহ ব্যতীত বিরহোপস্থিতি হয় না এবং যৌবন ব্যতীত অন্য বয়স নাই ।

Eng.—There of the yakshas, tears are always through happiness and not through any other cause, no pain but that of love which is to be ended through union with the beloved, there is no separation except love-quarrels and no age other than youth.

Expl.—Easy.

Sanj.—आनन्दोत्थमिति । 'यत्र' अलकायां 'वित्तेशानां' यक्षाणाम् ["वित्ताधिपः कुबेरः स्यात् प्रभौ धनिकयक्षयोः" इति शब्दार्णवः ] 'आनन्दोत्थम्' आनन्दजन्यमेव 'नयनसलिलम्'—'अन्यैः निमित्तैः' शोकादिभिः न । 'इष्टसंयोगेन' प्रियजनसमागमेन 'साध्यात्' निवर्त्तनीयात् न तु अप्रतिकार्य्यात् इत्यर्थः, 'कुसुमशरजात्' मदनशरजात् 'अन्यः तापः नास्ति' । 'प्रणयकलहात्, अन्यस्मात्' कारणात् 'विप्रयोगोपपत्तिः' विरहप्राप्तिः अपि नास्ति' । किञ्च 'यौवनात् अन्यत् वयो' वार्द्धकं नास्ति । श्लोकद्वयं प्रक्षिप्तम् ।

## Charcha.

1. आनन्दोत्थम्—आनन्दात् उत्तिष्ठति इति आनन्द + उद् + स्था + क कर्त्तरि =

आनन्दोत्थ arising from joy. तत्। Qual. नयनसलिलम्। Tears there were always of joy.

2. निमित्तैः—हेतौ ३या।

3. कुसुम &c.—कुसुमानि शराः यस्य इति कुसुमशरः cupid, बहु—। तस्मात् जातः इति कुसुमशर + जन + ड कर्त्तरि भूते = कुसुमशरजः caused by love. तस्मात्। अन्य शब्दयोगे ५मी by the rule "अन्यारात् इतरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते"।

4. इष्ट &c—सम् + युज + घञ् भावे = संयोग union. इष्टेन संयोगः, सुप सुपा। साध + ण्यत् कर्मणि = साध्यः to be alleviated (निवर्त्तनीय)। इष्टसंयोगेन साध्यम्, ३तत्—। तस्मात्। Qual. कुसुमशरजात्। ताप there was easily remediable.

5. प्रणयकलहात्—अन्यशब्दयोगे ५मी।

6. अन्यस्मात्—हेतौ ५मी।

7. विप्रयोग &c.—उप + पद + क्तिन् भावे = उपपत्तिः attainment (प्राप्ति)। विप्रयोग is separation. तस्य उपपत्तिः, ६तत्—। Nom. to अस्ति understood.

8. यौवनात्—अन्यशब्दयोगे ५मी। युवन् is young. तस्य भाव इति युवन् + अण = यौवन youth. तस्मात्। अण् comes by the rule "हायनान्तयुवादिभ्योऽण्"। यौवनात् अन्यत्वयः refers to 'old'. For a somewhat similar use, cp—"बाल्यात् परं साथ वयः प्रपेदे"—Kumar. Every one was young there. Also see—"यौवनान्तं वयो यस्मिन् नान्तकः कुसुमायुधात्। रतिखेदसमुत्पन्ना निद्रा संज्ञाविपर्ययः॥"

9. Remark—These two slokas have no beauty of diction etc. rather they contain rhetorical blesmishes, so Malli says "श्लोकद्वयं प्रक्षिप्तम्"। But remember the great also take nap.

*70. Yaksha's peculiar sort of enjoyment there.*

यस्यां यक्षाः सितमणिमयान्येत्य हर्म्यस्थलानि
ज्योतिश्छायाकुसुमरचितान्युत्तमस्त्रीसहायाः ।
आसेवन्ते मधु रतिफलं कल्पवृक्षप्रसूतं
त्वद्गम्भीरध्वनिषु शनकैः पुष्करेष्वाहतेषु ॥ ७० ॥

Prak.—यस्यां यक्षाः कल्पवृक्षप्रसूतं रतिफलं मधु आसेवन्ते [ There yakshas drink wine leading to passion, and prepared from *kalpa* tree ]. Drinking should go on in company—उत्तमस्त्रीसहायाः यक्षाः [ yes, they had women with them ]. What was their drinking site ?—सितमणिमयानि ज्योतिश्छायाकुसुमरचितानि हर्म्यस्थलानि एत्य आसेवन्ते [ The site was palaces with floor made of white crytals, where images of stars etc were manifest. This all the more delighted the drinkers ]. Was there no instrument then ?—त्वद्गम्भीरध्वनिषु पुष्करेषु शनकैः आहतेषु [ Yes, 'puskara' drums having sound like clouds were being played on there and thus they drank joyfully].

Prose.—यस्यां उत्तमस्त्रीसहायाः यक्षाः सितमणिमयानि ज्योतिश्छायाकुसुमरचितानि हर्म्यस्थलानि एत्य, त्वद्गम्भीरध्वनिषु—शनकैः पुष्करेषु आहतेषु ( सत्सु ) कल्पवृक्षप्रसूतं रतिफलं मधु आसेवन्ते ।

Beng.—যেখানে উত্তম স্ত্রীর সহিত যক্ষগণ শ্বেতমণিনির্মিত এবং তারকাদির প্রতিবিম্বরূপকুসুমরচিত প্রাসাদ ভূমিতে যাইয়া, তোমার ধ্বনির ন্যায় ধ্বনিবিশিষ্ট মৃদঙ্গ বাজিতে থাকিলে, কল্পবৃক্ষপ্রাপ্ত রতিফলাখ্য মধু ( মদ্য ) পান করে ।

Eng.—There the yakshas in company with beautiful damsels repair to palace-floors, ( set with white gems hence ) made of flowers in the shape of images of stars ( reflected there ),

and partake of wine named Ratiphala prepared from Kalpa-tree ; all the while drums having deep sounds like thee (cloud) are being gently beaten.

Expl.—The palaces had floor made of pure white crystal and thus these floors caught the images of stars, planets &c. In such lovely site the yakshas went on merry-making.

Sanj.—यस्यामिति । 'यस्याम्' अलकायां 'यक्षा' देवयोनिविशेषाः 'उत्तमस्त्री-सहायाः' ललिताङ्गनासहचराः सन्तः 'सितमणिमयानि' स्फटिकमणिमयानि चन्द्रकान्त-मयानि वा, अतएव 'ज्योतिषां' तारकाणां 'छायाः' प्रतिबिम्बान्येव 'कुसुमानि' तैः 'रचितानि' परिष्कृतानि [ "ज्योतिस्ताराग्निभाज्वालाद्दक् पुत्रार्थाध्वरात्मसु" इति वैजयन्ती ]। एतेन पानभूमेः अम्लानशोभत्वमुक्तम् । 'हर्म्यस्थलानि एत्य' प्राप्य, 'त्वद्गम्भीरध्वनिरिव ध्वनिः' येषां तेषु 'पुष्करेषु' वाद्यभाण्डमुखेषु [ "पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले" इत्यमरः ] 'शनकैः' मन्दमाहतेषु सत्सु [ एतच्च नृत्यगीतयोरप्युप-लक्षणं ] 'कल्पवृक्षप्रसूतं' कल्पवृक्षस्य काङ्क्षितमर्थप्रदत्वात् मधु अपि तत प्रसूतम्, रतिः फलं यस्य तत् 'रतिफलाख्यं मधु' मद्यम् 'आसेवन्ते' आदृत्य पिबन्तीत्यर्थः ["ताल-चोरचितामृतामलगुडोन्मत्तास्थिकालाह्वयदाविन्द्रद्रुमभीरटेषु कदलीगुग्गुलुप्रसूनैर्युतम् । इत्थं चेन्मधु पुष्पभङ्गुरपचितं पुष्पद्रुमूलाहृतं क्वाथेन खरटीपनं रतिफलं सुस्वादु शीतं मधु" इति मदिरार्णवे ( ? मदिरार्णवः )] ॥ ७० ॥

## Charcha.

1. सित &c.—सित white. सिता मणयः, कर्मधा—। By सितमणि is meant white crystals or चन्द्रकान्त—as Malli says तैः प्रकृतानि इति सितमणि + मयट् ( प्रकृतवचने ) = सितमणिमयानि । Qual. हर्म्यस्थलानि । By हर्म्यस्थल is meant floars (surfaces) of pal aces

2. एत्य—आ + इ + ल्यप् ।

3. ज्योति &c —By ज्योतिस Malli takes on'y (stars), but we

prefer to take ज्योतिस् here in the sense of 'all luminous bodies' in the sky. There is a difference between तारा ( stars ), ग्रह ( planets ), नक्षत्र, so तारका can not stand for all these, cp—"ताराग्रहनक्षत्रसङ्कुलापि ज्योतिष्मती चन्द्रमसैवरात्रिः"। छाया is image. ज्योतिषां छायाः, ६तत्—। ता एव कुसुमानि, कर्मधा—। तैः रचितानि, ३तत्—। Qual. हर्म्यस्थलानि। As the surfaces (floars) were of pure gems so stars, planets &c. reflected there looked like so many flowers. The epithet suggests fitness of पानस्थान।

4. आसेवन्ते—आ+सेव+लट् अन्ते। Nom. यक्षाः।

5. रतिफलम् मधु—Malli takes मधु to mean मद्यम्। Here a special variety of मधु (made of palm, sugar, milk, plantain &c). is meant, its name is रतिफल and it produces lust. See Malli—"रतिः फलं यस्य...इति मदिरार्णवः"। Obj. of आसेवन्ते।

6. कल्प &c.—कल्पवृक्षेभ्यः प्रसूतम् ( सम्भूतम् ), सुपसुपा—। Qual. मधु। Kalpa tree can produce evrything, so it produced मधु ( wine ).

7. त्वद् &c.—गम्भीरः ध्वनिः, कर्मधा—। तव गम्भीरध्वनिः, ६तत्—। त्वद्गम्भीरध्वनिरिव ध्वनिरस्य, बहु—by the varttika "सप्तम्युपमानपूर्वस्य उत्तरपदलोपश्च वक्तव्यः" ( ante ). तेषु। Qual. पुष्करेषु—which has भाषि ढमौ। पुष्कर also means a variety of cloud—see "जातं वंशे भुवनविदिते पुष्करावर्त्तकानाम्"—*ante.*

8. शनकैः—शनैः an अव्यय meaning slowly. शनैः इति शनैस्+अकच् स्वार्थे=शनकैः slowly. Adv. Qual. आहतेषु। Here अकच् स्वार्थे comes by the rule "अव्ययसर्वनाम्नामकच् प्राक्टेः" and it is placed before the final vowel. The reading मधुरम् here is also seen. It

improves the diction and clearly signifies the nature of the drum sound.

9 Voice.—उत्तमस्त्रीसहायैः यक्षैः...आसेव्यते... ।

## 71. *Girl's sports at Alaka.*

**मन्दाकिन्याः सलिलशिशिरैः सेव्यमाना मरुद्भि-**
**र्मन्दाराणामनुतटरुहां छायया वारितोष्णाः ।**
**अन्वेष्टव्यैः कनकसिकतामुष्टिनिक्षेपगूढैः**
**संक्रीडन्ते मणिभिरमरप्रार्थिता यत्र कन्याः ॥ ७१ ॥**

Prak.—यत्र अमरप्रार्थिताः कन्या मणिभिः संक्रीडन्ते [There beautiful girls play with gems]. What kind of play is this ?—कनकसिकता-मुष्टिनिक्षेपगूढैः (अतः) अन्वेष्टव्यैः मणिभिः संक्रीडन्ते [They play with beautiful gems that are first concealed in golden sands thrown by their hand and then sought out. Thus this is a kind of hide and seek game called Gupta-Mani where gems are concealed and found out]. Are they not tired in their games ?—मन्दाकिन्याः सलिल-शिशिरैः मरुद्भिः सेव्यमाना कन्याः [The damsels are refreshed by breeze cool in contact with Mandakini's waters]. Is this all ?—अनुतटरुहां मन्दाराणां छायया वारितोष्णाः [Further they play under shades of Mandara trees grown on the margin of the river. Thus the game does not exhaust them].

Prose.—यत्र अमरप्रार्थिताः कन्याः मन्दाकिन्याः सलिलशिशिरैः मरुद्भिः सेव्यमानाः अनुतटरुहां मन्दाराणां छायया वारितोष्णाः (सत्यः) कनकसिकतामुष्टिनिक्षेपगूढैः (अतः) अन्वेष्टव्यैः मणिभिः संक्रीडन्ते ।

Beng.—সেখানে দেবপ্রার্থিত (অর্থাৎ অতিসুন্দরী) কন্যাগণ, মন্দাকিনীর জলসম্পর্ক-

হেতু শীতল বায়ুদ্বারা সেবিত হইয়া এবং তটনিকটজাত মন্দারবৃক্ষের ছায়ায় আতপ হইতে রক্ষিত হইয়া, স্বর্ণময় বালুকাতে মুষ্টিনিক্ষেপহেতু গূঢ় এবং তদনন্তর অন্বেষণীয় মণিদ্বারা একপ্রকার ক্রীড়া করে।

Eng.—Where the damsels wooed by gods, being fanned by breezes cool owing to contact with Mandakini's waters and being protected from heat by the shades of Mandara growing on the river-margin, play with gems that are first concealed in golden sands ( of the river ) with handful throws and then sought after.

Expl.—See Prak.

Sanj.—मन्दाकिन्या इति। 'यत्र' अलकायाम् 'अमरप्रार्थिता:' सुन्दर्य्य इत्यर्थ: 'कन्या' यक्षकुमार्य्य: [ "कन्याकुमारिकानार्य्यो:" इति विश्व: ] 'मन्दाकिन्या:' गङ्गाया: 'सलिलेन शिशिरै:' शीतलै: 'मरुद्भि: सेव्यमाना' सत्य:, तथा अनुतटं तटे रोहन्तीति 'अनुतटरुह:' [ क्विप् ] तेषां 'मन्दाराणां छायया' अनातपेन 'वारितोष्णा:' शमितातपा: सत्य: 'कनकस्य सिकतासु मुष्टिभि: निक्षेपेण गूढै:' संवृतै: अतएव 'अन्वेष्टव्यै:' मृग्यै: 'मणिभि:' रत्नै: 'संक्रीड़न्ते' गुप्तमणिसंज्ञया सम्यक् क्रीड़न्तीत्यर्थ: [ "क्रीड़ोऽनुसम्परिभ्यश्च" इत्यात्मनेपदम्। "रत्नादिभिर्वालुकादौ गुप्तैर्द्रष्टव्यकर्मभि:। कुमारीभि: कृता क्रीड़ा नाम्ना गुप्तमणि: स्मृता॥ रासक्रीड़ा गूढ़मणि र्गुप्तकेलिस्तुलायनम्। पिच्छकन्दुकदम्भाद्या: स्मृता दैशिककेलय:॥" इति शब्दार्णव: ] ॥ ৩१ ॥

## Charcha.

1. मन्दाकिन्या:—मन्दाकिनी is the name of Ganges. तस्या:। षष्ठी, related to सलिल in सलिलशिशिरै:। "सापेक्षत्वेऽपि गमकत्वात् समास:"। Remember Alaka is on the Ganges—see *ante.*

2. सलिल &c.—सलिलेन शिशिरा:, ३तत्—। तै:। Qual. मरुद्भि:। Cool air refreshes all.

3. सेव्यमाना:—सेव + शानच् कर्मणि स्त्रियाम्। Pred. to कन्या:। मरुद्भि: is अनुक्त कर्त्ता of सेव्यमाना।

4. अनु &c.—तटे इति अनुतटम्, विभक्त्यर्थे अव्ययीभाव:। अनुतटं रोहन्तीति अनुतट + रुह + क्विप कर्त्तरि = अनुतटरुह: growing on banks, उपपदतत्—। तेषाम्। Qual. मन्दाराणाम्। The reading अनुतटरुहाम् is preferable to तटवनरुहाम्, for the former implies growth of trees just on the margin, which will be all the more adaptable to allay heat.

5. वारितोष्णा:—वृ + णिच् + क्त कर्मणि = वारित checked. वारित: उष्ण: आसाम्, बहु—। Pred. to कन्या:। छायया has अनुक्ते कर्त्तरि ३या—कर्त्ता of the क्रिया-वारित in वारितोष्णा:।

6. अन्वेष्टव्यै:—अनु + इष + तव्य कर्मणि = अन्वेष्टव्य to be sought after. तै:। Qual. मणिभि:।

7. कनक &c.—कनकस्य सिकता:—dust of gold, or कनकमया: सिकता: sand full of gold particles. Latter is preperable for it is possible that gold particles are mixed with sands on the river-bed of Ganges at Alaka. नि + क्षिप + घञ् कर्मणि = निक्षेप that which is thrown. गुह + क्त कर्मणि = गूढ concealed. मुष्टिभि: निक्षेप:, ३तत्—। कनकसिकतासु मुष्टिनिक्षेप:, सुप्सुपा—। तेन गूढा, ३तत्—। तै:। Qual. मणिभि:। This is a kind of hide and seek game. First the gems are laid concealed in golden sands of rivers by throws of handfuls of dusts, then these gems are sought out by others. See also Malli.—"रत्नादिभिर्गोलुकादौ" &c.

8. संक्रीडन्ते—सम् + क्रीड + लट् अन्ते। Nom. कन्या:। क्रीड is परस्मैपदी but here आत्मनेपद comes by "क्रीडोऽनुसंपरिभ्यश्च"। In the sense of

कूजन (indistinct sound), the root सम्+क्रीड़ is परस्मैपदी, cp "संक्रीड़न्ति चक्रम्" and the varttika "समोऽकूजने" ।

9. मणिभि:—करणे ३या । This is a play with gems named गुप्तमणि ।

10. अमरप्रार्थिता:—अमर is immortals. प्र+अर्थ+णिच्+क्त कर्मणि स्त्रियाम् = प्रार्थिता: wooed. अमरै: प्रार्थिता:, ३तत्— । Qual. कन्या: । The epithet suggests beauty of girls.

11 Voice.—सेव्यमानाभि: वारितोष्णाभि:...प्रार्थिताभि: कन्याभि: स क्रीड्यते...... ।

*72. Amusements of lovers at Alaka.*

नीवीबन्धोच्छ्वसितशिथिलं यत्र बिम्बाधराणां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु
अर्चिस्तुङ्गानभिमुखमपि प्राप्य रत्नप्रदीपान्
ह्रीमूढ़ानां भवति विफलप्रेरणा चूर्णमुष्टि: ॥ ७२ ॥

[ N. B.—The sloka is rather indelicate—Prose, Tran and Sanj. following.].

Prose.—यत्र अनिभृतकरेषु ( चञ्चलहस्तेषु ) प्रियेषु नीवीबन्धोच्छ्वसितशिथिलं क्षौमं रागात् आक्षिपत्सु ( सत्सु ), ह्रीमूढ़ानां ( लज्जाविधुराणां ) बिम्बाधराणां चूर्णमुष्टि: अर्चिस्तुङ्गान् ( प्रभामहता: ) रत्नप्रदीपान् अभिमुखं प्राप्य अपि विफलप्रेरणा भवति ।

Eng.—There the restless-handed lovers having through passion thown off the silk-garments (of females), slack through untying of the waist-knot, those girls with Bimba-like lips overcome with shame throw handful of dusts which even goin directly towards those gem-lamps of powerful rays become of no avail.

Expl.—It is natural that gem-lamps are used in amorous sports. There the lovers having deprived the girls of their clothings, put them to shame and they in vain try to save themselves by putting out the lights. [ Cp—"भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः"—Kumara ].

Sanj —नीवीति। 'यत्र' अलकायाम् 'अनिभृतकरेषु' चपलहस्तेषु प्रियेषु, नीवी वसनग्रन्थिः [ "नीवी परिपणे ग्रन्थौ स्त्रीणां जघनवाससि इति" विश्वः ] नीवीति बन्धः 'नीवीबन्धः' [ चूतवृक्षवत् अपौनरुक्त्याम् ] तस्य 'उच्छ्वसितेन' त्रुटितेन 'शिथिलं क्षौमं' दुकूलं 'रागात् आक्षिपत्सु' आहरत्सु सत्सु 'ह्रीमूढानां' लज्जाविधुराणाम्। बिम्बं बिम्बिकाफलम् [ "बिम्बं फले बिम्बिकायाः प्रतिबिम्बे च मण्डले" इति विश्वः ] बिम्बमिव अधरः यासां तासां 'बिम्बाधराणां' स्त्रीविशेषाणाम् [ "विशेषाः कामिनीकान्ता भीरु बिम्बाधराङ्गनाः" इति शब्दार्णवः ] 'चूर्णस्य' कुङ्कुमादेः मुष्टिः। 'अर्चिभिः' मयूखैः तुङ्गान् [ "अर्चिर्मयूखशिखयोः" विश्वः ] 'रत्नान्येव प्रदीपाः' तान् अभिमुखं यथा तथा 'प्राप्यापि विफलप्रेरणा' दीपनिर्वापणाक्षमत्वात् निष्फलक्षेपा (? निष्फलाक्षेपा) 'भवति'। अत्र अङ्गनानां रत्नप्रदीपनिर्वापणप्रवृत्त्या मौग्ध्यं व्यज्यते ॥ ७२ ॥

## Charcha.

1. नीवी &c —नीवी is knot of cloth. तस्य बन्धः, ६तत्—। No tautology here as in चूतवृक्ष—See Malli. Or नीवी is जघनवस्त्र, तस्य बन्धः। उद् + श्वस + क्त भावे = उच्छ्वसित untying ( श्लथभाव )। नीवीबन्धस्य उच्छ्वसितम्, ६तत्—। तेन शिथिलम्, ३तत्—। Qual. क्षौमम्।

2. बिम्बाधराणाम्—Deriv.—See Malli The word means a particular class of females The reading यत्राङ्गनानाम् is more specific. शेषे ६ष्ठी।

3. रागात्—रञ्ज + घञ भावे = राग affection. तस्मात्। हेतौ ५मी। The reading यत्र कामात् is simpler than this.

4. अनिभृतकरेषु—निभृत is still. न निभृत: not still i. e., restless, अशान्त्— । तादृश: कर: येषाम्, बहु— । तेषु— । Qual. प्रियेषु which has भावे ७मी ।

5. अर्चिस्तुङ्गान्—अर्चिस् is light, तुङ्ग is high, great. अर्चिषा तुङ्गा: powerful in light, इतत्— । तान् । Qual. रत्नप्रदीपान् ।

6. अभिमुखम्—मुखमभिलक्ष्य इति अभिमुखम्, अव्ययीभाव: । Adv. Qual. प्राप्य । The अव्ययीभाव is guided by the rule "लक्षणेनाभिप्रती आभिमुख्ये" । The reading अभिमुखगतान् here is not so emphatic as अभिमुखमपि ।

## 73. *Beauties of palaces defaced by clouds.*

नेत्रा नीता: सततगतिना यद्विमानाग्रभूमी-
रालेख्यानां स्वजलकणिकादोषमुत्पाद्य सद्य: ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा यत्र जालै:
धूमोद्गारानुकृतिनिपुणा: जर्जरा निष्पतन्ति ॥ ७३ ॥

Prak.—यत्र नेत्रा सततगतिना ( वायुना ) यद्विमानाग्रभूमी: नीता: जलमुच: जालै: निष्पतन्ति [ There wind forces clouds to enter the top-floors of seven-storeyed houses ; but these escape clear through windows ]. Why do they escape ? शङ्कास्पृष्टा इव [ They escape through fear ]. Whence this fear ?—आलेख्यानां स्वजलकणिकादोषमुत्पाद्य शङ्कास्पृष्टा: जलमुच: [ As they enter the tops of palaces, they defile with water particles the pictures there, hence they fear punishment ]. Then they are huge clouds surely—त्वादृशा: जलमुच: [ Quite so ]. How then do they escape through win

dows ?—धूमोद्गारानुकृतिनिपुणा जर्जरा: जालै: निष्पतन्ति [ They enter the palaces and being struck against walls break into pieces and also turn almost into smoke-vapours. Thus turned like smokes they easily issue out by the small windows ]. 73.

Prose.—यत्र नेत्रा ( प्रेरकेण ) सततगतिना यद्विमानाग्रभूमी: नीता त्वादृशा जलमुच: आलेख्यानां स्वजलकणिकादोषम् उत्पाद्य सद्य: शङ्कास्पृष्टा इव, धूमोद्गारानुकृतिनिपुणा जर्जरा: ( सन्त: ) जालै: निष्पतन्ति ।

Beng.—সেথানে প্রেরক সদাগতি বায়ুকর্তৃক সপ্তভূমিক প্রাসাদের অগ্রস্থানে নীত, তোমার ন্যায় বৃহৎ মেঘসমূহ নিজজলকণা বর্ষণ করিয়া তৎক্ষণাৎ ভয়াবিষ্ট হইয়াই যেন ধূমোদ্গমের অনুকরণ করিয়া ( অর্থাৎ ধূমাকারে ) এবং জর্জর হইয়া গবাক্ষ দিয়া বাহির হয় ।

Eng.—There huge clouds like thee, driven into the tops of seven-storeyed palaces, by the carrier wind, defile pictures by their water-particles and instantly as if overcome with fear, they escape through windows being reduced in size and imitating the issuing of smokes.

Expl.—See Prak

Sanj.—नेत्रेति । हे मेघ, 'नेत्रा' प्रेरकेण 'सततगतिना' सदागतिना वायुना [ "मातरिश्वा सदागति:" इति अमर: ] 'यस्या: अलकाया: 'विमानानां' सप्तभूमिकभवनानाम् 'अग्रभूमी: 'नीता:' प्रापिता: । 'त्वमिव दृश्यन्ते' इति त्वादृश: त्वत्सदृशा इत्यर्थ: [ "त्यदादिषु दृशोऽनालोचने कञ् च" इति कञ् (? क्विन्) प्रत्यय:] 'जलमुच:' मेघा: 'आलेख्यानां सचित्राणाम् [ "चित्रं लिखितरूपाद्यं स्यादालेख्यं तु यन्नत:" इति शब्दार्णव: ] 'स्वस्य जलकणिकाभि:' जलकणै: 'दोषं' स्फोटनम् 'उत्पाद्य सद्य: शङ्कास्पृष्टा इव' सापराधत्वात् भयाविष्टा इव [ "शङ्का वितर्कभययो:" इति शब्दार्णव: ] 'धूमोद्गारस्य' धूमनिर्गमस्य 'अनुकृतौ' अनुकरणे 'निपुणा:' कुशला 'जर्जरा:' विशीर्णा: सन्त: 'जालमार्गै:' गवाक्षरन्ध्रै: 'निष्पतन्ति' निष्क्रामन्ति । [ यथा केनचित् अन्त:पुर-

सञ्चारवता दूतेन गूढवृत्त्या रहस्यभूमिं प्रापिताः तत्र स्त्रीषां व्यभिचारदोषमुत्पाद्य सद्यः साशङ्काः कृतवेशान्तराः जाराः क्षुद्रमार्गैः निष्क्रामन्ति तद्वत् इति ध्वनिः। ]। प्रकृतार्थे शङ्कास्पृष्टा इव इत्युत्प्रेक्षा ॥ ७३ ॥

## Notes on Malli.

1. The implication is—This is just like—those adulterers who led in disguise to the harem by some messenger having access there, defile ladies and immediately through fear change dress and come out by trap doors,

## Charcha.

1. नेता—नी + तृच् कर्तरि = नेता carrier. तेन। Qual. सततगतिना।

2. सततगतिना—This is a name of वायु—see Malli. तेन। अनुक्ते कर्तरि तृया—कर्त्ता of नीताः।

3. यद्विमान &c.—विमान is seven-storeyed palace. यस्याः विमानम्। ६तत्— Here यस्याः refers to अलका। अग्रा भूमिः top floor. यद्विमानस्य अग्रभूमिः, ६तत्—। ताः। Obj. of नीताः। Wind drove clouds there.

4. स्वजल &c.—कणा or कण means particles. कणा एव इति कणिका स्वार्थेकन्। स्वस्य जलम्। ६तत्—। तस्य कणिका, ६तत्—। ताभिः (ताभ्यः वा) दोषः, ३तत् (Or—सुपसुपा)। तम्। Obj. of उत्पाद्य (उद् + पद + णिच् ल्यप्)। The reading सजलकणिका does not commend itself. सलिलकणिका is equally good.

5 सद्यः—Deriv ante. Adv. Qual. शङ्कास्पृष्टाः।

6 शङ्का &c.—स्पृश + क्त कर्त्तरि = स्पृष्ट touched. शङ्क + अ भावे = शङ्का fear. तया स्पृष्टाः ३तत्—। Qual. जलमुचः।

7 जलमुच:—जलं मुञ्चन्ति इति जल + मुच + क्विप् कर्त्तरि = जलमुच: clouds. Nom. to निष्पतन्ति ।

8. तादृशा:—त्वमिव एतान् पश्यन्तिजना:, ते एते त्वमिव दृश्यमाना: त्वामिव आत्मानं पश्यन्ति इति युष्मद् + दृश + कञ् कर्म कर्त्तरि = त्वादृश like you. ते । Qual. जलमुच: । These were huge clouds. The above deriv. is after भाष्य । Malli derives कर्मणि after वृत्ति । त्वत् comes in place of युष्मद् in singular by the rule "प्रत्ययोत्तरपदयोश्च" । Then आ comes by "आ सर्वनाम्न:" । The rule for कञ् is "त्यदादिषु दृशोऽनालोचने कञ् च"—when त्यद् and other सर्वनाम words of त्यदादि class precede as उपपद, the root दृश takes कञ् and क्विन् when seeing is not implied. पश्यन्ति here implies no seeing, cp—"तादृगादयो हि रूटिशब्दप्रकारा: । नेवात्र दर्शनक्रिया वर्त्तते"—*Vritti.* कस is available here giving त्वादृश: । Here Malli's reading is त्वादृशो जालमार्गै: । His त्वादृश: ( as plural of त्वादृश ) is got with क्विन् । Hence इति कञ् प्रत्यय:—in Malli should be इति क्विन् प्रत्यय: । All editions here read इति कञ् प्रत्यय:—this is wrong as said above. We do not here prefer Malli's reading, for in that case direct reference to अलका by 'यत्र' etc. is wanting.

9. जालै:—जाल window. तै: । करणे ३या ।

10. धूमो &c.—उद् गॄ + घञ् भावे = उद्गार issuing. अनु + कृ + क्तिन् भावे = अनुकृति imitation धूमस्य उद्गार:, ६तत्— । तस्य अनुकृति:, ६तत्— । तत्र निपुणा:, ७तत्— । Qual. जलमुच: । As seen before clouds are made of धूम, जल &c., hence it is very natural that clouds can imitate and assume the form of their original—the धूम । The sense is, clouds came out by windows in the form of smoke and in pieces ( जर्जरा: ) as well.

11. निष्पतन्ति—निस् + पत + लट अन्ति। Nom. जलमुचः। पपात, पतिष्यति, अपतत्।

12. Voice.—त्वाद्दृशैः जलमुग्भिः—निपुणैः जर्जरैः निष्पत्यते......।

## *74. Fatigue in amorous sports allayed.*

यत्र स्त्रीणां प्रियतमभुजोच्छ्वासितालिङ्गनाना-
मङ्गग्लानिं सुरतजनितां तन्तुजालावलम्बाः।
त्वत्संरोधापगमविशदैश्चन्द्रपादैर्निशीथे
व्यालुम्पन्ति स्फुटजललवस्यन्दिनश्चन्द्रकान्ताः॥ ७४॥

[ N. B—Indelicate—Prose and Malli. only follow ].

Prose.—यत्र निशीथे ( मध्यरात्रे ) त्वत्संरोधापगमविशदैः ( मेघावरणाप-गमनिर्मलैः ) चन्द्रपादैः ( चन्द्रकिरणैः ) स्फुटजललवस्यन्दिनः तन्तुजालावलम्बाः ( वितानलम्बिसूत्रसमूहे ग्रथिताः ) चन्द्रकान्ताः प्रियतमभुजोच्छ्वासितालिङ्गनानां स्त्रीणां सुरतजनिताम् अङ्गग्लानिं व्यालुम्पन्ति ( दूरीकुर्वन्ति )।

Eng.—Where at midnight the moongems dispel the bodily fatîgue due to amorous enjoyment, of women having their embraces loosened by the lover's arms; these moon-gems were hanging in strings ( tied to the ends of canopies ) and were droppings clear particles of water owing to moon-rays turned clear through removal of cloud's obstruction.

Sanj.—यत्रेति। 'यत्र' अलकायां 'निशीथे' अर्द्धरात्रे [ "अर्द्धरात्रनिशीथौ द्वौ" इत्यमरः ] 'त्वत्संरोधस्य' मेघावरणस्य 'अपगमेन विशदैः' निर्मलैः 'चन्द्रपादैः' चन्द्रमरीचिभिः ["पादा रश्म्यङ्घ्रि्तुर्य्यांशाः" इत्यमरः ] 'स्फुटजललवस्यन्दिनः' उल्बणाम्बु-कणस्राविणः' तन्तुजालावलम्बाः' वितानलम्बिसूत्रपुञ्जाधाराः तद्गुणगुम्फिता इत्यर्थः चन्द्रकान्ताः' चन्द्रकान्तमणयः 'प्रियतमानां भुजैः उच्छ्वासितानि' श्लथिता अलसीकाय

-ना शिथिलितानि 'आलिङ्गनानि' यासां तासां 'स्त्रीणां सुरतजनिताम्' अवयवानां ग्लानतां 'व्यालुम्पन्ति ॥ ७४ ॥

## Charcha.

1. प्रियतम &c.—उद् + श्वस + णिच् + क्त कर्मणि = उच्छ्वासित slackened. See "नीवीबन्धोच्छ्वसितशिथिलम्"—Sl. 72. प्रियतमभुजैः उच्छ्वासितानि, ३तत्—। तादृशानि आलिङ्गनानि आसाम्, बहु—। Qual. स्त्रीणाम् ।

2. तन्तु &c —See Malli. चन्द्रकान्ताः । These gems were hanging from strings at the end of canopies.

3. चन्द्रपादैः—चन्द्रपाद means 'moon-rays' ; cp "नवेन्दुन्ताभिव चन्द्रपादैः"—Kumara. हेतौ ३या ।

4. व्यालुम्पन्ति—वि + आ + लुप + लट अन्ति । Destroys. Nom. चन्द्रकान्ताः । लुम्पति, अलुपत्, लुलोप ।

### 75. *Lover's sports in Vaibhraja garden.*

**अक्षय्यान्तर्भवननिधयः प्रत्यहं रक्तकण्ठै-**
**रुद्गायद्भिर्धनपतियशः किन्नरैर्यत्र सार्द्धम् ।**
**वैभ्राजाख्यं विबुधवनितावारमुख्यासहायाः**
**बद्धालापा बहिरुपवनं कामिनो निर्विशन्ति ॥ ७५ ॥**

Prak.—तत्र कामिनः प्रत्यहं किन्नरैः सार्द्धं वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति [ There passionate lovers everyday enjoy in the outer garden of Kuvera named Vaibhraja ]. Do they enjoy alone ?—विबुधवनितावारमुख्यासहायाः बद्धालापाः कामिनः [No ; they enjoy and converse there in company with celestial prostitutes ]. Have they resources enough to enjoy celestial prostitutes ?—अक्षय्यान्तर्भवन-

निधय: कामिन: [ yes ; they have hoards of riches at their command ]. But how do they contribute to their master Kuvera ? रक्तकण्ठै: धनपतियश: उद्‌गायद्भि: किन्नरै: सार्द्धं निर्विशन्ति [ The Kinnaras with whom the lovers enjoy, sing devotedly in praise of Kuvera —the master of the plasure-garden, named वैभ्राज ]. 75.

Prose.—यत्र अक्षय्यान्तर्भवननिधय: ( अत: ) विबुधवनितावारमुख्यासहाया: बद्धालापा: कामिन: प्रत्यहं रक्तकण्ठै: धनपतियश: उद्‌गायद्भि: किन्नरै: सार्द्धं वैभ्राजाख्यं बहिरुपवनं निर्विशन्ति ।

Beng.—সেথানে গৃহে অক্ষয়ধনের অধিকারী ( অতএব ) অপ্সরাবেশ্যাসহায় আলাপরত কামী যক্ষগণ প্রত্যহ, রাগপূর্ণকণ্ঠে কুবেরের যশোগানে নিযুক্ত কিন্নরগণের সহিত বৈভ্রাজনামক বহিরুদ্যানে বিহার করিয়া থাকে।

Eng.—There in the outer garden, named Vaibraja, the passionate Yaksha lovers having inexhaustible stores in their houses, in company with celestial prostitutes and engaged in chats, daily enjoy along with melodious-voiced Kinnaras that sing in praise of the fame of Dhanapati ( Kuvera ).

Expl.—Eng.

Sanj.—अक्षय्येति । 'यत्र' अलकायां 'चेतुं शक्या:' क्षय्या: [ "क्षय्यजय्यौ शक्यार्थे" इति निपात: । ततो नञ् समास: ] भवनानामन्त: (?) 'अन्तर्भवनम् [ ' अव्ययं विभक्ति—" इत्यादिनाव्ययीभाव: ] 'अक्षय्या अन्तर्भवने निधय:' येषां ते तथोक्ता: । यथेष्टभोगसम्भावनार्थमिदं विशेषणम् । 'विबुधवनिता:' अप्सरस: ता एव 'वारमुख्या:' वेश्या: ता एव 'सहाया:' येषां ते तथोक्ता: [ "वारस्त्री गणिका वेश्या रूपाजीवाथ सा जनै: । सत्कृता वारमुख्या स्यात्" इत्यमर: ] 'बद्धालापा:' सम्भावितसंलापा: 'कामिन:' कामुका: 'प्रत्यहं' अहनि [ अव्ययं विभक्त्यादिना समास: । "अनश्च" इति समासान्तष्टच् । "अह्नष्टखोरेव—" इति टिलोप: ] । रक्तो मधुर: 'कण्ठ:' कण्ठध्वनिर्येषां ते, तै: सुन्दरकण्ठध्वनिभि: धनपतियश: कुबेरकीर्त्तिम् 'उद्‌गायद्भि' उच्चै: गायद्भि:

देवगानस्य गान्धारग्रामत्वात् तारतरं गायद्भिरित्यर्थः। 'किन्नरैः सार्द्धं' सह। विभ्राजस्य इदं वैभ्राजम्, वैभ्राजम् इत्याख्या यस्य तत् 'वैभ्राजाख्यम्' [ "विभ्राजेन गणेन्द्रेण स्यात् वैभ्राजमाख्यया" इति शब्दरहस्ये (? रहस्यम्)। चैत्ररथस्य नामान्तरमेतत्] 'बहिरुपवनं' बाह्योद्यानं 'निर्विशन्ति' अनुभवन्ति ॥ ७५ ॥

## Notes on malli.

1. In प्रत्यहम्, the अव्ययीभावसमास is guided by the rule "अव्ययं विभक्तिसमीपसमृद्धि-वृद्धि—अर्थाभाव अत्यय असम्प्रति-शब्दप्रादुर्भाव-पश्चात्-यथानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु—"। Then समासान्त टच् (अ) comes by the rule "अनश्च"—(अहन् ends in अन्)। Lastly अन् of अहन् elides by the rule "नस्तद्धिते"।

## Charcha.

1. अक्षय्य &c.—क्षेतुं शक्यमिति क्षि+यत्=क्षय्यम् perishable. न क्षय्यम्। नञ् तत्—। Here in this sense क्षय्यम् is irregularly formed by the rule "क्षय्यजय्यौ शक्यार्थे", otherwise the form is क्षेयम्। Cp "तपः षड्भागमक्षय्यम्" &c.—Sak. भवने इति अन्तर्भवनम्, विभक्त्यर्थे अव्ययीभावः। अन्तः भवनम् (or—अन्तर्भवने) निधयः, सुप्सुपा—। अक्षय्याः अन्तर्भवननिधयः एषाम्, बहु—। Qual. कामिनः। The epithet shows their power of wealth. Avoid the समास as—अक्षय्या अन्तर्भवने निधयः येषाम् as given by Malli, for व्यधिकरण बहु—is not sanctioned by Bhashya, cp "व्यधिकरणानां मा भूत्"। Malli's भवनानामन्तः &c. is defective. See अन्तर्भवन &c.—sl. 85. *ante*.

2. प्रत्यहम्—see Note on Malli.—connect it with उद्गायद्भिः।

3. रक्तकण्ठैः:—For समास see Malli. Qual. किन्नरैः।

4. उद्गायद्भिः—उद् + गै + शतृ कर्त्तरि = उद्गायत् loudly singing. तैः। Qual. किन्नरैः। See also Malli.

5. किन्नरैः—सहार्थे •सार्द्ध शब्दयोगे तृतीया by the rule "सहयुक्तेऽप्रधाने"।

6. वैभ्राजाख्यम्—विभ्राज is the name of a गणनायक। And this garden of Kuvera is named after him, for he protected it. For समास see Malli Qual. बहिरुद्यानम्।

7. विबुध &c.—विबुधानां (देवानां) वनिताः, ६तत्—। विबुधवनिता means अप्सरस् of heaven. ता एव वारमुख्याः कर्मधा—। ताः सहायाः एषाम्, बहु—। They were wealthy, hence no wonder that the yakshas enjoyed divine prostitutes. Qual. कामिनः।

8. बद्धालापाः—आ + लप + घञ् भावे = आलाप chat. बद्धः आलापः यैः, बहु—। तैः। Qual. कामिनः।

9. निर्विशन्ति—निर् + विश + लट् अन्ति। Enjoy. Nom. कामिनः। निर् + विश means to enjoy, cp "क्रीड़ारसं निर्विशतीव बाल्ये"—Kumara.

10 Voice.—...अन्तर्भवननिधिभिः—सहायैः बद्धालापैः कामिभिः निर्विश्यते...।

## *76. Path of women hastening to keep their tryst.*

गत्युत्कम्पादलकपतितैर्यत्र मन्दारपुष्पैः  
पत्रच्छेदैः कनककमलैः कर्णविभ्रंशिभिश्च।  
मुक्ताजालैः स्तनपरिसरच्छिन्नसूत्रैश्च हारै-  
र्नैशो मार्गः सवितुरुदये सूच्यते कामिनीनाम्॥ ७६॥

Prak.—यत्र सवितुः उदये कामिनीनां नैशो मार्गः सूच्यते [At sun rise we can infer there the course, women followed the previous night

to keep their tryst ]. How is it indicated ?—गत्युत्कम्पात् अलक-पतितैः मन्दारपुष्पैः [ Their moving gait let Mandara flowers drop from their locks of hairs. And these marked their way ]. This may be an accidental sign !—पत्रच्छेदैः [ They use new fresh twigs as decorations. These fallen from their usual places were an additional indication ]. Is this all ?—कर्णविस्रंसिभिश्च कनककमलैः [ The golden lotuses they use at their ears also fell down and indicated their nocturnal path ]. They are careless surely—मुक्ताजालैः ( सूच्यते ) [ yes ; their pearl strings also slipped down during their journey ]. Inference is all right then—स्तनपरिसरच्छिन्नसूत्रैः हारैश्च सूच्यते [ Their necklaces broken in their haste, over their breasts and fallen on the ground also clearly indicated their nocturnal way ].

Prose.—यत्र सवितुः उदये कामिनीनां नैशः मार्गः—गत्युत्कम्पात् अलकपतितैः मन्दारपुष्पैः, पत्रच्छेदैः, कर्णविस्रंसिभिः कनककमलैश्च, ( तथा ) मुक्ताजालैः ( एवं ) स्तनपरिसरच्छिन्नसूत्रैः हारैश्च सूच्यते ।

Beng.—সেখানে সূর্য্যোদয় হইলে রমণীগণের নৈশ পথ—গতিরকম্পহেতু কেশভ্রষ্ট মন্দারপুষ্পদ্বারা, পত্রখণ্ডদ্বারা, কর্ণবিভ্রষ্ট স্বর্ণ পদ্মদ্বারা, মুক্তাসূত্রদ্বারা এবং স্তনতটে ছিন্ন এবং পতিত হারসূত্র দ্বারা—সূচিত হইয়া থাকে।

Eng.—There at sunrise the paths of women taken to keep their tryst, are indicated by Mandara flowers fallen from the hair owing to shaking of gait, also by pieces of twigs, by golden lotuses fallen from their ears, by pearl-strings and by necklaces with the thread broken over their breasts ( and fallen ).

Expl.—See Prak.

Sanj.—गतीति । यत्रालकायां 'कामिनीनाम्' अभिसारिकाणां निशि भवो

'नैश: मार्गः सवितुः उदये' सति 'गत्या' गमनेन 'उत्कम्पः' चलनं तस्मात् हेतोः 'अलकेभ्यः पतितैः मन्दारपुष्पैः' सुरतरुकुसुमैः। तथा 'पत्राणां' पत्रलतानां 'छेदैः' खण्डैः पतितैरिति शेषः। तथा 'कर्णेभ्यः विभ्रंशिभिरिति तैः' 'कनकस्य कमलैः' [ षष्ठ्या विवक्षितार्थलाभे सति मयटा विग्रहे अध्याहारदोषः। एवमन्यत्राप्यनुसन्धेयम्। ] तथा 'मुक्ताजालैः' मौक्तिकसरैः शिरोनिहितैः इत्यर्थः। तथा 'स्तनयोः परिसरः' प्रदेशः तत्र 'छिन्नानि सूत्राणि येषां तैः 'हारैः' च सूच्यते' ज्ञाप्यते। मार्गपतितमन्दारकुसुमादिलिङ्गैरयमभिसारिकाणां पन्था इत्यनुमीयते ॥ ७६ ॥

## Notes on Malli.

1. The wished for meaning being got with a ६तत्—( in cases like कनककमल &c ), breaking of the comprund with a मयट् in the पू०पद ( e. g., कनकमयं कमलम् &c. ) is faulty of superfluity in the shape of अध्याहार। This is to be seen everywhere.

## Charcha.

1. गत्युत् &c.—उद् + कम्प + घञ् भावे = उत्कम्प shaking. गतेः उत्कम्पः ६तत्—। तस्मात्। हेतौ ५मी।

2. अलक &c.—पत + क्त कर्त्तरि = पतित fallen. अलक lock of hair. अलकेभ्यः पतितानि, ६तत्—। तैः। Qual. मन्दारपुष्पैः।

3. मन्दारपुष्पैः, पत्रच्छेदैः:—These take अनुक्ते कर्त्तरि ३या। The females use मान्दारपुष्प नवकिसलयखण्ड etc. for decoration.

4. कर्ण &c.—कर्णेभ्यः विभ्रंशिभिरिति कर्ण + वि + भ्रंश + णिनि कर्त्तरि साधुकारिणि = कर्णविभ्रंशिनः dropping from ears. तैः। Qual. कनककमलैः। These कनककमल served as ear-drops, Golden lotuses perhaps grow in the lakes of Alaka. For Alaka was the

abode of Kuvera. Manasa and Himalaya are hot-heds of हैमपद्म ; cp "सप्तर्षिहस्तावचितहैमपद्मम्"—Raghu.

5. स्तन &c.—परिसर is margin. स्तनस्य परिसरः ६तत्— । तत्र छिन्नः ( torn ), सुप्सुपा— । तादृशं सूत्रमस्य, बहु— । तैः । Qual. हारैः । The females were hastily hurrying to the place of tryst. And in their rush the necklaces on the breast tore off and fell down. This was an indication of their नैशमार्ग । हारैः &c.—has अनुक्ते कर्त्तरि ३या as before.

6. सूच्यते—सूच + णिच् ( चुरादि ) + लट ते कर्मणि । Agrees with उक्तकर्म—मार्गः । Thus—हाराः मार्गं सूचयन्ति becomes हारैः मार्गः सूच्यते in the कर्मवाच्य ।

7. उदये—उद + इ + अच् भावे = उदयः rise. तस्मिन् । भावे ७मी by the rule "यस्य च भावेन भावलक्षणम्" ।

8. Voice.— —पतितानि पुष्पाणि...छेदाः...कमलानि...—जालानि... चित्रसूत्रा हाराश्च नैशं मार्गं सूचयन्ति ।

## 77. *Works of females in the outer gardan of Alaka.*

**मत्वा देवं धनपतिसखं यत्र साक्षाद्वसन्तं**
**प्रायश्चापं न वहति भयान्मन्मथः षट्पदज्यम् ।**
**सभ्रूभङ्ग प्रहितनयनैः कामिलक्ष्यष्वमोघै-**
**स्तस्यारम्भश्चतुरवनिताविभ्रमैरेव सिद्धः ॥ ७७ ॥**

**Prak**.—Easy.

Prose.—यत्र मन्मथः धनपतिसखं देवं साक्षात् वसन्तं मत्वा षट्पदज्यं चापं न

बहति। सभ्रूभङ्गप्रहितनयनैः कामिलक्ष्येषु अमोघैः चतुरवनिताविभ्रमैरेव तस्य आरम्भः सिद्धः।

Beng.—সেখানে কামদেব, কুবেরের বন্ধু মহাদেব স্বয়ং বাস করিতেছেন জানিয়া ভয়েতে অলিপঙক্তিরূপ গুণযুক্ত ধনু বহন করে না। কিন্তু তদীয় কার্য্য, ভ্রূভঙ্গির সহিত প্রেরিত নয়ন এবং কামিজনরূপ লক্ষ্যেতে অব্যর্থ সেই চতুরবনিতাদের হাবভাবেই সাধিত হইয়া থাকে।

Eng.—There Cupid knowing Siva, the friend of Kuvera as himself dwelling there, does not through fear carry his bow which has bees for its string. His work is performed by the sports of expert ladies,—sports which have glances, directed with frowns and which are infallible to lovers as mark.

Expl.—Easy. This verse also has reference to the outer garden. The poet says that there the sportive women attract and win all ; for this, natural beauties have nothing to do.

Sanj.—मत्वेति। 'यत्र' अलकायां 'मन्मथः' कामः धनपतेः कुवेरस्य सखा इति 'धनपतिसखः' [ 'राजाहःसखिभ्यष्टच्" ] तं 'देवं' महादेवं 'साक्षात् वसन्तं' सन्निधानात् निजरूपेण वर्त्तमानं 'मत्वा' ज्ञात्वा 'भयात्' भालेक्षणभयात्, 'षटपदा एव ज्या' मौर्वी यस्य तं 'चापं प्रायः' प्राचुर्य्येण 'न वहति' न बिभर्त्ति। कथं तर्हि कार्य्यसिद्धिः अत आह सभ्रुभङ्गेति। 'तस्य' मन्मथस्य 'आरम्भः' कामिजनविजयव्यापारः 'सभ्रूभङ्गप्रहितानि' प्रयुक्तानि 'नयनानि' दृष्टयो येषु तैः तथोक्तैः, 'कामिन एव लक्ष्याणि' तेषु 'अमोघैः' सफलप्रयोगैः इत्यर्थः। मन्मथचापोऽपि क्वचिदपि मोघः स्यात् इति भावः। 'चतुराश्च ता वनिताश्च' तासां 'विभ्रमैः' विलासैरेव 'सिद्धः' निष्पन्नः॥ यदर्थकरं पाक्षिकफलञ्च तत्प्रयोगात् वरं निश्चितसाधनप्रयोग इति भावः।१ ॥ ৭৭ ॥

## Notes on Malli.

1. The sense is, it is better to apply the infallible than to apply what is conducive to danger and has partial success only.

## Charcha.

1. धनपति &c.—धनानां पतिः, ६तत्—। This is a name of Kuvera. तस्य सखा इति धनपतिसखि+टच् (अ) समासान्त=धनपतिसखः friend of Kuvera i. e., Mahadeva. समासान्त comes by "राजाहः-सखिभ्यष्टच्"। तम्। Qual. देवम्।

2. साक्षात् &c.—This word is an अव्यय meaning स्वयम् here. प्रकृत्यादित्वात् ३या। Qual. वसन्तम्। वस+शतृ=वसत् living. तम्। Pred to देवम्। Siva was living there through affection for Kuvera.

3. प्रायः—An अव्यय meaning बाहुल्येन। Qual. वहति।

4. भयात्—हेतौ ५मी। The allusion is to the story that once Cupid was reduced to ashes by the fire of Siva's third eye. Hence the fear.

5. षटपद &c—षट पदानि अस्य इति षटपदः bee. बहु,। षटपदा एव ज्या (गुणः) यस्य, बहु—। तत्। Qual. चापम्। It is said that rows of bees is the string of cupid's bow, cp—"अलिपङ्क्तिरनेकशस्तया गुणकृत्ये धनुषि नियोजिता"—Kumar. This is said so parhaps because these are the natural beauties and exciting causes of the passionate.

6. सभ्रू &c.—सभ्रूभङ्गं प्रहितानि (प्रयुक्तानि), सुप् सुपा। तादृशानि नयनानि येष, बहु—। तैः। Qual. विभ्रमैः। Such sportive postures of females are regardea as very effective to win the passionate, hence विभ्रमs are said as "कामिलक्ष्येषु अमोघैः"।

7. चतुर &c.—विभ्रम is विलास sportive poses. चतुरवनितानां विभ्रमाः, ६तत्—। तैः। करणे ३या। Sports of ladies are ever effective to the gallants. See also Malli.

8. सिद्धः—सिध + क्त कर्त्तरि = सिद्ध done. Nom. आरब्धः। अकर्म-कत्वात् कर्त्तरि क्तः।

9. एव—It indicates 'certainty.' See Malli "यदनर्थकं" &c.

10. Voice.—मन्मथेन...उह्यते...आरब्धं च सिद्धम् ( or सिध्यते न भुयते )।

## *78. Kalpa-tree at Alaka produces all decorations.*

वासश्चित्रं मधु नयनयोर्विभ्रमादेशदक्षं
पुष्पोद्भेदं सह किसलयैर्भूषणानां विकल्पान्।
लाक्षारागं चरणकमलन्यासयोग्यञ्च यस्या-
मेकः सूते सकलमबलामण्डनं कल्पवृक्षः॥ ७८॥

Prak—Very easy.

Prose.—यस्यां एकः कल्पवृक्षः, चित्रं वासः ( वसनं ), नयनयोः विभ्रमादेशदक्षं मधु ( मद्यम् ), किसलयैः सह पुष्पोद्भेदं भूषणानां विकल्पान्, चरणकमलन्यासयोग्यं लाक्षारागम ( इति ) सकलम् अबलामण्डनं सूते।

Eng.—There a single Kalpa true only produces all the decorations of females, e. g., coloured apparels, wine skilled in teaching sportive glances of eyes, blooming of flowers with tander shoots, variety of ornamants and lae capable of dying the lotus-like feet with.

**Expl.—Easy.**

Sanj.—वास इति। 'यस्याम' अलकायां चित्र" नानावर्णं 'वासः' वसनं—परि-धानमण्डनमित्यर्थः। 'नयनयोः विभ्रमाणाम् आदेशे दक्षं—अनेन विभ्रमकारी मधुनो मण्डनत्वमनुसन्धेयम—'मधु' मद्यम्। एतच्च मण्डनं देहधार्य्यं ऽन्तर्भाव्यम्। 'किसलयैः' पल्लवैः सह 'पुष्पोद्भेदम्' उभयञ्च इत्यर्थः। इदन्तु कर्णधार्य्यम्। 'भूषणानां विकल्पान्'

विशेषान्—द्विधाध्येमितम्। तथा 'चरणकमलन्यासस्य समर्पणस्य 'योग्य'', रज्यते अनेन इति 'रागः' रञ्जकद्रव्यं, लाक्षैव रागः तं 'लाक्षारागञ्च'। चकारः अङ्गरागादि-विलेपनमण्डनोपलक्षणार्थः। 'सकलं' सर्वं चतुर्विधमपीत्यर्थः. 'अबलामण्डनं' योषित्-साधनजातम् 'एकः कल्पवृक्षः' एव 'सूते, जनयति। न तु नानासाधनसम्पादनप्रयास इत्यर्थः ॥ ७८ ॥

## Charcha.

1. वासः—वासस् germent. तत्। Same case with अबलामण्डनम् See our Prose. Similarly parse—मधु, पुष्पोद्भेदं, विकल्पान्, लाक्षारागम्। अबलामण्डनम् is obj. to सूते।

2. मधु—Malli takes मधु to mean मद्य ( wine ). It is under fury of wine that amorous dalliances shine all the more. Hence it is विभ्रमादेशदक्षम्। See also Malli.

3. चरण &c.—चरणं कमलमिव, उपमितसमासः। Next see Malli. Qual. लाक्षारागम्।

4. सूते—सू ( अद् दि ) + लट् ते। Nom. कल्पवृक्षः।

5. Voice—एकेन कल्पवृक्षेण—...पुष्पोद्भेदः...विकल्पाः...योग्यः लाक्षारागः इति सकलम् अबलामण्डनं सूयते।

### *78 A. Horses &c, at Alaka.*

पत्रश्यामा दिनकरहयस्पर्धिनो यत्र वाहाः
शैलोदग्रास्त्वमिव करिणो वृष्टिमन्तः प्रभेदात्।
योधाग्रण्यः प्रतिदशमुखं संयुगे तस्थिवांसः
प्रत्यादिष्टाभरणरुचयश्चन्द्रहासव्रणाङ्कैः ॥

N .B.—The पार्श्वाभ्युदय reads it and so it is probably authentic though Malli does not recognise it. It is in style Kalidasian

surely. Again in describing the superhuman सम्पत् of Alaka, it is befitting that horses, warriors &c. there should also be described.

Prose.—यत्र पत्रश्यामाः वाहाः दिनकरहयस्पर्धिनः' (भवन्ति)। (तथा) शैलोदग्राः करिणः प्रभेदात् (मदस्रावात् हेतोः) त्वमिव वृष्टिमन्तः। योधाग्रण्यः संयुगे प्रतिदशमुखं तस्थिवांस (स्थितवन्तः—तिष्ठतेः लिटः स्थाने क्वसुः) अतः, चन्द्रहासव्रणाङ्कैः (रावणासिचिह्नैः) ते प्रत्यादिष्टाभरणरुचयश्च (भवन्ति)। [अतः सत्यमुच्यते शस्त्रप्रहारा एव वीराणां भूषणम्]।

### 79. *Yaksha's own house north of Kuvera's palace.*

तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्द्धितो मे
हस्तप्राप्यस्तवकनमितो बालमन्दारवृक्षः ॥ ७८ ॥

Prak.—Easy.

Prose.—तत्र धनपतिगृहात् उत्तरेण (उत्तरस्मिन्भागे) अस्मदीयम् अगारं सुरपतिधनुश्चारुणा तोरणेन (उपलक्षितं) अत दूरात् लक्ष्यम्। यस्य उपान्ते मे कान्तया वर्द्धितः (अतः) कृतकतनयः हस्तप्राप्यस्तवकनमितः बालमन्दारवृक्षः (विद्यते)।

Beng.—সেখানে কুবেরের গৃহের উত্তর ভাগে ইন্দ্রধনুর ন্যায় মনোরম তোরণে উপলক্ষিত আমার গৃহ দূর হইতে দেখিবে। ঐ গৃহের প্রান্তে আমার প্রিয়াকর্ত্তৃক বর্দ্ধিত (সুতরাং) পুত্রতুল্য ক্ষুদ্র মন্দার গাছ আছে। গাছটী হস্তপ্রাপ্য পত্রপুষ্পাদির স্তবকভারে বিনমিত।

Eng.—There on the north of Kuvera's palace you will from a distance find our abode marked with gate as beautiful as the rainbow. Near it there is a young Mandara plant reared by

my darling ( hence ) taken as a child ; the plant is bent down by the weight of bunches ( of twigs and flowers ), to be got by hand.

Expl.—Easy.

Sanj.—इत्यमलकां वर्णयित्वा तत्र स्वभवनस्य अभिज्ञानमाह—तत्रेति। 'तत्र' अलकायां 'धनपतिगृहान्' कुबेरगृहान् 'उत्तरेण' उत्तरस्मिन् अदूरदेशे [ "एनबन्यतरस्याम् अदूरेऽपञ्चम्याः" इत्येनप्प्रत्ययः। "एनपा द्वितीया" इति द्वितीया। "गृहाः पुंसि च भूम्न्येव" इत्यमरः ] अस्माकमिदम् अस्मदीयं [ "वृद्धाच्छः" इति पक्षे छ-प्रत्ययः] 'अगारं गृहं 'सुरपतिधनुश्चारुणा' मणिमयत्वात् अनेकवर्णत्वाच्च इन्द्रचापसुन्दरेण 'तोरणेन 'दूरात् लक्ष्य" दृश्यम्, अनेन अभिज्ञानेन दूरत एव ज्ञातुं शक्यमित्यर्थः। अभिज्ञानान्तरमाह—'यस्य' अगारस्य 'उपान्ते' प्राकारान्तःपार्श्वदेशे 'मे' मम 'कान्तया वर्द्धितः' पोषितः 'कृतकतनयः' कृत्रिमसुतः पुत्रत्वेन अभिमन्यमान इत्यर्थः। हस्तप्राप्यैः हस्तावचेयैः 'स्तबकैः' गुच्छैः 'नमितः' ["स्याद्गुच्छकस्तु स्तबकः" इत्यमरः ] 'बालो मन्दारवृक्षः' कल्पवृक्षः अस्तीति शेषः ॥ ७९ ॥

## Charcha.

1. धनपति &c.—धनपतेः गृहाः, इतत्—। तान्। The word गृह is plural when masculine. See Malli. Also comp. "प्रेषिता हि स्वगृहान् महाराजेन"—Uttar. II. द्वितीया in connection with the एनप्-प्रत्ययान्त word उत्तरेण। षष्ठी is also correct here. Cp. also—"अये दक्षिणेन वृक्षवाटिकाम् आलाप इव श्रूयते"—Sak. I.

2. उत्तरेण—उत्तरस्मिन् अदूरे देशे इति उत्तर + ङि (७मी) + एनप् स्वार्थे = उत्तरेण on the north. The word is treated as an अव्यय। See Malli also. We prefer the reading—"धनपतिगृहादुत्तरेण—" where उत्तरेण ( instrumental singular of उत्तर ) qualifies तोरणेन। Construe—तत्र अस्मदीयमगारं धनपतिगृहादुत्तरेण &c. Bhattoji also says—"उत्तरेण इति तृतीयान्ततोरणेन इत्यनेन सामानाधिकरण्यं बोद्धव्यम्"। This

reading also well expresses that the अगार was on the north of Kuvera's palace facing it. Thus the अगार was facing south, hence it was all right in accordance to the sastric injunction of erecting palaces.

3. दूरात्—ल्यप्लोपे अधिकरणे पञ्चमी। Thus दूरात्=दूरे स्थित्वा।

4. लक्ष्यम्—लक्ष+णिच्+यत् कर्मणि=लक्ष्यम् is to be noticed. Agrees with—अगारम्।

5. सुरपति &c.—सुरपति is Indra. तस्य धनुः, rainbow, ६तत्—। तदिव चारु—उपमानसमास by "उपमानानि सामान्यवचनैः"। Witness घनश्याम—Sak. तेन। Qual. तोरणेन (which has उपलक्षणे तृतीया by "इत्थम्भूतलक्षणे")। The तोरण looked so owing to the variety of gems with which it was studded. See Malli also.

6. कृतक &c.—कृत एव इति कृत+कन स्वार्थे=कृतक artificial, adopted, कृतकः तनयः, कर्मधा—। Qual मन्दारवृक्षः। कृतक may appear either as विशेष्य or विशेषण। Thus पूर्वनिपात is unrestricted. Cp—"सोऽयं न पुत्रकृतकः पदवीं मृगस्ते"—Sak. IV. "अपत्यकृतिकां राज्ञे लोमपादाय यां ददौ"—Uttar. I. The Mandara tree was like an adopted son.

7. हस्त &c —हस्तेन प्राप्याः, ३तत्—। तादृशाः स्तवकाः (bunches), कर्मधा—। तेन नमितः, ३तत्—। Qual. बालमन्दारवृक्षः (which is nom. to वर्तते understood). This was a sign whereby to recognise his abode. नमित is got with क्त added to णिजन्तनमधातु। नामित is an optional form.

8. Voice.—अस्माभिः अगारेण लक्ष्येण भूयते...—तनयेन वर्धितेन...—स्तवकनमितेन वृक्षेण इयते वा भूयते...।

9. Remark—The reading यक्षोद्याने for यक्षोपान्ते is more direct and suits better.

### 80. *Attractiveness of the* अगारः

वापी चास्मिन्मरकतशिलाबद्धसोपानमार्गा
हैमैश्छन्ना विकचकमलैः स्निग्धवैदूर्य्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥१५॥

Prak.—Easy.

Prose.—अस्मिन् मरकतशिलाबद्धसोपानमार्गा ( तथा ) स्निग्धवैदूर्य्यनालैः हैमैः विकचकमलैः छन्ना वापी च ( भवति ) । तस्याः ( वाप्याः ) तोये कृतवसतयः हंसाः त्वां प्रेक्ष्य अपि व्यपगतशुचः सन्निकृष्टं मानसं न अध्यास्यन्ति ।

Beng.—আমাদের বাটীতে একটী বাপী আছে। তার ধাপ মরকতমণিদ্বারা রচিত এবং উহা স্নিগ্ধবৈদূর্য্যমণির নালযুক্ত স্বর্ণময় প্রস্ফুটিত পদ্মে ব্যাপ্ত। তার জলে বাস করিয়া হংসগণ তোমাকে (মেঘকে) দেখিয়াও শোকমুক্ত হইয়া সমীপবর্ত্তী মানস সরোবরে যাইতে উৎকণ্ঠিত হইবে না।

Eng.—In our abode there is a pool whose flight of steps are made of emerald stones and which is pervaded with golden blooming lotuses, the stalks whereof are of glossy sapphire ; residing in its water the swans freed of their sorrow, will not even at your sight yearn after the neighbouring Manasa Lake.

Expl.—The pool in the Yakshasa's abode was so very beautiful that even swans will not quit it at the advent of of clouds even ; though in rainy season Manasa serves as their favourite haunt.

Sanj.—पुनरभिज्ञानान्तरमाह चतुर्भिः—वापीति । 'अस्मिन्' मदीये अगारे 'मरकतशिलाभिः बद्धः सोपानमार्गः' यस्याः सा तथोक्ता, विदूरे भवा वैदूर्य्याः [ "विदूराञ्ञ्यः" इति ञ्यप्रत्ययः ] वैदूर्य्याणां विकाराः वैदूर्य्याणि [ विकारार्थे अण् प्रत्ययः ] 'स्निग्धानि वैदूर्य्याणि नालानि' येषां तैः 'हैमैः' सौवर्णैः 'विकचकमलैः छन्ना'

वापी च' अस्तीति शेषः। 'यस्याः' वाप्याः 'तोये कृतवसतयः' कृतनिवासाः 'हंसाः त्वां' मेघं प्रेक्ष्यापि व्यपगतशुचः' वर्षाकालेऽपि व्यपगतकलुषजलत्वात् वीतदुःखाः सन्तः 'सन्निकृष्ट'' सन्निहितं सुगमनपीत्यर्थः। 'मानसं न आध्यास्यन्ति' नोत्कण्ठया स्मरिष्यन्ति [ "आध्यानमुत्कण्ठास्मरणम्" इति काशिकायाम् ( ? काशिका ) ] ॥ ८० ॥

## Charcha.

1. अस्मिन्—Refers to अगार of यक्ष। अधि ७मी।

2. मरकत &c.—मरकतस्य शिलाः stones of emerald, ताभिः बद्धः paved with emerald-stone, ३तत्—। तादृशः सोपानमार्गः यस्याः, बहु—। Qual. वापी। The epithet suggests super-excellent beauty of the pool.

3. छन्ना—छद+णिच्+क्त कर्मणि स्त्रियाम्=छन्ना pervaded, covered. Qual. वापी।

4 विकच &c.—विकच is blooming. तादृशानि कमलानि, कर्मधा—। तैः। अनुक्ते कर्त्तरि ३या, the verb is in छन्ना।

5. स्निग्ध &c.—विदूर is the place where this gem is got; hence it is called वैदूर्य। Cp "विदूरभूमिर्नवमेघशब्दात् उद्भिन्नया रत्नशलाकयेव"—Kum. I. वैदूर्याणां विकाराः वैदूर्य+अण्=वैदूर्याणि made of वैदूर्यमणि ( sapphire ). स्निग्धानि वैदूर्याणि नालानि येषाम्, बहु—। तैः। Qual. कमलैः। See Malli also. These epithets show that here also as in *Manasa* there were plenty of golden lotuses.

5. कृत &c—वस+क्तिन् भावे=वसति resideuce. कृता वसतिः यैः। बहु—। तै। Qual. हंसाः।

6. आध्यास्यन्ति—आ+ध्यै+लृट स्यन्ति। Nom. हंसाः। आध्यान is "yearning eagerly". See Malli also. Malli's इति काशिकायाम् should be इति काशिका।

8. व्यपगत &c—वि+अप+गम+क्त कर्त्तरि=व्यपगता gone. शुच+क्विप् भावे=शुच् grief. व्यपगता शुक् एषाम्, बहु—। Pred. to हंसाः। In the rainy season the swans all flock to Manasa, for everywhere else the water is turbid. But here the swans will not quit this pool though rain sets in, for the water of the pool is ever transparent and charming here. Thus during their stay here they are व्यपगतशुचः even seeing rains ( त्वां प्रेक्ष्य अपि ). Hence अपि implies गर्हा ( disregard ) here.

8. Voice.—...सोपानमार्गया अनया वाप्या भूयते......कृतवसतिभिः हंसैः व्यपगतशुग्भिः सद्भिः...आध्यास्यते ( or—आध्यायिष्यते )।

*81. The cloud imitates the pleasure-hill there.*

तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीड़ाशैलः कनककदलीवेष्टनप्रेक्षणीयः।
मद्गेहिन्या प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततड़ितं त्वां तमेव स्मरामि॥ ८८॥

Prak.—Easy.

Prose.—तस्याः ( वाप्याः ) तीरे पेशलैः ( चारुभिः ) इन्द्रनीलैः रचितशिखरः कनककदलीवेष्टनप्रेक्षणीयः क्रीड़ाशैलः ( अस्ति )। हे सखे, उपान्तस्फुरिततड़ितं त्वां प्रेक्ष्य ( सादृश्यात् तथा ) मद्गेहिन्याः प्रियः इति ( हेतोः ) कातरेण चेतसा तमेव स्मरामि।

Beng.—সেই বাপীর তীরে মনোরম ইন্দ্রনীলমণিতে খচিতাগ্রভাগ এক বিহার পর্বত আছে। উহা স্বর্ণকদলীবৃক্ষের বেষ্টনহেতু দর্শনীয় বটে। হে বন্ধো, চারিধারে বিদ্যুৎ স্ফুরিত হইতে থাকিলে তোমাকে দেখিয়া ( পর্বতের সহিত সাদৃশ্যহেতু ) এবং ঐ পর্বত আমার প্রিয়ার প্রিয় বলিয়া, আমি কাতর চিত্তে সেই পর্বতেরই স্মরণ করিব।

Eng.—On the bank of that pool, there is a pleasure-hill whose top is set with blue-sapphires and which is beautiful having circular golden plantain plants all around ; O friend, at your sight—you being with flashing lightning at the edges, through similarity I remember with a longing mind that very mountain, specially because it was my darling's favourite.

Expl.—The pleasure-hill set with blue sapphires and surrounded by golden plaintain plants will well resemble the blue cloud having circles of flashing lightning at the edges. Thus at the sight of such a cloud the sweet remembrances of the pleasure-hill will come home to yaksha's mind. And this recollection by association of ideas will pain his heart. Hence the poet says—कातरेण चेतसा स्मरामि ।

Sanj.—तस्या इति । 'तस्या' वाप्याः 'तीरे पेशलैः' चारुभिः [ "चारौ दक्षे च पेशलः" इत्यमरः ] 'इन्द्रनीलैः रचितशिखरः' इन्द्रनीलमणिमयशिखर इत्यर्थः 'कनककदलीनां वेष्टनेन' परिवेष्टनेन 'प्रेक्षणीयः' दर्शनीयः 'क्रीड़ाशैलः' अस्तीति शेषः । हे 'सखे', 'उपान्तेषु स्फुरिताः तड़ितः' यस्य तं तथोक्तम् [ इदं विशेषणं कदलीसाम्यार्थमुक्तम्, इन्द्रनीलसाम्यन्तु मेघस्य स्वाभाविकम् इत्यनेन सूच्यते ] 'त्वां प्रेक्ष्य मद्गेहिन्याः प्रिय इति' हेतोः, तस्य शैलस्य मद्गेहिनीप्रियत्वात् हेतोरित्यर्थः । 'कातरेण' भीतेन 'चेतसा' [ भयञ्चात्र सानन्दमेव—"वस्तूनामनुभूतानां तुल्यश्रवणदर्शनात् । स्मरणात् कीर्त्तनाद्वापि सानन्दा भीर्यथा भवेत्" ॥—इति रसाकरे दर्शनात् ] 'तमेव' क्रीड़ाशैलमेव 'स्मरामि' । एवकारो विषयान्तरव्यवच्छेदार्थः [ सदृशवस्त्वनुभवात् इष्टार्थस्मृतिर्जायते इत्यर्थः । अतएवात्र स्मरणाख्योऽलङ्कारः । तदुक्तम् "सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते" इति । निरुक्तकारस्तु—'त्वां तमेव स्मरामि' इति योजयित्वा मेघे शैलत्वारोपमाचष्टे, तत्र—अन्याकारारोपस्य पुरोवर्त्तिन्यनुभवात्मकत्वेन स्मरतिप्रयोगानुपपत्तेः । शैलत्वभावना स्मृतिरित्यपि न उपपद्यते, भावनायाः स्मृतित्वे प्रमाणाभावात्, साहस्यलोपन्यासस्य वैयर्थ्याच्च ; भावयामि इति भावनादर्शनात् इति ] ।

## Notes on Malli.

1. The sense is—recollection of the wished-for arises through a feeling of the similar ; hence the figure here is स्मरण। Thus it is said—"स्मरण is that when there is recollection of another through similarity". The Niruktakara takes this as an instance of रूपक attributing शैलत्व on मेघ—he construes as—"I remember thee as that very mountain." But this is not fair ; because the thing felt before one's eyes being an actual experience can not be identified with one at a distant ; hence also स्मृति is such cases cannot be rightly applied. Nor the explanation "I take you to be that very hill" is right, for स्मृ can not be taken to mean 'taking' or supposing'. Then also mention of likeness will be uncalled for ; because identification of one with a dis-similar thing is also seen, witness the taking of a stone as Hari.

## Charcha.

1. रचित &c—रचितः शिखरः (अग्रभागः) अस्य, बहु—। Qual. क्रीडाशैलः। The reading विच्छितशिखरः does not commend itself. The Hill had abundance of इन्द्रनील stones on its summit. Hence it is called इन्द्रनीलैः रचितशिखरः। इन्द्रनीलैः taking अनुक्ते कर्त्तरि ३या। The hill being इन्द्रनीलरचित, it very well imitated the blue cloud,

2. कनक &c—वेष्ट + ल्युट् भावे = वेष्टन circle, (परिधि)। कनककदल्याः वेष्टनम्, इतत्—। तेन प्रेक्षणीयः, इतत्—। Qual. क्रीडाशैलः। For प्रेक्षणीय see परिगणनप्रेक्षणीयम्—sl. 2. This epithet keeps up correspondence with उपान्तस्फुरिततडितम् (as applied to मेघ) and finishes the simile. See also Malli—इदं विशेषणं कदलीसाम्यार्थम् &c.

3. इति—An अव्यय implying हेतु here. "इति हेतौ:"—Malli.

4. चेतसा—करणे इया। All स्मरण is चेतसा ; why then mention चेतसा here ?—इन्द्रियेन स्मृति being impossible. The poet seems to mean—मम चित्तं कातरं (सत्) स्मरति, न तु अहं स्मरामि। Malli has—कातरेण भीतेन &c.—The भय 'being a nervonsness through joy'. See his quotation.

5. प्रेक्ष्य—प्र + ईक्ष + ल्यप्। Having seen.

6. उपान्त &c.—उपान्त edge. उपान्तेषु स्फुरिता: सुट्सुपा—। तादृश्य: तडित: यस्य, बहु—। तम्। Qual. त्वाम्।

7. स्मरामि—स्मृ + लटमि। Nom. अहम्। सस्मार, अस्मार्षीत्, स्मरिष्यति। The reasons of स्मरण are—(i) similarity and (ii) it being प्रिय to my गेहिणी।

8. Voice.—रचितशिखरेण शैलेन...—प्रेक्षणीयेन भूयते...स मया स्मर्यते...।

### 82. *I yearn for my beloved.*

रक्ताशोकश्चलकिसलय: केसरश्चात्र कान्त:
प्रत्यासन्नौ कुरवकवृतेर्माधवीमण्डपस्य।
एक: सख्यास्तव सह मया वामपादाभिलाषी
काङ्क्षत्यन्यो वदनमदिरां दोहदच्छद्मनास्या: ॥ ८२ ॥

Prak.—Easy.

Prose.—चलकिसलय: रक्ताशोक:, कान्त: केसरश्च (बकुलश्च), अत्र (क्रीडाशैले) कुरवकवृते: (कुरवकावरणस्य) माधवीमण्डपस्य प्रत्यासन्नौ। एक: मया सह तव सख्या: वामपादाभिलाषी। अन्य: (बकुल:) दोहदच्छद्मना अस्या: वदनमदिरां काङ्क्षति।

[ N. B.—Construe मया सह also in the last half of the verse here thus—अन्य: मया सह...सख्या वदनमदिरां काङ्क्षति—See Malli. ]।

Beng.—সেই বিহারপর্বতে কুরবকবেষ্টিত মাধবীমণ্ডপের সন্নিকটে কম্পমানপল্লবযুক্ত রক্তাশোক এবং মনোরম বকুলগাছ আছে। আমার ন্যায়, রক্তাশোক তোমার সখীর বামচরণাঘাত প্রার্থী এবং অপরটী ( অর্থাৎ বকুল ) দোহদচ্ছলে আমার ন্যায়, তার বদন-মদিরার আকাঙ্ক্ষা করে।

Eng.—There near the Jasmine-bower surrounded by a hedge of Kuravaka plant, stand the red Asoka with its moving twigs, and the beautiful Vakul. One ( i. e., Asoka ) like me, longs after your friend's left foot, and the other ( Vakul ) is desirous of her sip of wine in the mouth under the pretext that thus will they bloom.

Expl.—Easy. ( See Notes also ).

Sanj.—रक्तेति। 'अत्र' क्रीड़ाशैले 'कुरवका एव वृति:' आवरणं यस्य तस्य, मधौ वसन्ते भवा 'माधव्य:', तासां 'मण्डप:' तस्य अतिमुक्तलतागृहस्य [ "अभिमुक्त पुण्ड्रक: स्याद्वासन्ती माधवीलता" इत्यमर: ] 'प्रत्यासन्नौ' सन्निकृष्टौ ; 'चलकिसलय:' चञ्चलपल्लव: [ अनेन वृक्षस्य पादताड़नेषु प्राञ्जलित्वं व्यज्यते ] 'रक्ताशोक:' [ रक्त-विशेषणं तस्य स्मरोद्दीपकत्वात् उक्तम्। प्रसूनकै: अशोकस्तु श्वेतो रक्त इति द्विधा। "वहुसिद्धिकर: श्वेतो रक्तोऽत्र स्मरवर्द्धन:" इति अशोककल्पे दर्शनात् ] 'कान्त:' कमनीय: 'केसरो' वकुलश्च [ "अथ केशरे वकुलो वञ्जुल" इत्यमर: ] स्त: इति शेष:। 'एक:' तयोरन्यतर: प्राथमिकत्वात् अशोक इत्यर्थ: 'मया सह तव सख्या:' स्वप्रियाया इत्यर्थ:। 'वामपादाभिलाषी' ; दोहदच्छद्मना'—इति अत्रापि सम्बन्धनीयम्। 'अन्य:' केसर:, 'दोहदं' वृक्षादीनां प्रसवकारणं संस्कारद्रव्यम् [ "तरुगुल्मलतादीनामकाले कुशलै: कृतम्। पुष्पाद्युत्पादकं द्रव्यं दोहदं स्यात्तु तत्क्रिया"—इति शब्दार्णव: ] 'छद्मना' व्याजेन [ "कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे" इत्यमर: ] 'अस्या:' तव सख्या: 'वदनमदिरां' गण्डूषमद्यं 'काङ्क्षति' [ 'मया सह' इत्यत्रापि सम्बन्ध-नीयम् ]। अशोकवकुलयो: स्त्रीपादताड़नगण्डूषमदिरे दोहदमिति प्रसिद्धि:।।

[ स्त्रीणां स्पर्शात् प्रियङ्गुर्विकसति, बकुलः सीधुगण्डूषसेकात्, मन्दारो नर्मवाक्यात्, पटुमृदुहसनाच्चम्पको, वक्त्रवाताच्चूतो, गीतान्नमेरुर्विकसति, च पुरोनर्तनात् कर्णिकारः ] ॥ ८२ ॥

## Notes on Malli.

1. It is well-known that Asoka and Vakula trees' preparation to blooming is respectively, strike by feminine foot and sip of wine of their mouth.

## Charcha.

1. चलकिसलयः—किसलय is twig. चलतीति चलः ( पचाद्यच् ), चलः किसलयः यस्य, बहु—। Qual. रक्ताशोकः। The epithet suggests attitude to have पादाघात of a lady. See Malli also.

2. च—च indicates समुच्चय of the two nominatives; hence the verb ( प्रत्यासन्नौ ) is in the dual.

3. प्रत्यासन्नौ—प्रति + आ + सद् + क्त कर्तरि ( अकर्मकत्वात् ) = प्रत्यासन्नौ close at hand. Both रक्ताशोकः and केसरः together are nominatives. Malli takes this as qualifying—Asoka &c. But the above construction is preferable.

4. कुरवकवृतेः—वृ + क्तिन् भावे = वृतिः encircling, covering. कुरवकाः वृतिः ( आवरणम् ) यस्य, बहु—। तस्य। Qual. माधवीमण्डपस्य ( which has षष्ठी शेषे )। See Malli also.

5. एकः—Refers to रक्ताशोकः। Nom. to भवति understood.

6. तव सख्याः—By this यक्ष refers to his own wife.

7. वामपाद &c.—वामपादम् अभिलषतीति वामपाद + अभि + लष + णिनि कर्तरि ताच्छील्ये = वामपादाभिलाषी। Pred to एकः। In the case of

अशोक ; वामपाद—means वामपादाघात ; for it is well-known that strike by a feminine left foot sets Asoka to blossom. In case of yaksha, the epithet suggests his desire to have the privilege of shampooing her legs—cp—"अङ्के निधाय करभोरु यथासुखं ते संवाहयामि चरणावुत पद्मताम्रौ"—Sak. III. Thus both केसर and यक्ष were वामपादाभिलाषी ।

8. दोहद &c.—दोहनं दोहः ( दुह + घञ् भावे ) । दोहम् आकर्षं ददाति इति दोह + दा + क कर्त्तरि ( by the rule "आतोऽनुपसर्गे कः" ) = दोहदः foetus or desire of a गर्भिणी । "गर्भमात्रेऽपि दोहदम्" इति विश्वः । Bhanuji has "अयमिच्छामात्रवाची अपि विशेषेण गर्भिणीच्छायां प्रयुज्यते" । Here however it means "the संस्कारद्रव्य ( as पादाघात &c ) which puts trees to blossom". See Malli. "दोहदं वृक्षादीनां प्रसवकारणम् &c". दोहदमेव छद्म, कर्मधा— । तेन । हेतौ तृतीया । For दोहद, see also "उपेत्य सा दोहददुःखशीलताम्" &c.—Rag. III. Bhavabhuti goes against Amara &c. and uses दोहद in masculine,—cp "यः कश्चिद्-गर्भदोहदः अस्याः"—Uttar. I.

9. वदनमदिराम्—मदिरा wine. वदनस्य मदिरा, ६तत्— । ताम् । This put Vakula to blossom ; and that the yaksha coveted it is easily inferred. 'मया सह' and दोहदच्छद्मना are to be taken in both the two cases.

10. Voice.—Easy.

11. Remark.—Verbs agreeing with two or more nominatives connected by च, may be either singular or dual, cp.—"आदित्यचन्द्रावनिलोऽनलश्च...उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्" ।

## 83. *Peacock's seat there*

तन्मध्ये च स्फटिकफलका काञ्चनी वासयष्टि-
र्मूले बद्धा मणिभिरनतिप्रौढ़वंशप्रकाशैः ।
तालैः शिञ्जावलयसुभगैर्नर्त्तितो कान्तया मे
यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ॥ ८३ ॥

Prak.—Easy.

Prose.—तन्मध्ये ( वृक्षद्वयमध्ये ) अनतिप्रौढ़वंशप्रकाशैः मणिभिः मूले बद्धा ( वेदिकाकारेण रचिता ) स्फटिकफलका काञ्चनी वासयष्टिः ( अस्ति ) । शिञ्जावलय-सुभगैः तालैः मे कान्तया नर्त्तितः वः सुहृत् नीलकण्ठः दिवसविगमे याम् अध्यास्ते ।

Beng,—অশোক ও বকুল বৃক্ষের মধ্যে স্ফটিকনির্মিত পীঠযুক্ত স্বর্ণের একটী বাসযষ্টি ( বসিবার দণ্ড ) আছে। উহার তলদেশ নবজাতবংশের স্থায় প্রভাবিশিষ্ট মণিতে খচিত। তোমার বন্ধু নীলকণ্ঠ দিনাবসানে ঐ বাসদণ্ডে আস্থান লয়॥ ঐ ময়ূর আমার প্রিয়াকর্ত্তৃক তালযোগে (—যে তাল শব্দায়মান বলয়হেতু মনোরম হয়—তাহা দ্বারা ) নর্ত্তিত হইয়া থাকে।

Eng.—Between those two trees, there is a golden perching staff with a crystal slab on the top, and this perching staff is set at the foot with gems shining like unmatured bamboo. Your friend the peacock, that is being danced by my darling with clappings of hands beautiful owing to jingling of her bracelets, takes at the end of day its seat on that staff.

Expl.—Fasy.

Sanj.—तन्मध्य इति—[ किञ्चेति चार्थः ] 'तन्मध्ये' तयोः वृक्षयोर्मध्ये 'अनति-प्रौढ़ानाम्' अनतिकठोराणां 'वंशानां प्रकाश इव प्रकाशो' येषां तैः, तरुणवेणुसच्छायैः 'मणिभिः' मरकतशिलाभिः 'मूले बद्धा' कृतवेदिका इत्यर्थः । 'स्फटिकं' स्फटिकमयं 'फलकं' पीठं यस्याः सा, काञ्चनस्य विकारः काञ्चनी' सौवर्णी 'वासयष्टिः' वासदण्डः

वक्तीति यः। 'शिञ्जा' भूषणध्वनिः ["भूषणानान्तु शिञ्जितम्" इत्यमरः। भिदादित्वात् अङ्। शिञ्जिधातुरयं तालव्यादिर्नतु दन्त्यादिः] 'शिञ्जाप्रधानानि वलयानि, तैः सुभगा' रम्याः, तैः 'तालैः' करतलवाद्यैः 'मे' मम 'कान्तया नर्त्तितः यः' युष्माकं 'सुहृत्' सखा 'नीलकण्ठः' मयूरः ["मयूरो बर्हिणो बर्ही नीलकण्ठो भुजङ्गभुक्" इत्यमरः] 'दिवसविगमे' सायंकाले 'यां' यष्टिकाम् 'अध्यास्ते' इत्यर्थः ["अधिशीङ्स्थासां कर्म" इति कर्मत्वात् द्वितीया]। ['तत्रागारम्'—इत्यारभ्य पञ्चसु श्लोकेषु समृद्धवस्तुवर्णनात् उदात्तालङ्कारः; तदुक्तम् "तदुदात्तं भवेद्, यत्र समृद्धं वस्तु वर्ण्यते" इति। न च एषा स्वभावोक्तिः भाविकं वा, तत्र यथास्थितवस्तुवर्णनात्। अत्र तु कविप्रतिभोत्थापितसम्भाव्यमानैश्वर्य्यशालिवस्तुवर्णनात् आरोपितविषयत्वम् इति ताभ्यामस्य भेद इति अलङ्कारसर्वस्वकारः। ] ॥ ८३ ॥

## Notes on malli.

1. In the five slokas beginning with तत्रागारम् &c, super-excellent ( superhuman ) things are described, hence the figure is उदात्त। Thus it is said—"There we get उदात्त, where superexcellent facts are narrated." This is not an instance of either स्वभावोक्ति or भाविक, for in these, facts are described as seen in nature ; but here ( in the present case ) the poet by, play of his imagination describes probable super-human facts, hence something is attributed :—Thus it is different from those two figures. This is the view of *Alamkarasarvaswakara.*

## Charcha.

1. तन्मध्ये—अधि अमी। Here तत् refers to things just gone before ( पूर्वपरामर्शित्व ) i. e., it refers to अशोक and बकुल tree of the preceding sloka.

2. स्फटिक &c—फलक is slab ( पीठ ) । Here स्फटिक means 'made of crystal ; स्फटिकं फलकमस्याः, बहु— । Qual. वासयष्टिः ।

3. वासयष्टिः—यष्टि staff. वस+घञ् भावे=वासः perch, sitting. वासस्य यष्टिः perching staff, ६तत्— । Nom. to अस्ति understood.

4. बद्धा—बन्ध+क्त कर्मणि=बद्धा set, paved. Qual. वासयष्टिः । The foot was paved in the form of a dais, with settings of sapphires. See "मूले बद्धा कृतवेदिका" etc.—Malli.

5. अनति &c—प्र+वह+क्त कर्त्तरि=प्रौढ़ mature. Here वृद्धि comes by the Vaittika "प्रादूहोढोढ्येषैष्येषु" । अति अतिशयेन प्रौढाः, प्रादितत् । न अतिप्रौढाः, नञ् तत्— । अनतिप्रौढा वंशाः bamboo not much matured कर्मधा— । Such bamboos verywell rememble blue sapphires. तेषां प्रकाशः ( lustre ) ६तत्— । अनतिप्रौढवंश-प्रकाश इव प्रकाशः एषाम्, बहु—by the varttika "सप्तम्युपमानपूर्वस्य उत्तरपदलोपश्च वक्तव्यः" ( See ante ). तैः । Qual. मणिभिः ( which has करणे ३या ) ।

6. शिञ्जा &c—शिञ्ज+अ भावे स्त्रियाम्=शिञ्जा jingling of ornaments. भिदादित्वात् अङ् । शिञ्ज should begin with a palatal and not dental. See Malli—"शिञ्जा भूषणध्वनिः...न तु दन्त्यादिः" । वलय bracelat. सुभग beautiful. शिञ्जायुक्तानि वलयानि, शाकपार्थिवादि कर्मधा— । तैः सुभगाः, सुप्सुपा— । तैः । Qual. तालैः ( which has करणे ३या ) । Some read here शिञ्जद्वलयसुभगैः ; but शिञ्ज being आत्मनेपदी, शिञ्जत् with शतृ connot be got. A far-fatched defence is—शिञ्ज इव आचरतीति शिञ्जति । Then by शतृ we mayhave शिञ्जत् । This is Vallabha's reading, we however prefer that of Malli,

Vallabha remarks—"चिरेरात्मनेपदित्वात् चिरादिति प्रयोगः प्रमादजः। अनित्यो वा अनुदात्तेत आत्मनेपदविधिः"।

7. नर्त्तितः—नृत+णिच्+क्त कर्मणि=नर्त्तितः caused to dance. अनुक्त कर्त्ता is कान्तया। Qual. नीलकण्ठः।

8. अध्यास्ते—अधि+आस+लट् ते। Nom. नीलकण्ठः। The आधार of अधि+आस becomes कर्म by the rule "अधिशीङ्स्थासां कर्म"। Hence we have—'याम्'।

9. Voice.—वलया...कान्तया वासयष्ट्या भूयते नर्त्तितेन सुहृदा नीलकण्ठेन या अध्यास्यते...।

10. Parallel—compare—"करकिसलयतालैर्मुग्धया नर्त्यमानं सुतमिव मनसा त्वां वत्सलेन स्मरामि"—Uttar. III.

*84. These are characteristics of yaksha's abode.*

एभिः साधो हृदयनिहितैर्लक्षणैर्लक्षयेथाः
द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ च दृष्ट्वा।
क्षामच्छायं भवनमधुना मद्वियोगेन नूनं
सूर्य्यापाये न खलु कमलं पुष्यति स्वामभिख्याम्॥८४॥

**Prak.—Easy.**

**Prose.**—हे साधो, हृदयनिहितैः (मम हृदयस्थैः अर्पितैः तैः स्मृतैः) एभिः लक्षणैः, (तथा) द्वारोपान्ते लिखितवपुषौ शङ्खपद्मौ (पुरुषाकारेण लिखितौ; माङ्गलिकौ तौ) दृष्ट्वा, मद्वियोगेन अधुना नूनं क्षामच्छायं भवनं लक्षयेथाः। कमलं सूर्य्यापाये स्वामभिख्याम् न पुष्यति खलु।

Beng.—হে সাধো, আমার হৃদয়স্থ অবিস্মৃত এই সমুদয় লক্ষণগুলি এবং দ্বারদেশে পুরুষাকারে (মঙ্গলার্থ) লিখিত শঙ্খ ও পদ্ম (মাঙ্গলিক নিধিবিশেষ) দেখিয়া, আমার

## 85. *Cloud is to descend there.*

गत्वा सद्यः कलभतनुतां शीघ्रसम्पातहेतोः
क्रीड़ाशैले प्रथमकथिते रम्यसानौ निषण्णः ।
अर्हस्यन्तर्भवनपतितां कर्त्तुमल्पाल्पभासं
खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् ॥ ८५ ॥

Prak—विद्युदुन्मेषदृष्टिम् अन्तर्भवनपतितां कर्त्तुम् अर्हसि [ Lightning will serve you as your eyes. Thus you will cast into the interior of the home your eyes in the shape of flash of lightning ]. Will not this frighten your darling ?—अल्पाल्पभासम् ( अतः ) खद्योतालीविलसितनिभां दृष्टिम् कर्त्तुमर्हसि [ You will cast your lightning-eyes in a small measure, you will so much diminish it that it will resemble the twinkling ofrows of fire-flies ; thus your such tiny lightning-eye will not frighten her ]. But my size is very big—शीघ्रसम्पातहेतोः सद्यः कलभतनुतां गत्वा त्वम् [ For quick entrance you must diminish your size too ; you make it only as large as a young elephant ] I understand all, but whence shall I cast my vantage-eye ?—प्रथमकथिते रम्यसानौ क्रीड़ाशैले निषण्णः सन् त्वं दृष्टिं कर्त्तुमर्हसि [ Why, sit on that beautiful pleasure Hill and thence cast your eyes into the interior of the room to see my darling ]. 85.

Prose.—शीघ्रसम्पातहेतोः सद्यः कलभतनुतां गत्वा प्रथमकथिते रम्यसानौ क्रीड़ाशैले निषण्णः ( सन् ) त्वम्, अल्पाल्पभासं ( अतः ) खद्योतालीविलसितनिभां विद्युदुन्मेषदृष्टिम् भवनपतितां कर्त्तुमर्हसि ।

Beng—সত্বর প্রবেশ করিবার জন্য তখনই করিশিশুর স্থায় দেহ ধারণ করিয়া

এবং পূর্ব্বকথিত রমণীয় সানুযুক্ত সেই ক্রীড়াপর্ব্বতে উপবিষ্ট হইয়া তুমি অল্পালোকবিশিষ্ট (অতএব) খদ্যোতপংক্তির স্ফুরণের ন্যায় সামান্যকান্তিমান্ বিদ্যুৎস্ফুরণরূপ তোমার দৃষ্টি গৃহাভ্যন্তরে পাতিত করিবে।

Eng.—Immediately for quick entrance assuming the form of a young elephant and seated on that aforesaid pleasure-hill of charming slopes, you will make your glance of lightning-flash of meagre lustre and (hence) equal to the twinkling of fire-flies, cast into the interior of the house.

Expl.—See Prak.

Sanj.—निजगृहनिश्चयानन्तरं कृत्यमाह—गत्वेति। हे मेघ, 'शीघ्रसम्पातं एव हेतुः' तस्य शीघ्रप्रवेशार्थम् इत्यर्थः [ "षष्ठी हेतुप्रयोगे" इति षष्ठी (?)। "सम्पातः पतिते योगे प्रवेशे वेदसम्विदोः" इति शब्दार्णवः ] 'सद्यः' सपदि 'कलभस्य' करिपोतस्य तनुरिव तनुर्यस्य तस्य भावः ताम् अल्पशरीरतां 'गत्वा' प्राप्य 'प्रथमकथिते' तस्यास्तीरे इत्यादिना पूर्वोद्दिष्टे 'रम्ये सानौ' निषदनयोग्ये इत्यर्थः। 'क्रीड़ाशैले निषण्णः' उपविष्टः सन् 'अल्पाल्पा' अल्पप्रकारा 'भाः' प्रकाशो यस्याः तां [ "प्रकारे गुणवचनस्य" इति द्विरुक्तिः ]; 'खद्योतानाम् आली' तस्याः 'विलसितेन' स्फुरितेन 'निभां' समानां 'विद्युदुन्मेषो' विद्युत्प्रकाशः, स एव 'दृष्टिः' तां, भवनस्य अन्तः (?) 'अन्तर्भवनं', तत्र 'पतितां' प्रविष्टां 'कर्त्तुमर्हसि'। यथा कश्चित् किञ्चिदन्विष्यन् क्वचिदुन्नते स्थित्वा शनैः शनैरतितरां द्राघीयसीं दृष्टिम् अष्टदिक्षु पातयति तद्वत् इत्यर्थः। ॥ ८५ ॥

## Notes on Malli.

1. The sense is, this is just like one who seeking after something places himself high on, and thence gradually directs his long glance on all the eight directions.

## Charcha.

8. कलभ &c.—कलभ is a young elephant. तस्य तनुः, इतत्— कलभतनुः इव तनुः यस्य, बहु—by the Varttika "सप्तम्युपमानपूर्वस्य उत्तरपद-

-लोपश्च वक्तव्य:"—see वंशप्रकाशै: ( sl. 83 ) and *ante.* कलभतनौ: भाव इति कलभतनु + तल् = कलभतनुता । ताम् । Obj. of गत्वा । The cloud should reduce itself to the size of an young elephant.

2. शीघ्र &c.—सम् + पत + घञ् भावे = सम्पात fall, entrance. शीघ्रं सम्पात:, सुप्सुपा— । स एव हेतु: । तस्य or तस्मात् । मेघे ६ष्ठी or हेतौ ५मी । हेतु तृतीया is also correct. हेतौ ५मी suits better. Malli defends षष्ठी here by "षष्ठी हेतुप्रयोगे"— ; but the rule has no application here, it would have applied if the words शीघ्रसम्पात and हेतु were separate. For details see विश्रामहेतो: under sl 25.

3. रम्य &c.—सानु slope, summit. रम्य: सानुरस्य, बहु— । तस्मिन् । Qual. क्रीडाशैले । The epithet suggests that the Hill was a fit place to rest on.

4. निषण्ण:—नि + सद + क्त कर्त्तरि = निषण्ण: seated ; pred to त्वम् understood. "सदिरप्रते:" इति षत्वम् । तत: "रषाभ्यां नो ण: समानपदे" इति णत्वम् ; सन्धिना च द्वितीयनकारस्यापि णत्वम् ।

5. अर्हसि—अर्ह + लट सिप् । Nom. त्वम् । भ्रानन्दं, भ्रार्त्तिम् ।

6. भ्रन्तर्भवन &c —पत + क्त कर्त्तरि स्त्रियाम् = पतिता fallen. भवने इति भ्रन्तर्भवनम्, विभक्त्यर्थे भ्रव्ययीभाव: । Or भ्रन्त:स्थितं भवनम् इति भ्रन्तर्भवनम् । तत्र पतिता, सुप्सुपा— । ताम् । Pred to विद्युद्दाम्नि दृष्टिम् । Here the usual reading in Malli is भवनस्य भ्रन्त: । But as he takes this as an भ्रव्ययीभाव, so the use of भ्रन्त: is unnescessary and misleading. Again भवनस्य should be भवनेषु । The भ्रव्ययीभाव is of भवन and भ्रन्तर्, but being विभक्त्यर्थे its equivalent is merely a विभक्त्यन्त word. Thus भवने is sufficient. Hence the reading here ought to be—भवने इति भ्रन्तर्भवनम् । Cp "पदातिरन्तर्गिरि रेणुरूषित:"—Kirat. 1. Sl. 34.

7. अल्पाल्प &c—भासते इति भास् क्विप्=भास् light. अल्पप्रकारा इति अल्पाल्पा—"प्रकारे गुणवचनस्य" इति अल्पशब्दस्य द्वित्वे कर्मधारयवद्भाव:। This is Malli's derivation. But as the cloud will be reduced from a huge size to that of ayoung elephant i. e. less than an elephant even, so the reduction will be very small. Hence derive thus—अल्पात् अल्पा very small सुप्सुपा—। तादृशी भा: अल्पा:, बहु—। ताम्। Qual. विद्युदुन्मेषदृष्टिम्।

8. खद्योत &c.—खेआकाशे द्योतते इति ख+द्युत+अच् कर्त्तरि=खद्योत: fire-fly. तेषाम् आली ( row ), ६तत्—। तस्या: विलसितम् ( flash ) ६तत्—। तेन तुल्या इति खद्योतालीविलसितनिभा, नित्यतत् पुरुष—। Compare Amara's "स्युरुत्तरपदे त्वमी निभसङ्काशनीकाशप्रतिकाशोपमादय:"। ताम्। Qual- दृष्टिम्। As the glance was अल्पाल्पभा:, so its flash will be like that of rows of fire-flies.

9. विद्युत् &c—उद्+मिष+घञ् भावे=उन्मेष flash. विद्युत: उन्मेष:, ६तत्—। स एव दृष्टि: कर्मधा—। ताम्। Obj. of कर्त्तुम्। Cloud's eye will be its flash of lightning.

10. Voice.—निषण्णेन त्वया अर्ह्यते...।

11. Remark.—Some editious read the next three verses immediately after the verse "तत्रागारे रचितशिखर:" &c. ( Sl. 81 ). But in that case the order is unsound. Descriptions of palaces, houses with its token should precede the description of the inmate of the house. Hence we prefer Malli's order and all along follow that.

### *86. Darling's description as she was.*

**तन्वी श्यामा शिखरिदशना पक्वबिम्बाधरोष्ठी**
**मध्ये क्षामा चकितहरिणीप्रेक्षणा निम्ननाभि:।**

श्रोणीभारादलसगमना स्तोकनम्रा स्तनाभ्यां
या तत्र स्याद्युवतिविषये सृष्टिराद्येव धातुः ॥८६॥

[ N. B.—This and the following verse should be taken together ].

Prak.—Easy.

Prose.—तन्वी, श्यामा, शिखरिदशना, पक्वबिम्बाधरोष्ठी, मध्ये क्षामा, चकित-हरिणीप्रेक्षणा, निम्ननाभिः, श्रोणीभारात् अलसगमना, स्तनाभ्यां स्तोकनम्रा, युवति-विषये धातुः आद्या सृष्टिः इव या तत्र ( अन्तर्भवने ) स्यात्, ( ताम् परिमितकथां जानीयाः—Sl. 87. ) [ यद् and तद् being correlatives ].

Beng.—Easy.

Easy.—She who is there, slender, youthful, of pointed teeth, having lower lip like a ripe *bimba* fruit, thin-waisted, with eyes like frightened fawn, of a deep navel, of slow pace through weight of hips and slightly drooping owing to breasts, is as if creator's first creation with respect to young ladies.

Expl.—See Malli carefully.

Sanj.—सम्प्रति दृष्टिपातफलम् अभिज्ञानसन्देशकथनेनाह—तन्वीति । 'तन्वी' कृशाङ्गी [ "कृशा तनुः कृशं तनु" इत्यमरः । "वोतो गुणवचनात्" इति ङीष् ] 'श्यामा' युवतिः [ "श्यामा यौवनमध्यस्था" इत्युत्पलमाला ] शिखराणि एषां सन्तीति 'शिखरिणः' कोटिमन्तः [ "शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु" इति विश्वः ] 'शिखरिणो दशना' दन्ता यस्याः सा [ एतेनास्याः भाग्यवत्वं पत्यायुष्करत्वञ्च सूच्यते ; तदुक्तं सामुद्रिके—"स्निग्धाः समानरूपाः सुपङ्क्तयः शिखरिणः श्लिष्टाः । दन्ता भवन्ति यासां तासां पादे जगत् सर्वम् । ताम्बूलरसरक्तोऽपि स्फुटभासः समोदयाः । दन्ता शिखरिणो यस्या दीर्घं जीवति तत्प्रियः" इति ] 'पक्वं' परिणतं 'बिम्बं' बिम्बिकाफलम् इव 'अधरोष्ठो' यस्याः सा 'पक्वबिम्बाधरोष्ठी' [ "शाकपार्थिवादित्वात् मध्यमपदलोपिसमासः"

इति वामनः ॥ "नाभिश्चोदरबन्ध—" इत्यादिना श्लोकः ] 'मध्ये क्षामा' कृशोदरीत्यर्थः । 'चकितहरिण्याः प्रेक्षणानीव प्रेक्षणानि' दृष्टयो यस्याः सा तथोक्ता [ एतेनास्याः पद्मिनीत्वं व्यज्यते । तदुक्तं रतिरहस्ये पद्मिनीलक्षणप्रस्तावे—"चकितमृगदृगाभे प्रान्तरक्ते च नेत्रे" इति ] 'निम्ननाभिः' गम्भीरनाभिः [ अनेन नारीणां नाभिगाम्भीर्यात् मदनातिरेकः" इति कामसूत्रार्थः सूच्यते ] 'श्रोणीभारात् अलसगमना' मन्दगामिनी, न तु दोषात् । 'स्तनाभ्यां स्तोकनम्रा' ईषदवनता, न तु वपुर्दोषात् । 'युवतय एव विषयः' तस्मिन् युवतीः अधिकृत्य इत्यर्थः । 'धातुः' ब्रह्मणः 'आद्या सृष्टिः' प्रथमशिल्पम् 'इव' स्थिता इत्युत्प्रेक्षा । प्रथमनिर्मिता युवतिरिव इत्यर्थः । [ प्रायेण शिल्पिनां प्रथमनिर्माणे प्रयत्नातिशयवशात् निर्माणसौष्ठवं दृश्यते–इत्याद्यविशेषणम् । तथा च अस्मिन् प्रपञ्चे न कुत्रापि एवंविधरामणीयकं रमणीरत्नमस्तीति भावः।1 ] । तत् एवम्भूता 'या' स्त्री 'तत्र' अन्तर्भवने 'स्यात्'—'ताम्' इत्युत्तरश्लोकेन सम्बन्धः ॥ ८६ ॥

## Notes on Malli.

1. Generally the artists put forth their best efforts in the first production, so therein is seen perfection—this is implied by the adjective आद्य here. Thus in this expanse of the universe there is nowhere such a gem of ladies with such beauty.

## Charcha.

1. श्यामा—Qual. या । श्यामा is a high class youthful lady, Cp "शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला । तप्तकाञ्चनवर्णाभा सा स्त्री श्यामेति कथ्यते" । Ayurveda also states that श्याम colour indicates best health, and health surely adds to beauty. Hence the epithet is doubly significant. See Malli also.

1. शिखरिदशना—For deriv. and significance—see Malli. Qual. या । तन्वी indicates beauty, and this luck.

3. पक्व &c.—अधरः ओष्ठः इति अधरोष्ठः or अधरौष्ठः see the varttika "ओत्वोष्ठयोः समासे वा"। पक्वं बिम्बम्, कर्मधा—। पक्वबिम्बमिव अधरोष्ठः यस्याः बहु—। ङीष is optional in the feminine, so पक्वबिम्बाधरोष्ठा is also correct. Qual. या। This also indicates fresh beauty of youth. Malli's quotation from Vamana is out of place. Vamana's remark is with respect to the कर्मधारय compound बिम्बाधरः (बिम्ब-कारः अधरः), but not with respect to बहुव्रीहि compound as we have here. See Kavyalamkara-sutra (ch. II. rule 15) under "बिम्बाधर इति वृत्तौ मध्यमपदलोपिन्यास्"। The word मध्यपदलोप in such cases is misused. Question of मध्यम arises when at least 3 padas are present, but in cases like शाकपार्थिव &c. we have two words only (e g. शाकप्रियः and पार्थिवः)। Further the word प्रिय that is elided is an उत्तरपद of the first word. Hence we suggest to call these cases as उत्तरपदलोपिसमास।

4. चकित &c.—चकितहरिण्याः प्रेक्षणं, इतत्—। चकितहरिणीप्रेक्षणमिव प्रेक्षणमस्याः, बहु—by "सप्तम्युपमानपूर्वस्य—" (ante). Qual. या। This indicates her पद्मिनीत्व i. e. the first class of women among the four classes (हस्तिनी, शङ्खिनी, चित्रिणी) mentioned in the sastras. All the epithets also indicate beauty, Cp "वन्दे कह्लायनकुरङ्गविलोल-दृष्टेः"—Uttar. III.

5. श्रोणी &c.—Both श्रोणि and श्रोणी mean 'hip'. तस्याः भारः, इतत—। तस्मात्। हेतौ ५मी।

6. स्तोकनम्रा &c.—This also adds to beauty, Cp—"आवर्जिता किञ्चिदिव स्तनाभ्याम्"—Kum.

7. स्यात्—अस+लिङ् विधौ+यात्। Nom. या।

8. युवतिविषये—युवन्+ति स्त्रियाम्=युवतिः young lady. The rule is "यूनस्तिः"। युवतय एव विषयः, कर्मधा—। तस्मिन्। विषयाधिकरणे ७मी। Cp "स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः"—Sak. II. See also Malli. where the deriv. and significance of all the epithets are given.

9. Voice.—तन्व्या &c.—आद्यया सृष्ट्या इव यया भूयते...।

## 87. *Her condition.*

तां जानीथाः परिमितकथां जीवितं मे द्वितीयं
दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।
गाढोत्कण्ठां गुरुषु दिवसेष्वेषु गच्छत्सु बालां
जातां मन्ये शिशिरमथितां पद्मिनीं वान्यरूपाम्॥ ८७॥

Prak.—Easy.

Prose.—सहचरे मयि दूरीभूते (सति) चक्रवाकीमिव एकां (अतः) परिमितकथां तां मे द्वितीयं जीवितं जानीथाः। गाढोत्कण्ठां बालां एषु दिवसेषु गच्छत्सु शिशिरमथितां पद्मिनीं वा (इव) अन्यरूपां जातां मन्ये।

Beng.—প্রাণসহচর আমি দূরে থাকায় চক্রবাকীর ন্যায় একাকিনী ও মিতভাষিণী তাহাকে আমার দ্বিতীয় প্রাণ বলিয়া জানিবে। বিরহহেতু দীর্ঘ দিবসগুলি অতিবাহিত হইতে থাকিলে, তীব্র উৎকণ্ঠাযুক্ত আমার প্রিয়া হিমমথিতা পদ্মিনীর ন্যায় নিশ্চয়ই অন্যরূপ (অর্থাৎ মলিন) হইয়াছে।

Eng.—I her companion being afar, she solitary like a female *Chakravaka*, (hence) of measured speech, is to be known as my second life. These long days having rolled on, that girl possessed of an intense longing has, I think, turned otherwise like a lotus smitten by frost.

Expl.—Easy.

Sanj.—तामिति । 'सहचरे' सहचारिणि [ अनेन वियोगासहिष्णुत्वं व्यज्यते ] 'मयि दूरीभूते' सति, सहचरे चक्रवाके दूरीभूते सति 'चक्रवाकीं' चक्रवाकवधूम् 'इव एकाम्' एकाकिनीम् स्थितां 'तां परिमितकथां' मितभाषिणीं 'मे द्वितीयं जीवितं जानीथाः' 'जीविततुल्यां मत्प्रेयसीमवगच्छेः' इत्यर्थः । तन्वीत्यादिपूर्वलक्षणैः इति शेषः ॥ लक्षणानामन्यथाभावसम्भावनामाशङ्क्य आह—गाढेति । 'गाढोत्कण्ठाम्' प्रबलविरहवेदनाम् [ "रागे त्वलब्धविषये वेदना महती तु या । संशोषणी तु गात्राणां तामुत्कण्ठां विदुर्बुधाः" ॥—इत्यभिधानात् ] 'बालां गुरुषु' विरहमहत्सु 'एषु' वर्त्तमानेषु 'दिवसेषु गच्छत्सु' सत्सु 'शिशिरेण' शिशिरकालेन 'मथितां पद्मिनीं वा' पद्मिनीमिव [ "इववद्वा यथा शब्दाः" इति दण्डी ] 'अन्यरूपां' पूर्वविपरीताकारां 'जातां मन्ये' हिमहतपद्मिनीं विरहेण अन्यादृशी जातेति तर्कयामि इत्यर्थः । एतावता "न इयम् अन्या"—इति भ्रमितव्यम् इति भावः ॥ ८७ ॥

## Charcha.

1. ताम्—This तद् as said before is correlative of यद् ( in या ) of the previous sloka.

2. जानीथाः—ज्ञा + लिङ् ( विधौ ) + ईथास् । Should know. Nom. त्वम् । Here आत्मनेपद by "अनुपसर्गाज्ज्ञः" can not be defended, for the rule requires that the action should benefit the agent. In त्वं जानीथाः—cloud is not benefited, so परस्मैपद is legitimate here. Hence we prefer the reading जानीयाः ।

3. परि &c —परि + मा + क्त कर्मणि = परिमिता measured. तादृशी कथा यस्याः, बहु— । ताम् । Her solitariness like separation was another cause of her comparative silence. Qual. ताम् ।

4. द्वितीयं जीवितम्—Pred. to ताम् । Dear thing is called as a 'second soul', Cp—"त्वं जीवितं त्वमसि मे हृदयं द्वितीयम्"—Uttar. III.

5. दूरीभूते—अदूरं दूरं सम्पद्यमानं भूतम् इति दूर + च्वि + भू + क्त कर्त्तरि ॥

दूरीभूत placed at a distance. तस्मिन्। Pred. to मयि (which has भावे सप्तमी)। I was her constant companion (सहचर), I being afar she is alone. In fact, we were like a pair of चक्रवाक that cannot brook separation at all. Hence during my separation, she is taken चक्रवाकीमिव एकाम्।

6. गाढोत्&c.—उद्+कण्ठ+अ भावे स्त्रियाम्=उत्कण्ठा longing. गाढा (तीव्रा) उत्कण्ठा यस्याः, बहु—। ताम्। Qual. बालाम्। Separation made her so. See Malli also.

7. गुरुषु दिवसेषु—भावे ७मी। Days seem long when we are in distress (as separation here). Cp "विरहदीर्घतरं बिभर्ति"—Vikram.

8. मन्ये—मन दिवादि+लट ए। Nom. अहम्।

9. शिशिर &c.—मथ्+क्त कर्मणि=मथिता blighted. शिशिर dew. तेन मथिता, इतत्—। ताम्। Qual. पद्मिनीम्। She will look pale like a frost-blighted lotus.

10. वा—Here 'वा' has the sense of इव indicating उपमा। See Dandin quoted by Malli.

11. Parallel—For a similar sentiment, Cp—"बिभर्षि चाकारम-निर्वृतानां मृणालिनी हैममिवोपरागम्"—Rag. XVI.

12. Voice.—चक्रवाकी इव एका...यथा या त्वया ज्ञायेत...गाढोत्कण्ठा बाला...मथिता पद्मिनीव अन्यरूपा जाता मन्यते मया।

*88. Change in face and eyes &c.*

नूनं तस्याः प्रबलरुदितोच्छूननेत्रं प्रियायाः
निःश्वासानामशिशिरतया भिन्नवर्णाधरोष्ठम्।

हस्तन्यस्तं मुखमसकलव्यक्ति लम्बालकत्वा-
दिन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति ॥ ८८ ॥

Prak.—Easy.

Prose.—प्रबलरुदितोच्छूननेत्रं ( तथा ) निःश्वासानाम् अशिशिरतया भिन्नवर्णाधरोष्ठम् ( तथा ) लम्बालकत्वात् असकलव्यक्ति हस्तन्यस्तं तस्याः प्रियायाः मुखं, त्वदनुसरणक्लिष्टकान्तेः ( मेघोपरोधहीनकान्तेः ) इन्दोः दैन्यं बिभर्त्ति नूनम् ।

Beng.—প্রবলরোদনহেতু স্ফীতনয়ন, এবং নিঃশ্বাসের অশিশিরতা ( অর্থাৎ উষ্ণতা ) হেতু বর্ণান্তরীভূত অধরোষ্ঠযুক্ত, ( তথা ) সংস্কারাভাবজন্য কেশ লম্বমান থাকায় সম্পূর্ণ অপ্রকটিত ও হস্তস্থাপিত প্রিয়ার সেই মুখ, মেঘোপরোধহেতু ক্ষীণকান্তি চন্দ্রের মলিনতা নিশ্চয়ই ধারণ করিবে।

Eng.—My darling's face will surely wear the paleness of moon rendered lustrelass by the pursuit of cloud—face wherein eyes are swollen through excessive weeping, where the lower lip has attained a different colour owing to hotness of sighs and which is placed on the hand and is not fully manifest on account of long dishevelled hair.

Expl.—See Eng and notes.

Sanj.—नूनमिति । 'प्रबलरुदितेन उच्छूने' उच्छूसिते 'नेत्रे' यस्य तत् [ उच्छूनेति श्वयतेः कर्त्तरि क्तः । "उदितश्च" इति निष्ठानत्वम् । "वचिस्वपि—" इत्यादिना सम्प्रसारणम् । "सम्प्रसारणाच्च" इति पूर्वरूपत्वम् । "हलः" इति दीर्घः । तत्र "च्छ्वोः शूडनुनासिके" इति ऊठादेशे कृते रूपसिद्धिरिति एवंविधा (?) प्रक्रिया प्रामादिकी इत्यपेक्षणीया । तथा सति धातोरिकारस्य गत्यभावात् ; ऊठादेशे च्छ्वोरन्त्यत्वेन विशेषणाच्च इति । ]॥ एतेन विषादो व्यज्यते ॥ "निःश्वासानाम् अशिशिरतया' अत्युष्णत्वेन 'भिन्नवर्णौ' विच्छायौ 'अधरोष्ठौ' यस्य तत्, हस्ते न्यस्तम् 'हस्तन्यस्तम्' लम्बमानकुन्तलत्वात् 'असकलव्यक्ति' असम्पूर्णाभिव्यक्ति 'तस्याः प्रियायाः

मुखं, त्वदनुसरणेन' त्वदुपरोधेन मेघानुसरणेन इति यावत्, 'क्लिष्टकान्तेः इन्दोः दैन्यं' श्रोच्यतां 'बिभर्त्ति' नूनमिति वितर्के [ "नूनं तर्केऽर्थनिश्चये" इत्यमरः ] पूर्ववत् तथापि न भमितव्यमिति भावः ॥ ८८ ॥

## Notes on Malli.

1. [ N B.—Here Malli's reading is corrupt. I have corrected it in consultation with various editious. Some editions have—"इति वर्त्तमानसामीप्य प्रक्रिया प्रमादिकी इत्युत्प्रेक्षा" । These are interpolations of some readers and meaningless ]. In उच्छून we have कर्त्तरि क्त after the root 'श्वि' । Here निष्ठा क्त is changed to न by the rule "ओदितश्च" and श्वि is ओदित्, for it is read as "टु ओ श्वि" in Panini's धातुपाठ । The व of श्वि is changed to उ by सम्प्रसारण, the rule being "वचिस्वपियजादीनाम् किति" । Now the rule "सम्प्रसारणाच्च" directs that if there be a vowel after सम्प्रसारण, the two together will assume the form of the former ; hence उ is substituted in pleace of उ and इ of श्वि । Next we have दीर्घ by the rule 'हलः" for the सम्प्रसारण comes after a consonant. Thus उच्छून is got. Some say that उच्छून is got with ऊठ् added after श्वि by the rule 'च्छ्वोः शूडनुनासिके" । But this is wrong and is to be rejected. In that case, the इ of श्वि will be left unprovided, besides the rule "च्छ्वोः—" applies where छ or व are final letters—here इ being the final. [ N. B.—Here the marginal notes of some one as, वर्त्तमानसामीप्य and उत्प्रेक्षा, were perhaps later incorporated in the text. ].

## Charcha.

1. नूनम्—Malli takes this to denote वितर्क ( surmise ). But निश्चय suits better, for yaksha was sure of the consequences of their separation. See previous sloka.

2. प्रबल &c—उद्+श्वि+क्त कर्त्तरि=उच्छून swollen. See also Malli. रुद्+क्त नपुंसके भावे=रुदित weeping. प्रबलं रुदितम्, कर्मधा—। तेन उच्छूने, सुप्सुपा—। ताद्दशे नेत्रे अस्मिन्, बहु—। Qual. मुखम्। Pang of separation caused incessant weeping and consequent swelling of eyes.

3. भिन्न &c.—For अधरोष्ठ see sl. 86 under बिम्बाधरोष्ठौ। भिन्नः वर्णः अस्य, बहु—। ताद्दशः अधरोष्ठः यस्मिन् बहु—। तत्। Qual. मुखम्। Hot breath is likely to deepen the colour, cp "श्वासोपरक्ताधरः" and "चिन्ताजागरणप्रताम्रनयनः"—Sak. VI. Again hot breath was from internal sorrow—cp "इदमशिशिरैरन्तस्तापाद्विवर्णमणीकृतम्"—Sak. III.

4. हस्तन्यस्तम्—Qual. मुखम्। This indicates चिन्ता। See Malli also. I venture to take हस्त to mean वामहस्त, for we have—"वामहस्तोपहितवदना आलिखिता इव प्रियसखी"—in Sak IV.

5. असकल &c.—वि+अञ्ज+क्तिन भावे=व्यक्ति manifestation. न सकला असकला, नञ्तत्—। असकला व्यक्तिः ( प्रकाशः ) अस्य, बहु—। तत्। Qual. मुखम्। The face was not fully manifest, for long hairs dangled over it ( लम्बालकत्वात् हेतोः )।

6. त्वदनु &c.—अनु+सृ+ल्युट् भावे=अनुसरण pursuit. कम+क्तिन् भावे=कान्तिः beauty. तव अनुसरणम्, ६तत्—। तेन क्लिष्टा, ३तत्—। ताद्दशी कान्तिरस्य, बहु—। तस्य। Or—त्वदनुसरणेन क्लिष्टकान्तिः, सुप्सुपा—। तस्य।

Qual. इन्दो:। Moon loses its beauty when screened by clouds. Yaksha's wife too will lose natural brightness when overcome by constant pang of separation.

7. बिभर्त्ति—भृ+लट् ति। Nom. मुखम्। बभार, अभार्षीत्—अभरत, भरिष्यति—ते।

8. Voice.—...उच्छूननेत्रं च...—अधरोष्ठेन...—व्यक्तिना इन्दुदैन्येन मुखेन भ्रियते...।

## 89. *Her engagements during separation.*

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती
पृच्छन्ती वा मधुरवचनां सारिकां पञ्जरस्थां
कच्चिद्भर्त्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति ॥ ८९ ॥

Prak.—Easy.

Prose.—बलिव्याकुला वा, विरहतनु भावगम्यं मत्सादृश्यं ( मम प्रतिकृतिम् ) लिखन्ती वा, हे रसिके त्वं तस्य प्रिया ( अतः ) भर्त्तुः स्मरसि कच्चित्—इति पञ्जरस्थां मधुरवचनां सारिकां पृच्छन्ती वा सा ते आलोके ( दृष्टिपथे ) पुरा निपतति।

Beng.—সত্বরই আমার প্রিয়া তোমার দৃষ্টিপথে পড়িবে। হয়ত বা সে তখন পূজারত থাকিবে, অথবা মনে মনে আন্দাজ করিয়া সে আমার বিরহকৃশ প্রতিকৃতি আঁকিবে, কিম্বা—"হে রসিকে, তুমি আমার স্বামীর প্রিয় ছিলে, তার কথা মনে আছে কি ?—" ইত্যাদি বাক্য, পিঞ্জরস্থা মধুরকণ্ঠা সারিকাকে জিজ্ঞাসা করিতে থাকিবে।

Eng.—She will erelong come to thy sight—she who is either engaged in worship, or drawing from guess-wo.k my likeness reduced through separaiion, or asking the full melodied Sarika in the cage, in this strain—"O, do you remember my master, for you were his favourite ?"

Expl.—See Eng.

Sanj.—सर्वविरहिणीसाधारणानि लक्षणानि सम्भावनया उत्प्रेक्ष्याणि इत्याह-आलोक इत्यादिभिः त्रिभिः ॥ आलोक इति—हे मेघ, 'सा' मत्प्रिया 'बलिषु प्रोषिता-गमनार्थेषु च देवताराधनेषु 'व्याकुला' व्यापृता 'वा ; विरहेण तनु' कृशं 'भावगम्यं' मत्काश्यस्य अदृष्टचरत्वात् सम्प्रति सम्भावनया उत्प्रेक्ष्यमित्यर्थः 'मत्सादृश्यं' मदाकारसाम्यं मत्प्रतिकृतिमित्यर्थः [ यद्यपि सादृश्यं नाम प्रसिद्धवस्त्वन्तरगतम् आकारसाम्यं तथापि प्रतिकृतित्वेन विवक्षितम्, इतरथा आलेख्यत्वासम्भवात् ; अव्ययकोषे—"आलेख्येऽपि च सादृश्यम्" इत्यभिधानात्1 ]। 'लिखन्ती' क्वचित् फलकादौ विन्यस्यन्ती वा। चित्रदर्शनस्य विरहिणीविनोदोपायत्वात् इति भावः। [ एतच्च कामशास्त्रसंवादेन सम्यग्विवेचितमस्माभिः रघुवंशसञ्जीवन्याम्—"सादृश्य-प्रतिकृतिदर्शनैः प्रियायाः" इत्यत्र2 ] 'मधुरवचनां' मञ्जुभाषिणीम् अतएव 'पञ्जरस्थां' 'हिंस्रेभ्यः कृतसंरक्षणामित्यर्थः 'सारिकां' स्त्रीपक्षिविशेषं—हे 'सारिके, भर्तुः' स्वामिनः स्मरसि कच्चित्' स्मरसि किम् [ "कच्चित् कामप्रवेदने" इत्यमरः ] भर्तारं स्मरसि किमित्यर्थः। [ "अधीगर्थदयेशां कर्मणि" इति कर्मणि (शेषे) षष्ठी ]। स्मरणे कारणमाह—'हि' यस्मात् 'त्वं तस्य' भर्तुः प्रीणातीति 'प्रिया' [ "इगुपधज्ञाप्रीकिरः कः" इति कप्रत्ययः ]। अतः प्रेमास्पदत्वात् स्मर्तुमर्हसि इति भावः—इत्येवं पृच्छन्ती वा' [ वा शब्दो विकल्पे। "उपमायां विकल्पे वा" इत्यमरः ]।'ते' तव 'आलोके' दृष्टिपथे 'पुरा निपतति' सद्यो निपतिष्यति इत्यर्थः [ "स्यात् प्रबन्धे पुरा अतीते निकटागामिके पुरा" इत्यमरः। "यावत्पुरानिपातयोः लट्" इति लट् ] ॥ ८९ ॥

## Notes on Malli.

1. Though साहश्य means similarity of feature with respect to a well-known object, still it here ends in portrait ; otherwise drawing is impossible ; अव्ययकोष also says "साहश्य is used to denote portrait as well". 2. We have well discussed this fact ( e. g., portrait solaces a विरहिन् ) in our Sanjivani under

Raghu Viii. in "सादृश्यप्रतिकृतिदर्शनैः" &c. in consonance with कामशास्त्र ।

## Charcha.

1. आलोके—आ + लोक + घञ् भावे = आलोक sight. तस्मिन् । विषयाधिकरणे ७मी ।

2. पुरा—An अव्यय meaning 'erelong'. And लट् ( in निपतति ) in the sense of लृट् ( futurity ) is used in connection with this अव्यय पुरा, the rule is "यावत्पुरा निपातयो लंट्" ।

3. वलिव्याकुला—Qual सा । For समास, see Malli.

4. मत्सादृश्यम्—मम सादृश्यम्, ६तत्— । Obj. of लिखन्ती । Here सादृश्य means 'portrait'—See Malli.

5. भावगम्यम्—गम + यत् कर्मणि = गम्य to be inferred. भाव is guess, surmise. भावेन गम्यम्, ३तत्— । तत् । Qual. सादृश्यम् । His present state is a matter of inference, so it is said as भावगम्य । See Malli.

6. लिखन्ती, पृच्छन्ती—These are formed with शतृ ( in fem. ) added to लिख and प्रच्छ respectively. लिख being तुदादि, लिखती is also correct here by "आच्छीनद्योः नुम्" । Qual. सा ।

7. भर्त्तुः—कर्मणः शेषत्वविवक्षायां षष्ठी by the rule "अधीगर्थदयेशां कर्मणि" । Here Malli's इति कर्मणि षष्ठी should be इति कर्मणि शेषे षष्ठी ।

8 Voice.—व्याकुलया...लिखन्त्या...त्वया प्रिययाभूयते... कथ्यते त्वया इति पृच्छन्त्या तया...निपत्यते... ।

9. Remark—Sanskrit writers mention 4 means of solace left to the विरहिन् in the absence of the beloved—( 1 ) sight of object that resemble the beloved, ( 2 ) sight of portrait of

the beloved, ( 3 ) meeting in dreams, ( 4 ) touch of things that approach after contact with the beloved. Thus runs the गुणपताका quoted by Mallinath under Raghu VIII. 92— "वियोगेऽवस्थायां वा प्रियजनसदृशानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि। तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदितः" ( See also Malli on. Sl. 108 ). Here the 1st and the 2nd are mentioned so to say—for सादृश्य may mean चित्र as well.

## 90. *Same matter continued.*

उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणां
मद्गोत्राङ्कं विरचितपदं गेयमुद्गातुकामा।
तन्त्रीमार्द्रां नयनसलिलैः सारयित्वा कथञ्चिद्
भूयोभूयः स्वयमपि कृतां मूर्च्छनां विस्मरन्ती ॥ ९० ॥

Prak.—Easy.

Prose.—हे सौम्य, मलिनवसने उत्सङ्गे वीणां निक्षिप्य मद्गोत्राङ्कं ( यथा तथा ) विरचितपदं गेयम् उद्गातुकामा ( सा ), नयनसलिलैः आर्द्रां तन्त्रीं कथञ्चित् सारयित्वा भूयोभूयः स्वयं कृतामपि मूर्च्छनां विस्मरन्ती ( वा सा ), ते आलोके निपतति ( इति पूर्वेण सम्बन्धः )।

Beng.—হে সৌম্য, মলিনবসনযুক্ত ক্রোড়ে বীণা রাখিয়া আমার নামে পদ রচনা করিয়া গান গাহিতে ইচ্ছুক হইতে থাকিবে ; নয়নজলে আর্দ্র বীণার তারগুলি কোনরকমে সাজাইয়া পূর্বে বহুবার স্বকৃত স্বরমূর্চ্ছনা ও বিস্মৃত হইতে থাকিবে—এ অবস্থায় সে তোমার দৃষ্টিপথে আসিবে ।

Eng.—O good one, ( She will come to thy sight ) with a lute on her lap having dirty clothes, desirous as well to sing a song the lines whereof are composed in my name ; or somehow

setting the strings of the lute, wet with tears (she will be seen) forgetful of the rise and fall of pitch though she practised it oft times before.

Expl.—Easy.

Sanj.—उत्सङ्ग इति। हे 'सौम्य' साधो, 'मलिनवसने' [ "प्रोषिते मलिना कृशा।" इति शास्त्रात् इत्यर्थः ] 'उत्सङ्गे' ऊरौ 'वीणां निक्षिप्य', मम गोत्रं नाम अङ्कः चिह्नं यस्मिन् तत् 'मद्गोत्राङ्कं' मन्नामाङ्कं यथा तथा [ "गोत्रन्तु नाम्नि च" इत्यमरः ] 'विरचितानि पदानि' यस्य तत् तथोक्तं 'गेयं' गानार्हं प्रबन्धादि [ 'गीतम्' इति पाठे स एवार्थः ] 'उद्गातुम्' उच्चैर्गातुं कामो यस्याः सा [ "तुङ्काममनसोरपि" इति मकारलोपः ]। देवयोनित्वात् गान्धारग्रामं गातुकामा इत्यर्थः। [ तदुक्तम्—"षड्जमध्यमनामानौ ग्रामौ गायन्ति मानवाः। न तु गान्धारनामानं स लभ्यो देवयोनिभिः" ॥—इति ]। तथा 'नयनसलिलैः' प्रियतमस्मृतिजनितैः अश्रुभिः 'आर्द्रां तन्त्रीं कथञ्चित्' कृच्छ्रेण 'सारयित्वा' आर्द्रत्वापहरणाय करेण प्रमृज्य, अन्यथा क्वणनासम्भवात् इति भावः। 'भूयो भूयः' पुनः पुनः 'स्वयम्' आत्मना 'कृतामपि' विस्मरणानर्हमपि इत्यर्थः 'मूर्च्छनां' स्वरारोहावरोहक्रमम् [ "स्वराणां स्थापनाः यास्ताः मूर्च्छना सप्त सप्त हि" इति सङ्गीतरत्नाकरे (? करः) ] 'विस्मरन्ती वा, आलोके ते निपततीति—पूर्वेणान्वयः। विस्मरणं चात्र दयितगुणस्मृतिजनितमूर्च्छावशादेव [ तथा च रसरत्नाकरे—"वियोगायोगयोरिष्टगुणानां कीर्त्तनात् स्मृतेः साक्षात्कारोऽथवा मूर्च्छा दशधा जायते तथा" इति ]। मत्सादृश्यम्—इत्यादिना मनःसङ्गानुवृत्तिः सूचिता ॥ ९० ॥

## Charcha.

1. मलिन &c.—मलिन dirty. तादृशं वसनम् अस्मिन्, वहु—। तस्मिन्। Qual. उत्सङ्गे। In separation the devoted one gives up toilets and cleanliness. See Malli.—प्रोषिते मलिना &c.

2. मद् &c.—गोत्र name. अङ्क sign. मम गोत्रम्। तत् अङ्कः चिह्नं

यस्मिन्, बहु—। तत् यथा तथा। Adv. Qual. विरचित in विरचितपदम्। The sense is—the song is to be characterised by my name in its पद ( foot ).

3. गेयम्—गीयते यत् गै+यत् कर्मणि=गेय song. गेय is also irregularly got कर्त्तरि to denote गानकर्त्ता, the rule being "भव्यगेय—"। Obj. of उद्गातुकामा।

4. उद्गातु &c.—उत्गातुं कामः यस्याः, बहु—the म eliding by "तुङ्कामममनसोरपि"। Qual. सा।

5 तन्त्रीमार्द्राम्—The reading तन्त्रीरार्द्रा is better for several strings were wet by नयनसलिल। नयनसलिलैः has करणे ३या।

6. सारयित्वा—सृ+णिच्+क्त्वाच्। Removing the wetness. See Malli. "आर्द्रत्वापहरणाय करेण प्रमृज्य" &c. Vallabha renders it as "योजयित्वा" ( setting rightly ). And this suits here better.

7. भूयोभूयः—वीप्सायां द्विरुक्तिः।

8. स्वयम्—An अव्यय meaning 'आत्मना'। प्रकृत्यादित्वात् तृतीया।

9. मूर्च्छनाम्—Obj of विस्मरन्ती। The word means 'rise and and fall of pitch'. See Malli "स्वरारोहावरोहक्रमम्"।

10. विस्मरन्ती—वि+स्मृ+शतृ+ङीप् स्त्रियाम्=विस्मरन्ती forgetting. Qual. सा।

11. Voice.—गातुकामया...विस्मरन्त्या तया निपत्यते।

12. Remark.—This was a means of solace to a विरहिणी। And it is included under सादृश्यदर्शन।

*91. Same thought.*

**शेषान्मासान् विरहदिवसस्थापितस्यावधेर्वा**
**विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।**

सम्भोगं वा हृदयनिहितारम्भमास्वादयन्ती
प्रायेणैते रमणविरहेष्वङ्गनानां विनोदाः ॥ ९१ ॥

Prak.—Easy.

Prose.—विरहदिवसस्थापितस्य अवधेः शेषान् मासान् देहलीदत्तपुष्पैः भुवि गणनया विन्यस्यन्ती वा, हृदयनिहितारम्भं सम्भोगं ( मत्सम्भोगमित्यर्थः ) आस्वादयन्ती वा सा ( आलोके निपतति )। रमणविरहेषु अङ्गनानां प्रायेण एते विनोदाः ( भवन्ति )।

Beng.—বিরহ দিবস হইতে আরম্ভ করিয়া শেষাবধির বাকি মাসগুলি দেহলীতে রক্ষিত পুষ্পদ্বারা ভূদেশে গুণিতে থাকিবে, অথবা নিজবিষয়ক সম্ভোগ হৃদয়ে সঙ্কল্পবশতঃ অনুভব করিতে থাকিবে—এ অবস্থায় সে তোমার দৃষ্টিপথে আসিবে। প্রিয়বিরহে রমণীগণের সাধারণতঃ এই সমস্তই বিনোদোপায় হয়।

Eng.—She will come to thy sight placing by way of calaulation on the ground the remaining months of the limit beginning from the day of bereavement, by flowers kept on the thresh-hold ; or enjoying my company whose operation is drawn in the heart by imagination. These are usually the solaces of women bereft of their lovers.

Expl.—See Eng.

Sanj.—शेषानिति। 'विरहस्य दिवसः' तस्मात् 'स्थापितस्य' तत आरभ्य निश्चितस्य 'अवधेः' अन्तस्य 'शेषान्' गतशिष्टान् मासान् 'देहलीदत्तपुष्पैः' देहली द्वारस्य आधारदारु [ "गृहावग्रहणी देहली" इत्यमरः] तत्र दत्तानि राशित्वेन निहितानि यानि पुष्पाणि, तैः 'गणनया' एको द्वौ इत्यादिसंख्यानेन 'भुवि' भूतले 'विन्यस्यन्ती वा' पुष्पविन्यासैः मासान् गणयन्ती वा इत्यर्थः। 'हृदये निहितः' मनसि सङ्कल्पितः 'आरम्भ' उपक्रमः यस्य तम्, अथवा—हृदयनिहिता आरम्भाः चुम्बनादयो व्यापारा यस्मिन् तत् सम्भोगं' मत्सम्भोगरतिमास्वादयन्ती' वा 'आलोके ते निपतति' इति पूर्वेण सम्बन्धः।

ननु कथमयं नियम इत्याशङ्काम् अर्थान्तरन्यासेन परिहरति—'प्रायेण' बाहुल्येन 'अङ्गनानां रमणविरहेषु—एते' पूर्वोक्ता 'विनोदाः' कालयापनोपायाः। [ एतेन सङ्कल्पावस्था उक्ता ; तदुक्तम्—"सङ्कल्पो नाथविषयो मनोरथ उदाहृतः" इति। त्रिभिः कुलकम् ] ॥ ९१ ॥

## Charcha.

1. विरह &c.—विरहस्य दिवसः ( first day of विरह ), ६तत्—। स्था + णिच् + क्त कर्मणि = स्थापित ascertained. विरहदिवसात् स्थापितः ascertained from the day &c, सुप्सुपा—। तस्य। Qual. अवधेः। अवधेः has शेषषष्ठी, being related to मासान्।

2. विन्यस्यन्ती—वि + नि + अस ( क्षेपे—दिवादि ) + शतृ + ङीप् स्त्रियाम् = विन्यस्यन्ती placing. Qual. सा। There were flowers on the thresh hold. She took those flowers and placed them on the ground counting the remaing months cf the limit of शाप।

3. गणनया—गण + णिच् + युच् भावे = गणना counting ३या। प्रकृत्यादित्वात् ३या।

4. देहली &c.—देहली is threshhold. तत्र दत्तानि, सुप्सुपा—। तादृशानि पुष्पाणि, कर्मधा—। तैः। करणे ३या। The reading देहलीदत्त is more explicit than देहलीमुक्त।

5 सम्भोगम्—सम् + भुज + घञ् भावे = सम्भोग enjoyment. तम्। Obj. of आस्वादयन्ती। Both संयोग and सम्भोग are equally applicable here. But the reading मत्संयोगम् &c. is more clear and to the point.

6. हृदय &c.—नि + धा + क्त कर्मणि = निहित placed i. e., entertained by imagination. हृदये निहितः, सुप्सुपा—। तादृशः आरम्भः

-अत्र, बहु—। तम्। Qual. सम्भोगम्। She imagined the enjoyment during their future union.

7. आस्वादयन्ती—आ + स्वद + णिच् + शतृ स्त्रियाम् = आस्वादयन्ती enjoying. Qual. सा।

8. प्रायेण—An विभक्तिप्रतिरूपक अव्यय meaning 'बाहुल्येन'। Or—प्राय is the base meaning बाहुल्य। तेन। प्रकृत्यादित्वात् तृया।

9. Voice.—विन्यस्यन्त्या...आस्वादयन्त्या तया निपत्यते। एतैः विनोदैः भूयते...।

10. Remark.—Malli states that the poet here says of her determination to enjoyment, cp "एतेन सङ्कल्पावस्था...उदाहृता:"—Malli. It is the third of the ten कामदशा ( see sl. 97 ). The second is mentioned in the previous sloka.

## 92. *Fit time to see yaksha's wife.*

सव्यापारामहनि न तथा पीड़येन्मद्वियोगः
शङ्के रात्रौ गुरुतरशुचं निर्विनोदां सखीं ते।
मत्सन्देशैः सुखयितुमलं पश्य साध्वीं निशीथे
तामुन्निद्रामवनिशयनां सौधवातायनस्थः॥ ९२॥

Prak —Very easy.

Prose —मद्वियोगः अहनि सव्यापराम् ते सखीं तथा न पीड़येत्। रात्रौ निर्विनोदां तां गुरुतरशुचं शङ्के। उन्निद्रां अवनिशयनां साध्वीं तां मत्सन्देशैः अलं सुखयितुं निशीथे सौधवातायनस्थः ( सन् ) पश्य।

Beng.—আমার বিয়োগ, দিনে তোমার সখীকে কার্য্য নিযুক্ত থাকিবে বলিয়া তেমন পীড়া দিতে পারিবেনা। কিন্তু মনে হয় বিনোদোপায়হীন তাকে রাত্রে শোকে কাতর করিবে। নিদ্রাহীন ভূমিশায়িত মদীয় সাধ্বী পত্নীকে আমার সংবাদে যথেষ্ট সুখী করিবার জন্য তুমি রাত্রে প্রাসাদের জানালার নিকট থাকিয়া তাকে দেখিবে।

Eng.—At day time, my separation will not be able to torment her, for she is engaged then ; but I fear devoid of solacing means she will be heavily loaded with grief at night ; hence sufficiently to gladden the devoted sleepless one lying on the ground, by my news, you at night see her, remaining on the window of the mansion.

Expl.—Easy.

Sanj.—सव्यापारामिति। हे सखे, 'अहनि' दिवसे सव्यापारां' पूर्वोक्तबलिचित्रलेखनादिव्यापारवतीं 'ते सखीं' स्वप्रियाम् 'मद्वियोगो' मद्विरहः 'तथा' तेन प्रकारेण [ प्रकारवचने थाल्प्रत्ययः ] न पीडयेत् यथा रात्रौ इति शेषः। किन्तु 'रात्रौ निर्विनोदां' निर्व्यापारां ते सखीं, गुरुतरा शुक् यस्यास्तां 'गुरुतरशुचम्' अतिदुःखां 'शङ्के' तर्कयामि। [ "शङ्काबितर्कभययोः" इति शब्दार्णवः ]। अतः 'निशीथे' अर्द्धरात्रे 'उन्निद्राम्' उत्सृष्टनिद्राम्, 'अवनिरेव शयनं' शय्या यस्यास्तां, नियमार्थं स्थण्डिलशायिनीं 'साध्वीं' पतिव्रताम् [ "साध्वी पतिव्रता" इत्यमरः ] अतो नान्यथा शङ्कितव्यम् इति भावः। 'तां' त्वत्सखीं 'मत्सन्देशैः' मद्वार्त्ताभिः 'अलं' पर्य्याप्तं 'सुखयितुम्' आनन्दयितुं 'सौधवातायनस्थः' सन् 'पश्य'। [ "सखाधात्री च पितरौ चित्रदूतशुकादयः। सुखयन्तीष्टकथनसुखोपायैर्वियोगिनीम् ॥"—इति रत्नाकरे (? करः )। दूतश्चायं मेघः इति भावः ]। अनेन जागरावस्था उक्ता ॥ ९२ ॥

## Charcha.

1. सव्यापाराम्—वि + आ + पृ + घञ् भावे = व्यापारः work, engagement. तेन सह वर्त्तमाना इति सव्यापारा, बहु—by "तेन सहेति तुल्ययोगे"। ताम्। Qual. सखीम्। The engagements were as described in the 3 previous slokas. See Malli. also.

2. तथा—तेन प्रकारेण इति तद् + थाल् = तथा in that way. Adv. Qual. पीडयेत्। "क्रियाविशेषणानां फलभावनां प्रति करणत्वम्"।

3. पीड़येत्—पीड़+णिच्+लिङ् यात् = पीड़येत् be able to torment. शक्ति लिङ्। Or—सम्भावनार्थं लिङ्। Nom. मद्वियोगः।

4. शङ्के—शङ्क+लट ए। Nom. अहम्। Here शङ्का' is 'guess'. See Malli.

5. गुरुतर &c.—शुच+क्विप भावे = शुक grief. The base is fem. गुरुतरा शुक् अस्याः, बहु—। ताम्। Pred. to सखीम्। As she will be निर्विनोदा, so naturally she will be गुरुतरशुच् at night.

6. मत्सन्देशैः—सम्+दिश+घञ् कर्मणि = सन्देश message. मम सन्देशः, इतत्—। तैः। करणे ३या।

7. अलम्—An अव्यय having the sense of पर्य्याप्ति here. "अलं भूषणपर्य्याप्तिशक्तिवारणवाचकम्"—इत्यमरः। Adv. Qual. सुखयितुम्। Construe—अलं सुखयितुं पश्य। See Malli also.

8. उन्निद्राम—निद्रायाः उत्क्रान्ता इति उन्निद्रा, प्रादितत् by "अत्यादयः क्रान्ताद्यर्थे पञ्चम्या"। ताम्। Qual. ताम्। This indicates the जागरणावस्था। This is the 4th stage of solace. See गुणपताका quoted under sl. 89, and sl. 97 also.

9. अवनि &c.—For समास, see Malli. Qual. ताम्। As she was साध्वी, she observed vows of a पतिव्रता and took her bed on the ground. The reading अवनिशयनासन्नवातायनस्थः dces not make the idea clear at all. Hence we prefer Malli's reading.

10. सौध &c.—सौध mansion. एति अनेन इति इ+ल्युट, करणे = अयन way. वातस्य अयनम्। सौधस्य वातायनम्, इतत्—। तत्र तिष्ठतीति सौधवातायन+स्था+क कर्त्तरि = सौधवातायनस्थः। Pred. to त्वम्। The reading सद्मवातायनस्थः is more definite and is to be preferred. सन्नवातायनस्थः is also seen. 'सन्न' meaning 'near' is not very common, आसन्न being the usual word. So सन्नवातायनस्थ does not commend itself.

11. Voice.—मद्वियोगेन सव्यापारा ते सखी पौद्येत... निर्विनोदा...—युक्त्यते मया। वातायनस्थेन त्वया उन्निद्रा...अवनिशयना साध्वी सा दृश्यताम्।

12. Remark—Everywhere in the slokas I have invariably put Malli's readings, but have discused their propriety in the charcha.

## 93. *Her probable condition at that time.*

आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां
प्राचीमूले तनुमिव कलामात्रशेषां हिमांशोः।
नीता रात्रिः क्षण इव मया सार्द्धमिच्छारतैर्या
तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्॥ ९२॥

Prak.—Easy.

Prose.—आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वां प्राचीमूले कलामात्रशेषां हिमांशोः तनुम् इव (स्थितां) तां पश्य; (तथा) मया सार्द्धम् इच्छारतैः (स्वेच्छा-क्रीड़ाभिः) या रात्रिः क्षणः इव नीता, विरहमहतीं तामेव (रात्रिं) उष्णैः अश्रुभिः यापयन्तीं (तां पश्य)।

Beng—মনোব্যথায় কৃশ, বিরহশয়নে শরীরের একপাশমাত্র স্থাপিত করিয়া শয়ান, পূর্বদিগ্‌ভাগে কলামাত্রাবশিষ্ট চন্দ্রের মূর্ত্তির ন্যায় স্থিতা তাহাকে তুমি দেখিও। সে আমার সহিত ইচ্ছাকৃত ক্রীড়াসহকারে যে রাত্রি মুহূর্ত্তের ন্যায় অতিবাহিত করিয়াছে, সেই বিরহদীর্ঘ রাত্রিকে উষ্ণঅশ্রু সহকারে যাপন করিতে তাহাকে দেখিবে।

Eng—Emaciated by mental anguish and with one side of her body placed on the bed used during her separation, she is like the form of moon with a single digit only left and seen in the eastern horizon; the same night which she passed like a moment with voluntary enjoyments with me, is now being spent with hot tears, for it is long through separation.

Expl.—Yaksha surmises that, most probably such will appear her condition during separation See Eng. also.

Sanj.—पुनस्तामेव विशिनष्टि आधिक्षामामिति चतुर्भिः—आधीति । 'आधिना' मनोव्यथया 'क्षामां' कृशाम् [ "पुंसि आधिर्मानसी व्यथा" इत्यमरः । क्षायतेः कर्त्तरि क्तः । "क्षायो मः" इति निष्ठातकारस्य मकारः ] । विरहे शयनं, तस्मिन् 'विरहशयने' पल्लवादिरचिते इत्यर्थः, 'सन्निषण्णमेकं पार्श्वं' यस्यास्तां 'प्राच्याः' पूर्वस्या दिशो 'मूले' उदयप्रान्ते इत्यर्थः । प्राचीग्रहणं क्षीणावस्थाद्योतनार्थम् । 'कलामात्र' कलैव 'शेषो' यस्याः तां 'हिमांशोः तनु' मूर्त्तिमिव स्थिताम् । तथा 'या रात्रिः मया सार्द्धं, इच्छया कृतानि रतानि' तैः [शाकपार्थिवादित्वात् मध्यपदलोपिसमासः (? उत्तरपदलोपिसमासः)] 'क्षण इव नीता' यापिता 'तामेव' रात्रिं 'विरहेन महतीं' महत्वेन प्रतीयमानाम् 'उष्णैः अश्रुभिः यापयन्तीम्' [ यातेः णयन्तात् शतृप्रत्ययः । "अर्त्तिह्री—" इत्यादिना पुगागमः ] । स एव कालः सुखिनामल्प प्रतीयते, दुःखिनान्तु विपरीत इति भावः 1 । एतेन कार्श्यावस्था उक्ता ॥ ९३ ॥

## Notes on Malli.

1. The sense is, the self-sametime seems small to the happy and otherwise ( i. e., long ) to the unhappy.

## Charcha.

1. आधि &c.—क्षै + क्त कर्त्तरि स्त्रियाम् = क्षामा emaciated. Here त of निष्ठा is changed to म by "क्षायो मः" । आ + धा + कि कर्मणि = आधिः anguish. आधिना क्षामा, तृतत्—। ताम् । Qual. ताम् understood. Distressing thoughts naturally eat one's vital.

2. विरह &c.—विरहस्य शयनम् befitting bed during separation, ६तत्— । तस्मिन् । अधि ७मी ।

3. सन्निषण्ण &c.—नि + सद + क्त कर्त्तरि = निषण्ण placed. For carebral see *ante*. सम्यक् निषण्णम्, सन्निषण्णम्, प्रादितत्—। एकं पार्श्वम्, कर्मधा—। सन्निषण्णम् एकपार्श्वं यस्याः, बहु—। ताम्। Qual. ताम्। She was so engrossed in thoughts that she forgot to turn sides. Thus the epithet is a happy one showing her great attachment.

4. प्राची &c.—प्राञ्चति इति प्र + अञ्च + क्विन् कर्त्तरि = प्राक् east. स्त्रियाम् ङीप इति प्राची ; cp—"प्राचीवार्क प्रसूय च पावनम्"—Sak IV. प्राच्याः मूलं the eastern horizon, ६तत्—। तस्मिन्। अधि ७मी। See Malli also. This epithet keeps correspondence with विरहशयने।

5. कलामात्र &c.—कला is digit i. e., the one sixteenth part of the lunar disc. कला एव इति कलामात्रम्, मयूरव्यंसकादित्वात् तत्पुरुषः। कलामात्रं शेषः अस्याम्, बहु—। ताम्। Qual. तनुम्। The moon is seen on the eastern horizon with a digit only left on the fourteenth day of dark fortnight—cp.—"कृष्णपक्षे चतुर्दश्यां रात्रौ शेषकलामात्रस्य चन्द्रस्य दिङ्मुखे सम्भवः"। The comparison is very apt.

6. क्षण इव—The reading क्षणमिव is also seen. क्षण meaning 'moment' is used in the neuter no doubt. But its masculine use is more common. The उपमा here is slightly defective, for रात्रिः is fem, whereas क्षणः is masculine.

7. इच्छारतैः—रम + क्त भावे = रतम् sport. इच्छाकृतानि रतानि, शाकपार्थिवादिवत् समासः। तैः। करणे ३या। Happy times seem swift-flowing, cp "अविदितगतयामा रात्रिरेव व्यरंसीत्"—Uttar.

8. अश्रुभिः—करणे ३या।

9 विरहमहतीम्—विरहेण महती, सुप्सुपा—। ताम्। Qual. ताम्

( which refers to रात्रिम् )। As seen before time seems prolonged during distresses. The reading विरहजनितैः is decidedly better, for it states the reason of अस्रु and also helps alliteration.

10. यापयन्तीम्—या + णिच् + लटः स्थाने शतृ + ङीप् स्त्रियाम् = यापयन्ती spending, passing. ताम्। Qual. ताम्। या is आकारान्त so पुगागम comes in णिच्, the rule being "अर्त्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ"।

11. Voice.—क्षामा...निषण्णैकपार्श्वा...कलामात्रशेषा तनुरिव स्थितया... यां रात्रिं क्षणमिव नीतवती तामेव यापयन्ती सा त्वया द्रक्ष्यताम्।

12. Remark.—There are ten अवस्था during affliction, of love. These are described in Sl. 97 by Malli. The present sloka describes कार्श्यावस्था as the previous one जागरावस्था।

## *94. All seem reversed in separation.*

पादानिन्दोरमृतशिशिरान् जालमार्गप्रविष्टान्
पूर्वप्रीत्या गतमभिमुखं सन्निवृत्तं तथैव।
चक्षुः खेदात्सलिलगुरुभिः पक्ष्मभिश्छादयन्तीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम् ॥९४॥

Prak.—खेदात् सलिलगुरुभिः पक्ष्मभिः चक्षुः छादयन्तीं तां पश्य [ You will see her covering her eyes with eyelashes heavy with tears. She covered her eyes with disgust ]. Why was this disgust ?— पूर्वप्रीत्या अभिमुखं गतं तथैव सन्निवृत्तं चक्षुः खेदात् छादयन्तीम् [ She directed her eyes through her previous experience of pleasure, but at

once withdrew them and thus through disgust she covered her eyes with eyelashes ]. To which was the eye directed ?—जालमार्गप्रविष्टान् इन्दोः अमृतशिशिरान् पादान् अभिमुखं गतम् चक्षुः [ The eye was directed towards moon's rays that came close to her through the window of the chamber. Previously she delighted in these moon-rays, but now she found no pleasure in them. Hence she disgustingly withdrew her eyes from them. All this happens with a विरहिणी ] But then how will she look ? साभ्रेऽह्नि न प्रबुद्धां न सुप्तां स्थलकमलिनीमिव तां पश्य [ You will she her like a landlotus niether closed nor blown, as is seen in cloudy days ].

Prose.—पूर्वप्रीत्या जालमार्गप्रविष्टान् इन्दोः अमृतशिशिरान् पादान् अभिमुखं गतं तथैव ( तत्क्षणमेव ) सन्निवृत्तं ( प्रत्यागतं ) चक्षुः खेदात् सलिलगुरुभिः पक्ष्मभिः छादयन्तीम् ( अतः ) साभ्रेऽह्नि न प्रबुद्धां न सुप्तां स्थलकमलिनीम् इव ( तां पश्य )।

Beng.—পূর্ব প্রীতি হেতু, গবাক্ষদ্বারা আগত অমৃততুল্য শীতল চন্দ্র কিরণের দিকে ধাবিত কিন্তু তৎক্ষণাৎ প্রত্যাবৃত্ত চক্ষুকে খেদবশতঃ অশ্রুবিনতঅক্ষিপক্ষ্মদ্বারা আবৃত করিতে ( অতএব ) মেঘযুক্ত দিনে নাতিবিকসিত নাতিমুদ্রিত স্থলপদ্মের ন্যায় স্থিত তাকে দেখিবে।

Eng.—Out of previous experience of affection the eye, directed to moon—rays, come through windows and as cold as ambrosia, will at once be turned back ; and through pain she will cover the eyes with eyelashes heavy with tears. She will thus be seen like a land-lotus neither blown nor closed as in a cloudy day.

Expl.—See Prak.

Sanj.—पादानिति। 'जालमार्गप्रविष्टान्' गवाक्षविवरमतान् ( ? विवरागतान् )

'अमृतशिशिरान् इन्दोः पादान्' रश्मीन् 'पूर्वप्रीत्या' पूर्वस्नेहेन पूर्ववत् आनन्दकरा भविष्यन्तीति बुद्ध्या इति भावः। 'अभिमुखं' यथा तथा 'गतं तदैव सन्निवृत्तं' तदा तेषामतीव दुःसहत्वात् इति भावः। 'चक्षुः' दृष्टिं 'खेदात् सलिलगुरुभिः' अश्रुदुर्भरैः पक्ष्मभिः छादयन्तीम्, अतएव 'साभ्रे' दुर्दिने 'अह्नि' दिवसे 'न प्रबुद्धां' मेघावरणात् अविकसितां 'न सुप्ताम्' अपरित्यमुकुलिताम्। [ उभयत्रापि नञर्थस्य नशब्दस्य सुप्सुपेति समासः ] 'स्थलकमलिनीमिव' स्थिताम् एतेन विषयद्वेषाख्या षष्ठी दशा सूचिता ॥ ९४

## Charcha.

1. अमृत &c.—अमृत nectar. अमृतमिव शिशिराः, उपमानकर्मधा—by "उपमानानि सामान्यवचनैः"। तान्। Qual. पादान्। Moon-rays soothe all hence they are like nectar.

2. जाल &c.—जाल is window. जाल एव मार्गः, कर्मधा—। तेन प्रविष्टाः come by window, सुपसुपा—। तान्। Qual. पादान्।

3. पूर्व &c.—पूर्वा प्रीतिः, कर्मधा—। तया। हेतौ ३या। Her previous experience was one of pleasure, for she was not a विरहिणी then. Now in her angony she looked to इन्दोः पादान्—( moon-rays ) for that sensation of pleasure.

4. पादान्—२या in connection with अभि in अभिमुखम्।

5. तदैव—A compound अव्यय giving the sense of 'then and there'. Adv. Qual. सन्निवृत्तम्।

6. सन्निवृत्तम्—सम् + नि + वृत + क्त कर्त्तरि = सन्निवृत्त turned back. तत्। Qual. चक्षुः—The eye was at once withdrawn.

7. चक्षुः – Obj. of छादयन्तीम्।

8. पक्ष्मभिः—पक्ष्मन् eyeleshes तैः। करणे ३या।

9. छादयन्तीम्—छद + णिच् + लटः स्थाने शतृ + ङीप स्त्रियाम् = छादयन्ती covering. ताम्। Qual. ताम् understood. See Prose.

10. साभ्रे—अभ्र cloud. तेन सह वर्त्तमानं साभ्रम् cloudy. तस्मिन्। Qual. अह्नि।

11. Remark.—With her eyes almost closed with eyelashes, she resembled a स्थलकमलिनी neither full-blown (for cloud screened the sunrays ) nor closed ( for it was after all daytime.) Malli says that here the sixth मदनदशा namely, विषयद्वेष is indicated. See Malli.

12. Parallel.—Even soothing things like moon appear scorching to a विरहिन्, cp—

"यस्य न सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य।
यस्य च सविधे दयिता दवदहनस्तुहिनदीधितिस्तस्य॥"—Kavyaprakas.

"तदा रम्याण्यरम्याणि प्रियाः शल्यं तदासवः।
तदेकाकी सबन्धुः सन्निष्टेन रहितो यदा॥"—Kirat.

## 95. *Her sleepless condition*

निःश्वासेनाधरकिसलयक्लेशिना विक्षिपन्तीं
शुद्धस्नानात् परुषमलकं नूनमागण्डलम्बम्।
मत्सम्भोगः कथमुपनयेत् स्वप्नजोऽपीति निद्रा-
माकाङ्क्षन्तीं नयनसलिलोत्पीड़रुद्धावकाशाम्॥९५॥

Prak.—Easy.

Prose —अधरकिसलयक्लेशिना निःश्वासेन, शुद्धस्नानात् परुषम् आगण्डलम्बम् अलकं नूनं विक्षिपन्तीम्, ( तथा ) स्वप्नजोऽपि मत्सम्भोगः कथमुपनयेत् इति ( हेतोः ) नयनसलिलोत्पीड़रुद्धावकाशां ( अश्रुप्रवृत्त्या रुद्धप्रसरां ) निद्राम् आकाङ्क्षन्तीं ( तां पश्य )।

Beng.—অধররূপ-নবপল্লবপীড়নকারী নিঃশ্বাসদ্বারা, তৈলহীনস্নানহেতু রুক্ষ গণ্ডপর্য্যন্ত লম্বমান কেশকে নিশ্চয়ই বিক্ষিপ্ত করিতে থাকিবে, এবং স্বপ্নজ আমার সহিত সম্ভোগ কিভাবে পাইবে এই ভাবিয়া অশ্রুপ্রবাহহেতু রুদ্ধপ্রসর নিদ্রার আকাঙ্ক্ষা করিতেছে—( এইরূপ তাকে দেখিবে )।

Eng.—You will see her surely tossing her hair by hot breaths that oppress the twig-like lower lip—hair dangling up to cheeks and rough through unanonited bath. With a view as to how to get my companion even in dreams you will find her courting sleep whose course will be checked through profuse flow of tears.

Expl.—Her deep hot sighs will shake her rough hairs before her face. And as she passes sleepless nights so she will in vain desire for a sleep hoping to meet me in dreams.

Sanj.—निःश्वासेनेति। 'शुद्धस्नानात्' तैलादिरहितस्नानात् 'परुषं' कठिनस्पर्शं 'गण्डमागण्डलम्बम्' [ सुपसुपेति समासः ] 'अलकं' चूर्णकुन्तलान् [ जातावेकवचनम् ], 'अधरकिसलयं क्लेशयति' क्लिश्नातीति वा 'तेन' तथोष्णेन उष्णेन इत्यर्थः [ ताच्छील्ये णिनिः ] 'निःश्वासेन विक्षिपन्तीं' चालयन्तीम्; तथा 'स्वप्नजोऽपि' स्वप्नावस्थाजन्योऽपि साक्षात् सम्भोगासम्भवात् इति भावः, 'मत्सम्भोगः कथं' केन प्रकारेण 'उपनयेत्' आगच्छेत् इत्याशयेन इति शेषः [ इतिनैव उक्तार्थत्वात् अप्रयोगः। "प्रयोगे च अपौनरुक्त्यम्" इत्यालङ्कारिकाः। प्रार्थनायां लिङ् ] 'नयनसलिलोत्पीडेन' अश्रुप्रवृत्त्या' रुद्धावकाशां' आक्रान्तस्थानाम्, दुर्लभामित्यर्थः, 'निद्रामाकाङ्क्षन्तीं' स्वप्न-हेतुत्वात् इति भावः। अत्र अश्रुविसर्जनेन लज्जात्यागो व्यज्यते ॥ ९५ ॥

## Charcha.

1. अधर &c.—अधरः किसलयमिव इति अधरकिसलयम्, उपमितसमासः by the rule "उपमितं व्याघ्रादिभिः सामान्याप्रयोगे"। तत् क्लिश्नातीति अधर-

किसलयक्लेशी। तेन। Qual. निःश्वासेन ( which has करणे ३या )। See Malli also.

2. विक्षिपन्तीम्—वि + क्षिप + लटः स्थाने शतृ + ङीप् स्त्रियाम् = विक्षिपन्ती shaking. ताम्। Qual. ताम् understood ( see prose ). Hairs were before her face and deep hot breaths of sighs made these move.

3. शुद्धस्नानात्—शुद्ध is devoid of तैल। See Malli—तैलादिरहित-स्नानात्"। हेतौ ५मी। She was observing vow, hence discarded oils &c.

4. आगण्ड &c.—लम्बते इति लम्बः ( पचाद्यच् )। आ गण्डाभ्याम् इति आगण्डम्, अव्ययीभावः by the rule "आङ् मर्य्यादाभिविध्योः"। आगण्डं यथा तथा लम्बः इति आगण्डलम्बः सुप्सुपा—। तम्। Qual- अलकम्।

5. कथम्—किम् + थमु प्रकारे = कथम् how. An अव्यय in the sense of तृतीया। क्रियाविशेषणे २या, cp—"क्रियाविशेषणानां फलभावनां प्रति करणत्वम्"।

6. उपनयेत्—उप + नी + लिङ् यात्। Shall come. Nom. मत्सम्भोगः। Here नी is used as अकर्मक for it is used in the sense of 'happening.' cp,—"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्।

प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥"

For this sense of नी. also see verse 113—"कस्यैकान्तं सुखमुपनतम् &c"—*Infra*.

7. इति—Malli says that इति denotes इति आशयेन। And this sense being उक्त by इति, आशय is not used. हेतौ तृतीया।

8. आकाङ्क्षन्तीम्—आ + काङ्क्ष + शतृ + ङीप् = आकाङ्क्षन्ती desiring. ताम्। Qual. ताम्। Meeting in dreams solaces a विरहिन् hence

she hailed sleep ; but sleep was at a discount, cp "प्रजागरात् खिलीभूत स्वप्ने तस्याः समागमः"—Sak VI.

9 नयन &c.—उत्पीड़ is overflow. cp—"पूरोत्पीड़े तड़ागस्य परीवाहः प्रतिक्रिया"—Uttar. III. नयनसलिलस्य उत्पीड़ः इतत्—। तेन रुद्धावकाशा, ३तत्—। ताम्। Qual. निद्राम्। Constant weeping dispelled sleep. Thus she was wide awake and piteously wailed. Hence Malli says "अश्रुविसर्जनेन लज्जात्यागो व्यज्यते"।

10. Voice.—विचिपन्ती...स्वप्रजेन सम्भोगेन...उपनीयेत...आकाङ्क्षन्ती सा दृश्यताम् त्वया।

## 96. *Condition of her braid of hair.*

आद्ये बद्धा विरहदिवसे या शिखा दाम हित्वा
शापस्यान्ते विगलितशुचा तां मयोद्वेष्टनीयाम्।
स्पर्शक्लिष्टामयमितनखेनासकृत्सारयन्तीं
गण्डाभोगात्कठिनविषमामेकवेणीं करेण ॥ ८६ ॥

Prak.—Easy.

Prose.—आद्ये विरहदिवसे दाम (मालां) हित्वा या शिखा बद्धा, शापस्यान्ते विगलितशुचा मया उद्वेष्टनीयां स्पर्शक्लिष्टां (स्पर्शे सति क्लेशप्रयुक्तां) कठिनविषमां ताम् एकवेणीम् अयमितनखेन करेण गण्डाभोगात् सारयन्तीं (तां पश्य)।

Beng.—প্রথম বিরহদিবসে মালাত্যাগ করিয়া যে শিখা বাঁধা হইয়াছিল, শাপান্তে শোকমুক্ত আমাকর্তৃক যাহা উন্মুক্ত করা হইবে, এবং স্পর্শ করিলে যাহা কেশমূলে ব্যথা দেয়, কঠিন ও বিষম সেই একবেণী অকর্ত্তিতনখ হস্তদ্বারা কপোলদেশ হইতে বারংবার সরাইতে তাহাকে দেখিবে।

Eng.—The braid of hair,—which she on the first day of separation tied casting aside wreaths therein, which is to be

untied by me whose sorrow will wear away at the termination of the curse, which is painful when tonched, also hard and rongh,—is being pushed aside by her from the expanse of cheeks with hands the nails whereof are uncut

Expl.—She on the very day of the curse forewent usual wreaths on her braid of hair. And in observation of vows discarded oil and toilet. Thus that braid of hair was a hard matted rough lock. This every now and then hanged on her, cheeks, and she pushed it back by her hands.

Sanj.—आद्य इति। 'आद्ये विरहदिवसे दाम' मालां 'हित्वा' त्यक्त्वा 'या शिखा बद्धा' ग्रथिता 'शापस्य अन्ते विगलितशुचा' वीतशोकेन 'मया उद्वेष्टनीयां' मोचनीयां 'स्पर्शक्लिष्टां' स्पर्शे सति मूलकेशेषु सव्यथाम् इत्यर्थः। 'कठिना चासौ विषमा च' ताम् ।[ खञ्जकुब्जादिवत् अन्यतरस्य प्राधान्यविवक्षया "विशेषणं विशेष्येण बहुलम्" इति समासः ] 'एकवेणीम्' एकीभूतवेणीम् [ "पूर्वकाल—" इत्यादिना तत्पुरुषः] 'तां' शिखां 'अयमिता नखा यस्य' तेन 'करेण गण्डाभोगात्' कपोलविस्तारात् 'असकृत्' मुहुः-मुहुः 'सारयन्तीम्' अपसारयन्तीम्—'तां पश्य' इति पूर्वेण सम्बन्धः। असकृत् सारणात् चित्तविभ्रमदशा सूचिता ॥ ९६ ॥

## Charcha.

1. दाम—दामन् is wreath. तत्। Obj. of हित्वा [ हा ( त्यागे ) + क्त्वाच् ]। The usual practice is to put wreaths while tying hairs. But she discarded this and took up the vow of a साध्वी।

2. विगलित &c.—For शुच् see *ante*. विगलिता ( गता ) शुक् अस्य, बहु—। तेन। Qual. मया।

3. उद्वेष्टनीयाम्—उन्मुक्तं वेष्टनमस्या इति उद्वेष्टना whose tie was untied, बहु—। उद्वेष्टनां करोतीति उद्वेष्टयति unties. In उद्वेष्टयति

the क्तत् portion of उद्वेष्टना elides when णिच् follows by the varttika "आख्यानात् कृत: तदाचष्टे इति णिच् कृल्लुक् प्रकृतिप्रत्यापत्ति: प्रकृतिवच्च कारकमिति"। तत: उद्वेष्ट ( नाम धातु )+अनीयर् कर्मणि=उद्वेष्टनीय to be untied. ताम्। Qual. ताम्। उद्+वेष्ट धातु+अनीयर् also gives उद्वेष्टनीय, but then the meaning is 'to wrap, tie' &c , hence the recourse to above derivation. It is natural that husband should release the lock of a साध्वी, by way of the termination of her vow.

4. स्पर्श &c.—क्लिश+क्त कर्त्तरि=क्लिष्ट painful. स्पर्शे क्लिष्टा, सुप्सुपा—। ताम्। Qual. ताम्। This is Malli's derivation. But we suggest the following alternative—स्पर्शेन क्लिष्टा ( पीड़िता ) pressed ( i. e., tightened ) by touch, ३तत्—। ताम्। She constantly pushed the lock from her cheeks ( असकृत् सारयन्ती ), thus her grip compressed and tightened it, this was another reason why it was कठिनविषमा। We prefer this meaning.

5. अयमित etc.—यम+क्त कर्मणि=यमित restrained i. e., cut. न यमितम्, नञ्तत्। तादृश नखमस्य, बहु—। तेन। Qual. करेण।

6. सारयन्तीम्—सृ+णिच्+लट: स्थाने शतृ+ङीप्=सारयन्ती pushing back. ताम्। Qual. ताम् understood. For असकृत् ( not once ) see "भानु: सकृद्युक्ततुरङ्ग एव"—Sak. V.

7. गण्डा etc.—आभोग is expanse. गण्डस्य आभोग:, ६तत्—। तस्मात्। अपादाने ५मी by the rule "ध्रुवमपायेऽपादानम्"।

8. कठिन etc.—For समास see Malli. Qual. ताम्।

9. करेण—करणे ३या, करण of the क्रिया in सारयन्ती।

10. Voice.—यां शिखां वक्ष्यती...सारयन्ती सा त्वया द्रक्ष्यताम्।

11. Remark.—She was thinking this and that, so distur-

bed her mind was ; hence the lock of hair dangled on her cheek and she had to push it back. From this her चित्तविभ्रम is inferred—cp—"असकृत् सारणात् चित्तविभ्रमदशा सूचिता"—Malli.

### 97. *Her condition will make you weep.*

सा सन्नयस्ताभरणमवला पेशलं धारयन्ती
शय्योत्सङ्गे निहितमसकृद् दुःखदुःखेन गात्रम् ।
त्वामप्यस्रं नवजलमयं मोचयिष्यत्यवश्यं
प्रायः सर्वो भवति करुणावृत्तिरार्द्रान्तरात्मा ॥ ९७ ॥

Prak.—Easy.

Prose.—अबला सा सन्न्यस्ताभरणम् दुःखदुःखेन शय्योत्सङ्गे असकृत् निहितं पेशलं गात्रं धारयन्ती ( सती ) त्वामपि नवजलमयं अस्रम् अवश्यं मोचयिष्यति। आर्द्रान्तरात्मा सर्वः ( जनः ) प्रायः करुणावृत्तिः भवति ।

Beng.—দুর্বল আমার সেই প্রিয়া, ভূষণহীন এবং বারংবার দুঃখে শয্যাতলে রক্ষিত মৃদু গাত্র ধারণ করিয়া তোমাকেও নিশ্চয়ই নবজলরূপ অশ্রুজল ত্যাগ করাইবে। আর্দ্রান্তঃকরণ সকল প্রাণীই সাধারণতঃ করুণপরবশ হইয়া থাকে।

Eng.—That lean darling ( of mine ), bearing a delicate frame destitute of decorations and repeatedly placed on the bed-surface on account of sorrow, will surely make you shed tears in the shape of rain-drops. Everyone with a soft inner soul is generally of a compassionate disposition.

Expl.—Easy.

Sanj.—सेति । 'अबला' दुर्बला 'सन्न्यस्ताभरणं' कृशत्वात् परित्यक्ताभरणम् 'असकृत्' अनेकशो 'दुःखदुःखेन' दुःखप्रकारेण [ "प्रकारे गुणवचनस्य" इति द्विर्भावः] 'शय्योत्सङ्गे निहितं 'पेशलं मृदुलं 'गात्र" शरीर' धारयन्ती' वहन्ती । अनेन अत्यन्तासक्त्या मूर्च्छावस्था सूच्यते । 'सा' त्वत्सखी 'त्वामपि नवजलमयं' नवाम्बुरूपम्

'अस्रं' वाष्पम 'अवश्य'' सर्वथा 'मोचयिष्यति' [ "द्विकर्मसु पचादीनामुपसंख्यानम्" इति सुचेः पचादित्वात् द्विकर्मकत्वम् ( ? ) 1 ]। तथा हि—'प्रायः' प्रायेण 'आर्द्रान्तरात्मा' मृदुहृदयः मेघस्तु द्रवान्तःशरीरः; 'सर्वः, करुणा करुणामयी वृत्तिः अन्तःकरणवृत्तिर्यस्य सः 'करुणावृत्तिः' भवति। अस्मिन्नवसरे सर्वथा शीघ्रं त्वया गन्तव्यम् अनन्तरदशापरिहाराय इति सन्दर्भाभिप्रायः 2। [ ननु किमिदमादिमां चक्षुःप्रीतिमुपेत्य अवस्थान्तराण्येव तव भवान् कविराहृतवान्? उच्यते, सम्भोगो विप्रलम्भश्च द्विधा शृङ्गार उच्यते॥ संयुक्तयोस्तु सम्भोगो विप्रलम्भो वियुक्तयोः। पूर्वानुरागमानाख्यप्रवासकरुणात्मना॥ विप्रलम्भश्चतुर्धात्र प्रवासस्तत्र च त्रिधा। कार्यतः सम्भ्रमाच्छापादस्मिन् काव्ये तु शापजः॥ प्रागसङ्गतयोर्यूनोः सति पूर्वानुरञ्जने चक्षुःप्रीत्यादयोऽवस्था दशस्युस्तत्क्रमो यथा। दृङ्मनः सङ्गसङ्कल्पा जागरः कृशतारतिः। ह्रीत्यागोन्मादमूर्च्छान्ता इत्यनङ्गदशा दश॥ पूर्वसङ्गतयोरेव प्रवास इति कारणात्। न तत्रापूर्ववत् ( ? तत्र पूर्ववत् ) चक्षुः प्रीतिरुत्पत्तिमर्हति॥ कृतसङ्गस्य तु स्निग्धस्यापराविच्छेदोऽत्र वर्ण्यते। अन्यथा पूर्ववद्वाच्या इति तावद् व्यवस्थितेः॥ वैयर्थ्यादादिमां हित्वा वैरस्यादन्तिमां तथा। कृतसङ्गादीरिहाचष्ट—कविरष्टाविति स्थितिः॥ मत्सादृश्यं लिखन्तीति पद्येऽस्मिन् प्रतिपादिता। चक्षुःप्रीतिरिति प्रोक्तं निरुत्तरकृताननम्॥ चक्षुःप्रीतिर्भवेच्चित्रेष्वदृष्टचरदर्शनात्। यथा मालविकारूपमग्निमित्रस्य पश्यतः॥ प्रोषितानां तु भर्तॄणां क्व दृष्टादृष्टपूर्वता, अथ तत्रापि सन्देहे स्वकलत्राणि पृच्छतु॥ किं भर्तृप्रत्यभिज्ञा स्यात् किं वैदेशिकभावना। प्रवासादागते स्वस्मिन्नित्यलं कलहैर्वृथा॥ ]

## Notes on malli.

1. The quotation of Malli "द्विकर्मसु पचादीनामुपसंख्यानम्" means that पचादि are to be counted in the द्विकर्मक list of verbs. Though मोचि is not in the पचादि list of *Siddhanta Kaumudi* or *Kasika* still Sudharkara and his followers include it under द्विकर्मक list of verbs. [ It is perhaps an interpolation by a

beginner ]. ( See char ). 2. The sense of the stanza is that to avoid the next state you must go there quickly.

## Charcha.

1. सन्न्यस्त &c.—आभ्रियते अनेन इति आ + भृ + ल्युट् करणे = आभरणम् ornament. सम् + नि + अस + क्त कर्मणि = सन्न्यस्त cast away. सन्न्यस्तम् आभरणमस्मिन् ( अस्य वा ), बहु—। तत्। Qual. गात्रम्। पतिव्रताधर्म demanded discrading of decarations.

2. धारयन्ती—धृ + णिच् + लटः स्थाने शतृ + ङीप् = धारयन्ती bearing. Pred, to सा।

3 शय्योत् &c.—उद् + सञ्ज + घञ् भावे = उत्सङ्ग lap, surface. शय्याया उत्सङ्गः ६तत्—। तस्मिन्। अधि ७मी ॥ असकृत्—सकृत् once. न सकृत् असकृत् ( अव्यय ), नञतत्—। Adv. Qual. निहितम्।

4. दुःख &c.—दुःख sorrow. दुःखप्रकारम् इति दुःखदुःखम् see Malli's 'प्रकारे—' इति द्विर्भावः" Or Say—दुःखात् दुःखम्, सुप्सुपा—। तेन। प्रकृत्यादित्वात् ३या। It then implies intense sorrow.

5 मोचयिष्यति—मुच् + णिच् + ऌट् स्यति। Shall cause to shed. Nom. सा। In अणिजन्तावस्था, the sentence was—त्वं जलमयम् अस्त्रं मोक्ष्यसि ; then in णिच् we have—सा त्वां अस्त्रं मोचयिष्यति ( अणिकर्त्ता taking कर्मणि २या by the rule—"गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि-कर्त्ता स णौ" )—and मुच + णिच् implies a kind of motion ( गति ). Malli's view that "पचादित्वात् द्विकर्मत्वम्" is based on Sudhaka's saying—"जयतेः कर्षतेर्मन्थ मुषेर्दण्डयतेः पचेः। तारे र्गाहेस्तथा मोचेस्ताडे-र्दीपेश्च संग्रहः ॥" But we prefer the above process.

6. प्रायः—अव्यय meaning 'generally'. Adv. Qual. भवन्ति।

7. आर्द्र &c,—अन्तरात्मा is 'innersoul'. आर्द्र. अन्तरात्मा अस्य, बहु— । Qual. सर्वः । Cloud is आर्द्र' with water, and men with kindness ( करुणा ) ।

8. Voice.—अबलया तया धारयन्त्या...त्वम् मोचयिष्यसे आर्द्रान्तरात्मना सर्वेण...करुणावृत्तिना भूयते... । [ Here त्वम् becomes voiced by the Karika "प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः" ] ।

Remark.—Here Malli points out the gradual ten steps of a lover. चक्षुःप्रीति is the first state no doubt, but it applies to previously ununited pairs ; as yaksha and his darling were not so, so चक्षुःप्रीति need not be described here. Hence our poet does not mention it.

98. *She is devotedly attached-hence this guess.*

**जाने सख्यास्तव मयि मनः सम्भृतस्नेहमस्मा-**
**दित्थम्भूतां प्रथमविरहे तामहं तर्कयामि ।**
**वाचालं मां न खलु सुभगम्मन्यभावः करोति**
**प्रत्यक्षन्ते निखिलमचिरात् भ्रातरुक्तं मया यत् ॥ ९८ ॥**

Prak.—Easy.

Prose.—तव सख्याः मनः मयि सम्भृतस्नेहं जाने अस्मात् प्रथमविरहे अहं ताम् इत्थम्भूतां तर्कयामि । सुभगम्मन्यभावः मां वाचालं न करोति खलु, हे भ्रातः, मया यत् उक्तं तत् अचिरात् ते प्रत्यक्षं ( भवति ) ।

Beng.—তোমার সখীর ( অর্থাৎ আমার প্রিয়ার ) মন আমাতে জাতস্নেহ জানি, তাই প্রথমবিরহে তাকে এতদবস্থাপ্রাপ্ত বলিয়া অনুমান করি । আমার সৌভাগ্য-

অভিমানিতা আমাকে এভাবে বাচাল করিতেছে না নিশ্চয় ; কারণ হে ভ্রাতঃ, আমি যাহা বলিলাম, তা তুমি সত্বরই প্রত্যক্ষ করিবে ।

Eng.—Your friend's ( my wife's ) mind has its affection centred in me, so I guess such state of hers in this first separation. Indeed my thought of being a lucky one, does not make me talkative. O brother, you will erelong perceive all that I have said ( just now ).

Expl.—Easy.

Sanj.—नन्वीदृशीं दशामापन्नेति कथं त्वया निश्चितमतआह—जाने इति। हे मेघ, 'तव सख्याः मनो मयि सम्भृतस्नेहं' सञ्चितानुरागं 'जाने, अस्मात्' स्नेहज्ञान-करणात् 'प्रथमविरहे'। प्रथमग्रहणं दुःखातिशयार्थम्। 'तां' त्वत्सखीम् 'इत्थम्भूतां पूर्वोक्तावस्थामापन्नां 'तर्कयामि'। ननु सुभगमानिनामेष स्वभावो यदात्मनि स्त्रीणामनु-रागप्रकटनं, तत्राह वाचालमिति—सुभगमात्मानं मन्यते इति सुभगम्मन्यः [ "आत्ममाने खश्च" इति खश् प्रत्ययः। अरुर्द्विषदित्यादिना मुमागमः ] तस्य भावः 'सुभगम्मन्य-भावः' सुभगमानित्वम् 'मां वाचालं' बहुभाषिणं 'न करोति खलु' सौन्दर्य्याभिमानितां न प्रकटयामि इत्यर्थः [ "स्यात् जल्पकस्तु वाचालो वाचाटोबहुगर्ह्यवाक्" इत्यमरः। "आलजाटचौ बहुभाषिणि" इत्यालच प्रत्ययः ]। किन्तु 'हे भ्रातः, मयोक्तं यद् अभिज्ञामाम् इत्यादि 'तदखिलं' सर्वमचिरात् शीघ्रमेव 'ते' तव 'प्रत्यक्षं' भविष्यतीति शेषः ॥ ९८ ॥

## Charcha.

1. जाने—ज्ञा + लट ए। Nom. अहम्। "अनुपसर्गात् ज्ञः" इति कर्त्रभिप्राये क्रियाफले आत्मनेपदम्।

2. सम्भृत &c.—सम् + भृ + क्त कर्त्तरि = सम्भृत gathered ( सञ्चित )। सम्भृतः स्नेहः अस्य, बहु—। तत्। Qual. मनः ( which is Obj. of जाने )।

3. इत्थम्भूता—इदम्+थमु=इत्थम् thus ( एवम्प्रकारम् )। इत्थम् भूता, सुप्सुपा—। ताम्। Qual. ताम्। First separation ( प्रथमविरह ) is more pinching that subsequent ones.

4. खलु—निश्चयार्थे अव्ययम्। See *ante.*

5. सुभग &c —आत्मानम् सुभगं मन्यते इति सुभग+मन+खश् कर्त्तरि= सुभगम्मन्यः। For *Gram.*, see Malli. तस्य भावः, इतत्—। Nom. to करोति।

6. प्रत्यक्षम्—अक्ष्णोः प्रतिमुखत्वम् इति प्रति+अचि+अच् समासान्त= प्रत्यक्षम्, अव्ययीभावः—by the गणसूत्र "प्रतिपरसमनुभ्योऽक्ष्णः"। प्रत्यक्षमस्ति अस्य इति प्रत्यक्ष+अच् ( अर्श आदि )=प्रत्यक्षम्। Pred. to तत्। When प्रत्यक्ष &c. are used as adjectives, then we have recourse to अर्श आदि—अच्,—cp, "परोक्षा क्रिया इत्यादि तु अर्श आद्यचि"—*Bhattoji.*

7. Voice.—मया मनः...ज्ञायते...सा इत्थम्भूता तर्क्यतेमया...—मन्यभावेन वाचालःअहं क्रिये...अहं यदुक्तवान् तेन प्रत्यक्षेण भविष्यते।

## 99. *Probable beautiful casting of her eyes.*

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।
त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाच्चलकुवलयश्रीतुलामेष्यतीति ॥ ९९ ॥

Prak.—त्वयि आसन्ने ( सति ) मृगाक्ष्याः उपरिस्पन्दिनयनं मीनक्षोभात् चलकुवलयश्रीतुलाम् एष्यति इति शङ्के [ I think as you will approach near her she will cast tremulous looks on you. Thus her dark blue eye-balls and the white eye-surfaces will be constantly on the

move. And this will surely imitate the beauty of blue-lotuses shaken by white Safari fishes ]. Is the resemblance very apt ? —मधुनः प्रत्यादेशात् विस्मृतभ्रूविलासं नयनम् [ The eye was devoid of side-glances, for she gave up wine. Thus it was like a blown blue-lotus ] What more ?—अलकैः रुद्धापाङ्गप्रसरं ( तथा ) अञ्जनस्नेहशून्यं [ Her eyes could not move towards the corners, for loose dangling hairs obstructed this and they were not oily through use of collyrium. Hence her blue eye-balls were exactly like blue lotuses ]. 99.

Prose.—अलकैः रुद्धापाङ्गप्रसरम्, अञ्जनस्नेहशून्यं ( तथा ) मधुनः ( मद्यस्य ) प्रत्यादेशात् विस्मृतभ्रूविलासम्, त्वयि आसन्ने ( सति ) उपरिस्पन्दि मृगाक्ष्याः नयनं, मीनक्षोभात् चलकुवलयश्रीतुलाम् एष्यति इति शङ्के ।

Beng.—অলকদ্বারা যার অপাঙ্গ পর্য্যন্ত প্রসর অবরুদ্ধ, যাহা অঞ্জনশূন্য এবং মদ্য-ত্যাগহেতু যাহাতে ভ্রূবিলাস নাই এবং তুমি নিকটে আসিলে যাহা উর্দ্ধদিকে স্পন্দিত হইতে থাকিবে, হরিণনয়না প্রিয়ার সেই চক্ষুদ্বয়, আমার মনে হয়, শফরমৎস্যালোড়িত কম্পিত নীলকমলের শোভা ধারণ করিবে ।

Eng.—Methinks, the eyes of that fawn-eyed girl moving upwards at thy approach will attain the beauty of blue-lotuses agitated by fishes—eyes whose motions towards eye-corners are checked by loose hair, eyes that are without oiliness due to collyrium and that are forgetful of amorous gestures on account of giving up of wine.

Expl.—See Prak. Also comp...."तां वीक्ष्य लीलाचतुरामनङ्गः स्वचाप-सौन्दर्य्यमदं मुमोच"—Kumar.

Sanj.—रुद्धेति । 'अलकैः रुद्धा अपाङ्गयोः प्रसरा यस्य' तत् तथोक्तम् 'अञ्जन-स्नेहशून्यं' स्निग्धाञ्जनरहितम् 'अपि च मधुनो' मद्यस्य 'प्रत्यादेशात्' निराकरणात्

परित्यागादित्यर्थः, [ "प्रत्यादेशो निराकृतिः" इत्यमरः ] 'विस्मृतो भ्रूविलासो' भ्रूभङ्गो येन तत्। नयनस्य रुद्धापाङ्गप्रसरत्वादिकं विरहसमुत्पन्नम् इति भावः। 'त्वयि आसन्ने' सति, स्वकुशलवार्त्ताशंसिनि इति शेषः। 'उपरि' ऊर्ध्वभागे 'स्पन्दते' स्फुरतीति 'उपरिस्पन्दि' [ तथा च निमित्तनिदाने—"स्पन्दात्मूर्ध्नि क्षितिलाभं ललाटे पट्टसंश्रयम्। इष्टप्राप्तिं दृशोरूर्ध्वमपाङ्गे हानिमादिशेत्" ॥—इति ]। 'मृगाक्ष्याः' तव सख्याः नयनं' वाममिति शेषः। [ "वामभागस्तु नारीणां पुंसां श्रेष्ठस्तु दक्षिणः। दाने देवादि-पूजायां स्पन्देऽलङ्करणेऽपि च"—इति स्त्रीणां वामभागप्राशस्त्यात् ]। 'मीनक्षोभात्' मीनचलनात् 'चलस्य कुवलयस्य श्रियाः शोभायाः ( ? श्रिया शोभया ) 'तुलां' सादृश्यम्। 'एष्यतीति शङ्के' तर्कयामि [ "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्" इत्यत्र सदृशपर्य्यायस्य तुलाशब्दस्य प्रतिषेधादत्र च सादृश्यवाचित्वात् तद्योगेऽपि तृतीया। ] ॥

## Notes on Malli.

1. [ N. B.—Here in several editions the reading is श्रियाः शोभायाः &c, but this is wrong, it should be श्रिया शोभया, for Malli. himself says that in the rule "तुल्यार्थैः—" prohibition of तृतीया in cases of तुला and उपमा applies when they mean सदृश, but as the meaning here is सादृश्य, तृतीया is got in connection with तुला। Malli makes a similar remark under Magha I. sl. 4 ( e. g. सदृशपर्य्याययोः तुलोपमाशब्दयोः—"अतुलोपमाभ्याम्" इति निषेधात् सादृश्यवाचित्वे तृतीया इत्याहुः ) ]।

## Charcha.

1. अलकैः रुद्धापाङ्ग &c.—अलकैः has either करणे or अनुक्ते कर्त्तरि तृतीया, the verb being रुद्ध in रुद्धापाङ्गप्रसरम् ( for समास of which see Malli ). Qual. नयनम्।

2. अञ्जन &c.—अञ्जनस्य स्नेहः, ६तत्— । तेन शून्यम्, ३तत्— । Qual. नयनम् । Collyrium adds to the glossiness and beauty of the eyes, but all this is to be discarded during separation. See also Malli.

3. प्रत्यादेशात्—प्रति + आ + दिश् घञ् भावे = प्रत्यादेश giving up. तस्मात् । हेतौ ५मी ।

4. विस्मृत &c.—For समास, see Malli. Qual. नयनम् । Amorous gestures ( भ्रूविलास ) do not befit in time of separation. Hence her eyes as if forgot these, especially because she abstained from all exciting liquors ( मधु ) ।

5. उपरि &c —उपरि ( ऊर्ध्वं ) स्पन्दते इति उपरि + स्पन्द + णिनि कर्त्तरि साधुकारिणि = उपरिस्पन्दि quivering upwards. Qual. नयनम् । This indicates इष्टप्राप्ति । See निमित्तनिदान quoted by Malli.

6. मृगाक्ष्याः—मृगस्य अक्षि, ६तत्— । मृगाक्षि इव अक्षि यस्याः इति बहु— "सप्तम्युपमानपूर्वस्य उत्तरपदलोपश्च वक्तव्यः" ( see भर्त्तुः कण्ठच्छविः—&c, *ante* ). Then in बहुव्रीहि, षच् ( अ ) समासान्त comes by the rule "बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्" । ततः गौरादित्वात् ङीषि मृगाक्षी । तस्याः । Refers to प्रिया of यक्ष । शेषे ६ष्ठी ।

7. मीन &c.—क्षुभ + घञ् भावे = क्षोभः agitation. मीनेन क्षोभः agitation by fishes, सुप्सुपा— । तस्मात् । हेतौ ५मी । The exposition as मीनेन क्षोभः suits better than मीनस्य क्षोभः ।

8. चल &c.—चलं कुवलयम् । कर्मधा— । श्री is beauty. चलकुवलयस्य श्रीः, ६तत्— । तस्य तुला, शेषषष्ठ्या समासः ( ६तत्— ) । ताम् । Obj. of एष्यति । Malli makes ३या तत्—here as श्रिया तुला ( सादृश्यम् ), saying that prohibition is of सदृशवाचकतुला and not of सादृश्यवाचकतुला ।

And तुला being साहश्यवाचक here, gives तृतीया in connection with it. See also Notes on Malli. But we object to this view of Malli. Let us examine the rule "तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम्" little closely. Supposing the rule is omitted altogether, what विभक्ति is available in connection with तुल्यार्थ words ? We find no विभक्ति is enjoined except in the case of सदृश and सम which govern तृतीया by implication ( ज्ञापित ) in the rule "पूर्वसदृशसमोनार्थ-कलहनिपुणमिश्रश्लक्ष्णैः" । Hence generally the case of तुल्यार्थ words is as yet un-noticed ( अनुक्त ) । But we know—उक्तादन्यः शेषः—what is not noticed is शेष । Thus तुल्यार्थ words as a rule give शेषे षष्ठी, the rule "तुल्यार्थैः—" however provides for तृतीया also. cases not covered by this rule admit of षष्ठी only. So तुला and उपमा give षष्ठी and *not* तृतीया be the meaning सदृश or साहश्य it does not matter. Again the rejoinder to Malli's view is obvious—when साहश्यार्थ, तुला and उपमा are no longer तुल्यार्थ (सदृशार्थ), and can not come under the rule to claim तृतीया, they are entitled to षष्ठी only. So Malli's defence falls through.

Nagesa thinks तुला and उपमा do not mean सदृश but साहश्य only ; and by तुल्य in the rule he understands तुल्यत्व i. e. साहश्य to keep up correspondence with तुला and उपमा । Acc. to this view also, तुला here meaning साहश्य can not give तृतीया, for it comes under the prohibition अतुलोपमाभ्याम् । Hence we have expounded as—प्रियाः तुला with शेषषष्ठीतत् ।

9. एष्यति—आ + इ + लृट स्यति । Nom. नयनम् । For the simile, see Prak. above.

10. Remark—The reading मीनक्षोभाकुलकुवलयश्रीतुलाम् is decidedly better. मीनक्षोभ is the cause of आकुलकुवलय ( or चलकुवलय ), hence it should better be compounded than be left uncompounded.

11. Voice.—...अपाङ्गप्रसरेण...कज्जलस्नेहशून्येन...—विलासेन...स्पन्दिना नयनेन...श्रीतुला एष्यते ( or आयिष्यते ) इति मया शङ्क्यते... ।

### *100. Her sensation at cloud's sight.*

वामश्चास्याः कररुहपदैर्मुच्यमानो मदीयै-
र्मुक्ताजालं चिरपरिचितं त्याजितो दैवगत्या ।
सम्भोगान्ते मम समुचितो हस्तसंवाहनानां
यास्यत्यूरुः सरसकदलीस्तम्भगौरश्चलत्वम् ॥ १०० ॥

[ N. B.—This sloka is rather indelicate, so Prose. Eng. and Malli. only follow. ].

Prose.—मदीयैः कररुहपदैः ( नखचिह्नैः ) मुच्यमानः, दैवगत्या ( दैववशेन ) चिरपरिचितं मुक्ताजालं त्याजितः, सम्भोगान्ते मम हस्तसंवाहनानां ( हस्तमर्दनानां ) समुचितः सरसकदलीस्तम्भगौरः अस्याः वामः ऊरुः चलत्वं यास्यति ।

Eng—Her left thigh too, devoid of signs of my nail-marks, made to forego its ever-known pearl-string through freaks of Fate, inured to shampooing by my hand after intercourse and white like fresh stump of plantain, plant will feel tremblings.

Sanj.—वाम इति । 'मदीयैः कररुहपदैः' नखपदैः [ "पुनर्भव कररुहो नखोऽस्त्री नखरोऽस्त्रियाम्" इत्यमरः ] 'मुच्यमानः' परिहीयमाणः नखाङ्करहित इत्यर्थः ; 'चिरपरिचितं' चिराभ्यस्तं 'मुक्ताजालं' मौक्तिकसरमयं कटिभूषणं 'दैवगत्या' दैववशेन

'त्याजित:'। सम्प्रति नखपदोपमाभावेन शीतोपचारस्य तस्य वैयर्थ्यात् इति भाव:। [ त्यजते: ण्यन्तात् कर्मणि क्त:। पचादित्वात् द्विकर्मकत्वम् ( ? ) ] 'सम्भोगान्ते मम हस्तसंवाहनानां' हस्तेन मर्दनानाम् [ "संवाहनं मर्दनं स्यात्" इत्यमर: ] 'समुचित: योग्य: ; 'सरस:' रसार्द्र:, परिपक्वो न शुष्कश्च विवक्षित:, तत्रैव पाण्डिमसम्भवात्—स चासौ 'कदलीस्तम्भश्च', स इव 'गौर:' पाण्डुर: [ "गौर: करीरे सिद्धार्थे शुक्ले पीतेऽरुणेऽपि च" इति मालतीमाला ] 'अस्या:' प्रियाया: 'वाम: ऊरु: चलत्वं' स्पन्दनं 'यास्यति' प्राप्स्यति। [ "ऊरो: स्पन्दात् रतिं विद्याद्दूर्वा: प्राप्तिं सुवाससः" इति निमित्तनिदानम् ]॥ १००॥

## Charcha.

1. त्याजित:—त्यज + णिच् + क्त कर्मणि = त्याजित: made to give up. Qual. ऊरु:। दैवगत्या is its प्रयोजक अनुक्तकर्ता। त्याग implies motion ( गति ), hence in the णिजन्तावस्था we have अणिकर्तृ: कर्मसंज्ञा by "गतिबुद्धि—" ( see under मोचयिष्यति, sl. 97. ). Thus the sentence before णिच् was—ऊरु: मुक्ताजालं त्यक्तवान् ; adding णिच we get—दैवगति: ऊरुं मुक्ताजालं त्याजितवान्, then in कर्मवाच्य we have—दैवगत्या मुक्ताजालं त्याजित: ऊरु:। Sudhakara and his followers however add त्याजि in the list of द्विकर्मक verbs. See his quotation ( *ante* under मोचयिष्यति)। And Malli here as before follows him But we prefer the former view, for Bhattoji &c. is in our favour. Hence we said that it was perbaps an interpolation by a beginner and can not be the out come of Malli's scholarship.

2. Remark.—Stumps of plantain plants are standards of comparison for female thighs, cp "एकान्तशैत्यात् कदलीविशेषा:...जातास्तदूर्वोरुपमानबाह्या:"—Kumara. I.

### 101. *Don't rumble while she is asleep.*

तस्मिन्काले जलद यदि सा लब्धनिद्रासुखा स्या-
दन्वास्यैनां स्तनितविमुखो याममात्रं सहस्व ।
मा भूदस्याः प्रणयिनि मयि स्वप्नलब्धे कथञ्चित्
सद्यः कण्ठच्युतभुजलताग्रन्थि गाढोपगूढम् ॥ १०१ ॥

Prak.—Easy.

Prose.—हे जलद, तस्मिन् काले यदि सा लब्धनिद्रासुखा स्यात्, एनाम् अन्वास्य (तत्समीपमुपविश्य इत्यर्थः) स्तनितविमुखः त्वं याममात्रं सहस्व। प्रणयिनि मयि कथञ्चित् स्वप्नलब्धे (सति), अस्याः गाढोपगूढं (गाढालिङ्गनं) सद्यः कण्ठच्युत-भुजलताग्रन्थि मा भूत्।

Beng.—হে মেঘ, সেই সময় যদি আমার প্রিয়া নিদ্রাসুখ লাভ করে, তবে তার পার্শ্বে উপবিষ্ট হইয়া গর্জনে বিরত থাকিয়া যামমাত্র অপেক্ষা করিবে। প্রণয়ী আমাকে কোন প্রকারে স্বপ্নে পাইয়া থাকিলে, (হয়ত সে নিদ্রাতেই আমাকে আলিঙ্গন করিতে থাকিবে) তখন সেই সময় আমার কণ্ঠ হইতে ভুজপাশের বন্ধন ভ্রষ্ট হইয়া তাহার গাঢ়ালিঙ্গন যেন উন্মুক্ত না হয়।

Eng.—O cloud, if she at that time get the pleasure of sleep, then sitting close to her wait for a *prahara* (i. e., three hours) with your roar discontinued. I, her lover, being somehow met in dream, see that her deep embracing be not forthwith such as to have the tie of creeper-like arms slipped from my neck.

Expl.—In her sleep, she must have me in dreams. And there she will closely embrace me. Now if you see her in sleeping condition, don't disturb her by deep rumbles, for then she will instantly lose my embrace.

Sanj.—तस्मिन्निति । हे जलद, 'तस्मिन् काले' त्वदुपसर्पणकाले 'सा' मम प्रिया, 'लब्धं निद्रासुखं यया' तादृशी स्यात् यदि' स्यात् चेत् 'एनां' निद्राणाम् 'अन्वास्य' पश्चात् आसित्वा इत्यर्थः [ उपसर्गवशात् सकर्मकत्वम् ] 'स्तनितविमुखः' गर्जितपराङ्मुखः निःशब्दः सन् अन्यथा निद्राभङ्गः स्यादिति भावः । 'याममात्रं' प्रहरमात्रं [ "द्वौ यामप्रहरौ समौ" इत्यमरः ] 'सहस्व' प्रतीक्षस्व [ प्रार्थनायां लोट ] । शक्तयोरेकवारं सुरतस्य यामावधिकत्वात् स्वप्नेऽपि तथा भवितव्यम् इत्यभिप्रायः [ तथा च रतिसर्वस्वे—"एकवारावधिर्यामो रतस्य परमो मतः । चण्डशक्तिमतोर्यूनोरुद्भटक्रमवर्त्तिनोरिति ॥" ] । याममहनस्य प्रयोजनमाह, मा भूदिति—'अस्याः' प्रियायाः 'प्रणयिनि' प्रेयसि मयि 'कथञ्चित्' कृच्छ्रेण 'स्वप्नलब्धे' सति 'गाढोपगूढं' गाढालिङ्गनम् [ नपुंसके भावे क्तः ] 'सद्यः' तत्क्षणं 'कण्ठात् च्युतः भुजलतयोः ग्रन्थिः' बन्धः यस्य तत् 'मा भूत्' मास्तु । कथञ्चित् लब्धालिङ्गनस्य विघातो मा भूदित्यर्थः । न चात्र निद्रोक्तिः, 'तामुन्निद्राम्'—इति पूर्वोक्तेन निद्राच्छेदेन विरुध्यते, पुनः सप्तमाद्यवस्थासु पाक्षिकनिद्रासम्भवात् । [ तथा च रत्नाकरे—"अशक्ती रोदनं निद्रा निर्लज्जानर्थवाग्भ्रमः । सप्तमादिषु जायन्ते दशाभेदेषु वासुके ॥" इति ] ॥ १०१ ॥

## Notes on Malli.

1. Here निद्रोक्ति will not be inconsistent with the previous saying—तामुन्निद्राम् &c. for in the 7th state onwards ( e. g. अशक्ति &c.—see *ante* ) there is probability of partial sleep. Ratnakara also is to this effect.

## Charcha.

1. लब्ध &c.—लभ + क्त कर्मणि = लब्ध got. निद्रायाः सुखम्, ६तत्— । लब्धम् निद्रासुखमनया, बहु— । Pred. to सा ।

2. अन्वास्य—अनु + आस + ल्यप् । Having sat near. आस is अकर्मक but it is सकर्मक here owing to the उपसर्ग—'अनु' । 'एनाम' being its-

कर्म। Or—Take अन्वास्य to mean उपवेशनेन पूजयित्वा i. e., honouring her by sitting near her in her sleep. Thus the period of her sleep may be prolonged. This meaningseems better. For a similar sense of अनु+आस, cp.—"स्थाणुं तपस्यन्तमधित्यकायाम्। अन्वास्त इत्यप्सरसां मुखेभ्यः" &c.—Kum. III. and "अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम्—"Rag. I.

3. याम &c.—याम is प्रहर (a period of 3 hours). याम एव याममात्रम्, मयूरव्यंसकादित्वात् समासः। अत्यन्तसंयोगे २या। Thus याममात्रम् =याममात्रं व्याप्य (सहस्व) &c.

4. सहस्व—सह+लोट स्व। Wait. Nom. त्वम्। The sense is—You wait, till she arises from her sleep.

5. भूत्—भू+लुङ् द। "माङि लुङ्" इति माङ्योगे लोडर्थे लुङ्। "न माङ्योगे" इत्यडागमप्रतिषेधः। Nom. गाढ़ोपगूढ़म्।

6. स्वप्न &c.—स्वप+न=स्वप्न sleep. स्वप्ने लब्धः, सुप्सुपा—। तस्मिन्। Pred. to मयि (which has भावे ७मी)।

7. कथञ्चित्—As compound अव्यय meaning 'somehow' Cp. "कथञ्चित् क ण्ठादपक्रामति &c."—Rag. XIII.

8. कण्ठ &c.—कण्ठात् च्युतः (भ्रष्टः), सुप्सुपा—। भुजलतायाः ग्रन्थिः (बन्धः), इतत्—। कण्ठच्युतः भुजलताग्रन्थिः अस्मिन्, बहु—। तत्। Pred. to गाढ़ोपगूढ़म्। The sense is—See that the embraces she has got in dreams be not lost. In other words, you must not rouse her by your rumbles. Thus she will enjoy pleasure of embrace with me in sleep.

9. गाढ़ोप &c.—गाह+क्त कर्त्तरि=गाढ़ deep. उप+गुह+क्त भावे नपुंसके=उपगूढ़ embrace. गाढ़मुपगूढ़म्, कर्मधा—। तत्। Nom. to भूत्।

10. Remark—Malli explains याममात्रसङ्ग with reference to enjoyment. See the quoation of रतिसर्वस्व in Malli. But मल्लिमसिंह explains it thus—"उत्तमस्त्रियः प्रहरमात्रं निद्रां कुर्वन्ति इति पद्मिनीत्वं प्रकाशितं भवति—"पद्मिनी यामनिद्रा च द्विप्रहरा च चित्रिणी। हस्तिनी यामत्रितया, घोर-निद्रा च शङ्खिनी॥"

11. Voice.—...निद्रासुखया भूयते...विमुखेन सन्नतास...उपगूढेन...—ग्रन्थिना...मा भावि।

## *102. Cloud's words to begin now.*

तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्।
विद्युद्गर्भः स्तिमितनयनां त्वत्सनाथे गवाक्षे
वक्तुं धीरः स्तनितवचनैर्मानिनीं प्रक्रमेथाः॥ १०२॥

Prak—Easy.

Prose.—मालतीनाम् अभिनवैः जालकैः समं ( सह ) प्रत्याश्वस्तां तां स्वजल-कणिकाशीतलेन अनिलेन उत्थाप्य, त्वत्सनाथे गवाक्षे स्तिमितनयनां मानिनीं विद्युद्गर्भः धीरः ( त्वं ) स्तनितवचनैः वक्तुं प्रक्रमेथाः। Or—( After Mallli ) तां...उत्थाप्य मालतीनाम्...प्रत्याश्वस्ताम् &c. (See Malli).

Beng.—নূতন মালতী কোরকের সহিত উজ্জীবিত সেই প্রিয়াকে নিজ জলকণাহেতু শীতল বায়ুতে উত্থাপিত করিয়া, মেঘযুক্ত গবাক্ষে অনিমেষদৃষ্টিযুক্ত মানিনীকে, বিদ্যুৎকে অন্তরে বিলীন রাখিয়া তুমি গর্জনরূপ বাক্যে বলিতে আরম্ভ করিবে।

Eng.—She enlivened along with fresh Malati blossoms, should be roused from sleep by you with breezes cool through contact with your water-sprays. Then you, calm and with lightning concealed inside should begin to say by speech of

rumbles to that high-souled lady having her winkless eyes on the window possessed by you.

Eng.—Easy.

Malli.—तामिति । 'तां' प्रियां 'स्वस्य जलकणिकाभिः' जलबिन्दुभिः 'शीतलेन अनिलेन 'उत्थाप्य' प्रबोध्य । एतेन तस्याः प्रभुत्वाद्राजनानिलसमाधिर्व्यज्यते । [यथाह भोजराजः—"मृदुभिर्मर्दनैः पादे शीतलैर्व्यजनैः स्तनौ । श्रुतौ च मधुरैर्गीतैः निद्रातो बोधयेत्प्रभुम् ॥" इति ]। 'अभिनवैः मालतीनां जालकैः समं' जातीमुकुलैः सह ["सुमना मालती जातिः" इति । "साकं सत्रा समं सह" इति । 'क्षारको जालकं क्लीवे कलिका कोरकः पुमान्" इति च अमरः ] 'प्रत्याश्वस्तां' सुस्थिताम्, अन्यत्र पुनरुच्छ्वसिताम् [ श्वसेः कर्त्तरि क्तः । "आदितश्च" इति चकारात इट् प्रतिषेधः ]। एतेनास्याः सौकुमार्यं गम्यते । 'त्वत्सनाथे' त्वत्सहिते [ "सनाथं प्रभुमित्याहुः सहिते चित्ततापिनी"ति शब्दार्णवः ] 'गवाक्षे स्तिमितनयनां' कोऽसौ इति विस्मयात निश्चलनेत्रां 'मानिनीं' मनस्विनीम्, अनौचित्यसहिष्णुमित्यर्थः । 'विद्युत् गर्भः' अन्तःस्था यस्य स विद्युद्गर्भः अन्तर्लीनविद्युत्क इत्यर्थः [ । "गर्भोऽपवरके अन्तःस्थे गर्भोऽग्नौ कुक्षिगेऽर्भके" शब्दार्णवः ]। दृष्टिप्रतिघातेन वक्तृमुखावलोकनप्रतिबन्धकत्वात् न विद्युता द्योतितव्यमिति भावः1 । 'धीरो' धैर्यविशिष्टश्च सन्, अन्यथा शीतलत्वादिना एतद्नाश्वासनप्रसङ्गात् इति भावः । स्तनितवचनैः' स्तनितान्येव वचनानि तैः 'वक्तुं' प्रक्रमेथाः' उपक्रमस्व [ विध्यर्थे लिङ् । "प्रोपाभ्याम्—" इत्यात्मनेपदम् ] ॥ १०२ ॥

## Notes on Malli.

1. The sense is, you should not flash with lightning, for that being destroyer of sight will obstruct the face of you, the speaker.

## Charcha.

1. तामुत्थाप्य—उद् + स्था + णिच् + ल्यप् । Having roused. The reading प्रोत्थाप्यैनाम् in place of it is more emphatic.

2. सजल &c.—For समास see Malli. Qual. अनिलेन ( which has करणे ३या, करण of उत्थापनक्रिया ) ।

3. जालकैः—जालक means 'blossoms' ( कोरक ) । तैः । सहार्थक समं शब्दयोगे ३या, by the rule "सहयुक्तेऽप्रधाने" ।

4. प्रत्याश्वस्ताम्—प्रति + आ + श्वस + क्त कर्त्तरि स्त्रियाम् = प्रत्याश्वस्ता enlivened. Qual. ताम् । Or - Qual. मानिनीम् ( See Malli ). Malli's construction here is—तामुत्थाप्य...मालतीनां जालकैः समं प्रत्याश्वस्तां...मानिनीम् &c. But we differ, see Prose above. For, Malati blossoms at the advent of rain, hence so soon as cloud will go there, the blossoms will be blooming and this beneficial change of season and atmosphere will also be an additional cause to enliven Yaksha's wife in her sleep. Then, indeed she should be roused with wind cool through rain-sprays. Thus sne should be first प्रत्याश्वस्ता and then roused and not the reverse, as Malli says. In प्रत्याश्वस्ता we do not get इट्, for *Kasika* says under the rule "आदितश्च"—"चकारोऽनुक्तसमुच्चयार्थः । आश्वस्तः वान्तः" ।

5. विद्युद्गर्भः—विद्युत् गर्भः ( गर्भस्थः ) अस्य, बहु— । Qual. त्वम् understood. For the significiance of the epithet see "Note on Malli." The word also suggests that the cloud should be with its spouse—विद्युत, for it is to approach a lady.

6. गवाक्षे—गवाम् अक्षि ( अक्षीव ) इति गवाक्षः window. समासान्त here comes by the rule "अक्ष्णोऽदर्शनात्" । It is masculine through usage. तस्मिन् । अधि ७मी ।

7. त्वत etc —नाथेन सह वर्त्तमानः सनाथः, बहु— । त्वया सनाथः, सुप्सुपा— । तस्मिन् । Qual. गवाक्षे ।

8. स्तनित &c.—For समास, see Malli. करणे इया। The reading धीरस्तनितवचनै: is also seen, but we prefer Malli's reading, for the word धीर as qualifying cloud is significant here. See Malli—"धैर्य्यविशिष्टस्य सत" &c.

9. प्रक्रमेथा:—प्र + क्रम + लिङ् विधौ + ईथास्। Nom, त्वम। आत्मनेपद here comes by the rule "प्रोपाभ्यां समर्थाभ्याम"।

10. Voice.—...गर्भेण धीरेण त्वया प्रक्रम्येत...।

### *103. Cloud's account to her.*

भर्तुर्मित्रं प्रियमविधवे विद्धि मामम्बुवाहं
तत्सन्देशैर्हृदयनिहितैरागतं त्वत्समीपम्।
यो वृन्दानि त्वरयति पथि श्राम्यतां प्रोषितानां
मन्द्रस्निग्धैर्ध्वनिभिरबलावेणिमोक्षोत्सुकानि ॥ १०३ ॥

Prak.—Easy.

Prose.—हे अविधवे, मां भर्तु: प्रियं मित्रं हृदयनिहितै: तत्सन्देशै: त्वत्समीपमागतम् अम्बुवाहं विद्धि। य: ( मेघ: ) अबलावेणिमोक्षोत्सुकानि पथि श्राम्यतां प्रोषितानां वृन्दानि मन्द्रस्निग्धै: ध्वनिभि: त्वरयति।

Beng—হে অবিধবে, তোমার স্বামীর প্রিয় মিত্র, হৃদয়স্থ তদীয় বার্ত্তার সহিত তোমার নিকট আগত মেঘ বলিয়া আমাকে জানিবে। যে মেঘ, নিজ নিজ ভার্য্যার বেণিমোচনে উৎসুক শ্রান্ত পথিকগণের দলকে মন্দ মধুর গর্জ্জনে ( গৃহাভিমুখে ) ত্বরাযুক্ত করিয়া থাকে।

Eng.—O you, a non-widow, know me as a cloud—your husband's favourite friend, and come to you with messages laid concealed in his heart. I am the cloud that by deep rumbles hasten (towards home) hosts of separated wearied travellers eager to untie the braided hairs of their wives,

Expl.—Rainy season as said before, is very trying to separated lovers. Now at the advent of rain, mentravelling abroad will hasten to their wives to relieve them of their mental anguishes. Thus by coming home they will break the पतिव्रताधर्म of their wives, namely to remain एकवेणीधरा during separation.

Sanj.—सम्प्रति दूतस्य श्रोतृजनाभिमुखीकरणचातुरीमुपदिशति—भर्तुरिति। विधवा गतभर्तृका न भवतीति 'अविधवा' सभर्तृका, हे 'अविधवे'—अनेन भर्तृजीवनसूचनात् अनिष्टाशङ्कां वारयति। 'मां' तव 'भर्तुः प्रियं मित्रं' प्रियसुहृदं तत्रापि 'हृदये' मनसि स्थापितैः 'तत्सन्देशैः' तस्य भर्तुः सन्देशैः' त्वत्समीपम् आगतं' भर्तुः सन्देशकथनार्थमागतम् इत्यर्थः 'अम्बुवाहं' मेघं 'विद्धि' जानीहि। न केवलमहं वार्त्ताहरः, किन्तु घटकोऽपीत्याशयेन आह—'योऽम्बुवाहः 'अबलानां' स्त्रीणां 'वेणयः' तासां 'मोक्षे' मोचने 'उत्सुकानि' पथि श्राम्यतां' श्रान्तिमापन्नानां 'प्रोषितानां' प्रवासिनां पान्थानाम् इत्यर्थः 'वृन्दानि' सङ्घान् 'मन्द्रस्निग्धैः' स्निग्धगम्भीरैः ध्वनिभिः' करणैः 'त्वरयति'। पान्थोपकारिणो मे किमु वक्तव्यं सुहृदुपकारित्वम् इति भावः ॥ १०३ ॥

## Charcha.

1. अविधवे—See Malli. Case of Address. By this is suggested —that her husband was alive. For a similar use, cp.—"ये मामाहुः पितुर्गेहे पुत्रिण्यविधवेति च"—Ramayana.

2. विद्धि—विद्+लोट् हि। Nom. त्वम्। वेत्ति-वेद, विवेद, वेत्स्यति &c.

3. अम्बु etc.—अम्बु water. अम्बु वहतीति अम्बु+वह+अण् कर्त्तरि= अम्बुवाह cloud. तम्। Pred. to माम्। Here अण् comes by the rule "कर्मण्यण्"।

4. तत्सन्देशैः—ऊह्य सहयुक्तेऽप्रधाने तृतीया। Deriv. ante sl. 92. under मत्सन्देशैः।

5. हृदयनिहितै:—Deriv. *ante.* Qual. सन्देशै: । This means the message that lay in his inner heart.

6. त्वरयति—त्वर (भ्वादि) + णिच् + लट् ति । Hastens. Nom. य: । Here त्वर being घटादि, takes ह्रस्व in णिच् । Cp.—the rules "घटादयो मित:" and "मितां ह्रस्व:" ।

7. या—Refers to अम्बुवाह । "उत्तरवाक्यगतत्वेनोपादानात् न तच्छब्दव्यपेक्षा" ।

8. श्राम्यताम्—श्रम (दिवादि) + लट: स्थाने शतृ = श्राम्यत् resting. तेषाम् । Qual. प्रोषितानाम् ।

9. ध्वनिभि:—करणे ३या ।

10. अवलावेणि etc.—मुच् + घञ् भावे = मोक्ष untying. अबलानां वेणय:, ६तत्— । तासां मोक्ष:, ६तत्— । तस्मिन् उत्सुक: सुपसुपा— । तानि । Qual. वृन्दानि । The epithet suggests that they will hasten to home, and thus being united will put an end to the vow of एकवेणीधरत्व of their wives.

11. Voice.—अहम्...आगत: अम्बुवाह: विद्यै...येन वृन्दानि त्वर्यन्ते... ।

## *104. Her attention to cloud.*

**इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा**
**त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य सम्भाव्य चैवम् ।**
**श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां**
**कान्तोदन्त: सुहृदुपनत: सङ्गमात् किञ्चिदून: ॥ १०४ ॥**

Prak.—Very easy.

Prose.—इति आख्याते (सति), उन्मुखी सा मैथिली पवनतनयम् इव, उत्कण्ठोच्छ्वसितहृदया (सती) त्वां वीक्ष्य सम्भाव्य च अस्मात् परं अवहिता श्रोष्यति । हे सौम्य, सीमन्तिनीनां सुहृदुपनत: कान्तोदन्त: सङ्गमात् किञ्चित् ऊन: (भवति) ।

Beng,—এই কথা কথিত হইলে উন্মুখী প্রিয়া, সীতা যেমন হনুমানকে দেখিয়াছিলেন, তদ্রূপ উৎকণ্ঠাব্যাকুল চিত্ত হইয়া তোমাকে দেখিয়া, সম্মানকরতঃ অবধান সহকারে পরবর্ত্তী সমস্তই শুনিবেন। হে সাধো, বন্ধুকর্ত্তৃক আনীত প্রিয়ের বার্ত্তা, স্ত্রীলোকের নিকট সংযোগের প্রায় তুল্য হইয়া থাকে।

Eng.—This being said, she with face turned up at thy sight, her heart expanded through eagerness, will see and honour thee like Janaki at the sight of wind-god's son (Hanumat) ; then she will be all attention to thee. O good one, news of the beloved brought by friends is to women a little short of union.

Expl.—Easy.

Sanj.—भर्तृसख्यादिज्ञापनस्य फलमाह, इतीति,—'इति' एवम् 'आख्याते, पवनतनयं' हनूमन्तं 'मैथिली' सीता 'इव, सा' मत्प्रिया 'उन्मुखी, उत्कण्ठया उच्छ्वसितहृदया' विकसितचित्ता च सती 'त्वां वीक्ष्य सम्भाव्य' सत्कृत्य 'अस्मात्' भर्तृमैत्रीज्ञापनात 'परं' सर्वं श्रोतव्यम् 'अवहिता' अप्रमत्ता सती 'श्रोष्यति च'। [ अत्र सीताहनूमदुपाख्यानात अस्याः पातिव्रत्यं, मेघस्य दूतगुणसम्पत्तिश्च व्यज्यते। तद्गुणास्तु रत्नाकरे —"ब्रह्मचारी बली धीरो मायावी मानवर्जितः। धीमानुदारो निःशङ्को वक्ता दूतः स्त्रियां भवेत ॥"—इति ]। ननु वार्त्तामात्रश्रवणात् अस्याः को लाभ इत्याशङ्क्य अर्थान्तरमुपन्यस्यति,—हे 'सौम्य' साधो, 'सीमन्तिनीनां' वधूना [ "नारी सीमन्तिनी वधूः" इत्यमरः ] 'सुहृदा' सुहृन्मुखेन 'उपनतः' प्राप्तः। सुहृत्पदं विप्रलम्भशङ्कानिवारणार्थम्। 'कान्तस्य' उदन्तः वार्त्ता 'कान्तोदन्तः' [ "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्" इत्यमरः ] सङ्गमात कान्तसम्पर्कात 'किञ्चिदूनः' ईषदूनः तद्वदेव आनन्दकारीत्यर्थः ॥ १०४ ॥

## Notes on Malli.

1. Here by reference to the story of Sita and Hanumat, her devotedness and cloud's possession of a messenger's

qualities are indicated. Thus Rasakara enumerates the qualities of a दूत ।

## Charcha.

1. इति—An अव्यय meaning 'अनेन प्रकारेण' ( in this way). Or—इति means 'this'. obj. of आख्याते । See next.

2. आख्याते—आ + चक्ष + क्त नपुंसके भावे = आख्यात narration. आख्यात = आख्यान । तस्मिन् । भावे ७मी । If इति means अनेनप्रकारेण, then explain आख्यात in the above way. But if इति is taken to mean 'this', then derive आख्यात thus—आ + चक्ष + क्त कर्मणि = आख्यात having narrated. तस्मिन् । Qual. तस्मिन understood. ख्या is ordered in place of चक्ष when an आर्धधातुक affix follows, the rule is "चक्षिङः ख्याञ्" ।

3. उत्कण्ठ &c.- उद् + श्वस् + क्त कर्त्तरि = उच्छ्वसित dilated. Some grammarians take इट् optional after श्वस, witness आश्वसित and आश्वस्त &c. (see *ante*). उत्कण्ठया उच्छ्वसितम्, ३तत्— । तादृशं हृदयमस्याः, बहु— । Pred. to सा । The आख्यान made her delighted. ( Compare उच्छ्वासित *ante*).

4. सम्भाव्य—सम् + भू + णिच् + ल्यप् । Having honoured. cp "सम्भावनागुणमवेहि तमीश्वराणाम्"—Sak. VII.

5. श्रोष्यति—श्रु + लृट् स्यति । Nom. सा । शृणोति, शुश्राव, अश्रौषीत् &c.

6. अवहिता—अव + धा + क्त नपुंसके भावे = अवहितम् attention. तदस्ति अस्या इति अवहित + अच् मत्वर्थीय—अर्श आदि ) = अवहिता attentive. Pred. to सा । Or—अवहिता = अवहितचित्ता as पीत means पीतदुग्धा in पीता गाव: । We do not think कर्त्तरि क्त with अविवक्षा of the कर्म, as

sound here, for Bhattoji is against this procedure in his Manorama. See our notes on विदित:—Kirat 1, sl. 1,

7. सीमन्तिनीनाम्—For सीमन्त meaning 'hair' see ante. शकन्ध्वादित्वात् पररूपम्। सीमन्त: अस्ति आसाम् इति सीमन्त + इनि ( मत्वर्थे ) + ङीप् = सीमन्तिनी lady. तासाम्। शेषे ६ष्ठी, Malli' takes this to mean वधू, but we prefer the meaning नारी here, for all women consider the news of their beloved as equal to actual union.

8. सङ्गमात्—सम् + गम + अप् भावे = सङ्गम union. तस्मात्। "पञ्चमी विभक्ते" इति विभागे ५मी।

9. Voice.—उन्मुख्या तया...मैथिल्या इव...उच्छ्वसितहृदयया अवहितया श्रोष्यते...कान्तोदन्तेन उपनतेन उदन्तेन भूयते।

### *105. The message proper.*

**तामायुष्मन्मम च वचनादात्मनश्चोपकर्त्तुं**
**ब्रूयादेवं तव सहचरो रामगिर्य्याश्रमस्थ:।**
**अव्यापन्न: कुशलमबले पृच्छति त्वां वियुक्त:**
**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव ॥ १०५ ॥**

Prak.—Easy.

Prose.—हे आयुष्मन्, मम वचनात् च, आत्मन: उपकर्त्तुं च तामेवं ब्रूयात्—हे अबले, रामगिर्य्याश्रमस्थ: वियुक्त: ( तथा ) अव्यापन्न एव तव सहचर: त्वां कुशलं पृच्छति। सुलभविपदां प्राणिनां एतदेव पूर्वाभाष्यम् ( भवति )।

Beng.—হে আয়ুষ্মন্, আমর কথা শুনিয়া, পরোপকার দ্বারা নিজের উপকার করিবার জন্য তাহাকে বলিবে—"হে অবলে, রামগিরি-আশ্রমস্থ বিযুক্ত কিন্তু অমৃত তোমার সহচর তোমাকে কুশল জিজ্ঞাসা করিতেছে।" সদা বিপদযুক্ত জন্তুগণের ইহাই পূর্বে জিজ্ঞাস্য বটে।

Eng.—O long-lived one, hearing my words and to derive self-benefit ( by rendering service to other ) you should say to her thus—"O weak one, your companion residing at the hermitage of Ramgiri separated from you and not dead asks your welfare. Indeed thus is to be first enquired of animals easily liable to perils.

Expl.—Easy.

Sanj.—सम्प्रति सन्दिशति—तामिति। हे 'आयुष्मन्' [ प्रशंसायां मतुप् ] परोपकारश्लाघ्यजीवित इत्यर्थः। 'मम वचनं' प्रार्थनावचनं तस्माच्च 'आत्मनः' स्वस्य 'उपकर्त्तुञ्च' परोपकारेण आत्मानं कृतार्थयितुमित्यर्थः। [ उपकारक्रियां प्रति कर्मत्वेपि 'तस्यानुकरोति'—इत्यादिवत् सम्बन्धमात्रविवक्षायाम् आत्मन इति षष्ठी न विरुध्यते। तथाह भारविः—"सा लक्ष्मीरुपकुरुते यया परेषाम्" इति। तथा श्रीहर्षश्च—"साधूनामुपकर्त्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुं। न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम्"—इति। ]। 'तां' प्रियामिवं ब्रूयात्' भवानिति शेषः। किमित्याह—'हे अबले, तव सहचरो' भर्त्ता रामगिरेः चित्रकूटस्य आश्रमेषु तिष्ठतीति 'रामगिर्य्याश्रमस्थः' सन् 'अव्यापन्नः' न मृतः। 'वियुक्तो' वियोगं प्राप्तो दुःखी सन् त्वां कुशलं पृच्छति [ दुहादित्वात् पृच्छतेर्द्विकर्मकत्वम् ]। तथाहि—'सुलभविपदाम्' अयत्नसिद्धविपत्तीनाम् 'प्राणिनाम एतदेव' कुशलमेव 'पूर्वाभाष्यम्' एतदेव (?) प्रथममवश्यं प्रष्टव्यम् [ "कृत्याश्च" इत्यावश्यकार्थे ण्यत् प्रत्ययः ]॥ १०५॥

## Notes on Malli.

1. Though आत्मन् stands in the relation of कर्म to उप+कृ, still आत्मनः has सम्बन्धविवक्षया षष्ठी as in 'तस्य अनुकरोति'। And this is not inconsistent. Thus Bharavi in his Kirat says "सा लक्ष्मीरुपकुरुते यया परेषाम्", and Sriharsa in his Naishadha also writes "साधूनाम् उपकर्त्तुम् &c." [ N. B.—Here एतदेव is repeated twice in Malli. This seems to be a copyist's slip ].

## Charcha.

1. वचनात्—ब्रू or वच + ल्युट भावे = वचनम् word. तस्मात्। हेतौ ५मी। Or—ल्यप् लोपे कर्मणि ५मी, thus वचनात् = वचनं श्रुत्वा।

2. आत्मन:—आत्मन् has शेषे ६ष्ठी। See Malli and Notes thereon. उप + कृ in the sense 'to do good in return, is generally used as अकर्मक by poets. See Kirat and Naishadha quoted by Mallî; also cp. "न परस्य किञ्चिदुपकर्तुमिच्छति"—Sisu. For its सकर्मक use, cp, "किन्ते भूय: प्रियमुपकरोमि"—Uttar VII. उप + कृ in the sense 'to serve' is always सकर्मक, cp. "हरिमुपकुरुते"—*Bhattoji*. Cloud is to reap the benefit of helping others ( परोपकारफल )।

3. ब्रूयात्—ब्रू + लिङ् ( विधौ ) + यात्। Nom. भवान्। The reading ब्रूया: is also seen. Both are correct. For use of भवत् is also sometimes seen, after case of Address ( सम्बोधन ), cp.—"तदिन्द्रसन्दिष्टमुपेन्द्र...भवता निशम्यताम्"—Sisu 1. sl. 41.

4. रामगिर्य्यां &c.—See Sl. 1 and Malli ( for समास )। Qual. सहचर:।

5. अव्यापन्न:—वि + आ + पद् + क्त कर्त्तरि = व्यापन्न in peril, dead—(See ante also). न तथा इति अव्यापन्न:, नञ तत्—। Qual. सहचर:। As he was वियुक्त, so he is likely to be in peril ( व्यापन्न )। Here the reading वियुक्त: is preferred.

6. पृच्छति—प्रच्छ + लट ति। Nom. सहचर:। The root is द्विकर्मक ( see the Karika—"दुह्याच् पच्दण्डरुधिप्रच्छि" &c.—*ante* ). Here कुशलम् is the प्रधानकर्म and त्वाम् ( अप्रधान कर्म )। Here यक्ष was a high personage, hence he was as good as a Brahman, thus the use of the word कुशल is his case is not inconsistent, cp. "ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम्"—Manu.

7. पूर्वाभाष्यम्—आ + भाष + ण्यत् कर्मणि आवश्यके = आभाष्यम् is surely to be asked, पूर्वमाभाष्यम्, सुप्सुपा—। Pred-to एतत्। The reading पूर्वाश्राव्यम् is not good, for आश्राव्य means command also, cp. "आश्राव्यमधिगम्य मातः" &c.—Rag. II.

8. सुलभ &c.—सु सुखेन लभ्यते इति सु + लभ + खल् कर्मणि = सुलभ। सुलभा विपत् एषाम्, बहु—। तेषाम्। Qual. प्राणिनाम्।

9. Voice—सा...उच्यते भवता...आश्रमस्थेन वियुक्तेन अव्यापन्नेन सहचरेण त्वं पृच्छ्यसे [ "दुह्यादेरप्रधाने"—इति अप्रधानकर्मणः 'त्वाम्' इत्यस्य उक्तत्वम् ]...एतेन आभाष्येण भूयते...।

10. Remark—Here wilson notices the reading "भूतानां हि क्षयिषु करणेष्वाद्यमाश्राव्यमेतत्। But this does not commend itself; कुशलप्रश्न better befits one who e विपद् is सुलभ।

## *106. Message ccntinued.*

**अङ्गेनाङ्गं प्रतनु तनुना गाढतप्तेन तप्तं**
**सास्रेणाश्रुद्रुतमविरतोत्कण्ठमुत्कण्ठितेन।**
**उष्णोच्छ्वासं समधिकतरोच्छ्वासिना दूरवर्ती**
**सङ्कल्पैस्तैर्विशति विधिना वैरिणा रुद्धमार्गः॥ १०६॥**

Prak.—Easy.

Prose.—दूरवर्ती ( तथा ) वैरिणा विधिना रुद्धमार्गः स ( ते सहचरः ), तनुना ( कृशेन ) गाढतप्तेन सास्रेण उत्कण्ठितेन समधिकतरोच्छ्वासिना अङ्गेन, प्रतनु तप्तं अश्रुद्रुतम् अविरतोत्कण्ठम् उष्णोच्छ्वासम् ( ते ) अङ्गं तैः सङ्कल्पैः विशति।

Eng.—Being at a distance and with his procedure checked by an adverse Fate, your companion seeks to enter your slender, scorched, tearful, ceaselessly care-worn and hot-

sighed body with his emaciated, highly distressed, tearful, care-worn and heavily breathing limb.

Expl.—Though at a distant, Yaksha shows his earnest mentality of enjoying her in the same way as if they were united.

Sanj.—अङ्गेनेति । किञ्च 'दूरवर्त्ती' दूरस्थः ; न च आगन्तुं शक्यते इत्याह— 'वैरिणा' विरोधिना 'विधिना' दैवेन 'रुद्धमार्गः' प्रतिबद्धवर्त्मा 'स' ते सहचरः 'तनुना' कृशेन 'गाढ़तप्तेन' अत्यन्तसन्तप्तेन 'साश्रुणा', उत्कण्ठा वेदना अस्य जाता ( ? इति ) उत्कण्ठितं, तेन 'उत्कण्ठितेन' [ "तदस्य सञ्जातम्" इत्यादिना इतच् प्रत्ययः। उत्कण्ठतेः कर्त्तरि क्तः ]। 'समधिकतरम्' अधिकम् 'उच्छ्वसितीति 'समधिकतरोच्छ्वासि, तेन दीर्घनिःश्वासिना इत्यर्थः। 'अङ्गेन' स्वशरीरेण 'प्रतनु' कृशं 'तप्त' सन्तप्तं 'अश्रुद्रुतम्' अश्रुक्लिन्नम् [ "अश्रु नेत्राम्बुरोदनञ्चास्रमस्तु च" इत्यमरः] 'अविरतोत्कण्ठम्' अविच्छिन्नवेदनम् 'उष्णोच्छ्वासं' तीव्रनिःश्वासम् [ "तिग्मं तीव्रं खरं तीक्ष्णं चण्डमुष्णं समं स्मृतम्" इति हलायुधः ]। 'अङ्ग' त्वदीयं 'तेः' स्व संवेद्यैः 'सङ्कल्पैः' मनोरथैः 'विशति' एकीभवति इत्यर्थः। अत्र समरागित्वद्योतनाय नायकेन नायिकायाः स्वसमानावस्थात्वम् उक्तम्। ॥ १०६ ॥

## Notes on Malli.

1. Here the hero to express equality of affection states the similar condition of the heroine too.

## Charcha.

1. अङ्गेन—करणे ३या। The principal sentence being—अङ्गेन अङ्गं विशति।

2. प्रतनु, तनुना—These are adjectives meant to contrast each other, similarly compare the pairs—तप्तं and गाढ़तप्तेन, अश्रुद्रुतम् and साश्रेण, अविरतोत्कण्ठम् and उत्कण्ठितेन ( deriv. See Malli) );

उष्णोच्छ्वासम् and समधिकतरोच्छ्वासिना ( deriv.—see Malli ). These respectively qualify अङ्गम् and अङ्गेन। In English this is an instance of Antithesis.

3. विशति—विश + लट ति। Nom सः।

4. तैः सङ्कल्पैः—ऊह्य सहशब्दयोगे तृतीया।
Mentally he enters your body with those desires, ( तद् is here प्रसिद्धार्थक )। The desires are known to themselves.

5. रुद्धमार्गः—रुध + क्त कर्मणि = रुद्ध obstructed. रुद्धः मार्गः अस्य, यह्। Qual. सः। Kuvera's curse made his procedure futile.

6. वैरिणा—वीर hero, तस्य भावः कर्म वा इति वीर + अण् = वैरम् enmity. वीर being a गुणवचन word ष्यञ् should come by the rule 'गुणवचनब्राह्मणादिभ्यः कर्मणि च"। But as Panini himself uses वैर in the rule "इन्द्वाद्वुन् वैरमैथुनिकयोः" so the word takes अण्। Cp.—"कथं वैरमिति? वीरस्य भावः कर्म वेति ष्यञा भाव्यम्। उच्यते, 'इन्द्वाद्वैर—"इति निर्देशात्"—*Saranadeva.* वैरमस्ति अस्य इति वैर + इनि मत्वर्थे = वैरिन् enemy. तेन। Qual. विधिना ( which has अनुक्ते कर्तरि ३ या )।

7. Voice—दूरवर्त्तिना रुद्धमार्गेण तेन...विश्यते...।

8. Remark—The reading उष्णोच्छ्वासम् is better than दीर्घोच्छ्वासम्, cp "श्वासोपरक्ताधरः = ante. Hot breaths are natural in time of distress. सङ्कल्पैस्तै is the better reading.

## 107. *Same idea.*

शब्दाख्येयं यदपि किल ते यः सखीनां पुरस्तात्
कर्णे लोलः कथयितुमभूदाननस्पर्शलोभात्।

सोऽतिक्रान्तः श्रवणविषयं लोचनाभ्यामदृश्य-
स्त्वामुत्कण्ठाविरचितपदं सन्मुखेनेदमाह ॥ १०७ ॥

Prak.—सः उत्कण्ठाविरचितपदम् इदं सन्मुखेन त्वाम् आह [ He said this through me—and he said it with all eagerness ]. Whom do you mean !—श्रवणविषयम् अतिक्रान्तः, लोचनाभ्यामदृश्यः सः [ I mean him who is beyond the range of hearing and sight as well ]. Not clear—यः ते सखीनां पुरस्तात् यत् शब्दाख्येयं तदपि आननस्पर्शलोभात् कर्णे कथयितुं लोलः अभूत्, सः आह [I mean him who whispered even what can be loudly uttered to your ear. He did so because in that case he may be close to your face and may havea touch of it ].

Prose—यः ते सखीनां पुरस्तात् यत् शब्दाख्येयं तदपि आननस्पर्शलोभात् कर्णे कथयितुं लोलः अभूत् किल श्रवणविषयम् अतिक्रान्तः लोचनाभ्याम् अदृश्यः सः उत्कण्ठाविरचितपदम् इदं सन्मुखेन त्वाम् आह ।

Beng.—তোমার সখীগণের নিকট উচ্চভাবে বলিবার যোগ্য বাক্যও, যে তোমার মুখস্পর্শের লোভহেতু কাণে বলিতে ব্যগ্র হইত, শ্রবণের অগোচর চক্ষের অদৃশ্য সেই ব্যক্তি উৎকণ্ঠায় বক্ষ্যমাণ কথা রচনা করিয়া আমার মুখযোগে ইহা বলিতেছে।

Eng —He, who became eager in order to have your face's contact to whisper to your ears what might have been loudly said before your attendants, is saying this speech with its words composed—out of eagerness, to thee, for he is beyond the range of ears and is not to be seen by the eyes.

Expl.—See Prak.

Sanj.—सम्प्रति स्वावस्थानिवेदनाय प्रस्तौति, शब्दाख्येयमिति—हे अबले, 'यस्ते' प्रियः 'सखीनां पुरस्तात्' अग्रे 'आननस्पर्शे' त्वन्मुखसम्पर्के 'लोभात् शब्दाख्येयं' शब्देन

रवेण आख्येयम् उच्चै र्वाच्यमपि यत्, तद्वचनमपीति शेषः। 'कर्णे कथयितुं लोलः' लालसः 'अभूत् किल' [ "लोलुपो लोलुभो लोलः लालसो लम्पटोऽपि च" इति यादवः] 'श्रवणविषयं' कर्णपथम् 'अतिक्रान्तः' तथा 'लोचनाभ्यामदृश्यः' अतिदूरत्वात् द्रष्टुं आतुञ्च न शक्य इति भावः। 'स' ते प्रियः 'त्वाम् उत्कण्ठया विरचितानि पदानि' सुप्तिङन्तशब्दाः वाक्यानि वा यस्य तत् तथोक्तम् [ "पदं शब्दे च वाक्ये च" इति विश्वः ] 'इदं' वक्ष्यमाणं 'मन्मुखेन आह' मन्मुखेन स एवं ब्रूते इत्यर्थः ] ॥ १०७ ॥

## Charcha.

1. शब्दा &c.—आ+चच+यत् कर्मणि=आख्येय to be said ( see आख्यात ante). शब्देन आख्येयम्, ३तत्—। Pred. to यत्।

2. किल—An अव्यय denoting 'ऐतिह्य' here.

3. पुरस्तात्—Deriv ante—under "प्रेत्यमेतत् पुरस्तात्"।

4. अभूत्—भू+लुङ द। Nom. यः।

5. आनन &c.—स्पृश+घञ् भावे=स्पर्श touch. लुभ+घञ भावे=लोभः hankering. आननस्य स्पर्शः, ६तत्—। तस्य ( तस्मिन् वा ) लोभः, ६तत्— ( or सुप्सुपा )। तस्मात्। हेतौ ५मी।

6. अतिक्रान्तः—अति+क्रम+क्त कर्त्तरि ( गत्यर्थत्वात् )=अतिक्रान्त gone beyond. Qual. सः।

7. अदृश्यः—द्रष्टुं शक्य इति दृश्+यत् कर्मणि=दृश्य to be seen. न दृश्यः, नञतत्—। Qual. सः।

8. उत्कण्ठा &c.—उद्+कण्ठ+अ भावे स्त्रियाम्=उत्कण्ठा eagerness. वि+रच+णिच्+क्त कर्मणि=विरचित composed. उत्कण्ठया विरचितम्, सुप्सुपा ( or—हेतु ३या तत्— )। तादृशं पदमस्य, बहु—। Qual. इदम् (which refers to the speech following).

9. मन्मुखेन—मम मुखम्। तेन। करणे ३या।

10. आह—ब्रू+लट ति। Nom. सः। Remember that आह meaning 'said' (in the past sense) is an अव्यय ; for आह &c. come in place of लट of ब्रू, the rule is "ब्रुवः पञ्चानामादित आहो ब्रुवः"।

11. Voice.—येन...लोलेन अभावि...अतिक्रान्तेन अदृश्ये न तेन त्वम् उच्यसे [here the अप्रधानकर्म is voiced, for ब्रू is दुह्यादि ]।

## 108. *Her similarity is wanting.*

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छायां शशिनि शिखिनां बर्हभारेषु केशान् ।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्मिन् क्वचिदपि न ते चण्डि सादृश्यमस्ति ॥

Prak.—हे चण्डि, हन्त एकस्मिन् क्वचिदपि ते सादृश्यम् नास्ति [ O furious one, nowhere in a single object I find your similitude ]. Quite so, for no two objects are exactly alike—श्यामासु अङ्गं पश्यामि [ But similarily—of limb is seen in Priyangu creepers ]. Anyother particular resemblance in anyother objects ?—चकितहरिणीप्रेक्षणे दृष्टिपातम् पश्यामि, शशिनि वक्त्रच्छायां पश्यामि, शिखिनां बर्हभारेषु केशान् पश्यामि &c. and so on.

Prose—श्यामासु अङ्गं, चकितहरिणीप्रेक्षणे दृष्टिपातं, शशिनि वक्त्रच्छायां, शिखिनां बर्हभारेषु केशान, प्रतनुषु नदीविचिषु भ्रुविलासान् उत्पश्यामि, हे चण्डि, हन्त एकस्मिन् क्वचिदपि ते सादृश्यम् नास्ति ।

Beng.—প্রিয়ঙ্গুলতায় তোমার অঙ্গের লাবণ্য চঞ্চল হরিণীর নয়নে দৃষ্টিপাত, চন্দ্রে মুখশোভা, ময়ূরের পিচ্ছাগুচ্ছে কেশ শোভা, এবং স্বল্পতোয়া নদীতরঙ্গে তোমার ভ্রূবিভ্রম দেখিতেছি। হে কোপনশীলে, কিন্তু আশ্চর্য্য কোথাও একস্থানে তোমার সাদৃশ্য পাই না।

Eng.—I see the beauty of your limbs in Priyangu creeper, your glances in the eyes of restless does, your facial loveliness

in moon, your hair in plumes of peacock and your movements of eye-brows in slender river-streams ; but O furious one, it is a wonder that I nowhere in a single object find thy prototype.

Expl.—Easy.

Sanj.—सादृश्यप्रतिकृति-स्वप्नदर्शन-तदङ्गस्पृष्टस्पर्शाख्यानि चत्वारि विरहिणां विनोदस्थानानि ; तथा चोक्तं पताकायाम्—"वियोगावस्थासु प्रियजनसदृक्षानुभवनं ततश्चित्रं कर्म स्वपनसमये दर्शनमपि। तदङ्गस्पृष्टानामुपगतवतां स्पर्शनमपि प्रतीकारोऽनङ्गव्यथितमनसां कोऽपि गदितः॥"—इति१। तत्र सदृशवस्तुदर्शनमाह—श्यामास्विति। 'श्यामासु' प्रियङ्गुलतासु [ "श्यामा तु महिलाह्वया। लता गोवन्दनी गुन्द्रा प्रियङ्गुः फलिनी फली" इत्यमरः ] 'अङ्ग' शरीरम् 'उत्पश्यामि', सौकुमार्यादि-साम्यात् अङ्गमिति तर्कयामीत्यर्थः। तथा 'चकितहरिणीनां प्रेक्षणे दृष्टिपात' ; शशिनि' चन्द्रे 'वक्त्रच्छायां' मुखकान्तिं तथा 'शिखिनां' बर्हिणां 'बर्हभारेषु—' 'बर्हसमूहेषु 'केशान् ; प्रतनुषु' स्वल्पासु 'नदीनां वीचिषु' [ अत्र वीचीनां विशेषणोपादाने नानुक्त-गुणग्रहदोषः। भ्रूसाम्यनिर्वाहाय महत्त्वदोषनिराकरणार्थत्वात् तस्येति। तदुक्तं रसरत्नाकरे—"ध्वन्युत्पादे गुणोत्कर्षे भावोक्तौ दोषवारणे। विशेषणादिर्शिष्यस्य नास्त्यनुक्तगुणग्रहः" इति गुणविशेषणे गुणग्रहणात् ( ? ) ] 'भ्रूविलासान्' [ 'भ्रूपताका' इति पाठे भ्रुवः पताका इव इत्युपमित समासः ] 'उत्पश्यामि' इति सर्वत्र सम्बध्यते। तथापि नास्ति मनोनिर्वृतिः इत्याशयेनाह—हन्तेति। 'हन्त' विषादे [ "हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः"- इत्यमरः ] हे 'चण्डि' अत्यन्तकोपने [ "चण्डस्त्वत्यन्तकोपनः" इत्यमरः। गौरादित्वात् ( ? बह्वादित्वात् ) ङीष् ]। उपमानकथनमात्रेण न कोपितव्यमिति भावः। 'क्वचिदपि' कस्मिन्नपि 'एकस्मिन्' वस्तुनि ते तव 'सादृश्यं नास्ति' अतो न निर्वृणोमीत्यर्थः। अनेनास्याः सौन्दर्यमनुपममिति व्यज्यते ॥ १०८ ॥

## Notes on Malli.

1. This portion has been explained under "Remark" of sloka 89. (see *ante*.). [ N. B.—Here in the Sanj. Malli's reading

is erroneous. "गुणविशेषणे गुणग्रहणात्"—being superflous. The idea is complete with 'इति'। Again 'गौरादित्वात्' should be बह्वादित्वात्, for बह्वादि list contains चण्ड।

## Charcha.

1. अङ्गम्, दृष्टिपातम् &c.—These are objects of उत्पश्यामि (उद् + दृश + लट मि)।

2. Remark—The reading दृष्टिपातम् is better than दृष्टिपातान्, for the former keeps up the alliteration. The reading गण्डच्छायम् is rather ungrammatical, for छाया in the rule "विभाषा सेनाच्छाया—" means shade. See also "रत्नच्छायाव्यतिकर इव" &c. *ante*.

3. चकित &c.—प्र + ईक्ष + ल्युट करणे = प्रेक्षण eye. चकिता हरिणी, कर्मधा—। तस्याः प्रेक्षणम्, ६तत्—। तस्मिन्। अधि' ७मी। Restless eyes of does are compared to restless eyes of females. cp "त्रस्तै-कहायनलोलकुरङ्गदृष्टेः" &c—Uttar. Similarly श्यामासु, वर्हभारेषु &c. have अधिकरणे ७मी।

4. नदीवीचिषु—नदीनां वीचयः (waves), ६तत्—। तासु। अधि ७मी। Here वीचि would itself have implied नदीवीचि, still नदी is added for here we have the qualifying epithet प्रतनुषु ; and this completes the उपमा। Thus here is no rhetorical fault. See also Malli "अत्र वीचीनां विशेषणोपादाने...नानुक्तगुणग्रहः इति"।

5. हन्त—विषादे अव्ययम्। cp "हन्त हता मनस्विता"—Kirat.

6. चण्डि—चण्डते कुप्यति इति चण्ड + अच् कर्त्तरि + ङीष स्त्रियाम् = चण्डी highly choleric lady. तत् सम्बुद्धौ। चण्ड being of the बह्वादि class, it takes ङीष in the feminine. Malli's गौरादित्वात् is wrong.

7. Parallel—For, somewhat similar sentiments cp—"मद्‌पवनभिन्नो मत्प्रियाया विनाशात् घनरुचिरकलापो निःसपत्नोऽद्यजातः। रतिविगलितबन्धे केशपाशे सुकेश्याः सति कुसुमसनाथे कं हरेदेष बर्हः ॥"—*Vikram.* and "पृषतीषु विलोलमीक्षितं पवनाधूतलतासु विभ्रमाः"—Raghu VIII.

## *109. Yaksha's condition during separation.*

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-
मात्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम्।
अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥ १०८ ॥

Prak.—Easy.

Prose.—प्रणयकुपितां त्वाम् धातुरागैः शिलायाम् आलिख्य यावत् आत्मानं ते चरणपतितं कर्त्तुमिच्छामि, तावत् मुहुः उपचितैः अस्रैः मे दृष्टि आलुप्यते। क्रूरः कृतान्तः तस्मिन्नपि नौ सङ्गमं न सहते।

Beng.—প্রণয়কুপিত তোমাকে ধাতুরাগদ্বারা শিলাতে অঙ্কিত করিয়া (প্রসন্ন করিবার জন্য) যখন নিজেকে তোমার চরণপাতিত করিতে ইচ্ছা করি তখন বারংবার সঞ্জাত নয়নজলদ্বারা আমার দৃষ্টি আবৃত হয়। নিষ্ঠুর কৃতান্ত এতেও আমাদের সমাগম সহ্য করিতে পারে না।

Eng.—As I wish to make me fallen on thy feet after having protrayed thee angry in love, on stone-slabs with minerals, then my vision is obstructed with considerably accumulated tears. Cruel Destiny does not tolerate our union in this too.

Expl.—In time of separation Yaksha wished to beguile his time by portraying his beloved in several ways. But in this too he could not fully enjoy her sight for ceaseless tears blurred his vision.

Sanj.—सम्प्रति प्रतिकृतिदर्शनमाह—त्वामिति। हे प्रिये, 'प्रणयेन' प्रेमातिशयेन 'कुपितां' कुपितावस्थायुक्तां 'त्वां' त्वत्प्रतिकृतिमित्यर्थः। 'धातवो' गैरिकादयः [ "धातुर्वातादिशब्दादि गैरिकादिषु अजादिषु" (?) इति यादवः। ] 'ते एव रागा' रञ्जकद्रव्याणि तैः 'धातुरागैः', 'शिलायां' शिलापट्टे 'आलिख्य' निर्माय 'आत्मानं' मां मत्प्रतिकृतिमित्यर्थः 'ते' तव चित्रगताया इत्यर्थः 'चरणपतितं' कर्तुं तथा लेखितुं 'यावदिच्छामि, तावत्, इच्छासमकालं 'मुहुरुपचितैः' प्रवृद्धैः 'अस्रैः' अश्रुभिः कर्तृभिः 'मे दृष्टिरालुप्यते' 'आव्रियते इत्यर्थः। ततो दृष्टिप्रतिबन्धनात् लेखनं प्रतिबध्यते इति भावः। 'क्रूरः' घातुकः [ "नृशंसो घातुकः क्रूरः" इत्यमरः ] 'कृतान्तो' दैवम् [ "कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु" इत्यमरः ] 'तस्मिन्नपि' चित्रेऽपि 'नौ' आवयोः [ "युष्मदस्मदोः षष्ठी चतुर्थीद्वितीयास्थयोः वान्नावौ" इति नावादेशः ] 'सङ्गमं' सहवासं 'न सहते'। सङ्गमलेखनमपि आवयोः असहमानं दैवम् आवयोः सङ्गमं न सहते इति किमु वक्तव्यमिति अपि शब्दार्थः॥ १०९॥

## Notes on Malli.

1. N. B.—Here the reading "धातुर्भूवादिशब्दादिगैरिकादिलगादिषु—" is also seen. And this reading seems to be correct; reference to roots by भूवादि is grammatical indeed, cp—Panini "भूवादयो धातवः" १।३।१।

## Charcha.

1. प्रणयकुपिताम्—प्र+नी+अच् भावे=प्रणय love. "उपसर्गादसमासेऽपि णोपदेशस्य" इति णत्वम्। कुप+क्त कर्तरि=कुपिता enraged. प्रणये कुपिता, सुपसुपा—। or प्रणयेन कुपिता, हेतु ३या तत्—( or सुप्सुपा )। ताम्। Qual. त्वाम्। Yaksha tries to portray her in the attitude of wrath in love affairs.

2. धातुरागैः—धातूनां रागाः dyes of minerals, ६तत्—। Or see Malli, तैः। करणे ३तीया। For notes on राग see *ante*.

3. उपचितैः—उप + चि + क्त कर्त्तरि = उपचित increasing. तैः। Qual. अस्रैः।

4. आलुप्यते—आ + लुप + लट् ते कर्मणि। Is being obstructed. Agrees with उक्तकर्म—दृष्टिः। लुम्पति, लुलोप, लुङ् अलुपत्। See also व्यालुम्पन्ति *ante.*

5. कृतान्तः—It here means दैव। It also means 'यम'। Nom. to सहते ( सह + लट ते )। Malli says—Fate does not tolerate our union in painting even, what to speak of actual union. This is got from अपि। See Malli "सङ्गमलिखनमपि &c."

6. Voice.—...मया दृश्यते...उपचितानि अस्रानि दृष्टिं आलुम्पन्ति। क्रूरेण कृतान्तेन सङ्गमः...सह्यते...।

7. Remark.—प्रतिकृतिदर्शन which is a solace to separated lovers is also at a discount through constant flow of tears—

cp—"प्रजागरात् खिलीभूतः स्वप्ने तस्याः समागमः
बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥"—Sak.

and "न च सुवदनामालेखेऽपि प्रियामसमाप्य तां मम नयनयोरुद्बाष्पत्वं न भवतीति"—Vik. II.

### *110. Yaksha misses her company in dreams as well.*

**मामाकाशप्रणिहितभुजं निर्दयाश्लेषहेतोः**
**लब्धायास्ते कथमपि मया स्वप्नसन्दर्शनेषु ।**
**पश्यन्तीनां न खलु बहुशो न स्थलीदेवतानां**
**मुक्तास्थूलास्तरुकिसलयेष्वश्रुलेशाः पतन्ति ॥ ११० ॥**

Prak.—स्थलीदेवतानां मुक्तास्थूलाः अश्रुलेशाः तरुकिसलयेषु न खलु पतन्ति इति न [Large drops of tears of the presiding goddesses there will

not however fall on shoots of trees] Why should the goddesses drop tears ?—मां बहुशः पश्यन्तीनां स्थलीदेवतानाम् [ They will weep by repeatedly looking at me]. Why should my sight make them weep ?—स्वप्नसन्दर्शनेषु मया लब्धायाः ते निर्दयाश्लेषहेतोः आकाश-प्रणिहितभुजं माम् [ In dreams when I shall somehow get your vision, then surely to embrace you closely I shall throw up my hands. This pitiable sight of mine will indeed furnish them with occasions to drop their tears. But even then they will not do so ; for that forbodes evil] 110.

Prose.—स्वप्नसन्दर्शनेषु मया कथमपि लब्धायाः ते ( मम ) निर्दयाश्लेष-हेतोः आकाशप्रणिहितभुजं मां बहुशः पश्यन्तीनां स्थलीदेवतानां मुक्तास्थूलाः तरु-किसलयेषु न खलु पतन्ति इति न। Or—connect बहुशः with पतन्ति (See Malli).

Beng.—স্বপ্নসমাগমে কোন প্রকারে প্রাপ্ত তোমাকে গাঢ় আলিঙ্গন করিবার জন্য আমি শূন্যে হস্ত প্রসারিত করিব ; এতদবস্থ আমাকে বারংবার দেখিলে স্থলীদেবতাগণ মুক্তার ন্যায় স্থূল, অশ্রুজল তরুর নবপল্লবে নিশ্চয়ই পাতিত করিবে।

Eng—The forest deities will indeed let drops of tears as large as pearl beads fall on twigs of trees, when they will repeatedly see me stretching my hands in the air to deeply embrace you (mydarling) somehow got in dreams.

Expl.—See Prak,

Sanj.—अधुना स्वप्नदर्शनमाह—मामिति ॥ सुप्तस्य विज्ञानं 'स्वप्नः' [ "स्वप्नः सुप्तस्य विज्ञानम्" इति विश्वः ] 'सन्दर्शनं' संवित् [ "दर्शनं समये शास्त्रे दृष्टौ स्वप्नेऽपि च संविदि" इति शब्दार्णवः ] स्वप्नदर्शनानि स्वप्नज्ञानानि, चूतवृक्षादिवत् सामान्यविशेषभावेन सहप्रयोगः। तेषु 'मया कथमपि' महता प्रयत्नेन 'लब्धायाः' गृहीतायाः दृष्टाया इति यावत्, 'ते' तव 'निर्दयाश्लेषः' गाढालिङ्गनं स एव 'हेतुः'

तस्य निर्दयाश्लेषार्थम् इत्यर्थः [ "षष्ठी हेतुप्रयोगे" इति षष्ठी (?) ] 'आकाशे' निर्विषये 'प्रणिहितभुजं' प्रसारितबाहुं 'मां पश्यन्तीनां स्थलीदेवतानां मुक्ता' मौक्तिकानि 'इव स्थूलाः अश्रुलेशाः' बाष्पबिन्दवः 'तरुकिसलयेषु'। अनेन चेतनस्येव अश्रुधारणसमाधिर्ध्वन्यते। 'बहुशो न पतन्ति इति न' किन्तु पतन्त्येव इत्यर्थः [निश्चये नञ्द्वयप्रयोगः, तथाचाधिकारिक ( ? चालङ्कारिक) सूत्रम् "प्रतिनिश्चयहिताार्थेषु नञ्द्वयप्रयोगः" इति ]। "महात्मगुरुदेवानामश्रुपातः क्षितौ यदि। देशभंशो महा- दुःखं मरणञ्च भवेद्ध्रुवम्" इति क्षितौ देवताश्रुपातनिषेधदर्शनात् यक्षस्य मरणाभाव सूचनार्थं तरुकिसलयेषु पतन्तीत्युक्तम् ॥ ११० ॥

## Notes on Malli.

1. N. B.—Here the reading आधिकारिसूत्रम् is seen, but we suggest आलङ्कारिकसूत्रम्, for अलङ्कार deals with such प्रयोग, cp "सम्भाव्यनिषेधनिवर्त्तने द्वौ प्रतिषेधौ"—*Vamana* in काव्यालङ्कारसूत्रवृत्ति। Malli quotes this also under sl. 65 ante. But there, no particular reference is made.

## Charcha.

1. आकाश &c.—आकाश is void, emptyspace. प्र + नि + धा + क्त कर्मणि = प्रणिहित stretched. आकाशे प्रणिहितौ, सुपसुपा। तादृशौ भुजौ यस्य, बहु—। तम्। Qual. माम्। Here do'nt expound as आकाशे प्रणिहितौ भुजौ येन, बहु—, for as a rule व्यधिकरणबहुव्रीहि is not allowed. "व्यधिकरणानां माभूत्"—*Bhashya.* My hand will be stretched in empty air and this will excite the pity of the presiding deities there.

2. निर्दय &c—आ + श्लिष + घञ् भावे = आश्लेष embrace. निर्दय is

tight. निर्दयः आश्लेषः कर्मधा—। स एव हेतुः, कर्मधा—। तस्य, वा तस्मात्। शेषे ६ष्ठी or हेतौ ५मी। Malli's "षष्ठी हेतुप्रयोगे" here is wrong. For reasons see under विश्रामहेतोः— sl. 24 *ante*.

3. कथमपि—Acompound अव्यय meaning somehow', cp "क्लेशात् ...कथमपि...प्रत्ययः" &c.—Raghu.

4. स्वप्न &c—स्वप्न itself will imply स्वप्नसन्दर्शन, but still such use is not defective, cp—"वृतहस्त्यादिवत् सामान्यविशेषभावेन सहप्रयोगः—Malli. अधि ७मी। See also Malli.

5. बहुशः—बहु + शस् = बहुशः oft times. Qual. पश्यन्तीनाम्। Malli connects it with पतन्ति। But our exposition seems better, for repeated sight will give occasions for अश्रुपात and pity as well.

6. पतन्ति—पत + लट् अन्ति। Nom. अश्रुलेशाः।

7. न, न,—The two negatives imply one strong affirmative. See Malli and notes thereon.

8. Voice.—मुक्तास्थूलैः अश्रुलेशैः ...पतते... ।

9. Remark—Malli says that fall of tears of dieties on the ground is ominous ; hence the poet says that tears fell on तरुकिसलय। This also indicates that the यक्ष met no danger. See Malli—"महात्मगुरुदेवानाम्...पतन्ति"।

This and the previous verse are so vivid in description that these seem to be actual experiences of the writer. The poet perhaps through poverty had to live separate from his beloved wife and these were his the then outpourings of sorrow.

### 111. *Yaksha's engagement during separation continud.*

**भित्त्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां**
**ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।**
**आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवाताः**
**पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥ १११ ॥**

Prak.—Easy.

Prose.—सद्यः देवदारुद्रुमाणां किसलयपुटान् भित्त्वा, तत्क्षीरस्रुतिसुरभयः ये तुषाराद्रिवाता दक्षिणेन प्रवृत्ताः, हे गुणवति, एभिः यदि तव अङ्गं पूर्वं स्पृष्टं भवेत् किल इति मया ते (वाताः) आलिङ्ग्यन्ते ।

Beng.—হিমালয়ের যে বায়ু দেবদারুবৃক্ষের নবপল্লবাগ্রভাগ ভিন্ন করিয়া, তদীয় ক্ষীরপ্রবাহে সুরভিত হইয়া দক্ষিণদিকে বহিতেছে, সেই বায়ু, হে গুণবতি, যদিবা পূর্ব্বে তোমার অঙ্গ স্পর্শ করিয়া আসিয়া থাকে এই হেতু আমাকর্তৃক স্পর্শিত হইতেছে ।

Eng.—The breezes of Himalaya which then and there piercing the fresh folds of twigs, get scented by the flow of gum therefrom, blow on to the south. O qualified one, I embrace these thinking that they might have already touched your limbs.

Expl.—Easy.

Sanj.—इदानीं तदङ्गस्पृष्टवस्तुस्पर्शनमाह भित्त्वेति । 'देवदारुद्रुमाणां किसलयपुटान्' पल्लवपुटान् 'सद्यः भित्त्वा तत्क्षीरस्रुतिसुरभयः' तेषां देवदारुद्रुमाणां 'क्षीरस्रुतिभिः'—क्षीरनिष्यन्दैः सुरभयः सुगन्धयः [ तुषाराद्रिजातत्वे लिङ्गमिदम् ] 'ये वाता दक्षिणेन' दक्षिणमार्गेण [ 'तृतीयाविधाने प्रकृत्यादिभ्य उपसंख्यानात्' तृतीया ; समेन यातीतिवत् । तत्रापि करणत्वस्य प्रतीयमानत्वात् कर्त्तृकरणयोरेव तृतीया ( २ 'कर्त्तृकरणयोस्तृतीया' इत्येव सिद्धम् )" इति भाष्यकारः । ] 'प्रवृत्ताः' चलिताः ।

ईंदृशवर्त्ति, सौभ्रोत्कण्ठीकृत्याद्यादिगुणलक्षणे, 'ते तुषाराद्रिवाताः "पूर्वं' प्राक् एभिः काले: 'अङ्गं' स्पृष्टं भवेत् यदि किल' इति सम्भावितमेतत् 'इति' उक्त्या [ "वार्त्तासम्भाव्ययोः किल" इत्यमरः ] मया 'आलिङ्ग्यन्ते' अश्लिष्यन्ते । [ अत्र वायूनां स्पृश्यत्वेऽपि अमूर्त्तत्वेन आलिङ्गनाशीमात् ( ? आयोग्यात् ) आलिङ्गन कल्पभिधानं यक्षस्य उन्मत्तत्वात् प्रलपितम् इत्यदोष इति वदन् निरुक्तकारः स्वयमेव उन्मत्तप्रलापी इत्युपेक्षणीयः ॥ ]।

## Notes on malli.

1. In करणेन we have तृतीया प्रकृत्यादित्वात् as in सुखेन याति। Here too करणत्व being evident भाष्यकार directs इत्थंभूते तृतीया by the rule "कर्त्तृकरणयोस्तृतीया"। [ N. B.—Malli here quotes भाष्य। So in place of "कर्त्तृकरणयोरेव तृतीया" we have put the correct reading of भाष्य ]। 2. Niruktakara says that though वायु is to be touched, still it not being an embodied thing is not fit to be embraced; but we tolerate this saying, for Yaksha was mad. Malli however retorts—that uttering this निरुक्तकार himself speaks insane and so we neglect this point [N. B.—Malli's आलिङ्गनायोग्यात् should be आलिङ्गनायोग्यात् ].

## Charcha.

1. किसलय &c.—पुट is अग्रभाग tip. किसलयानां पुटाः, इतत्—। ताम्। The epithet किसलयपुट means पुटितकिसलय folded twig, by the maxim—"कृदभिहितो भावो द्रव्यवत् प्रकाशते"। See पुष्पोद्गद also *ante*. Obj. of भित्त्वा।

2. सत्स्रुतेः &c.—स्रु + क्तिन् भावे = स्रुति flow. तेषां क्षीरम् ; अवत्—।

तस्य स्तुतिः, भवत्—। तया सुरभयः सुप्सुपा (तृतीयातत् वा)। Qual. तुषाराद्रिवाताः। Malli says "तुषाराद्रिजातत्वे लिङ्गमिदम्"। Yaksha, an ardent lover, smells as it were through air the scent of gum of *Devadaru* tree, though placed at *Ramgiri*.

3. दक्षिणेन—प्रकृत्यादित्वात् तृतीया। See Malli. Bhasya however rejects this Varttika and supports करणतृतीया in such cases.

4. किल—सम्भावनायाम् अव्ययम्। See Malli.

5. भवेत्—भू + लिङ् (सम्भावनायाम्) + यात्। Nom. अङ्गम्।

6. आलिङ्ग्यन्ते—आ + लिङ्ग + कर्मणि लट् अन्ते। अनुक्त कर्त्ता is मया।

7. Voice.—...—सुरभिभिः यैः वातैः...प्रवृत्त...अनेन स्पृष्टेन भूयेत्—तान् अहम् आलिङ्गामि।

8. Remark—Here the poet speaks of the 4th means of solace of a विरहिन्। See गुणपताका explained under sloka 89 and see Malli as well. [विरहिनां प्रियाङ्गस्पृष्टवस्तुसंसर्गो विरहदुःखापनोदने क्षमः]। Thus Ramayana also says "वाहि वात, यतः कान्तां तां स्पृष्ट्वा मामपि स्पृश"।

## 112. *Yaksha helpless.*

संक्षिप्येत क्षण इव कथं दीर्घयामा त्रियामा
सर्वावस्थास्वहरपि कथं मन्दमन्दातपं स्यात्।
इत्थं चेतश्चटुलनयने दुर्लभप्रार्थनं मे
गाढोष्माभिः कृतमशरणं त्वद्वियोगव्यथाभिः॥

Prak.—Easy.

Prose—दीर्घयामा त्रियामा कथं क्षणइव संक्षिप्येत, सर्वावस्थासु अहरपि कथं

मन्दमन्दातपं स्यात्, इत्थं मे चेतः, हे चटुलनयनने दुर्लभप्रार्थनं ( सत् ) गाढ़ोष्माभिः त्वद्वियोगव्यथाभिः अशरणं कृतम्। ( or—दुर्लभप्रार्थनं चेतः गाढ़ोष्माभिः &c)।

Beng.—দীর্ঘ প্রহরযুক্ত রাত্রি কেমনে মুহূর্ত্তের ন্যায় সংক্ষেপ করা যায়, সকল অবস্থায়ই দিবসইবা কি করিয়া মন্দাতপযুক্ত হইতে পারে—এই ভাবিয়া আমার চিত্ত, হে চঞ্চলনয়নে, অপূর্ণমনোরথ হইয়া গাঢ়তাপে নিঃসহায় হইয়াছে।

Eng.—How the night with prolonged *praharas* can be reduced to a moment, how can the day be of mild heat under all circumstances—thus (with this thought) my mind with its desires unfulfilled has been, O Restless-eyed one, made helpless with intensely hot pangs of your separation.

Expl.—Easy.

Sanj.—संक्षिप्येतेति। दीर्घा यामाः प्रहरा यस्यां सा 'दीर्घयामा' विरहवेदनया तथा प्रतीयमाना इत्यर्थः, 'त्रियामा' रात्रिः [ "आद्यन्तयोरर्द्धयामयोः दिनव्यवहारात् त्रियामा" इति क्षीरस्वामी ] 'क्षण इव कथं' केन प्रकारेण 'संक्षिप्येत' लघूक्रियेत, 'अहरपि सर्वावस्थासु' सर्वकालेषु इत्यर्थः, 'मन्दमन्दः' मन्दप्रकारः [ "प्रकारे गुणवचनस्य" इति द्विरुक्तिः। "कर्मधारयवदुत्तरेषु—"इति कर्मधारयवद्भावात् सुपो लुक् ] 'मन्दमन्दातपम्' अत्यल्पसन्तापं 'कथं स्यात्'। हे 'चटुलनयने' चञ्चलाक्षि 'इत्थम्' अनेन प्रकारेण 'दुर्लभप्रार्थनम्' अप्राप्यमनोरथं 'मे' मम 'चेतः गाढ़ोष्माभिः' अतितीव्राभिः 'तद्वियोगव्यथाभिः अशरणम् 'अनाथं' कृतम्॥

## Charcha.

1. संक्षिप्येत—सम्+क्षिप ( दिवादि )+लिङ् ( विधौ )+ईत कर्मणि। Nom. मया। The reading संक्षिप्यते is not good, for it does not correspond with लिङ् form in स्यात्, and it does not express probability. As discussed before (Sl. 93) the reading क्षण इव is better than क्षणमिव।

2. दीर्घयामा—याम is प्रहर। दीर्घाः यामाः यस्याः ( Or—यस्याम् ), बहु—। Qual. त्रियामा। विरह made रात्रि seem long, while संयोग makes रात्रि short, cp "अविदितगतयामा त्रियामा &c"—*Uttar.* For त्रियामा—see क्षीरस्वामी quoted by Malli.

3. सर्वावस्थासु—अधि ७मी। सारोद्धारिणी says—"शीतमध्याह्नादिषु दशासु"।

4. मन्द &c—मन्दप्रकार इति मन्दमन्दः। प्रकारे द्विर्वचनम्। See Malli and also under मन्दं मन्दं नुदति पवनः &c—*ante.* मन्दमन्द आतपः अस्य, बहु—। तत्। Qual. अहः (1st case sing of अहन्—'day').

5. दुर्लभप्रार्थनम्—प्र+अर्थ+युच् भावे=प्रार्थना desire. दुर्लभा प्रार्थना यस्य, बहु—। तत्। Qual. चेतः। Kalidasa elsewhere says—"इदमसुलभवस्तुप्रार्थनादुर्निवारं प्रथममपि मनो मे पञ्चबाणः क्षिणोति"।—

6. गाढो &c.—उष्मन् heat. गाढः उष्मा आसाम्, बहु—। ताभिः। Qual. वियोगव्यथाभिः। Pang of separation eats our vitals. Here गाढोष्मभिः is also correct, for डाप् ( आ ) in fem. of the बहुव्रीहि compound is optional by "डाबुभाभ्यामन्यतरस्याम्"।

7. त्वद्वियोग &c.—तव वियोगः, ६तत्। तस्य व्यथाः। ताभिः। अनुक्ते कर्त्तरि ३या।

8. Voice—दीर्घयामा त्रियामा...अस्य इव...संक्षिप्येत ( or —सं क्षिप्याम् ) ...अहा...मन्दातपेन भूयेत...गाढोष्माः...व्यथाः चेतः अशरणं कृतवत्यः।

9. Remark—Here the epithet चटुलनयने suggests his ardent admiration for her and that he passes the night somehow, remembering her beautiful flashing eyes only.

### *113. Time—good or bad—changes.*

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।

कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥ ११२ ॥

Prak.—Easy.

Prose.—ननु बहुविगणयन् ( अहम् ) आत्मानम् आत्मना एव अवलम्बे, तत् ( तस्मात् ) हे कल्याणि, त्वमपि नितरां कातरत्वं मा गमः। कस्य अत्यन्तं सुखमुपनतं ( भवति ), एकान्ततो दुःखं वा ( भवति ); दशा चक्रनेमिक्रमेण नीचैः उपरि च गच्छति।

Beng.—আমি বহু বিচার করিয়া নিজেই নিজেকে ধারণ করিতেছি, সেই হেতু হে কল্যাণি, তুমি নিতান্ত কাতরভাব প্রাপ্ত হইও না। কাহারই বা সুখ এবং দুঃখ নিরত উপস্থিত হয়; দশা চক্রধারের ন্যায় কখনও নীচে এবং কখনও উপরে উঠিয়া থাকে।

Eng.—Thinking much indeed, I myself sustain my self, so, O good one, you too must not take to too much sorrow. Whose indeed sorrow or happiness, come ceaselessly; course of life now rises and now falls like the course of rims of wheels.

Expl.—Man neither suffers misery, nor enjoys happiness for good. These visit all in turns.

Sanj.—ननु च मदीयदुःखासहत्वात् मैतव्यमिति—नन्विति ॥ 'ननु' इत्यामन्त्रणे [ "प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु:" इत्यमरः ]। 'ननु' प्रिये 'बहु विगणयन्' आशापान्ते सत्यमेवं करिष्यामि इत्यालोचयन् 'आत्मानम् आत्मनैव' स्वेनैव [ "प्रकृत्यादिभ्य: उपसंख्यानम्" इति तृतीया ] "अवलम्बे' धारयामि, यथा कथञ्चित् जीवामि इत्यर्थः। 'तत्' तस्मात् कारणात् हे 'कल्याणि' सुभगे, मत्सौभाग्येनैव जीवामि इति भावः [ "बह्वादिभ्यश्च" इति ङीष् ] 'त्वमपि नितरां' अत्यन्तं 'कातरत्वं' भीरुत्वं 'मागमः' मा गच्छ [ "न माङ्योगे" इत्यडागमाभावः ]। ताडक्दुःखिनौ: आवयोः कुत्रचित् दुःखे कथं न बिभेमि इत्याशङ्क्याह, कस्येति—'कस्य' जनस्य 'अत्यन्तं' नियतं

'सुखम् उपनतं' प्राप्तं, 'एकान्ततो' नियमेन 'दुःखं वा उपनतं, किन्तु 'दशा' अवस्था 'चक्रस्य' रथाङ्गस्य 'नेमिः' तद्वत्: [ "चक्रं रथाङ्गं तस्यान्ते नेमिः स्त्री स्यात् प्रधिः पुमान्" इति अमरः ] 'तस्याः क्रमेण' परिपाट्या [ "क्रमः: शक्तौ परिपाट्याम्" इति विश्वः ] नीचैः' अथ 'उपरि च गच्छति' प्रवर्त्तते। एवं जन्तोः सुखदुःखे पर्य्यावर्त्तेते इत्यर्थः ॥

## Charcha.

1. ननु—Malli says, it implies 'आमन्त्रण' here. But we like to take it as 'अवधारणे'। For आमन्त्रण to darling is said by 'कल्याणि'। The reading इति here is decidedly better, for it keeps sequence with previous slokas.

2, आत्मना &c.—आत्मना has प्रकृत्यादित्वात् तृतीया। He himself supported his life. In times of distress and always indeed one is to guard himself by his self alone, cp "आत्मनैवात्मानं प्रशंसेत्"—*Mahabharata* ; and "उद्धरेदात्मनात्मानम्"—Gita.

3. अवलम्बे—अव + लम्ब + लट ए। Nom. अहम्।

4. कल्याणि—The epithet suggests, that he will not die, but shall unite with her in time, See also Malli.

5. गमः—गम + लुङ् सः। Nom. त्वम्। विध्यर्थे लुङ् by "माङि लुङ्"। Then अडागम is prohibited by "न माङ्योगे"।

6. कातरत्वम्—कातराया भाव इति कातरा + त्व = कातरत्वम्। तत्। Obj. of गमः। Here पुंवद्भाव comes by the Varttika "त्वतलोर्गुणवचनस्य"।

7. अत्यन्तम्—Here the reading एकान्तम् commends itself, for we have एकान्ततो later. ( In एकान्ततो we have तृतीयायां तसिः ; प्रकृत्यादित्वात् तृया )।

8. चक्र etc,—For gram. see Malli. प्रज्ञ्यादित्वात् ३या ।

9. Remark—For a similar sentiment compare "चक्रवत् परिवर्त्तन्ते सुखानि च दुःखानि च"—*Manu.*

10. Voice.—विगणयता मया आत्मा अवलम्ब्यते।...त्वया गामि...दशया गम्यते। एकान्तेन सुखेन उपनतेन भूयते...दुःखेन वा भूयते...।

*114. His resolve after period is over.*

**शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ**
**शेषान्मासान् गमय चतुरो लोचने मीलयित्वा ।**
**पश्चादावां विरहगुणितं तं तमात्माभिलाषं**
**निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥ ११४ ॥**

Prak.—Easy.

Prose.—शार्ङ्गपाणौ (विष्णौ) भुजगशयनात् उत्थिते (सति) मे शापान्तः (भविष्यति)। अतः शेषान् चतुरो मासान् लोचने मीलयित्वा गमय। पश्चात् परिणतशरच्चन्द्रिकासु क्षपासु आवां विरहगुणितं तं तं आत्माभिलाषं निर्वेक्ष्यावः।

Beng—বিষ্ণু কার্ত্তিকমাসে ভুজগশয়ন হইতে উত্থিত হইলে আমার শাপের অবসান হইবে। (এখন আষাঢ় মাস) সুতরাং বাকি চার মাস তুমি চোখ মুদিয়া কাটাও। পরে (মিলিত হইয়া) শরতের চন্দ্রিকাযুক্ত রাত্রিতে বিরহকালে কল্পিত সেই সেই ভোগ করিব।

Eng.—My curse will terminate when Vishnu will rise from his sleep on serpent-bed ( in the month of *Kartick*), so pass the remaining four months with your eyes closed. Then when we meet, we will enjoy all those desires thought npon during separation in nights having full-rayed autumnal moon-shine.

Expl.—Yaksha was entrusting the cloud with his message in *Asada* month (see *ante* Sl, 2.), hence practically four months remained for the end of the curse.

Sanj.—न च निरवधिकमेतत् दुःखमित्याह, शापान्त इति। पाणौ शार्ङ्गं यस्य स तस्मिन् शार्ङ्गपाणौ [ "सप्तमीविशेषणे" इत्यादिना बहुव्रीहिः। "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः" इति वचनात् पाणिशब्दस्योत्तरनिपातः ( ? शब्दस्य परनिपातः ) ] 'भुजगः' शेष एव 'शयनं तस्मात् उत्थिते सति मे शापान्तः' शापावसानम्। 'शेषान्' अवशिष्टान् 'चतुरो मासान्' मेघदर्शनप्रभृति हरिबोधनदिनान्तमित्यर्थः। [ दशदिवसाधिक्यं त्वत्र न विवक्षितम् इत्युक्तमेव ]। 'लोचने मीलयित्वा' निमील्य 'गमय' धैर्येण अतिवाहय इत्यर्थः। 'पश्चात्' अनन्तरं, त्वञ्च अहञ्च 'आवाम्' [ "त्यदादीनि सर्वैः नित्यम्" इत्येकशेषः। "त्यदादीनां मिथो द्वन्द्वे यत्परं तत् शिष्यते" इति अस्मदः शेषः ] 'विरहगुणितम्' एवं करिष्यामि इति मनसि आवर्त्तितं 'तं तं' [ वीप्सायां द्विरुक्तिः ] 'आत्मनोः' आवयोः 'अभिलाषं मनोरथं' 'परिणताः शरच्चन्द्रिकाः यासां' तासु 'क्षपासु' रात्रिषु 'निर्वेक्ष्यावः' भोक्ष्यावहे [ विशते लृट्। "निर्वेशो भृतिभोगयोः" इत्यमरः ]। [ अत्र केचित् "नभोनभस्ययोरेव वार्षिकत्वात् कथमाषाढादिचतुष्टयस्य वार्षिकत्वमुक्तम् इति चोदयित्वा ऋतुत्रयपक्षाश्रयणात् अविरोधः' इति पर्यहारि, तत्सर्वं असङ्गतम्। यच्च नाथेनोक्तं, 'कथमाषाढादि चतुष्टयात् परं शरत्काल इति', तथापि आकार्त्तिकसमाप्तेः शरत्कालानुवृत्तेः परिणतशरच्चन्द्रिकासु इत्युक्तं न तु तदैव शरत्-प्रादुर्भाव उक्तः इत्यविरोध एव2 ]॥ ११४॥

## Notes on malli.

1. For this solution, see notes on *Malli* under *sloka 2 ante.* 2. Here some urging that, Sravana and Bhadra completing a course how the four months *Asada* &c. can be taken to make a course; some replied that all this is possible if we take there seasons to complete a year (then 4—months will complete a course)—but all this is not to the point here. Natha says that how can autumn come after the 4 months beginning with *Asada*, the rejoinder is that autumn lasts till

the very end of *Kartick* so by 'परिणतशरच्चन्द्रिका' ( flag end of autumn is meant ) and not its advent only. Thus there is nothing inconsistant in our poet's saying.

## Charcha.

1. भुजग etc.—शी + ल्युट अधिकरणे = शयन bed. भुजग एव शयनम्। कर्मधा—। तस्मात्। अपादाने ५मी by "भुवमपायेऽपादानम्"। Krishna rises from his bed of serpent ( शेष ) on उत्थान एकादशी day in the month ( middle or so ) of Kartic, cp "क्षीराब्धौ शेषपर्यङ्के आषाढ्यां संविशेद्धरिः। निद्रां त्यजति कार्त्तिक्यां तयोः संपूजयेद्धरिम्"—Puran

2. शार्ङ्ग etc.—शार्ङ्गम् is bow. तत् पाणौ यस्य, बहु—। A name of Vishnu ( Krishna ). तस्मिन्। भावे ७मी। Here the सप्तम्यन्त word पाणि is placed last by the varttika "प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः"।

3, मासानन्यान्—Both मासानन्यान् and शेषान् मासान् are equally good. For a similar sentiment, cp "कान्ते कत्यपि वासराणि गमय त्वं मीलयित्वा दृशौ"।

c. विरह etc.—Here गणित means कल्पित ( thought upon ). Now. see Malli. विरहगुणितम् is also read by some meaning विरहेण गुणितं ( वर्द्धितम् )। We prefer the latter reading, for avidity of enjoyment increases during separation. cp—"इष्टे वस्तुन्युपचितरसाः etc"—sl, 116—*Infra*, Qual. तं तम् which has वीप्सायां द्विर्वचन, cp "स्वस्त्यस्तेर्विशति" &c.— *ante* Sl. 106.

5. निर्वेक्ष्यावः—निर् + विश + लृट स्यावः। Nom. आवाम्। 'निर् + विश' means to enjoy here ( cp—"निर्विशेस्तं नगेन्द्रम्" &c—*ante*, and "क्रीडारसं निर्विशतीव बाल्ये"— Kumar 1.) hence the rule "नेर्विशः" has no scope in this case.

6. परिणत &c.—शरदः चन्द्रिका, इतत्— । परिणताः शरच्चन्द्रिकाः यासाम्, बहु— । तासु । Qual. क्षपासु । The epithet suggests end of autumn. See Malli

7. Voice—शापान्तो मे भविष्यते—शेषाः चत्वारः मासाः गम्यन्ताम् त्वया... विरहगुणितः सः सः अभिलाषः निर्वेक्ष्यते... ।

## 115. *His further message.*

भूयश्चाह त्वमपि शयने कण्ठलग्ना पुरा मे
निद्रां गत्वा किमपि रुदती सस्वरं विप्रबुद्धा ।
सान्तर्हासं कथितमसकृत् पृच्छतश्च त्वया मे
दृष्टः स्वप्ने कितव रमयन् कामपि त्वं मयेति ॥ ११५ ॥

Prak.—Easy.

Prose—स भूयश्च आह—पुरा शयने मे कण्ठलग्ना अपि त्वम् निद्रां गत्वा सस्वरं रुदती विप्रबुद्धा । असकृत् पृच्छतः मे ( सम्बन्धे ) त्वया सान्तर्हासं कथितम्—हे कितव, मया स्वप्ने त्वं कामपि रमयन् दृष्ट इति ।

Beng.—তোমার কর্ত্তা আরো বলিল,—পূর্ব্বে তুমি আমার কণ্ঠলগ্না হইয়া নিদ্রা যাইয়াও আবার উচ্চৈঃস্বরে ক্রন্দন করিয়া জাগিয়াছ। আমি বার বার জিজ্ঞাসা করিলে পর, অন্তরে হাসিয়া বলিয়াছ—হে ধূর্ত্ত আমি স্বপ্নে দেখিলাম তুমি অন্য স্ত্রীর সহিত রমণ করিতেছ।

Eng.—He further adds—formerly clasped to my neck on the bed you fell asleep and awoke crying aloud something. Repeatedly asked by me you replied with an internal laugh—O Knave, I saw in the vision that you were enjoying some other lady,

Expl.—Easy.

Sanj—सम्प्रति तस्या मेघवञ्चकत्वनिरासाय अतिगूढमभिज्ञानं उपदिशति—भूयः

इति ॥ हे अबले 'भूयः' पुनरपि 'आह' त्वद्भर्त्ता मन्मुखेन इति शेषः। मेघवचनमेतत्। किमित्यत आह—"पुरा' पूर्वं। पुराशब्दः चिरातीते ["स्यात् प्रबन्धे चिरातीते निकटागामिके पुरा" इत्यमरः] 'शयने मे कण्ठलग्नापि त्वं' गते वस्तुतः कथमपि गमनं न सम्भवेत् इति भावः। 'निद्रां गत्वा किमपि केन वा निमित्तेन' इत्यर्थः। 'सस्वनं' सशब्दं 'रुदती'सती 'विप्रबुद्धा' आसीरिति शेषः। 'असकृत्' बहुशः 'पृच्छतः' रोदनहेतुमिति शेषः; 'मे' मम, 'कितव, त्वं कामपि रमयन् स्वप्ने दृष्ट इति मया सान्तर्हासं यथा तथा कथितञ्च—इति त्वद्भर्त्ता भूयश्चाह इति योजना ॥

## Charcha.

1. Remark—This sloka states some secret token whereby she will recoginse that the cloud is really her husband's messenger. See Malli. मेघवंचकत्वनिरासाय &c,

2. त्वमपि—The reading त्वमयि is better here. For अपि is unmeaning here.—त्वमसि is also seen.

3. विप्रबुद्धा—वि+प्र+बुध+क्त कर्त्तरि स्त्रियाम्। Nom. त्वम्।

4. पृच्छतः—प्रच्छ+शतृ लटः स्थाने=पृच्छत् asking तस्य। Qual. मे।

5. रमयन्—रम+णिच्+शतृ लटः स्थाने=रमयन् causing to enjoy i. e. persuading. Pred to त्वम्।

6. किमपि—अपि lends indefinite character to किम्। Obj. of रुदति। Cp.—"काप्यभिख्या तयोरासीत् व्रजतोः शुद्धवेषयोः"—*Raghu.* Malli also takes it as an अव्यय meaning केन निमित्तेन। But we prefer the former view, for रुद is अकर्मक।

7. Voice.—त्वम् उच्यसे तेन। कण्ठलग्नया रुदत्या त्वया विप्रबुद्धम्... 'अहं रमयन्' त्वां दृष्टवतो इति त्वं कथितवती—।

*116. She should thus take heart.*

**एतस्मान्मां कुशलिनमभिज्ञानदानाद्विदित्वा**
**मा कौलीनादसितनयने मय्यविश्वासिनी भूः ।**
**स्नेहानाहुः किमपि विरहे ध्वंसिनस्ते त्वभोगा-**
**दिष्टे वस्तुन्युपचितरसाः प्रेमराशीभवन्ति ॥ ११६ ॥**

Prak.—Easy.

Prose—हे असितनयने, एतस्मात् अभिज्ञानदानात् मां कुशलिनं विदित्वा कौलीनात् ( अपवादात् हेतोः ) मयि अविश्वासिनी मा भूः । ( जनाः ) स्नेहान् विरहे किमपि ( कुतोऽपि हेतोः ) ध्वंसिनः आहुः । ते तु अभोगात् इष्टे वस्तुनि उपचित-रसाः प्रेमराशीभवन्ति ।

Beng.—হে কৃষ্ণনয়নে ( সুন্দরি ), এই অভিজ্ঞান দেওয়াতে আমাকে কুশলী বলিয়া জানিবে এবং লোকের নানাঅপবাদ হেতু আমার প্রতি অবিশ্বাসিনী হইও না। লোকে, কোনকারণে স্নেহকে বিরহকালে বিনাশী বলে ; কিন্তু এই স্নেহ ভোগাভাব-হেতু অভীষ্টবস্তুতে সমধিক রসান্বিত হইয়া প্রেমরাশিরূপে পরিণত হয়।

Eng.—O black—eyed one, knowing me well from this reference to token, be not unfavourably disposed to me through false rumours ( about my fidelity ) ; people say that affections somehow disperse through separation ; but on the other hand, these become accumulated with their flow increased on the disired object from non-enjoyment.

Expl.—As remarked before it is natural that the desire of enjoyment intensifies in order during separation.

Sanj.—एतस्मादिति। 'एतस्मात्' पूर्वोक्तात् अभिज्ञायते अनेन इति अभिज्ञानं' लक्षणं तस्य 'दानात्' प्रापणात् 'मां कुशलिनं'' क्षेमवन्तं 'विदित्वा' ज्ञात्वा, हे 'असित-नयने', कुले भवात् 'कौलीनात्' ( ? ) लोकप्रवादात्, एतावता कालेन परासुः, नोचेत् आगच्छतीति जनवादात् इत्यर्थः। 'मयि' विषये 'अविश्वासिनी' मरणशङ्किनी 'मा भूः' न भव। [ भवतेर्लुङ्। "न माङ्योगे" इत्यडागमनिषेधः ]। न च दीर्घ-कालविप्रकर्षात् पूर्वस्नेहनिवृत्तिः शङ्क्या इत्याह स्नेहानिति—'किमपि' किञ्चित् निमित्तं न विद्यते इति शेषः, 'स्नेहान्' प्रीतीः 'विरहे' सति अन्योन्यविप्रकर्षे सति 'ध्वंसिनः' विनश्वरान् 'आहुः'। तत् ( ? ते ) तथा न भवति ( ? भवन्ति ) इत्यभिप्रायः। किन्तु 'ते' स्नेहा 'अभोगात्' विरहे भोगाभावात् हेतोः [ प्रसज्यप्रतिषेधेऽपि नञ् समासः इष्यते ] 'इष्टे वस्तुनि' विषये 'उपचितः रसः' स्वादो येषु ते 'उपचितरसाः' सन्तः प्रवृद्धतृष्णाः ( ? प्रवृद्धतृष्णाः सन्तः) इत्यर्थः ["रसो गन्धे रसः स्वादे तिक्तादौ विषरागयोः" इति विश्वः ] 'प्रेमराशीभवन्ति' वियोगासहिष्णुत्वमापद्यन्ते इत्यर्थः। स्नेहप्रेम्णोरवस्थाभेदात् भेदः। [ तदुक्तम्—"आलोकनाभिलाषौ रागस्नेहौ ततः प्रेमा। रति-शृङ्गारौ योगे वियोगतो विप्रलम्भश्च" ॥—इति। तदेव स्फुटीकृतं रत्नाकरे—"प्रेमा दिदृक्षा रम्येषु तच्चिन्तात्वभिलाषकः। रागस्तत्सङ्गबुद्धिः स्यात्स्नेहस्तत्प्रवणक्रिया। तद्वियोगासहं प्रेम रतिस्तत्सहवर्त्तनम्। शृङ्गारस्तत्समं क्रीडा संयोगः सप्तधा क्रमात् ॥" —इति ] ॥ ११६ ॥

## Charcha.

1. अभिज्ञान &c.—For deriv. and Samasa, see Malli. ल्यप्लोपे कर्मणि पञ्चमी। अभिज्ञानदानं प्राप्य is the meaning here.

2. कौलीनात्—कुले भव इति कुल + ख = कुलीनः। तस्य भावः इति कुलीन + अण् = कौलीनम्। तस्मात्। हेतौ पञ्चमी। Malli's कुले भवात् = कौलीनात् is wrong. This gives कुलीनः। वृद्धि cannot come here for the rule is "कुलात् खः"। Here कौलीन was in the shape of falling in love with some other so he says मयि अविश्वासिनी मा भूः। Malli

explains the कौलीन in the shape of मरण ; but this does not suit the context. Thus सारोद्धारिणी says "तव वियोगे विषयान्तरमपि मया न सेव्यते किमुत वनितान्तरम्।" In this explanation the significance of the epithet असितनयने is also kept up, for the word implies 'admiration and love for her.'

4. मा भूः—भू + लुङ् स्। Nom. त्वम्। For gram. see Malli and *ante*.

5. किमपि—A compound अव्यय meaning "through some cause". Vallava says "कुतोऽपि हेतोः"। Suddenly affection disperses in separation, cp. "out of sight out of mind."

6. विरहे—कालाधिकरणे ७मी। Or—भावे ७मी as Malli says.

7. आहुः—ब्रू + लट अन्ति। Nom. जनाः understood. See आह— sl. 115, and *ante*.

8. अभोगात्—न भोगः, नञतत्—। Here नञ् expresses प्रसज्य-प्रतिषेध, so it should be emphasised and thus should not enter into a समास। But sometimes प्रसज्यप्रतिषेध नञ् also enters into समास। Witness "अश्रिति', 'अनेकाल्' &c.—in *Panini*. See Malli also. तस्मात्—हेतौ ५मी।

9. प्रेमराशीभवन्ति—प्रेम्नां राशयः, ६तत्—। अप्रेमराशयः प्रेमराशयः भवन्ति इति प्रेमराशि + च्वि + भू + अट अन्ति। Nom. स्नेहाः। Affection intensifies and accumulates and turns into a huge mass of love ( प्रेमराशि ) when out of enjoyment. Hence संयोग is more hailing afte वियोग। Here प्रेमराशीभवन्ति is not a case of गतितत्—the rule is "उपपदमतिङ्" where *Bhattoji* says "अतिङन्तश्चायं समासः"। प्रेमराशी is only placed before भवन्ति by the rule "ते प्राग्धातोः"।

10. Remark—Here the last line is another potent reason why she should not be अविश्वासिनी (about his love); People say affection somehow dies out in separation, but I think the real fact is, it grows stronger in separation. Hence again she must not be अविश्वासनी through कौलीन।

*117. Delivering this message cloud is to return back.*

आश्वास्यैवं प्रथमविरहोदग्रशोकां सखीं ते
शैलादाशु त्रिनयनवृषोत्खातकूटान्निवृत्तः ।
साभिज्ञानप्रहितकुशलैस्तद्वचोभिर्ममापि
प्रातःकुन्दप्रसवशिथिलं जीवितं धारयेथाः ॥ ११७ ॥

Prak—Easy.

Prose.—प्रथमविरहोदग्रशोकां ते सखीम् एवम् आश्वास्य, त्रिनयनवृषोत्खात-कूटात् शैलात् ( कैलासात् इत्यर्थः ) निवृत्तः ( सन् ) त्वं साभिज्ञानप्रहितकुशलैः तद्व-चोभिः प्रातःकुन्दप्रसवशिथिलं ममापि जीवितं धारयेथाः ।

Beng—প্রথমবিরহহেতু তীব্রশোকযুক্তা তোমার সখীকে ( অর্থাৎ আমার প্রিয়াকে ) এইভাবে আশ্বস্ত করিয়া ত্রিলোচনের ( শিবের ) বৃষকর্তৃক উৎপাটিতশৃঙ্গ কৈলাস হইতে সত্বর ফিরিয়া আসিয়া, অভিজ্ঞানসহ কুশলসংবাদপূর্ণ প্রিয়ার বাক্য দ্বারা প্রাতঃকালের কুন্দফুলের ন্যায় মলিন ( বা ক্ষণস্থায়ী ) আমার জীবনকে রক্ষা কর।

Eng—Thus solacing your friend (my darling) who is heavy with intense sorrow in her first bereavement, you soon return from the mountain (Kailasa) whose summit is dug up by Siva's bull; then you save my life frail (loose) like the morning *kunda* flower, by messages conveying her welfare along with some token.

Expl.—Easy.

Sanj.—इत्थं स्वकुशलं सन्दिश्य तत्कुशलसन्देशानयनमिदानीं याचते—आश्वास्येति ॥ 'प्रथमविरहेण उदग्रशोकां' तीव्रदुःखां 'ते सखीम् एवं' पूर्वोक्तरीत्या 'आश्वास्य' प्रबोध्य 'त्रिनयनस्य' त्र्यम्बकस्य 'वृषेण' वृषभेण 'उत्खाता' अवदारिताः 'कूटाः' शिखराणि यस्य, तस्मात् [ "कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः ] "शैलात्' कैलासात् 'आशु निवृत्तः' सन् 'साभिज्ञानं' सलक्षणं यथा तथा 'प्रहितं' प्रेषितं 'कुशलं' येषु तैः 'तस्याः' त्वत्सख्याः 'वचोभिः ममापि प्रातःकुन्दप्रसवम् इव शिथिलं' दुर्बलं जीवितं 'धारयेथाः' स्थापय । [ प्रार्थनायां लिङ् ] ॥ ११७ ॥

## Charcha.

1. आश्वास्य—आ + श्वस + णिच् + ल्यप् । Having consoled. The reading आश्वस्यैवम् is better than आश्वास्यैनाम् ।

2. प्रथम &c.—प्रथमः विरहः, कर्मधा— । उद्गतमग्रमस्य उदग्रः बहु— । उदग्रः शोकः अस्याः, बहु— । प्रथमविरहेण उदग्रशोका, सुप्सुपा— । ताम् । Qual. सखीम् । The reading प्रथमविरहादुग्रशोकाम् is equally good.

3. त्रिनयन &c.—कूट is peak. त्रीणि नयनानि अस्य इति त्रिनयनः बहु— । This is a name of Siva. अत्र क्षुभ्नादित्वात् णत्वप्रतिषेधः । त्रिनयनस्य वृषः, ६तत्— । तेन उत्खातः, ३तत्— । तादृशः कूटः अस्य, बहु— । तस्मात् । Qual. शैलात् । शैल refers to Kailasa. शैलादस्मात् is not a good reading, for इदम् refers to a thing near—cp. "इदमस्तु सन्निकृष्टम्" etc. The reading तस्मादद्रेः is good. Reference to त्रिनयन bodes success.

4. साभिज्ञान् etc.—साभिज्ञानं यथा तथा प्रहितं ( प्रेरितम् ), सुप्सुपा— । तादृशं कुशलं येषु, बहु— । तैः । Qual. तद्वचोभिः (which has करणे ३या) ।

5. प्रातः etc.—प्रसव is flower. कुन्दस्य प्रसवः, ६तत्— । प्रातर्जातः कुन्दप्रसवः, शाकपार्थिवादि तत्— । स इव शिथिलम्, उपमानकर्मधा— । Qual.

जीवितम्। Malli takes शिथिल to mean 'दुर्बल' weak (pale) ; but it may be taken to mean 'frail' ( चणस्थायि ), and this improves the significance of धारण।

6. धारयेथा:—धृ+णिच्+लिङ् ईथास्। Nom. त्वम्। "णिचश्च" इत्यात्मनेपदम् ; for the action will benefit the cloud. Cp. "आत्मनश्चोपकर्त्तुम्" etc.—*ante.* प्रार्थनायाम् लिङ्। This reading is thus superior to 'धारयेदम्'।

7. Voice—...निरहतेन त्वया...धार्य्येत...।

## *118. Trust on cloud.*

कच्चित् सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
नि:शब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्य:
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव ॥ ११८ ॥

Prak—Easy.

Prose—हे सौम्य, इदं मे बन्धुकृत्यं त्वया व्यवसितं कच्चित्। प्रत्यादेशात् ( प्रत्युत्तरं प्राप्य एव ) भवतो धीरतां न कल्पयामि खलु, ( यत: ) याचित: सन् त्वं नि:शब्दोऽपि चातकेभ्य: जलं प्रदिशसि। हि ( यत: ) सतां प्रणयिषु ( याचकेषु ) ईप्सितार्थक्रिया एव प्रत्युक्तम् ( भवति )।

Beng —হে সাধো, তুমি কি বন্ধুর এই কাজ করিবে ? তোমার প্রত্যুত্তর পাইয়া, তোমার ( কার্য্যকরণে ) ধীরতা আমি অনুমান করি না, যেহেতু যাচিত হইলে তুমি উত্তর না দিয়াও চাতককে জল দাও। এই কারণে বলি—যাচকের বাঞ্ছিত কার্য্য করাই সাধুদিগের প্রত্যুত্তর বটে।

Eng.—O good one, do you mean to do this work of mine, your friend? Really I will not infer your gravity (in doing my

mission) on receipt of your reply, for when requested you offer water to *chatakas* even without giving any answer whatsoever; so it is, that doing of the wished for objects of suitors is indeed the reply of the good.

Expl.—See Tran. and Malli.

Sauj.—सम्प्रति मेघस्य प्रार्थनाङ्गीकारं प्रश्नपूर्वकं पृच्छति, कच्चिदिति—हे 'सौम्य' साधो, 'इदं मे बन्धुकृत्यं' बन्धुकार्य्यम् [ 'देवदत्तस्य गुरुकुलम्' इतिवत् प्रयोगः ] व्यवसितं कच्चित् 'करिष्यामि'—इति निश्चितं किम् ? [ "कच्चित् कामप्रवेदने" इत्यमरः । अभिप्रायज्ञापनं ( ? स्वाभिप्रायज्ञापनं ) कामप्रवेदनम् ]। न च ते तूष्णीम्भावात् अनङ्गीकारं शङ्के, यतस्ते स एवोचित इत्याह—'प्रत्यादेशात्' करिष्यामिति प्रतिवचनात् [ "उक्तिः आभाषणं वाक्यमादेशो वचनं वचः" इति शब्दार्णवः ] 'भवतः' तव 'धीरतां' गम्भीरत्वं 'न कल्पयामि' न समर्थये 'खलु'। तर्हि कथमङ्गीकारज्ञानं तत्राह—'याचितः सन् निःशब्दोऽपि' निर्गर्जितोऽपि अप्रतिजानानोऽपि इत्यन्वयः। 'चातकेभ्यः जलं प्रदिशसि' ददासि। युक्तञ्च एतदित्याह—'हि' यस्मात् सतां सत्पुरुषाणां 'प्रणयिषु' याचकेषु विषये 'ईप्सितार्थक्रिया एव' अपेक्षितार्थसम्पादनमेव 'प्रत्युक्तं' प्रतिवचनम् ; क्रिया केवलमुत्तरम् इत्यर्थः। नीचो वदति न कुरुते, न वदति सज्जनः करोत्येव इति भावः ॥ ११८ ॥

## Charcha.

1. कच्चित्—An अव्यय implying कामप्रवेदन i. e. disclosure of one's own wish. That is, Yaksha wishes his task to be carried out by the cloud. In place of अभिप्राय we propose स्वाभिप्राय in Malli, to make the meaning more explicit.

2. व्यवसितम्—वि + अव + सो + क्त कर्मणि = व्यवसितम् to be done. Nom. त्वया।

3. मे बन्धुकृत्यम्—उक्त कर्म of व्यवसितम्। मे is related to बन्धु। Still

बन्धु is compounded with क्षत्य। This is an irregularity. Malli supports it by saying "ईश्वदत्तस्य गुरुकुलम्' इतिवत् प्रयोगः"।

4. प्रत्यादेशात्—Malli rightly renders प्रत्यादेश as प्रतिवचन। तस्मात्। हेतौ ५मी। Or—ल्यपलोपे कर्मणि ५मी। प्रत्यादेशात् = प्रत्यादेशं प्राप्य। Malli's sense is—I do not infer your gravity (silence) of doing work, from your reply; for even without reply you do for others (चातकेभ्यः निःशब्दः अपि जलं दिशसि)। Malli really takes धीरता to mean gravity through silence, and *not* 'gravity' merely as some suppose. For his 'न च तूष्णीम्भावात् अनङ्गीकारं शङ्के' and 'धीरतां गम्भीरत्वम्' suggest this. प्रत्यादेश in the sense of प्रत्याख्यान does not well suit here. प्रत्यादेश was not still then present (known), so cause being absent ५मी will be ungrammatical. हेतु ५मी requires the cause to be present. ४र्थी would have been correct here. Hence प्रत्यादेशात् meaning प्रत्याख्यानाय is queer indeed; so we propose to take प्रत्यादेशात् to mean प्रतिवचनात् हेतोः। The reading प्रत्यादिष्टम् or प्रत्याख्यातम् is decidedly better here. Silence means acceptance; so your silence cannot imply 'प्रत्याख्यान'—this will then be the sense here.

5. प्रणयिषु—प्रणय is याच्ञा। स अस्ति एषाम् इति प्रणयिनः (मत्वर्थे इनिः)। तेषु। विषयाधिकरणे ७मी।

6. ईप्सितार्थ &c.—अर्थ object. ईप्सितः अर्थः, कर्मधा—। तस्य क्रिया (करणम्), ६तत्—। Same case with प्रत्युक्तम्। "विधेयोद्देश्ययोः लिङ्गवचनेषु न तन्त्रता" इति प्रत्युक्तशब्दस्य भिन्नलिङ्गत्वम्।

7. हि—हि here implies हेतु। See Malli. एव implies अवधारण, so don't take हि too as अवधारणे।

8. Voice—त्वं व्यवसितवान्...धीरता मया कल्प्यते...याचितेन सता निःशब्देन जलं प्रदिश्यते...क्रियया...प्रत्युक्तेन भूयते... ।

9. Remark—The last line says—'doing is replying with the good'; cloud was good (being उच्चवंशजात and being his बन्धु ), hence cloud's doing will be replying. Thus too cloud's silence ( and consequent gravity ) means acceptance and it needs no reply. Therefore on the strength of the last line too we support Malli's rendering, if प्रत्यादेशात् at all be the reading.

*119, Yaksha dissolves cloud with benediction.*

एतत् कृत्वा प्रियमनुचितप्रार्थनावर्त्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या ।
इष्टान् देशान् जलद विचर प्रावृषा सम्भृतश्री-
र्माभूदेवं क्षणमपि च ते विद्युता विप्रयोगः ॥ ११८ ॥

इति श्रीमहाकविकालिदासकृतं मेघदूतं समाप्तम् ।

Park.—Easy.

Prose.—हे जलद, सौहार्दात् वा, ( अहं ) विधुर इति वा, मयि अनुक्रोशबुद्ध्या वा, आत्मनः अनुचितप्रार्थनावर्त्तिनः मे प्रियं एतत् ( कार्य्यं ) कृत्वा, प्रावृषा सम्भृतश्रीः ( सन् ) त्वं देशान् विचर । क्षणमपि ते विद्युता एवं विप्रयोगः मा च भूत् ।

Beng.—হে জলদ, বন্ধুত্বহেতু, অথবা আমি বিপদ্‌গ্রস্ত বলিয়া, অথবা আমার প্রতি করুণাহেতু, এবং আমার মনোমুরূপ ( কিন্তু ) প্রকৃতপক্ষে অনুচিত প্রার্থনাকারী আমার প্রিয়কার্য্য করিয়া, বর্ষাগমে শোভান্বিত হইয়া তুমি বিচরণ কর। ক্ষণকালের জন্যও যেন তোমাতে ও এই তোমার প্রিয়া বিদ্যুতে বিয়োগ না ঘটে।

Eng.—O cloud either out of friendship, or as I am in peril in the shape of separation, or out of pitiful feeling for me, do this desired work of mine though my request is unbecoming to you ; and then being of enhanced beauty owing to the advent of rainy season, you roam about. And there may not be your separation from your spouse lightning even for a moment.

Expl.—Easy—see Sanj.

Sanj.—सम्प्रति स्वापराधसमाधानपूर्वकं स्वकार्य्यस्यावश्यं करणं (? अवश्यं करणत्वं) प्रार्थयमानः मेघं विसृजति—एतदिति ॥ हे 'जलद ; सौहार्दात्' सुहृद्भावात् वा [ "हृद्भगसिन्ध्वन्ते पूर्वपदस्य च" इत्युत्तरपदवृद्धिः ] 'विधुरो' वियुक्त इति हेतोः [ "विधुरस्तु प्रविश्लेषे" इत्यमरः ] 'मयि अनुक्रोशबुद्ध्या वा' करुणाबुद्ध्या वा, 'आत्मनः' तव 'अनुचितम्' अननुरूपा या 'प्रार्थना' प्रियां प्रति सन्देशं मे हर इत्येवंरूपा, तत्र 'वर्त्तिनः' निर्बन्धपरस्य मे मम 'एतत्' सन्देशहरणरूपं 'प्रियं कृत्वा' सम्पाद्य 'प्रावृषा' वर्षाभिः 'सम्भृतश्रीः' उपचितशोभः सन् 'इष्टान्' स्वाभिलषितान् 'देशान् विचर' यथेष्टदेशेषु विचर इत्यर्थः [ "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्" इति वचनात् सकर्मकत्वम् ] 'एवं' महत् 'क्षणमपि' स्वल्पकालमपि 'ते' तव 'विद्युता' कलत्रेण इति शेषः। 'विप्रयोगः' विरहो 'मा भूत' मास्तु [ "माङि लुङ्" इत्याशिषि लुङ् ]। [ "अन्ते काव्यस्य नित्यत्वात् कुर्य्यादाशिषमुत्तमाम्। सर्वत्र व्यापृतौ (? व्याप्तये) विद्वान् नायकेच्छानुरूपिणीम् ॥"—इति सारस्वतालङ्कारे दर्शनात् काव्यान्ते नायकेच्छानुरूपोऽयम् आशीर्वादः प्रयुक्त इत्यनुसन्धेयम् ] ॥ ११९ ॥

इति श्रीमहामहोपाध्याय-कोलाचलमल्लिनाथसूरिविरचितायां मेघसन्देशव्याख्यायां सञ्जीवन्यामुत्तरमेघः समाप्तः।

## Notes on Malli.

1. N. B.—(a) Here the reading of Malli is vicious अवश्यं करणम् should be अवश्यकरणीयत्वम् (for then म् of अवश्यम् elides by

"लुम्पेदवश्यम: कृत्ये")। Or—we may say अवश्य' करणत्व'; (b) व्यापार: should be व्यापद्ये।

## Charcha.

1. अनुचित &c.—अनुचिता प्रार्थना, कर्मधा—। तत्र वर्त्तते य स: इति अनुचितप्रार्थना + वृत + णिनि कर्त्तरि साधुकारिणि = अनुचितप्रार्थनावर्त्ती। तस्य। Qual. मे। Yaksha requested the cloud to deliver his message to his beloved and to come back with his darling's news. Thus it is a burden to the cloud, hence in a sense—the प्रार्थना was अनुचित to thecloud. The reading अनुचितप्रार्थनावर्त्मन: does not commend itself. Again the reading प्रियसमुचित' प्रार्थनं चेतस: is good indeed.

2. सौहार्दात्—सुशोभनं हृदयमस्य इति सुहृत् friend. "सुहृत्सुहृर्दौ मित्रामित्रयो:" इति निपातनात् साधु:। तस्य भाव इति सुहृत् + अण् = सौहार्दम् friendship. तस्मात्। हेतौ ५मी। Or हृत् is an independent word meaning mind. "स्वान्त' हृन्मानसं मन:" इत्यमर:। सु सुष्ठु हृदस्य इति सुहृद्। तस्य भाव: इति सौहार्दम्। Remember सुहृदयस्य भाव gives सौहृदम्। All this has been well discussed in our Sakuntala under "Addendum."

3. अनुक्रोश &c.—अनुक्रोश pity तस्य बुद्धि:, ६तत्—। तया। हेतौ ३या।

4. विधुर:—विगता धुरस्य इति विधुरम् misery, बहु—। Here वि + धुर् becomes विधुर by the rule "ऋक्पूरब्धू: पथामानक्षे"। विधुरमस्ति अस्य इति विधुर: (अर्श आदि अच्)। Qual. अहम्। विधुर: = विपद्‌युक्त: i e. वियोगरूपविपद्‌युक्त:। Malli says "विधुर: वियुक्त:"। We have recourse to this dervation, for विधुरम् (neuter) means danger, see Malli; also comp.—"विधुरं प्रत्यवाये स्यात् कष्टविश्लेषयोरपि"।

5. विचर—वि + चर + लोट हि। Nom. त्वम्। वि + चर in this

sense is अकर्मक, cp "हंसं विचरन्तमन्तिके"—*Naishadha.* But it here becomes सकर्मक, for देश is its कर्म। see "देशकालाध्वगन्तव्याः—" quoted by Malli. Also cp—"अचिन्त्यधन्वा विचचार दावम्"—Raghu II.

6. भूत्—भू+लुङ् द। आशिषि लुङ्। "न माङ्योगे" इति अडागमनिषेधः। See also Malli. क्षणमिति "अत्यन्तसंयोगे द्वितीया"।

7. Voice.—सम्भृतश्रिया इष्टाः देशाः विचर्यन्ताम्...विप्रयोगेन मा भावि।

8. Remark—Cloud was सम्भृतश्रीः through प्रावृट्, hence the आशिस् (of not suffering separation) at this stage is befitting indeed (see Malli). And this आशिस् is Yaksha's internal desire. So in fact here ends the poem with this benediction. Some on the ground that the poem should end in union suggests two other slokas (e. g.—तत्सन्देशं जलधरवरो दिव्यवाचाचचक्षे प्राणास्तस्या जनहितरतो रक्षितुं यक्षवध्वाः। प्राप्योदन्तं प्रमुदितमनाः सापि तस्थौ स्वभर्तुः केषां न स्याद्वितथकल्पा प्रार्थनाम्युन्नतेषु ॥ and—श्रुत्वा वार्तां जलदकथितां तां धनेशोऽपि सद्यः शापस्यान्तं सदयहृदयः स विधायास्तकोपः। संयोज्य तौ विगलितशुचौ दम्पती हृष्टचित्तौ भोगानिष्टानभिमतसुखं भोजयामास शश्वत् ॥). But the termination is well-nigh ended and the verse "शापान्तो मे भुजगशयनात्" &c suggests their union in near future; so in fact Yaksha was hopeful of a speedy union and wished cloud's ever-long disunion. Further if these verses are added then the imaginative character of the poem vanishes. Hence these are perhaps spurious. [N B.—we have all along given those verses which we think as authentic]

9. *Metre*—The metre everywhere is मन्दाक्रान्ता, ("मन्दाक्रान्ता अम्बुधिरसनगैर्मो भनौ तौ गुरुश्चेत्"), the scheme being :—

| म | भ | न | त | त | ग ग |
|---|---|---|---|---|---|
| — — — | — ⏑ ⏑ | ⏑ ⏑ ⏑ | — — ⏑ | — — ⏑ | |
| क श्चि त्का | न्तां वि र | ह गु रु | णा स्वा धि | का र प्र | म त्तः |

[ For मकारादिलक्षण—see notes on Metre at the end of our Kirat canto 1].

10. N. B. (a)—As remarked before it is a खण्डकाव्य—cp.—"खण्डकाव्य' भवेत् काव्यस्यैकदेशानुसारि च—यथा मेघदूतादि"—*Sahityadarpana.*

(b) Sanskrit poems and dramas are never tragic. They as a rule contain or end in benedictions (as the भरतवाक्यs) or union or both (as here, in Sakuntala, and in Uttaracharita &c.) Thus Wilson says—"The Hindu plays never offer a calamitious conclusion." And our poet as said before observes it.

पद्यैर्मिलितखण्डभाषायां कालिदासविकाशिनीम् ।
बालानामवबोधाय व्यधात्कुमुदरञ्जनः ॥
यदनुक्तं दुरुक्तं वा मतिमोहसमुद्भवम् ।
सन्तः सन्ततकारुण्यास्तत् सर्वं मर्षयन्तु मे ॥

---

N. B.—As the book has been hurried through the Press, so many printing mistakes have surely escaped me ; the readers should excuse this lapse of mine.

KUMUDRANJAN RAY.

लाल बहादुर शास्त्री राष्ट्रीय प्रशासन अकादमी, पुस्तकालय
*Lal Bahadur Shastri National Academy of Administration Lib*
मसूरी
MUSSOORIE

अवाप्ति सं०
Acc. No.........................

कृपया इस पुस्तक को निम्न लिखित दिनांक या उससे पहले वा
कर दें।

Please return this book on or before the date last stam
below.

| दिनांक Date | उधारकर्ता की संख्या Borrower's No. | दिनांक Date | उधारकर्ता की संख्या Borrower's No. |
|---|---|---|---|
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |
| | | | |

891.22
Kal

अवाप्ति सं० 112521
ACC. No. ~~14617~~

वर्ग सं.
Class No..............

पुस्तक सं.
Book No..............

लेखक
Author..Kalidasa..............

शीर्षक

891.22 LIBRARY 14617
Kal

LAL BAHADUR SHASTRI

National Academy of Administration

MUSSOORIE

*Accession No.* 112521

1. Books are issued for 15 days only but may have to be recalled earlier if urgently required.
2. An over-due charge of 25 Paise per day per volume will be charged.
3. Books may be renewed on request, at the discretion of the Librarian.
4. Periodicals, Rare and Reference books may not be issued and may be consulted only in the Library.
5. Books lost, defaced or injured in any way shall have to be replaced or its double price shall be paid by the borrower.

*Help to keep this book fresh, clean & moving*